श्रीस्वामिलक्ष्मीरामनिधिग्रन्थमालायाः सप्तमं पुष्पम्

चरकतत्त्वप्रदीपिका

श्रीशिवदाससेनकृता चरकसंहिता-व्याख्या

(सूत्रस्थानम्)

प्रियव्रतशर्मणा सत्यदेव दुबे
इत्याख्येन च सम्पादिता

प्रकाशक:

स्वामिलक्ष्मीराम

श्रीस्वामिलक्ष्मीरामनिधिग्रन्थमालायाः सप्तमं पुष्पम्

चरकतत्त्वप्रदीपिका

श्रीशिवदाससेनकृता चरकसंहिता-व्याख्या

(सूत्रस्थानम्)

सम्पादकौ

आचार्यः प्रियव्रतशर्मा

काशीहिन्दूविश्वविद्यालयीय-स्नातकोत्तरायुर्वेदसंस्थानस्य
प्राक्तननिदेशकः

एवं

डा० सत्यदेव दुबे

बी. ए. एम. एस., डी. एवाई. एम., पीएच. डी.
काशीहिन्दूविश्वविद्यालयीयायुर्वेदसंकायस्थद्रव्यगुणविभागे
व्याख्याता

प्रकाशक :

श्रीस्वामिलक्ष्मीराम ट्रस्ट, जयपुर

पुस्तकप्राप्तिस्थानम् :
श्रीस्वामिलक्ष्मीरामचिकित्सालयः
सांगानेरी गेट, जौहरी बाजार
जयपुर-३०२००३

•

संस्करणम्—प्रथमम्
वि. सं. २०४७ (१९९० ई.)

मूल्यम्—१२५ रूप्यकाणि

•

मुद्रकः
आनन्द कानन प्रेस
डी० १४/६५ टेढ़ीनीम
वाराणसी
फोन : ६२०५०

श्रीस्वामिलक्ष्मीराममहाभागाः



पीयूषपाणिभिषजां शिरोभूषणतां गताः ।
श्रीलक्ष्मीरामचरणाः पुण्यश्लोकाः जयन्ति ते ॥

प्रकाशकीयं निवेदनम्

यत्प्रभापटलोद्भासि भासतेऽद्यापि भारतम् ।
आयुर्वेदात्मकं ज्योतिः शाश्वतं नः प्रकाशताम् ॥

—स्वामिश्रीलक्ष्मीरामपादाः

जयपुरवास्तव्यैः श्रीदादूपथपरिव्राजकैः तदानीन्तनभारतविख्यात-चिकित्सकचूडामणिभिः पीयूषपाणि-आयुर्वेदमार्त्तण्ड-प्राणाचार्यादिविविधोपाधिविभूषितैः श्रीलक्ष्मीरामस्वामिमहाभागैः १८८१ विक्रमसंवत्सरे विजयदशमीतिथौ (१९३२ ईसवीयवत्सरे अक्टूबरमासस्य सप्तदशतारिकायां) "श्रीस्वामिलक्ष्मीरामट्रस्ट" नाम्ना प्रन्यास(ट्रस्ट)मेकं नियम्य दशसहस्राधिकलक्षैकमुद्रासम्मितं राजकीयसुरक्षितधनं तात्कालिकपादोनलक्षद्वयमुद्रामूल्याङ्कितं गृहारामादिकं च प्रन्यासाधीनं विहितम् ।

श्रीस्वामिमहाभागानां प्रन्यासोल्लिखितोद्देश्यानुसारं श्रीधन्वन्तर्यौषधालयातुरालययोः, श्रीदादूमहाविद्यालयस्य संरक्षणे निर्धनसंस्कृतविद्यार्थिनां वृत्त्यादिना साहाय्यसम्पादने, श्रीदादूसम्प्रदायस्य सत्साहित्यग्रन्थानामायुर्वेदग्रन्थानां प्रकाशने चेत्यादिष्वनेकविधधर्मकार्येषु विद्योन्नतिकार्येषु च प्रन्यासद्वारा मूलधनादुपलब्धायराशिर्व्ययीक्रियते ।

आयुर्वेदचिकित्साद्वारैव पुण्यश्लोकैः श्रीमद्भिः स्वामिमहाभागैः सर्वं धनमुपार्जितमित्यायुर्वेदोन्नतिरेव विशिष्याभीष्टाऽऽसीत्तेषाम् । प्रन्यासाधिकृते धने विंशतिसहस्रमुद्राराशिः श्रीस्वामिभिरेतदुद्देश्येनैव पृथक् नियमितः । निधेरस्य सूदद्वारा प्राप्तद्रव्येणायुर्वेदसम्बन्धिनवीनपुस्तकनिर्मातृभ्यो विद्वद्भ्यः पुरस्काररूपेण प्रोत्साहनं प्रदीयते, प्राचीनार्वाचीनानां चामुद्रितग्रन्थानां प्रकाशनमप्यनुष्ठीयते । तदनेन द्रव्येण प्रन्यासद्वारा निम्नाङ्कितग्रन्था अद्यावधि प्राकाश्यमानीताः—

(१) सुश्रुतसंहितायाः सूत्रस्थानम्—भानुमतीव्याख्यासहितम् ।

(२) अष्टाङ्गहृदयस्योत्तरतन्त्रम्—शिवदाससेनकृतव्याख्योपेतम् ।

(३) प्रसूतितन्त्रम्—श्रीदामोदरगौडविरचितम् ।

(४) हिन्दी प्रसूतितन्त्रम्—श्रीपटवर्धनप्रणीतम् ।

(५) आयुर्वेदीयपदार्थविज्ञानम्—श्रीबलवन्तशर्मरचितम् ।

(६) चरकसंहितायाः चरकोपस्कारव्याख्यानम्—श्रीयोगीन्द्रनाथसेन-महाभागैर्विरचितम् ।

इदानीं चरकसंहितायाः सूत्रस्थानं श्रीशिवदाससेनकृत-चरकतत्त्व-प्रदीपिकाव्याख्यासंवलितं विदुषां पुरः प्रस्तूयते। अप्रकाशितं खलु व्याख्यानमिदमद्यावधि यद्यपि त्रयाणामन्येषां ग्रन्थानां (अष्टाङ्गहृदय-चक्रदत्त-द्रव्यगुणसङ्ग्रहाणां) शिवदाससेनकृतं व्याख्यानं पुरैव प्रकाशितं समुपलभ्यते ।

वाराणसीवास्तव्यैः विद्वद्वरेण्यैः प्रख्यातायुर्वेदग्रन्थप्रणेतृभिः काशी-हिन्दूविश्वविद्यालये स्नातकोत्तरायुर्वेदसंस्थानस्य निदेशकपदमलङ्कृत-वद्भिः श्रीप्रियव्रतशर्ममहाभागैः महता कौशलेन सम्पादितमिदं ग्रन्थरत्नम् । तदर्थं ते परमधन्यवादार्हाः । आचार्यश्रीप्रियव्रतशर्ममहाभागानां शिष्यवरे-ण्येन डा० सत्यदेव दुबेमहोदयेन ग्रन्थस्यास्य सम्पादनकर्मणि महान् परि-श्रमोऽनुष्ठितः, तस्मादयमपि धन्यवादार्हः ।

चरकसंहितायाः चक्रपाणिदत्तकृता व्याख्या, श्रीयोगीन्द्रनाथविरचितं चरकोपस्कारव्याख्यानं, श्रीगङ्गाधरकविराजविरचितं जल्पकल्पतरु-व्याख्यानं च विदुषां मध्ये समाद्रियन्ते। तदिदानीमियं चरकसंहितायाः शिवदाससेनकृता चरकतत्त्वप्रदीपिका व्याख्या सूत्रस्थानपर्यन्ता वैद्य-जगतः समक्षमुपस्थाप्यते। आयुर्वेदपारावारीणा विद्वांसः ग्रन्थमिमं मान-पुरस्सरमङ्गीकुर्युरिति बहुतरमाशास्यते विश्वस्यते च यदेवंविधानां प्राची-नानाममुद्रितग्रन्थानां परिचयं प्रदाय ते प्रन्यासस्य सदस्याननुगृह्णीयुः येन प्रन्यासोऽयं ग्रन्थानेवंविधान् प्रकाश्य आयुर्वेदसेवाद्वारा श्रीलक्ष्मीराम-स्वामिमहाभागानां सदुद्देश्यपरिपूर्त्तये प्रभवेदिति ।

विदुषामनुचरः
भगवानसहायः त्रिवेदी
मन्त्री,
श्रीस्वामिलक्ष्मीरामट्रस्ट संस्था,
जयपुरम्

अक्षयतृतीया,
सं० २०४७

उपोद्घातः

आयुर्वेदे तिस्रः संहिताश्चरक-सुश्रुत-वाग्भटविरचिताः गौरवाद् बृहत्त्रयीति नाम्ना प्रसिद्धाः सन्ति। तासामपि चरकसंहिता मुख्यतः कायचिकित्सापरायणा गुणोच्चयत्वात् सर्वा अतिशेते। अत एव बहवो विद्वांसश्चरकसंहिताया व्याख्यां विदधुस्तद्व्याजेन चायुर्वेदसिद्धान्तानां क्रियाक्रमाणाञ्च विवेचनं स्वमतोल्लेखपुरस्सरं चक्रुः। मन्ये एतेषां व्याख्याकाराणामग्रणीः भट्टारहरिचन्द्रो बभूव यत्सरणिमनुसृत्य परवर्त्तिनश्चक्रादयो व्याख्याप्रपञ्चं वितेनिरे। शिवदाससेन एषामन्यतमस्तच्छृंखलायामन्त्यश्चासीत् यो हि मध्याधुनिककालयोः सन्धिस्थलमध्यास्ते।

परिचयः कालश्च

शिवदाससेनः मालञ्चिकाग्रामवास्तव्यस्य गौडावनीपालभिषग्वरस्यानन्तसेनस्य तनय आसीदिति ग्रन्थान्ते निर्दिष्टश्लोकाज्ज्ञायते[१]। मालञ्चिकाग्रामो वङ्गप्रदेशे राजशाहीमण्डलान्तःपातीति विज्ञापितं विद्वद्भिः[२]। तस्य वंशपरम्परा तेनैव सूचिताऽधो निबध्यते—

साहिसेनः
|
काकुत्स्थसेनः
|
लक्ष्मीधरसेनः
|
उद्धरणसेनः
|
अनन्तसेनः
|
शिवदाससेनः

---

१. मालञ्चिकाग्रामनिवासभूमेर्गौडावनीपालभिषग्वरस्य।
अनन्तसेनस्य सुतो व्यधत्त टीकामिमां श्रीशिवदाससेनः॥
(अष्टाङ्गहृदयम्, चक्रदत्तः)

२. ज्योतिषचन्द्रसरस्वती—उपोद्घातः, अष्टाङ्गहृदयसंहिता (उत्तरतन्त्रम्), जयपुर, १९४२

यादवजी त्रिकमजी—उपोद्घातः, चरकसंहिता, निर्णयसागर, बम्बई, १९४१ (तृ. सं.)

आद्यपुरुषः साहिसेनः शिखरेश्वरस्य सभायां वाणीविलासं कविसार्वभौमं विजित्य कविराजपदं प्रभूतञ्च यशो लेभे[१]। शिखरेश्वरोऽसौ वङ्गदेशीय-मानभूममण्डलान्तर्गतस्य शिखरनाम्नो जनपदस्य शासकः यो हि फिरोजशाहतुगलकनाम्ना राज्ञा १३६० ईस्वीवर्षस्यान्त्ये मासे आक्रान्त इत्यनुमीयते।

शिवदाससेनस्य माता भैरवी पिता चानन्तसेन इति ज्ञायते तद् वचनैः[२]। अनन्तसेनः आयुर्वेदवैदुष्येण सार्धं न्यायवैशेषिकसांख्यादिदर्शनशास्त्राणामपि पारगत्वमधिजगाम, शिवदासश्च तस्मात् पितुरेव विद्यागुरोः सर्वाणि तन्त्राण्यधीत्य पाण्डित्यमवाप।[३]

शिवदाससेनस्य कालविषये तद्ग्रन्थोपसंहारपद्यमेकं सहायतां याति।

---

१. आसीत् सभायां शिखरेश्वरस्य लब्धप्रतिष्ठः किल साहिसेनः।
वाणीविलासं कविसार्वभौमं विजित्य यः प्राप यशो दुरापम्॥
काकुत्स्थसेनस्तनयस्ततोऽभूत्तस्यापि लक्ष्मीधरसेननामा।
तस्मादभूदुद्धरणस्तनूजस्तस्याप्यनन्तस्तनयोऽथ जज्ञे॥
(अ० हृ०, च० द०, द्र० गु०)

२. शिवदासः पदाम्भोजं पित्रोर्भैरव्यनन्तयोः।
स्थानमुत्तरतन्त्राख्यं व्याचिख्यासुः प्रणम्यति॥
(अ० हृ०)

महदादिनिकायोऽयं यस्याः प्रादुरभूत् किल।
सतीं गुणमयीं भक्त्यां 'भैरवीं जननीं भजे'॥
(द्र० गु०)

'जनयित्रीमहं भजे' इति तत्त्वप्रदीपिकापाठः।

३. काणादसांख्यायुर्वेदतन्त्राणां पारदृश्वनः।
तातस्यानन्तसेनस्य वन्दे चरणपङ्कजम्॥
(च० सं०, द्र० गु०)

तातादधीत्य तन्त्राणि शिवदासेन धीमता।
क्रियते चरकस्येयं टीका तत्त्वप्रदीपिका॥
गुरुणाऽनन्तसेनेन यद् व्याख्यानं प्रदर्शितम्।
ततो मे स्खलनं मा भूद् वाग्देवि! त्वदनुग्रहात्॥
(च० सं०)

तस्य पिता अनन्तसेनो गौडनरपतेः बार्बकशाह[१] इत्याख्यस्यान्तरङ्गवैद्यश्छत्रप्रदानेन च तेन सम्मानित आसीत् । एष बार्बकशाहः १४५९--१४७४ खीष्टाब्दावधौ वङ्गप्रदेशं शशासेति वङ्गदेशीयेतिहासे प्रसिद्धम्[२] । ततः शिवदाससेनः स्वपितुः कनीयान् समकालीनः सन् पञ्चदशशताब्द्या अन्ते बभूवेति सिध्यति । अष्टाङ्गहृदयोत्तरतन्त्रस्य तदीयव्याख्याया मातृका केनचित् जगन्नाथशर्मणा १४४८ शकाब्दे (१५२६ खीष्टाब्दे) लिखितेत्यपि[३] कालमिममेव द्रढयति ।

कृतयः

शिवदाससेनस्य तिस्रः कृतयः प्रकाशिताः सन्ति—अष्टाङ्गहृदयोत्तरतन्त्रस्य तत्त्वबोधाख्या व्याख्या[४], चक्रपाणिदत्तकृतचिकित्सासङ्ग्रहस्य (चक्रदत्तस्य) तत्त्वचन्द्रिकाव्याख्या[५], चक्रपाणिदत्तकृतद्रव्यगुणसङ्ग्रहस्य व्याख्या च[६] । चतुर्थी चरकसंहितायास्तत्त्वप्रदीपिकाव्याख्या यद्यपि तदीयान्यकृतिषु निर्दिष्टा[७] परं नाद्यावधि प्रकाशपथमानीतासीत् ।

'आसीत् सभायाम्' इत्यादिपद्यैः प्रस्तुता वंशावली सर्वासु कृतिषु समानरूपेण दृश्यते (चरकतत्त्वप्रदीपिकायाः अन्त्यभागस्य खण्डितत्वान्नैतन्निश्चयेन वक्तुं शक्यते परमनुमीयत एव तथाविधया) । मालञ्चिकाग्रामोल्लेखि पद्यं चक्रदत्तव्याख्यायां बार्बकशाहसङ्केतकं पद्यं च द्रव्यगुणसङ्ग्रहव्याख्यायामुपलभ्यते, अष्टाङ्गहृदयोत्तरतन्त्रव्याख्याया-

---

१. ज्योतिषचन्द्रसेनमहाशयेन स्वसंपादितस्याष्टाङ्गहृदयोत्तरतन्त्रस्य मातृकायां 'बार्बकशाह' इति सुस्पष्टं निर्धारितं येन शिवदासस्य कालनिर्धारणं सुशकं जातम् । इतः पूर्वन्तु द्रव्यगुणे 'अर्वाक् साह' इति पाठान्न किमपि लब्धमासीत् ।

२. J. N. Sarkar (ed.) : the History of Bengal, Vol. II, Dacca, 1948, PP. 132-36

३. अष्टाङ्गहृदयम्, तदेव, पृ. ३७५

४. श्रीस्वामिलक्ष्मीराम ट्रस्ट, जयपुर, १९४२ (प्र० सं०)

५. आशुबोध-नित्यबोध, कलकत्ता, १९३३ (पञ्चम सं०)

६. जीवानन्द विद्यासागर, कलकत्ता, १८९७ (द्वि० सं०)

७. चक्रदत्तव्याख्या—ज्वर. २५७; स्नेह. १,७; वमन १६; द्रव्यगुणव्याख्या—पानीय. ३७; कृतान्न. ९. द्रव्यगुणव्याख्यायां नामग्राहं विना रस–विपाक--वीर्यादिप्रसङ्गेषु तत्त्वप्रदीपिका बहुश उद्धृता ।

ञ्चोभयोः समावेश इति कृत्वा एतस्याः पूर्वनिर्दिष्टव्याख्याद्वयापेक्षया परवर्त्तित्वं प्रतीयते परन्तु चरकतत्त्वप्रदीपिकायाः अत्र निर्देशाभावादुपर्युक्तव्याख्याद्वये च तत्सत्त्वादस्याः न केवलं व्याख्याद्वयापेक्षया अपि तु चरकतत्त्वप्रदीपिकापेक्षयाऽपि पूर्ववर्त्तित्वं सूच्यते। एतन्निकषकषणात् शिवदाससेनस्य कृतीनां पौर्वापर्यक्रम इत्थं पर्यवस्यति—

१. अष्टाङ्गहृदयव्याख्या
२. चरकतत्त्वप्रदीपिका
३. चक्रदत्तव्याख्या
४. द्रव्यगुणसङ्ग्रहव्याख्या

शिवदासस्य वैदुष्यम्

शिवदासः स्वपितुः सकाशादायुर्वेदतन्त्राणि न्यायसांख्यादिदर्शनशास्त्राणि चाधीतवानिति ज्ञायते। चिकित्साकर्मणि च कौशलं गौडावनीपालान्तरङ्गवैद्यस्यानन्तसेनस्य शिष्यत्वेन लब्धवानित्यप्यनुमीयते। इत्थं शास्त्रनिष्णातः कर्मदक्षश्च शिवदासः पितुः परिगृहीतं वैदुष्यं चिकित्साकर्मानुभवञ्च स्वव्याख्यासु कौशलेन निबद्धवान्। विशेषतस्तु चरकतत्त्वप्रदीपिकायां सिद्धान्तवैदुष्यं स्थाने स्थाने स्वपितृचरणमतोल्लेखपुरःसरं चक्रदत्तव्याख्यायाञ्च चिकित्साकर्मानुभववर्णनं द्रष्टव्यम्।

शिवदासकाले चक्रपाणिदत्तः, अरुणदत्तः निश्चलकरश्चैते त्रयो व्याख्याकाराः आयुर्वेदशास्त्रे प्रसिद्धा आसन्। शिवदासः सर्वानेव त्रीन् क्रमशः चरक-अष्टाङ्गहृदय-चक्रदत्तव्याख्यासु प्रायशोऽनुसरन् स्थलविशेषेषु तेषां मतानि प्रतिक्षिप्य स्वमतं स्थापितवान्[1]। अतिविस्तरञ्च परिहृत्य संक्षेपेण गूढार्थानां तात्पर्यं प्रकाशितवान् येन नव्यानां तरुणवैद्यानामिमा व्याख्या आनूकूल्यमाप्नुयुः युगानुरूपाश्च प्रसिद्धिं लभेरन्[2]।

चरकतत्त्वप्रदीपिकाया वैशिष्ट्यम्

तत्त्वप्रदीपिका यद्यप्यायुर्वेददीपिकायाश्चक्रपाणिदत्तकृतचरकसंहिता-

---

१. विस्तरोक्तञ्च संक्षिप्य प्रतिक्षिप्य च दुर्वचः।
व्याख्यान्तरञ्च निक्षिप्य टीकेयं क्रियते मया॥
(चक्रदत्तव्याख्या)

२. कृतिर्ममैषाऽखिलतन्त्रतत्त्वविच्चिकित्सकान्नोपकरोति यद्यपि।
तथाऽपि नव्यान् भिषगल्पदृश्वनः परः सहस्रराननुकूलयिष्यति॥
(द्रव्यगुणव्याख्या)

व्याख्याया प्रायशोऽनुगामिनी तथाप्यनेकस्थलेषु तस्या वैशिष्ट्यं लक्ष्यते। अधस्तनानि कानिचिदुदाहरणानि प्रस्तूयन्तेऽत्र—

१. 'त्रिसूत्रम्' इतिपदव्याख्यानावसरे (१.२४) चक्रः 'त्रीणि हेत्वादीनि सूत्र्यन्ते यस्मिन् येन वा तत् त्रिसूत्रम्' इत्येतावन्मात्रमेव कथितवान्, शिवदासेन तु समासव्यासाभिधानयुक्त्या पौनरुक्त्यपरिहारः कृतः—'हेतुलिङ्गौषधज्ञानं' इति व्यासाभिधानं, 'त्रिसूत्रम्' इति तु समासाभिधानमिति नात्र दोषः। अत एव 'त्रीणि हेत्वादीनि सूत्र्यन्ते समासेनोच्यन्तेऽनेनेति त्रिसूत्रम्' इति निर्वचनं कृतम्। 'अन्ये तु—सूत्र्यते सूच्यते वाऽर्थोऽनेनेति सूत्रं वाक्यं, पूर्वपक्षसिद्धान्ताधिकारभेदेन त्रिविधं सूत्रं यस्मिंस्तत् त्रिसूत्रम्' तथा 'अपरे तु—यथा ब्रह्मा त्रिसूत्रं बुबुधे यथा चेन्द्रो हेतुलिङ्गौषधज्ञानं प्रोवाच, तथैव भरद्वाजोऽपि त्रिस्कन्धं तं बुबुधे इत्येवंवचनादायुर्वेदस्याविप्लुत आगम उपदिश्यते तेन नैतेषु पौनरुक्त्यमिति ब्रुवते' इत्यपि योजितम्। इत्थमेव तत्रैव शाश्वतमितिपदस्य नित्यमित्यर्थः कृतश्चक्रेण, शिवदासेन तु तदतिरिक्तं ब्रह्मदेवारुणदत्तयोर्मतमुल्लिख्य शाश्वतं शाश्वतलोकप्राप्तिहेतुत्वेन मोक्षहेतुत्वेन वा निर्दिष्टम्।

२. सामान्यविशेषविवरणप्रसङ्गे (१.४४) 'केचित्' इत्यनेन चक्रस्य मतमुद्धृत्य तत्र स्वीयाऽस्वीकृतिः प्रकटिता। चक्रेण भावपदस्य 'भवन्ति सत्तामनुभवन्तीति भावाः द्रव्यगुणकर्माणि, न तु भवन्ति उत्पद्यन्त इति भावाः' इति निरुक्तिर्विहिता यतस्तथा सति पृथिव्यादिपरमाणूनां नित्यानां सामान्यस्य पार्थिवद्व्यणुकादिवृद्धं कार्यमसंगृहीतं स्यादिति। अत्र शिवदासः समाधत्ते—'वस्तुतस्तु 'भवन्ति उत्पद्यन्ते' इत्युक्तेऽपि भावपदस्योत्पत्तिमदितिपदार्थविभावकोपाधिमति तात्पर्यं तेन नित्यानित्यरूपपृथिवीग्रहणान्न प्रागुक्तदोष इत्यवधेयम् इति'। पुनश्च सर्वत्र प्रभाव एव वृद्धिकारणतया कल्पतां किं सामान्येन इति प्रश्नं समादधता शिवदासेनोक्तं—'द्रव्यादित्रयं क्वचित् सामान्यमवलम्ब्य, क्वचिद् विशेषमवलम्ब्य, क्वचिच्च प्रभावमवलम्ब्य कार्यविशेषं जनयति, अतो यत्रासमानेभ्योऽपि वृद्धिर्दृश्यते तत्रैव गत्यन्तराभावात् प्रभावकल्पना प्रामाणिकी विकृतिविषमसमवायान्यथानुपपत्तिकल्पनीयत्वात् प्रभावस्येति'।

३. 'सत्त्वमात्मा शरीरञ्च' (१.४६-४७) इतिप्रसङ्गे चक्रेण 'पुमान्' इति पदं न व्याकृतं न वा पुरुषसम्बन्धिनी काचिच्चर्चा विहिता। शिवदासस्तु चरकसुश्रुतयोः मतमुद्धृत्य तत्रापातविरोधञ्च समाधाय सुश्रुतोक्त-

पुरुषलक्षणे (पञ्चमहाभूतशरीरिसमवायः पुरुष इति) 'समवाय' इतिपदं संयोगस्य प्राधान्यं व्यनक्तीति कथितवान् । संयोग एव महाभूतशरीरिणोः प्रधानं, न केवलानि पञ्चमहाभूतानि न वा केवला चिच्छक्तिरिति, अत-एवामुमेव सत्वादिमेलकं पुरुषं संयोगपुरुषशब्देन शारीरे निर्दिशति चरकः। अपरे तु सुश्रुते समवायपदं समुदायवचनमाहुः। स पुमानिति स सत्त्वा-दिमेलकः पुमानिति भण्यते ।

४. गुणलक्षणप्रसङ्गे (१.५१) चक्रस्य मतं प्रतिक्षिप्तं शिवदासेन यथा 'चक्रस्तु कारणमितिपदेन समवायस्यापि व्यावृत्तिरित्याह, तन्न, यतः समवायीत्युक्ते समवायेऽतिप्रसक्तिरेव नास्ति।' पुनः 'अथ समवायीति-पदेन समवायाधारता समवायाधेयता च युगपद् विवक्षिता, तदा कारण-पदवैयर्थ्यमिति ध्येयं, तस्मात् कारणपदेन कारणजातीयविवक्षया सामा-न्यादीनां च व्युदासः सामान्यादौ जातेरभावात्'इत्युक्तम्'। अन्ते 'कर्म-भिन्नत्वे सति मात्राधारत्वं गुणत्वम्' इति संक्षेपतो लक्षणमपि निर्दिष्टम्।

५. दोषसङ्ग्रहप्रसङ्गे (१.५७) चक्रेण दोषलक्षणं निर्दिश्य रक्तस्य दोषत्वं परिहृतम्। शिवदासेन तु सविस्तरं विजयरक्षितादीनां मतमुद्-धृत्य दोषाणां निमित्तकारणत्वं रुद्रमिश्राणां मते च तत्समवायित्वं निर्दिष्टं यथा हि—'दोषाणां समवायित्वं सिद्धम्। तथा दोषाणां निमित्तत्वे प्रमाण-मपि न पश्यामः, तथा सुश्रुतविरोधोऽपीत्याहुः'। एतदुपसंहारादत्रैव शिव-दासस्य स्वीकृतिरिति प्रत्येतव्यम्।

६. पञ्चमाध्यायोपक्रमे शास्त्रप्रयोजनमातुरव्याधिहरणं स्वस्थस्य स्वास्थ्यरक्षणञ्च निर्दिष्टं चक्रेण। शिवदासस्तु तदेव नैयायिकरीत्या व्याधि-प्रध्वंसरूपं व्याधिप्रागभावरूपञ्च ब्रूते। आतुरव्याधिहरणेन यदारोग्यं तत्प्रध्वंसाभावरूपं, रोगोत्पादकसामग्रीविघटनद्वारा यद् रोगाजननं तत्प्राग-भावरूपमिति।

७. 'तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते' (५.१३) इत्यस्य व्याख्याने शिवदासः चक्रस्य 'श्लोकपूर्वार्धेन स्वास्थ्यपोषकहेतुरुक्तः, उत्त-रार्धेन तु स्वास्थ्यविघातकहेतुपरिहारोऽभिधीयते' इति पक्षं समर्थयति भट्टारहरिचन्द्रादीनां मतञ्च प्रतिक्षिपति यथा—''अन्ये त्वाहुः पूर्वार्धमाहार-विहारार्थं, उत्तरार्धन्तु वमनाद्यर्थं, तन्न, नित्यमित्युक्तेः, न हि वमनादिकं नित्यमुपयुज्यते धातुक्षयादिदोषात्। भट्टारहरिचन्द्रस्तु अनुवृत्त्यनुत्पत्त्यो-

रर्थान्तरत्वादपीनरुक्त्यमित्याह, तदपि न मनोरमं, स्वास्थ्यानुवृत्तिविकारानुत्पत्त्योर्विकारप्रागभावपरिपालनरूपत्वेनानर्थान्तरत्वादिति" ।

८. रसाञ्जनप्रसङ्गे (५.१५) चक्रो न किञ्चिल्लिखति, परञ्च शिवदासेन तस्य द्वैविध्यं रुद्रमिश्रारुणदत्तयोर्मतमनुसृत्यात्र रसाञ्जनं दार्वीकाथसमुद्भवमेव व्यवहर्तव्यमित्युक्तम् । द्वैविध्यन्तु मन्ये सुश्रुतव्याख्यायां (सू० ३८.४१) डल्हणमतमवलोक्य निर्दिष्टम् ।

९. युक्तिप्रसङ्गे (११.२५) 'बहु' इत्यस्य 'प्रभूत' इत्यर्थः कृतश्चक्रेण 'कारण' इत्यस्य विशेषणं मत्वा, शिवदासेन तु तत् क्रियाविशेषणरूपेण पठित्वा 'भूयो भूयः' इति व्याख्यानं कृतम् । शान्तरक्षितकमलशीलयोर्मतमुद्धृत्य यत् शास्त्रार्थानुष्ठानं विहितं चक्रेण तन्मन्ये विस्तरभयात् परिहृतं शिवदासेन ।

१०. उपस्तम्भत्रयप्रसङ्गे (११.३५) ब्रह्मचर्यस्य चक्रव्याख्यामुद्धृत्य 'अन्ये' इति कृत्वा वाग्भटपाठं (अब्रह्मचर्य)मित्यनुसृत्यारुणदत्तस्य व्याख्यानं तत्पाठस्य साधुत्वञ्च प्रतिपादितम् ।

११. स्नेहप्रसङ्गे (१३.१३) चतुर्णां स्नेहानां सर्पिरुत्तमं प्रोक्तं संस्कारस्यानुवर्तनात् । अयमभिप्रायः—तैलादयो हि द्रव्यान्तरसंस्कृताः सन्तः स्वगुणं विहायैव संस्कारकद्रव्यगुणान् वहन्ति, सर्पिषि तु प्राकृतगुणं संस्कारगुणोऽनुवर्तते सहैव । परं यदि भेषजैः सर्पिषः प्राकृतगुणोपमर्दो न स्यात्तदा वातकफामय-सङ्ग्रहग्रहण्यामवातादौ मरिचादिकाञ्जिकषट्पलादिघृतविधानं निरर्थकं स्यात् संस्कारकमरिचादिद्रव्यैः सर्पिःशैत्यानभिभवेन वातकफवृद्धेः । तस्मादुभयोरपि (तैलसर्पिषोः) द्रव्यान्तरसंयोगात् प्राकृतगुणहानिः परमार्थतोऽग्नेर्विशेषेण पुनस्तैले इति शिवदासमतम् ।

१२. 'अमलभास्करे' (१३.१९) इति दुर्दिनव्युदासार्थमिति शिवदासो व्याख्यातवान् 'अन्ये तु मध्याह्नग्रहणमित्याहुः' इति कृत्वा चक्रस्य च मतमुद्धृतवान् । अग्रे भट्टारहरिचन्द्रस्यापि मतं प्रतिक्षिप्तं यथा—'हरिचन्द्रस्तु 'उष्णे चापि' इत्यत्र अपिचशब्दाभ्यां वातकफप्रकृति-पित्तकफप्रकृत्यादीनां ग्रहणमित्यादि बहु व्याख्यातवान् तत्तु ग्रन्थविस्तरभयादमनोहरत्वाच्च न लिखितम् ।' इति । चक्रपाणिनाऽपि भट्टारमतं नोद्धृतम् ।

१३. मृदुक्रूरकोष्ठलक्षणप्रसङ्गे (१३.६५) मध्यकोष्ठोऽपि पञ्चरात्रेण स्निह्यन् तन्त्रान्तरप्रामाण्यान्निर्दिष्टः शिवदासेन । अपरञ्च सप्तरात्रादूर्ध्व-

मिति स्नेहनं युक्तितः करणीयमित्युक्तं दृढबल-सुश्रुतवचनसमाधानं विधाय। वृद्धवैद्यक्रियाक्रमोऽप्येतत् समर्थयति।

१४ शिवदासस्त्वोजोवर्णनप्रसङ्गे (१७.७३-७४) चक्रमतमनुसरन्नपि विशेषेण शुक्र(विशेष)मोजो वदतां (डल्हणप्रभृतीनां) मतमाक्षिप्तवान् यथा 'अन्ये तु शुक्रविशेषमोज आहुः, तन्न मनोरमम्' इति।

१५. 'न ते पृथक् पित्तकफानिलेभ्यः' (१९.६) इति दोषव्याध्योरपार्थक्यं न वर्णितं चक्रेण, शिवदासेन तु तयोरुपादानोपादेयभावादनर्थान्तरत्वमूर्णापटयोरिव साधितम्, यथा—'धातुवैषम्यनिमित्तजा विकाराः पित्तकफानिलेभ्यो न भिन्नाः नार्थान्तराणि उपादानोपादेयभावादिति भावः। ययोर्हि अर्थान्तरत्वं न तयोरुपादानोपादेयभावः यथा घटपटयोः। उपादानोपादेयभावश्च दोषरोगयोर्वर्त्तते, अतो नार्थान्तरत्वं यथा ऊर्णापटयोः। एतेन यथा तन्तव एव तेन संस्थानविशेषेण परिणताः पटः, न तन्तुभ्योऽर्थान्तरं पटः, तथा दोषा एव तेन तेनावस्थाविशेषेण परिणता व्याधयो न दोषेभ्योऽर्थान्तरं व्याधिरित्यर्थः' इति।

१६. 'ज्ञानपूर्वं समाचरेत्' (२०.२०) इति व्याख्यानप्रसङ्गे शिवदासेन निदानचिकित्साक्रमः स्वरूपतया दर्शितः यथा 'रोगपरीक्षानन्तरमिदमौषधं यौगिकं भवति न वेत्यौषधपरीक्षा, तदनन्तरं वृद्धवैद्यक्रियमाणकर्मदर्शनं, (ततः) चिकित्सिताचरणम्' इति क्रमो दर्शितः इति। अत्र परम्परागतचिकित्साक्रमज्ञानस्य महत्वं प्रतिपादितं, चक्रेण त्विदं परित्यक्तमेव।

१७. 'क्षुत्पिपासासहोदये' (२२.३५) इत्यस्य सुश्रुतमनुसरता चक्रेण 'क्षुत्पिपासयोरसहः पीडाकरत्वेनोदयः' इति व्याख्यानं कृतं, शिवदासेन तु वाग्भटानुसारं 'क्षुत्पिपासयोर्युगपदुदय' इत्यर्थोऽपि प्रमाणसिद्ध एवेति कथितम्।

१८. आरग्वधीये (३.३) 'करवीरकश्चेति काश्मीरकाः पठन्ति, करवीरकत्वगिति गौडीयाः' इति शिवदासः सूचयति, चक्रेण तु न किञ्चिल्लिखितम्। अन्यत्रापि (५.५०) 'ऋजु त्रिकोषमच्छिद्रमिति काश्मीरसम्मतः पाठः' इति कथितम्।

अनन्तसेनस्य विशिष्टवैदुष्यम्

यथोपक्रमपद्ये निवेदितं शिवदासेन स्वपितुरनन्तसेनस्य व्याख्यानानुसारमेव तत्त्वप्रदीपिका टीका व्यधायि। यत्र तत्र 'अस्मत्पितृचरणास्तु'

इति कृत्वा तस्य मतमपि निर्दिष्टम्। आयुर्वेदसार्वभौमस्यानन्तसेनस्य न कापि स्वतन्त्रा कृतिरुपलभ्यते, अतोऽस्यां टीकायामेव समाहितस्य तद्-विचारनिवहस्यावलोकनेन तन्मतस्य विशिष्टवैदुष्यस्य च कश्चिदाभासो भवेदिति मत्वाऽत्र तानि स्थलानि प्रस्तूयन्ते—

१. समवायप्रसङ्गे (.५०) अनन्तसेन इत्थमुद्धृतः—"अस्मत्पितृ-चरणास्तु व्याख्यानयन्ति—असंबद्धयोरविद्यमानत्वमपृथग्भावः, किं वा पृथग्भावः संबन्धविरहः यथा हिमवद्विन्ध्यौ पृथग्भूतावसंबद्धावित्यर्थः। तेनापृथग्भावः संबन्ध एव, तथा च संबन्धः समवाय इत्युक्तिः।"

२. द्रव्यलक्षणप्रसङ्गे (१.५१) कथितम्—'अस्मत्पितृचरणास्तु—गुणत्वं गुणात्यन्ताभावविरोधित्वं गुणप्रागभावप्रध्वंसयोरपि गुणात्य-न्ताभावविरोधित्वादित्याहुः।'

३. धूमनेत्रप्रमाणप्रसङ्गे (५.४९–५०) चक्रमतं विविच्य स्वपितृमता-नुसारं शिवदासेन व्याख्यातम्। जतूकर्णप्रत्ययाच्चक्रः 'अध्यर्धम्' इति 'चतुर्विंशतिकं' इत्यनेन सह परामृशति ततः प्रायोगिकधूमपाने नेत्रमानं षट्-त्रिंशदङ्गुलं भवति। अनन्तसेनस्तु सुश्रुतादिप्रत्ययात् 'द्वात्रिंशदङ्गुलं' इत्यस्य 'अध्यर्धं' कृत्वा 'अष्टचत्वारिंशत्' इति व्याख्यानयति। दुराग्रहराहित्याच्च सर्वेषामेव मतानां प्रामाण्यं स्वीकरोति शिवदासः—'सर्वेषामेव प्रामाण्य-मिति युक्तम्' इति।

४. 'द्वौ कालौ' (५.७१) इति सायं प्रातरिति चक्रो व्याख्यानयति, शिवदासस्तु पितृचरणानुसारं 'प्रातःकालो भोजनानन्तरकालश्चेति' वदति वाग्भटप्रत्ययात्।

५. पथ्यलक्षणप्रसङ्गे (२५.४५) कथितम्—'अस्मत्पितृचरणास्तु व्याचक्षते—आयुर्वेदबोधितो मार्गः पन्थाः, तस्मादनपेतमार्वेदाविरुद्धं यदाहाराचादि तदेव पथ्यमिति।'

६. 'रसनार्थो रसः' (१.६४) इति रसलक्षणं साधु प्रतिपादितं चक्रेण यथा—'एतच्च षण्णामपि रसानामनुगतं रूपादिषु च व्यावृत्तत्वात् साधु लक्षणम्'; परमनन्तसेनेनेदं लक्षणं दूषयित्वा 'रसनेन्द्रियग्राह्यवृत्तिगुण-त्वावान्तरजातिमत्त्वं रसत्वम्' इति लक्षणं प्रस्तुतं यथोक्तं शिवदासेन—'अस्मत्पितृचरणास्तु—उभयथा दूषितमेतल्लक्षणं रसत्वे रसाभावे चातिव्यापकं तयोरपि रसनेन्द्रियग्राह्यत्वात् तथातीन्द्रियरसे चाव्यापकं तस्माद् 'रसनेन्द्रियग्राह्यवृत्तिगुणत्वावान्तरजातिमत्त्वं रसत्वमिति लक्षण-तया बोद्धव्यमित्याहुः' इति।

७. ऋतुक्रमेण शोधनकालप्रसङ्गे (७.४६) पितृचरणमतमनुसरता शिवदासेन हरिचन्द्र-वाग्भट-कपिलबलतन्त्रान्तरीयवचनानां विरोधपरिहारः कृतः। चक्रेण तु 'अत्र बुद्धिमतां न व्यापारः' इति कृत्वा मौनमेवावलम्बितम्।

इत्थं स्वपितृपरम्परामनुगच्छता शिवदासेन तत्त्वप्रदीपिकायां नैके नूतना विचारा उद्भाविता ये चक्रपाणिदत्तकृतव्याख्यायां नावाप्यन्ते। यत्र तत्र भट्टारचक्रादीनां मतानि प्रतिक्षिप्य स्वमतमपि युक्तिपुरःसरं स्थापितं तेन। एतद्व्याजेनानन्तसेनस्यापि मौलिकं व्याख्यानं रसादिलक्षणप्रसङ्गेषु व्यञ्जितम्।

ग्रन्थाधारभूता मातृका

ग्रन्थाधारभूतैकैव मातृकोपलब्धा एशियाटिक सोसाइटी, बम्बई पुस्तकालयतः। इयं १७३ संख्याङ्किता १२८ पत्रेषु (२५५ पृष्ठेषु) समाप्ता चरकसंहितायाः सूत्रस्थाने षड्विंशाध्यायस्य सप्तपञ्चाशच्छ्लोकपर्यन्तमेवापूर्णा विद्यते। द्वितीयावरणपृष्ठे इदमङ्कितं वर्त्तते—"इन्द्रजीसूनुना भगवानलालेन काश्यां लेखितोऽयं ग्रन्थः संवत् १९२८ चरकसूत्रस्थानिका तत्त्वप्रकाशिका पत्राणि १२८" इति। इदं द्योतयति यदयं ग्रन्थः काशीस्थस्य कस्यचित् कविराजस्य गृहे आसीत्। चतुःषष्टितमपृष्ठपर्यन्तमक्षराण्यतीव सूक्ष्माणि यत्र तत्राविशेष्याणि सन्ति, पञ्चषष्टितमपृष्ठे तृतीयपंक्तितः हस्तलिपिरन्यैव प्रारब्धाऽन्तं यावद् यत्राक्षराणि स्थूलानि सुपाठ्यानि च विद्यन्ते। लिपिकरप्रमादः प्रायशः सर्वत्र दृश्यते। यत्र तत्र बहवो ग्रन्थांशास्त्रुटिताः सन्ति, येषु स्थलेषु 'अत्र ग्रन्थत्रुटिरस्ति' इति लिपिकरटिप्पण्यङ्किताऽस्ति। मन्येऽस्य लिपिकरस्याधारभूता मातृकाऽपीदृशी खण्डितैवासीत्।

एशियाटिक सोसाइटी, बम्बई पुस्तकालयस्थमातृकानां प्रकाशिते विवरणग्रन्थे[१]ऽस्माकं मातृकाया अधस्तनं विवरणमुपलभ्यते—

---

१. A Descriptive Catalogue of Sanskrit and Prakrit Manuscripts in the Library of the Bombay Branch of the Royal Asiatic Society, compiled by H. D. Velankar, Vol. I-Technical literature, Published by Bombay Branch of the Royal Asiatic Society, Town Hall, Bombay, 1926, London, Arthur Probesthene at Great Russel Street W. C. I.

"173—चरकसंहिता (सूत्रस्थान) with तत्त्वप्रदीपिका by शिवदास 12×6 in Devanagari handwriting, Foll. 126, about 13 lines in a page, incomplete.

The Ms. Contains the Sutrasthana upto the end of यज्जःपुरुषीय adhyaya and a greater portion of the next adhyaya."

श्रीयादवजी त्रिकमजी आचार्यः स्वसंपादिते चरकसंहितायाः सायुर्वेद-दीपिकायाः निर्णयसागरसंस्करणे (बम्बई, १९४१, तृतीयावृत्तिः) यत्र तत्र पादटिप्पण्यां शिवदाससेनमुद्धृतवान्[1]। तेषु निदानस्थानीयोऽशः द्रव्यगुणव्याख्यायाः, चिकित्सा-सिद्धिस्थानीया अंशाश्च चक्रदत्तव्याख्याया वर्तन्ते, सूत्रस्थाने १३.६२ श्लोकात् त्रिंशत्तमाध्यायपर्यन्तं तत्त्वप्रदीपिकामेव

---

१. सूत्रस्थानम्—१३.६२, ९६, १००; १४.२४, ३७, ४४, ७१; १५.४, ७, १३, १४, १६; १६.२७, ३४; १७.६२, ६४; १८.१४,३६; २०.१-२, ३, ६, १२, १४; २१.३, ८, ९, १७, ५७, ५९; २२.१, ४, ३५, ३७; २३.१-२, १९, ३०; २४ १, १७, २५, ३०, ३५, ४३; २५.१२, १४, २१, २२, ३५, ४०, ४१, ४५, ४९, ५१; २६.७, ८, ९, १०, ११, १४, १५, १६, १७, २१, ३२, ३३, ३६, ४०, ४१, ४३, ४४, ४५, ४६-४७, ४८-४९, ५१, ५२, ५६, ५७, ६४-६५, ६६, ६७, ६८-७०, ७६-७९, ८०, १०५; २७.३, ४, ८-१२, १९, २३, २५, ३०, ३४, ६१, ७३, ११३, १२८, १५३, १७५, १८६, १९६-१९७, २१७, २२१, २२८, २३१, २४०, २४५, २५०-५६, २६९, २७६, २८६, २९४, २९७, २९८, ३००, ३०२-३, ३०९, ३११, ३१४, ३१८, ३१९, ३२१, ३२५, ३२७-२८, ३३१; २८.१-२, ४, १६, १७, ३१, ३३, ३४, ३६, ३९, ४६; २९.३, ४, ५, ७, ८; ३०.३-४, ५, ८, ११, १५, १८, १९, २५, २७, २८, ३०, ३१, ३२, ३३, ४३, ४५, ५२, ६२, ६८, ६९, ७०.

निदानस्थानम्—२.४.

चिकित्सास्थानम्—३.१३८, १५०, १७९-१८७, १९४, १९७-१९९, २००-२०३.

सिद्धिस्थानम्—१.१९, २८; ३.११; ६.२४.

निरदिशत्। १३.६२ श्लोकात् प्राक्तनोंऽशः मन्येऽस्पष्टतया पठितुमशक्यत्वान्नोद्धृतवान्, परञ्च षड्विंशाध्यायादनन्तरमुद्धृतोंऽशो विचारणीयः यतो हि वर्तमानमातृका षड्विंशाध्यायस्य सप्तपञ्चाशच्छ्लोके एव समाप्तिं याति। वेलंकरमहोदयकृतविवरणेऽप्येतावानेवांशो निर्दिष्टः। आचार्ययादवजीमहोदयेनापि स्वसंपादितचरकसंहितायाः निर्णयसागरसंस्करणे (बम्बई, १९४१, तृतीयावृत्तिः, पृ० १७) लिखितं यत् तेनेदं हस्तलिखितं पुस्तकं सप्तविंशतितमाध्यायपर्यन्तं मुंबईनगरस्थ रायल एशियाटिक सोसायटी पुस्तकालयात् प्राप्तमिति। संभाव्यते यदादौ वेलंकरमहोदयस्य विवरणात् प्रागियं मातृका सप्तविंशतितमाध्यायपर्यन्ता स्यात्तदनन्तरं कालक्रमात् खण्डितान्त्यभागा वर्तमानरूपमवाप्ता; यादवजीमहोदयेनाद्यमातृकैवोपलब्धा स्यात्। तथापीदं विस्मयावहं यत् कथं स शिवदाससेनं त्रिंशत्तमाध्यायपर्यन्तमुद्धृतवान्। तान्युद्धरणानि तत्त्वप्रदीपिकाया एव सन्तीत्यत्र नास्ति कश्चित् संशयो यतश्चरकमूलपाठमनुसरन्त्येव व्याख्या बहुशो द्रव्यगुणादिव्याख्यासु नोपलभ्यते। द्रव्यगुणव्याख्यायां कानिचिदुद्धरणानि दृश्यन्ते तानि तत्त्वप्रदीपिकाया अन्योद्धरणवत् समाधेयानि। अपरञ्च यत्र तत्र यादवजीमहोदयेनोद्धृतः पाठो वर्तमानमातृकापाठाद् भिद्यतेऽपि। अतोऽनुमीयते यद् यादवजीमहोदयस्य गृहे अन्याऽप्येका मातृकाऽऽसीत्त्रिंशत्तमाध्यायपर्यन्ता यस्य न क्वापि निर्देशो लभ्यते[1] नापि सूचितो यादवजीमहोदयेन। एतन्मातृकां

---

१. फ्रांसदेशीयविदुषा पी० कॉर्डियरमहोदयेन सूचितं (१९०३ ई०) यदेकाऽद्वितीया खण्डिता मातृका कलिकातावास्तव्यस्य कविराजश्यामकिशोरसेनमहोदयस्य गेहे आसीत् यो हि शङ्करसेनकृतनाडीप्रकाशस्य वङ्गीयानुवादकर्त्तुः श्रीपीताम्बरसेनस्य तनयः। मातृकेयं कविराजहरिनाथविशारदेन चरकसंहितायाः स्वकीये संस्करणे समुपयुक्तेति। (Travaux Sur L'Histoire De La Mẽdecine Indienne, compiled and presented by Arion Rosu, Paris, 1989, PP. 548-49; also his personal communication dated 3rd May 1990.)
अत्र ध्येयमिदं यत् कॉर्डियरमहोदयो बम्बईस्थ एशियाटिक सोसाइटीति संस्थायां स्थितायाः प्रस्तुतमातृकायाः निर्देशं नाकरोत् या हि १९२८ वत्सरे (वैक्रमे ?) एव प्रतिलिपिबद्धाऽभूत्। एते मातृके भिन्नेऽभिन्ने वेति वक्तुमशक्यम्।

विना कथं नाम स तावन्तमंशमुद्धर्तुमशक्नोत् ?

शिवदासस्तत्त्वप्रदीपिकां सूत्रस्थानावधिमेव कृतवान् सम्पूर्णायां चरकसंहितायां वेति प्रश्नः समुदेति। यथा हि अष्टाङ्गहृदयोपक्रमे स्पष्टमुल्लिखितं यदुत्तरतन्त्रस्य व्याचिख्यासुः शिवदासो न तथा तत्त्वप्रदोपिकाया उपक्रमे कश्चित् सङ्केतः। उपलब्धव्याख्यायां सन्ति केचिन्निर्देशाः यैः प्रतीयते यत्तत्त्वप्रदीपिका सम्पूर्णायां चरकसंहितायां विरचिताऽऽसीद् यथा—

१. चक्रदत्तव्याख्यायां निरूहाधिकारे (३६) 'इति चरकव्याख्या' इति निर्दिशति (श्रीयादवमहोदयस्तु 'इति चरकव्याख्या' इति स्थाने 'इत्यत्र व्याख्या' इति पादटिप्पण्यां निरदिशत्)। अत्रत्यो मूलश्लोकः चरकसंहितायाः सिद्धिस्थाने (प्रथमाध्याये) वर्ततेऽतः उपरिनिर्दिष्टा चरकव्याख्या सिद्धिस्थानीयैवेत्यत्र नास्ति कश्चित् सन्देहः।

२. 'ताश्च तन्त्रयुक्तयो वक्ष्यन्ते' इति तत्त्वप्रदीपिका (२६.३७)-वचनेनेदमनुमीयते यदियं व्याख्या तन्त्रयुक्तिमप्यन्तरभावयद् या चरकसंहिताया अन्तिमेंऽशे सन्निविष्टा वर्त्तते।

३. एकस्मिन् स्थले (१७.६२) शिवदासो लिखति—'दृढबलोक्तं च हेत्वन्तरं त्रिमर्मीये व्याख्यास्यामः' इति। दृढबलेनायं विषयो विवेचितस्त्रिमर्मीयचिकित्सिते (च० चि० २६), अत इदं सुस्पष्टं यत्तत्त्वप्रदीपिकाव्याख्या त्रिमर्मीयचिकित्सां यावदवश्यमासीत्। ज्वरचिकित्सायाः (२५७) चक्रदत्तव्याख्यायामपि तत्त्वप्रदीपिकायाः निर्देशः कृतः।

४. वमनाधिकारे (१६) चक्रदत्तव्याख्यायां शिवदासो लिखति—'व्याख्यान्तरञ्चास्मदीयचरकतत्त्वप्रदीपिकायामनुसन्धेयम्' इति। अत्रत्यो मूलश्लोकः 'पेयां विलेपीमकृतं कृतञ्च' इति चरकसंहिताया सिद्धिस्थाने प्रथमाध्याये विद्यते। अतः सुस्पष्टं यत् तत्त्वप्रदीपिकाव्याख्या चरकसंहितायाः सिद्धिस्थानं यावत् पूरिता शिवदासेन या खलु कालवशात् खण्डिता नाधुनोपलभ्यते।

सम्पादनविधिः

यत एकैव मातृकाऽस्य ग्रन्थस्योपलभ्यते, नासीदस्यास्तुलनावकाशः कयाचिदन्यया सह। अस्यामपि मातृकायामाद्यभागे चतुःषष्टितमपृष्ठं यावदक्षराण्यतिसूक्ष्माणि, अस्पष्टानि, अनिर्धारणीयानि सन्ति यस्य पठनमतीव दुःशकमासीत्। यादवजीमहाभागोऽपि मन्ये एनमंशं नाशक्नोत् स्पष्टतया निर्धारयितुमत एव तदंशे तस्य शिवदासीया टिप्पणी नोप-

लभ्यते । इदं दुःसाध्यं कार्यं महता परिश्रमेण मदीयशिष्येण डा० सत्यदेव दुबेमहोदयेन ग्रन्थस्यास्य सहसम्पादकेन साधितमिति साधुवादार्होऽसौ समस्तायुर्वेदसुधीजनानाम् । तत्प्रस्तुतप्रारम्भिकालेखमाधृत्य प्रत्यक्षरं पुनः मातृकया मेलयित्वा पदानि वाक्यानि च साधूनि यथा स्युस्तथा संस्कृत्य सम्पादितोऽयं ग्रन्थः । यत्र किञ्चित् पदं लुप्तं प्रतीयते तत् कोष्ठके निविष्टम् । यत्र च पाठे कश्चित् सन्देहस्तत्र कोष्ठके स्वानुमितपदं प्रश्नचिह्नसहितं निर्दिष्टम् । स्थले स्थले व्याख्याया बहवोंऽशास्त्रुटिताः सन्ति तत्र गत्यन्तराभावात् नैव किञ्चित् कर्त्तुं शक्ता इति परित्यक्तम्, परं तत्रापि मूलश्लोकाः निविष्टाः ग्रन्थपरम्परापालनार्थम् । एतदेव हृदि निधाय खण्डितांशेऽपि मूलश्लोकनिवेशेन त्रिंशत्तमाध्यायपर्यन्तं सूत्रस्थानं संपूरितम् ।

यतस्तत्त्वप्रदीपिका आयुर्वेददीपिकां चक्रपाणिदत्तकृतां बहुशोऽनुसरति आयुर्वेददीपिका तत्त्वप्रदीपिकायाः पाठानां निर्धारणे स्पष्टीकरणे च प्रचुरं साहाय्यं प्रादत्त। शिवदासस्यान्यकृतिषूद्धृतानां तत्त्वप्रदीपिकांशानामप्यस्मिन् कार्य्ये साहाय्यमवाप्तम् । प्रातिलोम्येन तत्त्वप्रदीपिका आयुर्वेददीपिकायाः पाठालोचनेऽपि सहाया सेत्स्यतीति सुस्पष्टम् ।

एशियाटिक सोसाइटी, बम्बईपुस्तकालयादस्य ग्रन्थस्य सूक्ष्मच्छायाप्रतिलिपिरधिगता तदर्थं तत्पुस्तकालयाध्यक्षेभ्यः धन्यवादान् ज्ञापयामि । अस्मिन् कार्ये डा० लक्ष्मीदत्तशुक्लमहोदयस्य साहाय्यमवाप्तं तदर्थं सोऽपि धन्यवादार्हः ।

जयपुरीयश्रीस्वामिलक्ष्मीरामनिधिनाऽयं दुर्लभो ग्रन्थः प्रकाशनार्थमङ्गीकृतस्तदर्थं तदधिकारिणो विशेषतः वैद्यरत्नश्रीस्वामिरामप्रकाशमहाभागाः भूरिशो धन्यवादार्हाः न केवलमस्माकमपि तु समस्तायुर्वेदलोकस्य ।

शिवदासकृता सार्था व्याख्या तत्त्वप्रदीपिका ।
चरकार्थान् समर्थैषा प्रकाशयतु सर्वथा ॥

इति शम् ।

प्रियव्रतशर्मा

३९, गुरुधाम
वाराणसी
वैशाखपूर्णिमा, सं० २०४७

चरकतत्त्वप्रदीपिकायां प्रमाणतयोद्धृतानां ग्रन्थाना-माचार्याणाञ्च सन्दर्भनिर्देशः

सङ्केत–विवरणम्

1. चक्रपाणिदत्तकृतायुर्वेददीपिका–व्याख्या (चरकसंहिता, निर्णयसागर संस्करण, १९४१)

2. चरकसंहितायाः पादटिप्पण्यामाचार्ययादवजी त्रिकमजीमहोदयेनोद्धृतः शिवदाससेनकृतचरकतत्त्वप्रदीपिकाव्याख्यांशः।

3. स्वकीयद्रव्यगुणसङ्ग्रहव्याख्यायां शिवदाससेनेनोद्धृतश्चरकतत्त्वप्रदीपिकांशः।

च. नि.—चरकसंहिता, निर्णयसागर संस्करण, १९४१

सु. नि.—सुश्रुतसंहिता, निर्णयसागर संस्करण, १९३८

•

विषय-सूची

सूत्रस्थानम्

विषयः पृष्ठाङ्कः

१ दीर्घञ्जीवितीयोऽध्यायः

२ अपामार्गतण्डुलीयोऽध्यायः

३ आरग्वधीयोऽध्यायः

४ षड्विरेचनशताश्रितीयोऽध्यायः

५ मात्राशितीयोऽध्यायः

१० महाचतुष्पादोऽध्यायः

११ तिस्रैषणीयोऽध्यायः

१२ वातकलाकलीयोऽध्यायः

१३ स्नेहाध्यायः

१४ स्वेदाध्याय:

१५ उपकल्पनीयोऽध्याय:

१६ चिकित्साप्राभृतीयोऽध्याय:

१७ कियन्तःशिरसीयोऽध्याय:

१८ त्रिशोथीयोऽध्यायः

१९ अष्टोदरीयोऽध्यायः

२० महारोगाध्यायः

२१ अष्टौनिन्दितीयोऽध्यायः

२२ लङ्घनबृंहणीयोऽध्यायः

२३ सन्तर्पणीयोऽध्यायः

२४ विधिशोणितीयोऽध्यायः

२५ यज्जःपुरुषीयोऽध्यायः


२६ आत्रेयभद्रकाप्यीयोऽध्यायः

२७ अन्नपानविध्यध्यायः

२८ विविधाशितपीतीयोऽध्यायः

२९ दशप्राणायतनीयोऽध्यायः

३० अर्थेदशमहामूलीयोऽध्यायः



मातृकायाः प्रथमं पृष्ठम्



मातृकायाः पञ्चषष्टितमं पत्रं यत्र हस्तलिपिः परिवर्त्ततेऽन्तं यावत

॥ श्रीः ॥

चरकसंहिता

सूत्रस्थानम्

प्रथमोऽध्यायः

अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्यामः ॥ १ ॥

श्रीगणेशाय नमः ।

यस्याः प्रसादतो विद्यामविद्यातिमिरच्छिदम् ।
लेभिरे मुनयो राज्ञीमोश्वरीं तामुपास्महे ॥
दशाननादितिमिरपरिभूतमिदं जगत् ।
प्रससाद यतस्तस्मै कस्मैचिन्महसे नमः ॥
महदादिनिकायोऽयं यस्याः प्रादुरभूत् किल ।
सतीं गुणमयीं भक्त्या जनियत्रीमहं भजे ॥
काणादसांख्यायुर्वेदतन्त्राणां पारदृश्वनः ।
तातस्यानन्तसेनस्य वन्दे चरणपङ्कजम् ॥
तातादधीत्य तन्त्राणि शिवदासेन धीमता ।
क्रियते चरकस्येयं टीका तत्त्वप्रदीपिका ॥
गुरुणाऽनन्तसेनेन यद्व्याख्यानं प्रदर्शितम् ।
ततो मे स्खलनं मा भूद्वाग्देवि ! त्वदनुग्रहात् ॥

इह खलु जिज्ञासितमर्थं प्रतिपादयन् प्रतिपादयिता अवधेयवचनो भवति प्रेक्षावतां, अजिज्ञासितमर्थन्तु प्रतिपादयन्नयं लौकिको न वा परोतः (श्रौतः ?) प्रेक्षावद्भिरुन्मत्तवदुपेक्षणीयः । एषां च जिज्ञासितार्थः स एव यो ज्ञातः सन् पुरुषार्थाय कल्पते । अयञ्चायुर्वेदो ज्ञातोऽपि न कञ्चन पुरुषार्थं साधयितुमिष्ट इति तदभिधानं निष्प्रयोजनमिति केचित् । तत्र आयुर्वेदो हि वेदत्वाद्वेदान्तवत् सर्वथा सप्रयोजन एवेति । तथाहि आयुर्वेदः पठितोऽपि ऐहिकमामुष्मिकं च श्रेयः साधयति, यद्वक्ष्यति—"दीर्घमायुर्यशः स्वास्थ्यं त्रिवर्गञ्चापि पुष्कलम् । सिद्धिं चानुत्तमां लोके लभते विधिना

पठन् ।।'' (सि. १२.३५) इति। **सुश्रुतेऽप्युक्तं**—''स्वयम्भुवा प्रोक्तमिदं सनातनं पठेद्धि यः काशिपतिप्रकाशितम्। स पुण्यकर्मा भुवि पूजितो नृपैरसुक्षये शक्रसलोकतां व्रजेत् ।। (सु. सू. १.४१); तथा पुनस्तत्रैवोक्तं— ''अत्रायत्तमैहिकमायुष्मिकं च श्रेय'' इति। अपि च आरोग्यं सर्वपुरुषार्थानां प्रधानं कारणं तथा च—''धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।'' (सू० १.१५) इति। तच्चारोग्यमायुर्वेदाभिधेयं चिकित्सितं साधयतीत्यारोग्यजननत्वादयमायुर्वेदः सर्वानेव पुरुषार्थान् साधयति यतोऽरोगा एव धर्मसाधनं तपःप्रभृति कर्तुं प्रभवन्ति, तथा आयुर्वेदप्रतिपादितेन चिकित्सितेन ये केचिदीश्वरा उपक्रियन्ते उपकृताश्च प्रीतमनसः स्वजीवितनिष्क्रयणाय दृष्टादृष्टमपेक्षमाणा धनमुपानयन्ति तेन धनवान् भिषग्भवति; अर्थवतश्च कामसंसिद्धिरिति (धर्मफलः) अर्थफलः कामफलश्चायुर्वेदः। अथवा आयुर्वेदमभ्यस्य तदभिहितार्थानुष्ठानेन भिषजो नीरोगत्वं, नीरोगश्च शब्दस्पर्शादीनिन्द्रियार्थानविकलेन्द्रियः सन्निन्द्रियैर्यथास्वमुपाददानः कामं सुखमवाप्नोतीति कामफलसिद्धिः। एतच्च धर्मादिसाधनत्वमायुर्वेदस्य ग्रन्थकारोऽप्यर्थेदशमहामूलीये स्वयमेव व्यक्तीकरिष्यति, तथा मोक्षोपायोपदेशकत्वेन मोक्षफलकत्वं चायुर्वेदस्य, शारीरे हि मोक्षोपायाः प्रतिपादयिष्यन्त, इत्ययमायुर्वेदश्चतुर्वर्गसाधनत्वात् प्रेक्षावतां भवति जिज्ञास्य इति तदभिधानं युक्तमेव। स्यादेतदारोग्यं चतुर्वर्गसाधनमित्यत्र न कोऽपि विवादः केवलमायुर्वेदप्रतिपादितं चिकित्सितं तत्साधयतीति तं न सहामहे, उभयतो व्यभिचारात्। नैवं, अन्वयव्यभिचारस्याग्रे परिहरिष्यमाणत्वात्, व्यतिरेकव्यभिचारस्तु नास्त्येव तृणारणिमणिन्यायेनारोग्यविशेषं प्रत्येव भेषजस्य कारणत्वात्, विशेषं च महाचतुष्पादे ग्रन्थकारः स्वयमेव स्फुटीकरिष्यति; किंवा सर्वजनप्रसिद्धदशमूल्यादिभेषजादर्शनाद् व्यतिरेकाभिमानो भवति। अत्रापि बलवज्जीवनादृष्टेन यदृच्छोपनीतस्य दोषादिविपरीतदेशकालादेर्भेषजस्य सत्त्वमस्त्येवेति न व्यभिचारः। अस्तु वा व्यतिरेकव्यभिचारोऽपि तथाऽप्यसौ वैदिकस्थले नेह किञ्चित्कर इत्येतद्विस्तरेण महाचतुष्पादे उपपादयिष्याम इति नेह प्रतन्यते। तथा विनाशमात्रस्याहेतुकत्वेन चिकित्सितस्यापि रोगनिवृत्तिं प्रत्यहेतुत्वादायुर्वेदोऽपि निरर्थक इति यत् क्षणभङ्गवादिनो विप्रतिपद्यन्ते तदपि चिकित्साप्राभृतीये निराकरिष्याम इति नेहोच्यते। स्यादेतत्, वेदा ह्यपौरुषेयाः, सम्प्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वादात्मवत्; इदं पुनः शास्त्र**मग्निवेशादिभिः** कृतमिति श्रूयते, कृतकत्वाच्च परिकल्पितप्रबन्धवच्चायमनागमः,

अनागमत्वाच्चास्य शास्त्रस्य न प्रामाण्यं, अप्रमाणत्वेनैतदुक्तानामर्थाना-मश्रद्धेयत्वादनुपादेयत्वमस्य प्राप्नोतीत्यपरे। मा भूदनागमत्वादस्य प्रामाण्यं किन्तर्हि अन्वयव्यतिरेकाभ्यां एतदुक्तानामर्थानां समधिगम्यत्वात् प्रामाण्यं सिध्यतीति, तन्न, यतो ह्यायुर्वेदनिर्दिष्टाः सर्वेऽर्था निःशेषं सिरास्नायु-मर्मादयो नान्वयव्यतिरेकगम्याः, परमसूक्ष्मत्वेन (च) केषाञ्चिदतीन्द्रिया-णामर्थानां प्रत्यक्षानुमानाभ्यां परिच्छेतुमशक्यत्वात्; नैवं, नित्य एवाय-मायुर्वेदः, नित्यत्वं चार्थेदशमहामूलीये प्रतिपादयिष्यामः। **अग्निवेशा**-दिभिरपि सदैव वेदस्य वचनं स्मृतिवचनमिव पृथक् कृत्वा निबद्धं न पुनरपूर्वत्वेन कृतं तदत्र स्मृतीनामिव वेदार्थाभिन्नत्वेन प्रामाण्यमस्या-भ्युपेयम्। तत्र यद्यपि ब्रह्मप्रभृतिभिः प्रणीतान्येवायुर्वेदतन्त्राणि सन्ति तथाऽपि तेषामतिविस्तरत्वदुरधिगमत्वाभ्यामाधुनिकानामल्पायुर्मेधसाम-प्रवृत्तिमभिसमीक्ष्य परमकारुणिको भगवा**नग्निवेशो**ऽनतिसंक्षेपविस्तरं काय-चिकित्साप्रधानमायुर्वेदतन्त्रं प्रणेतुमारब्धवान्। तस्मिंश्च सूत्रनिदानविमा-नशारीरेन्द्रियचिकित्सितकल्पसिद्धिस्थानात्मकेऽभिधातव्ये सूत्रस्थानमेवादौ निर्दिष्टवानाचार्यः, सूत्रस्थाने सूत्रितानामेवार्थानां सकले तन्त्रे विस्तरेण वक्ष्यमाणत्वात्। अनेकाध्यायात्मकेऽपि सूत्रस्थाने वक्तव्ये रोगोपशमं प्रति भेषजस्य साक्षाद्ध्याप्रियमाणत्वेनान्तरङ्गतया उद्देश्यतया च भेषज-चतुष्केऽभिधातव्ये निखिलतन्त्रबीजभूतार्थाभिधायकत्वेन तथा तन्त्र-प्रवृत्त्यङ्गप्रयोजनवदायुर्वेदागमादेरुपदर्शकत्वेन च दीर्घञ्जीवितीयमध्यायं प्रथमतोऽभिधातुं शिष्यावधानार्थं प्रतिजानीते—अथात इत्यादि। दीर्घञ्जी-वितशब्दमधिकृत्य कृतोऽध्यायो दीर्घञ्जीवितीयः। एतेन प्रयोजनादिकमपि सूचितमुक्तं नैरुज्यप्रयोजनाद्यभिधायकं, धातुसाम्यक्रिया चोक्तेत्यादि-वाक्यस्यापि दीर्घञ्जीवितीयपदेन सामान्यतोऽभिहितत्वात्। यद्यपि प्रयोजनाभिधानमात्रं न प्रवर्तकं भ्रान्तप्रस्तावकवाक्ये व्यभिचारात्, तथाऽप्यत्र महर्षे**रग्निवेशस्य** परमाप्तत्वेन प्रसिद्धस्य प्रयोजनाभिधानं प्रवर्तकमेवेति। नन्वयमथशब्दो न तावन्मङ्गले गौरश्वः पुरुषो हस्तीति-वदन्यथानुपपत्तेः फलाभावाच्च, न ह्यभिधेयस्य प्रयोजनं तदभिधायकः शब्दोऽपि कर्तुमिष्टे अतिप्रसङ्गात्, न वा मङ्गलवत्तत्प्रतिपादकशब्दस्यापि तत्फलत्वं मानाभावात्, न वा प्रारिप्सितसमाप्तिकामो मङ्गलमाचरेदिति च तत्प्रतिपादकशब्दप्रयोगमाचरेदित्यर्थ विधिर्येनैवं स्यात्। ननु मा भून्मङ्गलमथशब्दस्य वाच्यं लक्ष्यं वा किन्तु मृदङ्गशङ्खध्वनिवदथशब्द-स्यैव मङ्गलत्वमिति चेत्तर्हि कथमन्वयो मङ्गलस्यापदार्थत्वात् पदार्थो

हि वाक्यार्थेनान्वीयते; अथ—"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥" इति स्मृतिवचनेन तावदथशब्दस्य मङ्गलत्वं बोध्यते तथात्वे चान्यथानुपपत्तिरिति विरोधे आनन्तर्याद्यन्यतममर्थमादायान्वितस्याथशब्दस्य मङ्गलत्वं मन्तव्यम्। त्वयाऽप्येतदवश्यमभ्युपेयं, अन्यथा उक्तविरोधे व्यापिनि म ....मिति चेत्, भवेदेवं, यदि प्रकृतेऽर्थान्तरमपि सम्भवेत् तथाहि न तावदानन्तर्यार्थत्वम्। तदर्थं त्विह यस्य कस्यचिदानन्तर्यं विवक्षितमाहोस्वित् कस्यचिन्मतनियतस्य वा? नाद्यः तस्याभिधामन्तरेणापि ....ह पुरुषः......... करोति; न द्वितीयः, तदुपस्थापकमानाभावात्। अधिकारार्थत्वेऽपि किं दीर्घञ्जीवितीयस्याधिकारार्थत्वात् तद्व्याख्यानस्य वा? नाद्यः, दीर्घञ्जीवितीयस्य व्याख्यानं क्रियाभिसम्बन्धेनैव निबोध्यते तस्मादधिकारार्थेनाथशब्देनान्वयो नोपपद्यते। व्याख्यानस्याधिकारार्थत्वेऽपि अथातो दीर्घञ्जीवितीयव्याख्यानमित्येव विदध्यात् तथैवान्वयोपपत्तेः, अथशब्दा.........मनमित्यादिवत्। अत एव प्रारम्भार्थत्वमुक्तदोषानिवृत्तेः। नापि पूर्वप्रकृतापेक्षायां, पूर्वप्रकृतिं हि काञ्चनान्यामपेक्ष्य कल्पोपन्यासः पूर्वप्रकृतापेक्षा, यथा हि - अयमायुर्वेदो नित्यः अथानित्य इति प्रकृते च (कल्पो) पन्यासस्ततो नास्तीति कथं तदर्थता। अत्र वदति— आनन्तर्यमत्राथशब्दार्थः, आनन्तर्यनिरूपकं च यद्यपि साक्षान्न श्रूयते तथाऽपि येनापि व्याख्यानं न सम्भवति यस्मिन्सति भवत्येवेति प्रकृतव्याख्यानहेतुतया तत्साधन.........रुपलम्भः अतस्तदनन्तरमिति गम्यते (आयु) र्वेदार्थसम्यगधिगमतन्त्रकरणार्थगुर्वाज्ञालाभादिरूपात्। अन्ये तु **अग्निवेशीय** शिष्टत्वान्यथानुपपत्त्यनुमितेष्टदेवतानमस्कारस्यानन्तरमिति वर्णयन्ति, तत्र अनैकान्तिकत्वात् मङ्गलपूर्वकत्वे च साध्येऽथशब्देनासिद्धसाधनम्। ननु मङ्गलमभिसंधाय प्रयुक्तोऽथशब्दः पश्चात्तदानन्तर्यं बोधयिष्यतीति चेत्, प्रेक्षावच्छब्दप्रयोगस्याभिसन्धानपूर्वकत्वात् मङ्गलस्य चातदर्थत्वात्। तस्मादानन्तर्यप्रतिपादकोऽप्यथशब्दः स्वरूपेणैव मङ्गलं भवतीति स्थितम्। ग्रन्थारम्भे च मङ्गलाचरणं प्रारिप्सितसमाप्त्यर्थं समाप्तिप्रतिबन्धकविघ्नध्वंसार्थं चेति। अतः शब्दोऽत्र हेतौ, यतो रोगोपशमोपायजिज्ञासवः शिष्या उपवसेयुः अतो व्याख्यास्याम इति। अन्ये तु अधिकारप्राग्विधेरुपदर्शनार्थमतः शब्दः अत ऊर्ध्वं यदुपदेक्ष्यामस्तद् दीर्घञ्जीवितीयमिति वदन्ति, तत्र आनन्तर्यप्रतिपादकेनाथशब्देन फलतस्तदर्थस्याप्यभिधानात्। **ऋजवस्तु** नाटकादौ अहोऽत्र खलु भो इति समुदितमेवाव्ययं यथा सम्बोधने तथाऽ-

त्रापि अथात इति समुदितमेवाव्ययं प्रकरणप्राप्तमित्यूचिरे। व्याख्यानान्तरप्रपञ्चस्तु विस्तरभयादुपेक्षित इति। अधीयत इत्यध्यायः, कर्मणि घञ्। योगरूढेयं संज्ञा, तेन स्थानादिषु नातिप्रसक्तिः। वक्ष्यति च—"अधिकृत्येयमध्यायनामसंज्ञा प्रतिष्ठिता॥" (सू० ३०.७०) इति; नामसंज्ञा योगरूढा संज्ञेत्यर्थः। अत्र प्रकरणपरिच्छेदार्थं प्रत्यध्यायमेव प्रतिज्ञासूत्रमवश्यं वक्तव्यं तथा सति तन्त्रव्याख्यानप्रतिज्ञाऽप्यर्थतः सिद्धाऽध्यायसमुदायत्वात्तन्त्रस्येति ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

ननु श्रूयते हि ब्रह्मणैवायुर्वेदो ज्ञायते ततश्च तन्मात्रज्ञातस्यायुर्वेदस्य पृथिव्यामुपदेशकाभावात् कथमनेन मानुषेण तद्व्याख्यानं सम्भाव्यत इति शिष्यानवधानं मा भूदित्यतस्तदुपदेशपरम्पराप्रदर्शकमैतिह्यमस्तीति प्रतिपादनाय द्वितीयं सूत्रमुपन्यस्यति—इति ह स्माह **भगवानात्रेय** इति। इति हेति ऐतिह्यमित्यर्थः, ऐतिह्यस्याप्रोक्तत्वेनैव प्रामाण्यमित्यत उक्तं **भगवानात्रेय** इति। तदेवैतिह्यं दर्शयन्नाह—दीर्घञ्जीवितमित्यादि, किंवा यदस्मिंस्तन्त्रे त्वया वक्तव्यं तत् स्वीयबुद्धिरचितमाहोस्वित् कुतश्चिदाप्तात् प्रतिपन्नमिति पर्यन्तमुक्तः स्वग्रन्थस्य प्रामाण्यदर्शनाय गुरूक्तानुवादरूपतां दर्शयन्नाह—इति ह स्माह **भगवानात्रेयः**। इतिशब्दो वक्ष्यमाणनिखिलतन्त्रार्थपरामर्शकः, ह शब्द इवार्थः, **अरुणस्त्व**नुकम्पायामित्याह, **पितृचर**णास्तु सम्बोधन इत्याहुः; उक्तं हि **मेदिन्यां**—"हः स्यात्सम्बोधने पादपूरणे च विनिग्रहे" इति। केचित्तु इतिशब्देन दीर्घञ्जीवितीयमित्यादिसूत्रं परामृश्यत इत्याहुः, उक्तसूत्रमात्रस्य गुरूक्तानुवादरूपताप्रदर्शनेन फलाभावात् तथा उत्तरत्राभिधेयस्य निखिलतन्त्रस्य गुरूक्तानुवादरूपताऽनभिधानेन प्रामाण्यशंकायाश्चानिरासात्। इदन्तु सूत्रमध्यायान्तरे नास्त्येव, फलाभावात्। अत एव **सुश्रुते** "यथोवाच भगवान् धन्वन्तरि"रिति सूत्रं, **वाग्भटे** च "इति ह स्माहुरात्रेयादयो महर्षयः" इति च तत्तदाकरपुस्तकेषु न दृश्यते। यदि च बहुपुस्तकदर्शनादादरणीयमेतत्तदा इतिशब्देन सङ्कोचवृत्त्या दीर्घञ्जीविताध्यायमात्रं परामृश्यत इति व्याख्येयम्। तथा सति अध्यायान्तरस्य गुरूक्तानुवादरूपताप्रदर्शनानुमितं हेत्यादिसूत्रमध्यायान्तरेऽपि समर्थनीयम्। भगं पूजितं ज्ञानं, तद्वान्; उक्तं च—"उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥"; **अत्रेरपत्यमात्रेय** इति, एतेन विशुद्धवंशत्वं दर्शितम्। भगवा-

निति विशेषणेनैव गुरुगौरवस्य दर्शितत्वात् **आत्रेय** इति एकवचन-निर्देशोऽपि न दोषायेति विज्ञेयम्। यद्यपि गुरुसूत्रं, प्रतिसंस्कर्तृसूत्रं, शिष्य-सूत्रमेकीयसूत्रं चेति चतुर्विधं सूत्रं भवति, तत्र गुरुसूत्रं यथा—"नैतद्बुद्धि-मता द्रष्टव्यमग्निवेश" (सू० ४.२२) इत्यादि, प्रतिसंस्कर्तृसूत्रं यथा—"तमुवाच भगवानात्रेयः" (सू० ४.२२) इत्यादि, शिष्यसूत्रं यथा—"नैतानि भगवन्! पञ्च कषायशतानि पूर्यन्ते" (सू० ४.२१) इत्यादि, एकीयसूत्रं यथा—"कुमारस्य शिरः पूर्वमभिनिर्वर्तते" (शा० ६.२१) इत्यादि, तथाऽपि यत्र विशेषो नास्ति तत्सर्वमेव सूत्रं ग्रन्थकर्तुरेवेति प्रतिपत्तव्यं तेनैतत् सूत्रद्वयम**ग्निवेश**स्यैवेति। अन्ये तु-आद्यं प्रतिज्ञासूत्रं गुरो**रात्रेयस्य नाग्निवेशस्य**, तस्य शिष्यत्वेन व्याख्यानानधिकारात्; द्वितीयं तु सूत्रं प्रतिसंस्कर्तुः। आह स्मेति भूतानद्यतनपरोक्ष एव स्मशब्दः लिटि, प्रतिसंस्कर्त्तारं प्रत्यात्रेयोपदेशस्य परोक्षत्वादिति प्रलपन्ति, तदसा(धु), यदि हि शिष्यत्वेनैव व्याख्यानेऽनधिकारः तदात्रेयाव्यतिरिक्तस्य सर्वस्यैव शिष्यत्वेना**त्रेयस्यापि** व्याख्यानानधिकारप्रसङ्गः। अथापेक्षिकः शिष्य-गुरुव्यवहार इति चेत्तर्हि **अग्निवेश**स्यापि स्वशिष्यापेक्षया गुरुत्वेन व्याख्या-यामधिकारार्थः केन वार्यते? द्वितीयन्तु सूत्रं प्रतिसंस्कर्तुरित्यपि (न), मानाभावात्। आह स्मेति भूतमात्र एव स्मशब्दयोगो लिटि॥२॥

दीर्घञ्जीवितमन्विच्छन्भरद्वाज उपागमत्।
इन्द्रमुग्रतपा बुद्ध्वा शरण्यममरेश्वरम्॥३॥

इदानीं गुरुरात्रेयोऽपि ब्रह्मज्ञातमायुर्वेदं येन क्रमेण यस्माच्च ज्ञातवान् तद्दर्शयन्नस्य तन्त्रस्य प्रामाण्यं द्रढयन्नाह—दीर्घञ्जीवितमित्यादि। जीवितं शरीरेन्द्रियसत्त्वात्मसंयोगः। यद्यपि संयोगस्य गुणत्वेन दीर्घत्वस्य परिमाण-विशेषस्य सम्बन्धो नोपपद्यते तथाऽपि दीर्घकालसम्बन्धितयैव दीर्घत्वं बोध्यम्। अन्विच्छन्निति युगानुरूपं प्राक्तनकर्मानुरूपं च दीर्घमिच्छन्। तेनाव्यवस्थितं दीर्घत्वमिति चोद्यमपास्तम्। तत्र युगानुरूपमायुः सत्ये वर्षशतचतुष्टयं, त्रेतायां वर्षशतत्रयं, द्वापरे शतद्वयं, कलौ वर्षशतमेकं परमायुः। यदुक्तं भगवता **व्यासेन**—"पुरुषाः सर्वसिद्धार्थाश्चतुर्वर्षशता-युषः। कृते, त्रेतादिकेऽप्येवं पादशो ह्रसति क्रमात्॥" इति। एतच्च वर्ष-शतमायुः कलेः प्रथमत एव, कलेस्तु यथा यथा क्षयस्तथा तथा आयुः-क्षयोऽपि ज्ञेयः; तदुक्तं—"संवत्सरशते पूर्णे याति संवत्सरः क्षयम्। देहि-नामायुषः काले यत्र यन्मानमिष्यते॥" (वि० ३.२६) इति। संवत्सरशते

पूर्ण इति संवत्सरैः कृत्वा शततमे भागे पूर्ण इत्यर्थः। एतेन यावद्भिर्वर्षैः कलियुगं पूर्यते तद्भागशतं कृत्वा एकभागे पूर्णे एकसंवत्सरः क्षयं यातीत्यर्थः। प्राक्तनकर्मानुरूपं चायुर्नियतानियतभेदेन द्विविधं विमानस्थान एव ग्रन्थकारः स्वयमेव व्यवस्थापयिष्यतीति। 'उग्रतपा' इति विशेषणेन **भरद्वाजस्य** मानुषस्यापि तन्त्राभिगमनशक्तिः शरण्यत्वप्रतीतिश्चोपदर्शिता। न चोग्रतपस्त्वेनायुर्वेदमपि गुरुनिरपेक्षतया कथं न बुध्यत इति वाच्यं, तपसः प्रतिनियतशक्तिकत्वात् तथा गुरुमुखात् प्रतीतस्य चायुर्वेदस्य फलजनकत्वात्, तदुक्तं—"नामुखाद्गुरोरिति"। अथ कथं ब्रह्मादिषु पूर्वगुरुषु विद्यमानेषु इन्द्रसेवायामुपागमदित्याह—बुद्ध्वा शरण्यममरेश्वरमिति। यस्यादयममरो राजा, राजा हि प्रजारक्षणेऽधिकृत इति स एव शरण्यो न तु ब्रह्मादय इति बुद्ध्वा ॥३॥

ब्रह्मणा हि यथाप्रोक्तमायुर्वेदं प्रजापतिः।
जग्राह निखिलेनादावश्विनौ तु पुनस्ततः ॥४॥

अश्विभ्यां भगवाञ्छक्रः प्रतिपेदे ह केवलम्।
ऋषिप्रोक्तो भरद्वाजस्तस्माच्छक्रमुपागमत् ॥५॥

शिष्यपरम्परासञ्चारिणी विद्या ह्यसम्यग्ग्रहणादिदोषात् पात्रपरम्परासञ्चार्यमाणमधुवत् क्षीणापि सम्भाव्यतेऽतः प्रधानगुरोर्ब्रह्मण एव श्रवणं युज्यते तत्कथमिन्द्रमुपागमदित्यत आह—ब्रह्मणा हीत्यादि। हिशब्दो यस्मादर्थे। प्रजापतिर्दक्षः। यथेति यादृशं प्रकर्षेणोक्तं तादृशमेव। निखिलेनेत्यनवशेषेण जग्राह। अश्विनौ तु तत प्रजापतेर्जगृहतुः। अत्रापि यथाप्रोक्तं निखिलेनेति पदं योजनीयम्। अश्विभ्यां भगवान् शक्रः प्रतिपेदे अत्रापि यथाप्रोक्तमित्यादि योज्यम्। हशब्दोऽवधारणे, तेन प्रतिपेदे एव शक्रो नतु कस्मैचिदायुर्वेदं दत्तवानित्यर्थः। केवलमिति समग्रं, एतेन ब्रह्मणो यथायुर्वेदज्ञानं तथेन्द्रस्यापि, तेन ब्रह्मणो वायुर्वेदः श्रूयते इन्द्रतो वेति न कश्चिद्विशेषः; इन्द्रे त्विदमधिकं यदयमसङ्क्रामितविद्यत्वेन शिष्यार्थी, तस्माच्छक्रमेवोपागमदित्यर्थः। ऋषिप्रोक्त इति वक्ष्यमाणप्रकारेण ऋषिभिर्नियोजित इत्यर्थः ॥४–५॥

विघ्नभूता यदा रोगाः प्रादुर्भूताः शरीरिणाम्।
तपोपवासाध्ययनब्रह्मचर्यव्रतायुषाम् ॥६॥

तदा भूतेष्वनुक्रोशं पुरस्कृत्य महर्षयः।
समेताः पुण्यकर्माणः पार्श्वे हिमवतः शुभे ॥७॥

अथ येन प्रकारेण ऋषिभिः प्रोक्त इति दर्शयितुमायुर्वेदस्य मर्त्यलोकागमे हेतुमाह—विघ्नभूता इत्यादि। केषां विघ्नभूता इत्याह—तपोपवासेत्यादि। तपश्चान्द्रायणादि, उपवासलक्षणं यथा–"उपावृत्तस्य पापेभ्यः सहवासो गुणैश्च यः। उपवासः स विज्ञेयो न शरीरस्य शोषणम् ॥", ब्रह्मचर्यमुपस्थनिग्रहः, व्रतं शास्त्रविहितो नियमः। अत्र असिद्धविधेरनित्यत्वात् तोपपवासेति प्रयोगस्य साधुत्वं ज्ञेयम्, अन्ये तु अकारान्तस्तपशब्दोऽपि तपस्यावाचक इत्याहुः। अनुक्रोशमित्यनुकम्पाम्। पुरस्कृत्य आदृत्य, महर्षयः पुण्यां कथां चक्रुरिति वक्ष्यमाणेनान्वयः ॥६–७॥

अङ्गिरा जमदग्निश्च वसिष्ठः कश्यपो भृगुः।
आत्रेयो गौतमः साङ्ख्यः पुलस्त्यो नारदोऽसितः ॥८॥

अगस्त्यो वामदेवश्च मार्कण्डेयाश्वलायनौ।
पारिक्षिर्भिक्षुरात्रेयो भरद्वाजः कपिञ्जलः ॥९॥

विश्वामित्राश्मरथ्यौ च भार्गवश्च्यवनोऽभिजित्।
गार्ग्यः शाण्डिल्यकौण्डिन्यौ वार्क्षिदेवलगालवौ ॥१०॥

साङ्कृत्यो वैजवापिश्च कुशिको बादरायणः।
बडिशः शरलोमा च काप्यकात्यायनावुभौ ॥११॥

काङ्कायनः कैकशेयो धौम्यो मारीचकाश्यपौ।
शर्कराक्षो हिरण्याक्षो लोकाक्षः पैङ्गिरेव च ॥१२॥

शौनकः शाकुनेयश्च मैत्रेयो मैमतायनिः।
वैखानसा वालखिल्यास्तथा चान्ये महर्षयः ॥१३॥

ब्रह्मज्ञानस्य निधयो दमस्य नियमस्य च।
तपसस्तेजसा दीप्ता हूयमाना इवाग्नयः ॥१४॥

सुखोपविष्टास्ते तत्र पुण्यां चक्रुः कथामिमाम्।

के ते महर्षय इत्याह—अङ्गिरा इत्यादि। भिक्षुरित्यात्रेयविशेषणं, वक्ष्यति हि—"तन्नेति भिक्षुरात्रेयः" (सू० २५.२४) इति। च्यवन इत्यपि भार्गवस्य, तत एव च वक्ष्यति—"लेहं वा भार्गवप्रोक्तं" इति। वैखानसा इति कर्मविशेषप्रयुक्ता संज्ञा। निधय इव निधयः अक्षयस्थानत्वात्। दम इन्द्रियनिग्रहः। इमामिति वक्ष्यमाणामेव कथां दर्शयति ॥८–१४॥–

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ॥१५॥
रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च।
प्रादुर्भूतो मनुष्याणामन्तरायो महानयम् ॥१६॥
कः स्यात्तेषां शमोपाय इत्युक्त्वा ध्यानमास्थिताः।
अथ ते शरणं शक्रं ददृशुर्ध्यानचक्षुषा ॥१७॥
स वक्ष्यति शमोपायं यथावदमरप्रभुः।

धर्मार्थेत्यादि। मूलमिति प्रधानकारणम्। तस्येत्यारोग्यस्य धातुसाम्यरूपस्य। श्रेय इति जीवितविशेषणं, तेन सुखं हितं च यदायुस्तद्गृह्यते, असुखमहितं चायुः प्रतिक्षिप्यते। एतच्चतुर्विधमायुरर्थेदशमहामूलीये वक्ष्यति। किंवा, श्रेयःशब्देन धर्मादयोऽभिधीयन्ते, जीवितशब्देन च जीवितमात्रमिति। अन्तराय इति धर्मादिसाधने। अयमिति रोगप्रादुर्भावः। तेषामिति रोगाणाम्। अथेति ध्यानाश्रयणानन्तरम्। अथ किं शक्रः प्रभावादेव रोगानभिभविष्यति, उत रोगोपशपोपायोपदेशकत्वेनेति सन्दिहानं प्रत्याह—स च वक्ष्यतीत्यादि ॥१५–१७॥–

कः सहस्राक्षभवनं गच्छेत् प्रष्टुं शचीपतिम् ॥१८॥
अहमर्थे नियुज्येऽयमत्रेति प्रथमं वचः।
भरद्वाजोऽब्रवीत्तस्मादृषिभिः स नियोजितः ॥१९॥
स शक्रभवनं गत्वा सुरर्षिगणमध्यगम्।
ददर्श बलहन्तारं दीप्यमानमिवानलम् ॥२०॥
सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम्।
प्रोवाच विनयाद्धीमानृषीणां वाक्यमुत्तमम् ॥२१॥
व्याधयो हि समुत्पन्नाः सर्वप्राणिभयङ्कराः।
तद्ब्रूहि मे शमोपायं यथावदमरप्रभो ॥२२॥
तस्मै प्रोवाच भगवानायुर्वेदं शतक्रतुः।
पदैरल्पैर्मतिं बुद्ध्वा विपुलां परमर्षये ॥२३॥

अथ तेषु मध्ये **भरद्वाज** एव कथमृषिभिर्न्नियोजित नान्य इत्याह—कः सहस्राक्षभवनमित्यादि। शचीपतिमित्यनन्तरमिति प्रश्ने इति शेषः। इतिशब्दो यस्मादर्थे, शचीपतिं प्रष्टुं कः सहस्राक्षभवनं गच्छेदिति प्रश्ने यस्माद्भरद्वाजः प्रथमं वचोऽब्रवीत् तस्मादित्यर्थः। किं तद्वच इत्याह—अहमित्यादि। अत्रार्थ इति प्रकृतप्रयोजने इन्द्राभिगमनरूपे, नियोजित इति चौरादिको णिच्, स्वार्थे। जयाशीर्भिरिति जयशब्दपूर्विकाभिराशीर्भिरित्यर्थः। अत्र **भरद्वाजस्य** इन्द्रप्रश्नादि न दर्शितं ग्रन्थविस्तरभयात्।

कस्मात्पदैरल्पैरुक्तवानित्याह—विपुलाम्मतिं बुद्ध्वेति। विपुलामिति महतीं, महत्त्वं च बुद्धिगुणयोगात्, तदुक्तं—"शुश्रूषा श्रवणं चैव ग्रहणं धारणन्तथा। ऊहापोहासु विज्ञानं तत्त्वज्ञानं च धीगुणाः॥" इति ॥१८-२३॥

हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम्।
त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः॥२४॥

कीदृशोऽयमायुर्वेदो यमिन्द्रः प्रोवाचेत्याह—हेतुलिङ्गौषधज्ञानमित्यादि। हेतुलिङ्गौषधानि ज्ञायन्ते सम्यगवबुध्यन्तेऽनेनेति, करणे ल्युट्। एतेन हेतुलिङ्गौषधान्यत्र प्रपञ्चेनाभिधेयानीति दर्शितं, सम्यग्ज्ञानस्य प्रपञ्चाभिधानमन्तरेणासम्भवात्। तथा स्वस्थातुरयोः परायणमभीष्टं स्वस्थानुवृत्तिव्याधिहरणोपायत्वात्, 'परायणमभीष्टे स्यादिति' **मेदिनिः।** किंवा परममयनमुत्कृष्टो मार्गः। त्रिसूत्रमिति—त्रीणि हेत्वादीनि सूत्र्यन्ते समासेनोच्यन्तेऽनेनेति त्रिसूत्रम्। एवं च हेतुलिङ्गौषधज्ञानमित्यनेन सहास्य न पौनरुक्त्यं, समासव्यासाभिधानं च शास्त्रगुण इति, उक्तं हि—"ते वै विधयः सुसंगृहीताः भवन्ति येषां समासो व्यासश्चेति"; अन्ये तु—सूत्र्यते सूच्यते वाऽर्थोऽनेनेति सूत्रं वाक्यं, पूर्वपक्षसिद्धान्ताधिकारभेदेन त्रिविधं सूत्रं यस्मिस्तत्त्रिसूत्रम्। तत्र पूर्वपक्षसूत्रं यथा—"नैतानि भगवन्! पञ्च कषायशतानि पूर्यन्ते (सू० ४.२१) इत्यादि। सिद्धान्तसूत्रं यथा—"एकोऽपि ह्यनेकां संज्ञां लभते" (सू० ४.२२) इत्यादि। अधिकारसूत्रं तु यत्र (नैवं) पूर्वपक्षो नापि प्रतिवचनं केवलमधिकृतार्थप्रतिपादकमित्याहुः। अपरे तु—यथा ब्रह्मा त्रिसूत्रं बुबुधे यथा चेन्द्रो हेतुलिङ्गौषधज्ञानं प्रोवाच तथैव **भरद्वाजो**ऽपि त्रिस्कन्धं तं बुबुध इत्येवंवचनादायुर्वेदस्याविप्लुत आगमस्तपदिश्यते तेन नैतेषु पौनरुक्त्यमिति ब्रुवते। शाश्वतमिति नित्यम्। **ब्रह्मदेवस्तु** शाश्वतलोकप्राप्तिहेतुत्वेन शाश्वतमित्याचष्टे। **अरुणस्तु** शाश्वतो मोक्षः, तद्धेतुत्वेन शाश्वतमित्याह। पुण्यमिति पुण्यजनकत्वात्। ननु ब्रह्मरचितस्यायुर्वेदस्य कथं नित्यत्वमित्यत आह—बुबुधे यं पितामह इति। पितामहो ब्रह्मा यं बुबुधे ज्ञातवान् न तु चकारेत्यर्थः॥२४॥

सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामतिः।
यथावदचिरात् सर्वं बुबुधे तन्मना मुनिः॥२५॥

तेनायुरमितं लेभे भरद्वाजः सुखान्वितम् ।
ऋषिभ्योऽनधिकं तच्च शशंसानवशेषयन् ॥२६॥

इन्द्रोपदिष्टमायुर्वेदं **भरद्वाजोऽपि** यथावद्गृहीतवानित्याह—सोऽनन्तपारमित्यादि । आयुर्वेदप्रतिपाद्यस्यार्थस्यातिविस्तरत्वेनानन्तोऽनवधि· पारोऽवसानं यस्य स तथा, 'पारं परतटे प्रान्ते' इति हि **मेदिनिः** । अन्ये तु अविद्यमानावन्तपारौ यस्य स तथा, पारशब्देन च गोबलीवर्दन्यायेनादिरुच्यते; किंवा अनन्तो मोक्षः पारमुत्कृष्टं फलं यस्येत्याहुः । ननु यस्मादायुर्वेदोऽयमनन्तपारः तर्हि कथं सर्वं बुबुध इत्यत आह—महामतिरिति । त्रिस्कन्धमिति—त्रयो हेत्वादयः स्कन्धा अवयवा यस्य तं त्रिस्कन्धम् । एतेन तत्तदवान्तरभेदप्रभेदाभ्यामसंख्यमप्यभिधेयजातमत्रैवान्तर्भवतीति दर्शयति । तथा हि हेतुरूपेऽवयवेऽनन्तानामेव व्याधिजनकानां भावानामन्तर्भावः; तथा व्याधेरारोग्यस्य च दुःखसुखहेतुत्वेन तथा शरीरस्य तथाऽऽयुषश्च व्याध्यादिहेतुत्वेन हेतावन्तर्भावः, लिङ्गे च तावद्दोषदूष्यसंसर्गादिभेदेन बहुविधानामेव व्याधिलिङ्गानां तथारोग्यलिङ्गस्य चोपग्रहः औषधे च सर्वस्यैवाहारविहारस्य पथ्यरूपस्यान्तर्भावः । महामतेरप्यन्यमनस्कस्यार्थतत्त्वज्ञानं न भवतीत्यत उक्तं तन्मना इति । तस्मिन्नायुर्वेदार्थे मनो यस्य स तथा; एतेन यद्यप्यनन्तपारोऽयमायुर्वेदः तथाऽपि यस्मादयं महामतिः तन्मनाश्च तेन हेत्वादिस्कन्धत्रयमालम्बनं कृत्वाऽचिरादेव यथावदायुर्वेदं प्रतिपन्नवानित्यर्थः । तेनेति यथावद्बुद्धेनायुर्वेदेनायुर्लेभे तद्विहितार्थानुष्ठानादिति भावः । तच्चेति तदायुर्वेदशास्त्रं, तञ्चेति पाठे आयुर्वेदमित्यर्थः । अनवशेषयन्निति कात्स्न्येनेत्यर्थः ॥२५–२६॥

ऋषयश्च भरद्वाजाज्जगृहुस्तं प्रजाहितम् ।
दीर्घमायुश्चिकीर्षन्तो वेदं वर्धनमायुषः ॥२७॥

महर्षयस्ते ददृशुर्यथावज्ज्ञानचक्षुषा ।
सामान्यं च विशेषं च गुणान् द्रव्याणि कर्म च ॥२८॥

समवायं च तज्ज्ञात्वा तन्त्रोक्तं विधिमास्थिताः ।
लेभिरे परमं शर्म जीवितं चाप्यनित्वरम् ॥२९॥

तेनेति **भरद्वाजाद्**गृहीतेनायुर्वेदेन, कीदृशेन ज्ञानार्थं चक्षुषा नेत्रस्वरूपेण वस्तुतत्त्वपरिचायकत्वात्, किं ददृशुरित्याह—सामान्यमित्यादि ।

यद्यपि गुणाश्रयतया द्रव्यं प्रधानमिति गुणात्प्राग्द्रव्यस्यैव निर्देशो युक्तः अत एवोद्देशप्रकरणे खादीनीत्यादिना द्रव्योद्देशमेव प्रथमं करिष्यति तथाऽपि गुणानादौ निर्दिशता गुणानामेव रसादीनां प्रायः शास्त्रे कार्मुकत्व-मुपदिश्यत इति बोधनार्थं प्राङ्‌निर्देशो बोध्य इति। अनेन च सामान्यं चेत्यादि ग्रन्थेन निखिलपदार्थज्ञानमेव तेषामायुर्वेदप्रसादाज्जातमित्युक्तम्। तन्त्रोक्तं विधिमिति—अहितपरिहारहितोपादानरूपम्। एतच्च हिताहित-ज्ञानं सामान्यादिज्ञानाधीनमित्युत्तरत्र सर्वदा सर्वभावानामित्यादिना ग्रन्थेन स्फुटीभविष्यति। अनित्वरमित्यगत्वरम् ॥२७-२९॥

अथ मैत्रीपरः पुण्यमायुर्वेदं पुनर्वसुः।
शिष्येभ्यो दत्तवान् षड्भ्यः सर्वभूतानुकम्पया ॥३०॥
अग्निवेशश्च भेल(ड)श्च जतूकर्णः पराशरः।
हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः ॥३१॥

इदानीं **भरद्वाजशिष्य आत्रेयोऽग्निवेशादि**भ्यस्तमायुर्वेदं ददावित्याह—अथेत्यादि। मैत्री सर्वभूतेष्वात्मनीव बुद्धिः। पुनर्वसुरि**त्यात्रेयस्य** च नामान्तरम्; अत्र केचित् **वाग्भटे**—"ब्रह्मा स्मृत्वाऽऽयुषो वेदं प्रजापतिम-जिग्रहत्। सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान्मुनीन् ॥" (अ० हृ० सू० १.३) इत्यनेना**त्रेयस्य** इन्द्रशिष्यत्वमुक्तमिति दृष्ट्वा यश्**चात्रेयः** स एव **भरद्वाजः** इत्येकस्यैव संज्ञाद्वयं मन्यन्ते, तन्न, **भरद्वाज**संज्ञया **आत्रेयस्य** क्वचिदपि तन्त्रेऽकीर्तनात्; हारीते चात्रेयादिगुरुतया **भरद्वाजस्योक्तत्वात्। वाग्भटवचनन्तु** आयुर्वेदसमुत्थानीये च रसायनपादे आदिशब्देन वक्ष्यमा-णेन्द्रशिष्यतायोगात् समर्थनीयम्। तत्र हीन्द्रेण पुनर्महर्षीणामायुर्वेद उपदिष्ट इति वक्तव्यम्। के ते षट् इत्याह—अग्निवेशश्चेत्यादि ॥३०-३१॥

बुद्धेर्विशेषस्तत्रासीन्नोपदेशान्तरं मुनेः।
तन्त्रस्य कर्ता प्रथममग्निवेशो यतोऽभवत् ॥३२॥
अथ भेला(डा)दयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च।
श्रावयामासुरात्रेयं सर्षिसङ्घं सुमेधसः ॥३३॥
श्रुत्वा सूत्रणमर्थानामृषयः पुण्यकर्मणाम्।
यथावत्सूत्रितमिति प्रहृष्टास्तेऽनुमेनिरे ॥३४॥
सर्वे एवास्तुवंस्तांश्च सर्वभूतहितैषिणः।
साधु भूतेष्वनुक्रोश इत्युच्चैरब्रुवन् समम् ॥३५॥

तं पुण्यं शुश्रुवुः शब्दं दिवि देवर्षयः स्थिताः ।
सामराः परमर्षीणां श्रुत्वा मुमुदिरे परम् ॥३६॥
अहो साध्विति निर्घोषो लोकांस्त्रीनन्ववादयत् ।
नभसि स्निग्धगम्भीरो हर्षाद्भूतैरुदीरितः ॥३७॥
शिवो वायुर्ववौ सर्वा भाभिरुन्मीलिता दिशः ।
निपेतुः सजलाश्चैव दिव्याः कुसुमवृष्टयः ॥३८॥
अथाग्निवेशप्रमुखान् विविशुर्ज्ञानदेवताः ।
बुद्धिः सिद्धिः स्मृतिर्मेधा धृतिः कीर्तिः क्षमा दया ॥३९॥
तानि चानुमतान्येषां तन्त्राणि परमर्षिभिः ।
भावाय भूतसङ्घानां प्रतिष्ठां भुवि लेभिरे ॥४०॥

बुद्धेर्विशेष उत्कर्षः । यत इति बुद्धेर्विशेषात्, कृतानि चेति तन्त्राणीति सम्बन्धः । सर्वभूतहितैषिण इति तानित्यस्य विशेषणम्, तानित्यग्निवेशादीन् । साधुशब्दोऽयमजहल्लिङ्गतया नपुंसकलिङ्ग एव यथा वेदाः प्रमाणमिति केचित्; अन्ये तु साधुशब्दोऽयमव्ययोऽप्युक्त इत्याहुः । अहो साध्विति प्रशंसायाम् । स्निग्ध इत्यनुत्कटत्वेनाह्लादकत्वेनौपचारिकः प्रयोगः । अथेति तन्त्रकरणानन्तरम् । ज्ञानदेवता इति ज्ञानाधिष्ठात्र्यो देवताः । तेन ग्रन्थकरणात् पूर्वमग्निवेशादीनां बुद्ध्यादयो व्यवस्थिता एवं तन्त्रकरणानन्तरन्तु पुण्यातिशयेन बुद्ध्यादिदेवानुप्रवेश इति । बुद्धिरध्यवसायात्मकं ज्ञानम् । सिद्धिः साध्यसाधनं ज्ञानम्, अन्ये तु अणिमादिसिद्धिजनकं ज्ञानं सिद्धिरित्याहुः । मेधा धारणावती बुद्धिः । धृतिरिति मनोनियमनं, धृतिहेतुज्ञानं धृतिरित्यर्थः । कीर्तनं कीर्तिः, वचनमिति यावत्, वक्तुं ज्ञानमित्यर्थः । क्षमा शान्तिः, तृष्णोपशम इति यावत्, अत्रापि क्षमाजनकं ज्ञानं क्षमेत्यर्थः । भावायेति रोगादुपहतजीवितस्थितये । प्रतिष्ठां गौरवम् ॥३२–४०॥

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥ ४१ ॥

अयं चायुर्वेदशब्दो न मण्डपादिवत् रूढिमात्रपुरस्कारेण वर्तते किं तर्हि योगोऽप्यस्तीति दर्शयति—हिताहितमित्यादि । हितं च अहितं च हिताहितं, तथा सुखयुक्तत्वात् सुखं, दुःखयुक्तत्वाच्च दुःखं; एतच्चतुर्विधमप्यायुरर्थेदशमहामूलीये प्रपञ्चनीयम् । तस्य हिताहितमित्यायुषः पथ्या-

पथ्यम् । मानञ्चेत्यायुष एव प्रमाणं, तच्चेन्द्रियस्थाने वक्ष्यमाणम् । तच्चेत्यायुःस्वरूपं, तेन 'हिताहितत्वादिना आयुर्वेदयतीति आयुर्वेद' इत्युक्तं भवति । एतेन निरुक्तिद्वारा आयुर्वेदाभिधेयमपि दर्शितं, न त्वायुर्वेदयतीत्यायुर्वेद इत्युक्तम् ॥ ४१ ॥

शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम् ।
नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते ॥ ४२ ॥

अत्रायुःस्वरूपं किमिति जिज्ञासायामाह—शरीरेन्द्रियेत्यादि । सत्त्वं मनः । यद्यपि शरीरग्रहणेन इन्द्रियाणि लभ्यन्ते, इन्द्रियग्रहणेन च मनः, तथाऽपि तेषां प्राधान्यख्यापनार्थं भेदेनोपादानम् । अयं च संयोगः संयोगिनः शरीरस्य पाकपरावर्तमानस्य क्षणिकत्वेन यद्यपि क्षणिकः तथाऽपि सन्तानव्यवस्थितोऽयमेकतयोच्यते । **वैशेषिके**ऽप्यात्मविशेषगुणजनकमनःसंयोगो जीवितमित्युक्तम् । शरीरेन्द्रियेत्यादिनाऽप्युक्तरूपसंयोगस्यात्मविशेषगुणजनकत्वेनार्थभेदोऽपि नास्तीति ज्ञेयम् । शास्त्रे व्यवहारार्थं लक्षणार्थं च तस्यायुषः पर्यायानाह—धारीत्यादि । यत्पुनश्चैतन्यानुवृत्तिरायुरित्यर्थेदशमहामूलीये वक्ष्यति तेनापि चैतन्यस्यानुवृत्तिर्यस्मादिति बहुव्रीहिणा कार्यकारणयोरभेदाद्वा (आयू)रूपः शरीरादिसंयोग एवोच्यते इति नार्थभेदः शङ्कनीयः ॥ ४२ ॥

तस्यायुषः पुण्यतमो वेदो वेदविदां मतः ।
वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितम् ॥४३॥

तस्येत्यादि । वेदयतीति वेदः । पुण्यतमत्वादेव वेदविदां पूजितः । पुण्यतमत्वे हेतुमाह—वक्ष्यत इत्यादि । यदिति यस्मादर्थे, ऋग्वेदादयः प्रायः परलोकहितमेवार्थं वदन्ति तेन पुण्याः पुण्यतराश्च, अयञ्चायुर्वेदो यस्मादुभयोरपि लोकयोर्हितमारोग्यसाधनं धर्मसाधनं च वक्ष्यते, तेनातिशयेन पुण्यः पुण्यतम इत्यर्थः । वक्ष्यत इति ब्रूञः प्रयोगः । अत्र केचिद्वदन्ति—अस्मिन् शास्त्रे रोगिवृत्ते स्वस्थवृत्ते च तत्र तत्र मांसोपदेशात् हिंसोपदिश्यते, हिंसामन्तरेण मांसोपयोगासम्भवात्, हिंसा चाधर्महेतुत्वेन निरयहेतुः, तत्कथं परलोकहितं शास्त्रमिदमिति ? न च स्वयंमृतानां मांसोपयोगो युक्तस्तस्य निषिद्धत्वात्; तदुक्तं—"स्वयंमृतं नाददीत पुंपापजनकं हि तदिति ।" अत्र केचित् समादधते—विहिता हिंसा नाधर्मजनकं किन्त्वविहितहिंसैव, तेन यथा वेदेऽग्नीषोमीयं पशुमालभेतेत्यादौ विहितहिंसा

परित्यज्य हिंसान्तरस्याधर्महेतुत्वं तद्वदत्राप्यायुर्वेदे स्वस्थातुरहितत्वेन विहितं यन्मांसं तदर्थक्रियमाणहिंसाव्यतिरेकेणैव हिंसाया अधर्मजनकत्वं व्यवस्थाप्यते वेदविहितत्वस्य हेतोरुभयत्रापि तुल्यत्वात्। तच्च न मनोरमम्, आयुर्वेदविहितत्वेनैव धर्मजनकत्वे तन्निषिद्धत्वेन वा अधर्मजनकत्वे पथ्यापथ्याचरणयोरपि धर्माधर्महेतुत्वप्रसङ्गात्। तस्मादारोग्यसम्पादनमिह मुख्यं प्रयोजनम्। तच्चारोग्यसाधनं यद्यधर्मफलकमपि तथाऽपि भूरिश्रेयश्चतुर्वर्गमूलारोग्यसाधकतया इहोपादेयमिति लोकद्वयहितत्वं न विरुध्यते; उच्यते हि—"भूरिश्रेयसामर्थेऽल्पीयसां पापीयसामारम्भ" इति; अथवा भवत्वायुर्वेदस्य सर्वथा वेदरूपतया तद्विधिवाक्यानां धर्मोपदेशकत्वं तथाऽपि नात्र हिंसा विधीयते सद्यस्कादिगुणवन्मांसभक्षणं हि रागत एव प्रवृत्तं तच्चारोग्यसाधनतया विधीयते। कामाद्यलब्धो ह्यर्थो विधिविषयः, न हि श्येनेनाभिचरन् यजेतेत्यत्राऽप्यभिचारे विधिविषयतया धर्महेतुत्वमिति। तथा स्वयमकृतायामपि हिंसायां व्याधैः स्ववृत्त्यर्थकृतहिंसोपकृतमांसेनापि भक्षणमुपपद्यते। तस्मादत्र हिंसायाः भूरिश्रेयःसाधकारोग्यहेतुतया उपदेशो न दोषमावहति। अनया दिशाऽभक्ष्यमांसभक्षणोपदेशविरोधोऽपि समाधेयः। **सांख्येऽप्युक्तं**—क्रतूपकारार्थं हिंसा स्वयमधर्महेतुः हिंसोपकृतस्तु क्रतुरभीष्टस्वर्गादिफल इति, **वाचस्पतिमिश्रै**रप्युक्तं भविष्यति हिंसा प्रत्यवायहेतुः क्रतोश्चोपकरिष्यतीति को विरोध इति ॥४३॥

सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्।
ह्रासहेतुर्विशेषश्च, प्रवृत्तिरुभयस्य तु ॥ ४४ ॥

नन्वायुर्वेदाभिधेयतया हेतुलिङ्गौषधान्येव प्रस्तुतानि न च सामान्यविशेषौ हेत्वादीनामन्यतमौ तत्कथं तयोरुपदेश इति शिष्यजिज्ञासायां तयोर्वृद्धिह्रासहेतुत्वं क्रमेणोपपादयन्नाह—सर्वदेत्यादि। सर्वदा नित्यगे चावस्थिके च काल इत्यर्थः। सर्वभावानां सामान्यं वृद्धिकारणमित्यन्वयः। भवन्ति सत्तामनुभवन्तीति भावाः द्रव्यगुणकर्माणि, न तु भवन्ति उत्पद्यन्त इति भावाः; तथा सति पृथिव्यादिपरमाणूनां नित्यानां सामान्यस्य पार्थिवद्व्यणुकादिवृद्धं कार्यमसंगृहीतं स्यादिति केचित्। वस्तुतस्तु भवन्ति उत्पद्यन्त इत्युक्तेऽपि भावपदस्य उत्पत्तिमदितिपदार्थविभावकोपाधिमति तात्पर्यं तेन नित्यानित्यरूपपृथिवीग्रहणान्न प्रागुक्तदोष इत्यवधेयम्। किंवा, सामान्यं सर्वभावानां वृद्धिकारणमिति योज्यं, भवन्ति उत्पद्यन्त इति भावा अनित्यपदार्थाः, तेन सामान्यं सर्वेषामनित्यपदार्थानां वृद्धिकारणं

न तु नित्यानां, एवं च नित्यानित्यवृत्तिपृथिवीपरमाणुनिष्ठपृथिवीत्वसामान्यस्य पार्थिवद्व्यणुकवृद्धिं प्रति कारणत्वं चाव्याहतमेवेति न कश्चिद्दोषः। वृद्धिराधिक्यम्, एतच्च सामान्यं सामान्यवतो मांसद्रव्यादेर्वृद्धिकारणस्य लक्षणत्वेन वृद्धिकारणमित्युच्यते। यतो न सामान्यं मांसत्वादिरूपं वृद्धौ कारणं भवति, तथा सति सामान्यं मांसत्वादिरूपं यथा वर्धके भोज्यरूपे मांसेऽस्ति तथा शरीरधातुरूपे वर्धनीये मांसेऽप्यस्ति, ततश्च नित्यं मांसत्वसंबन्धादमांसादानामपि मांसेन वर्धितव्यं; तस्माद्वृद्धिकारणलक्षणत्वे सामान्यं वृद्धिकारणमित्युक्तम्। अत एव **भाष्ये**ऽप्युक्तं[1]—"त्रयाणामकार्यत्वमकारणत्वं च"—इति। त्रयाणामिति सामान्यविशेषसमवायानाम्। ये तु समानमेव सामान्यमिति कृत्वा द्रव्याद्येव सामान्यशब्देनाभिदधति तेषां मते "सामान्यं च विशेषं च" इत्यादिग्रन्थोक्तसामान्यस्य न किंचिदनेनोक्तं स्यादित्यसम्बद्धार्थत्वं[2] प्रकरणस्य स्यादिति। एतच्च वृद्धिकारणत्वं सामान्यस्य लक्षणं, किन्त्वायुर्वेदोपयोगिना धर्मेण निर्देशलक्षणं पुनरग्रे वक्ष्यति। एतच्च सामान्यस्य वृद्धिकारणत्वं असति विरोधिकारणे बोध्यं, तेनामलकगतमम्लत्वादिकं पित्तगताम्लत्वादि न वर्धयति तद्गतशीतत्वप्रभावस्य विरोधित्वादिति। एवमन्यत्रापि त्रिदोषहरादिद्रव्ये बोध्यम्। इह च सामान्यस्य वृद्धिविशेषं प्रत्येव कारणत्वं, वृद्धिमात्रकारणत्वे हि घृताद्वह्निमेधयोर्वृद्धिर्नोपपद्यते सामान्याभावात्, उक्तं—घृतमग्निमेधे करोति' तथा चिन्तया वातवृद्धिः, तथा वृष्यपादलेपाच्छुक्रवृद्धिरित्यादि, एषा च वृद्धिः प्रभावेनैव क्रियते। अन्ये त्वाहुः—द्विविधं हि सामान्यम्—उभयवृत्ति तथैकवृत्ति चेति;[3] मांसत्वं पोष्यपोषकगतत्वादुभयवृत्ति, एकवृत्ति तु यथा—घृतमग्निकरं तथा धावनादिकर्म वातकरं, आस्यादि श्लेष्मकरं; एतद्धि सर्वं न वर्धनीयेन सामान्यं किन्तु प्रभावाद्वर्धकं, प्रभावश्च घृतत्वधावनत्वादिः स चैकवृत्तिसामान्यरूपः। तेनात्रापि सामान्यं वृद्धिकारणम्। अस्मिंस्तु पक्षेऽनुभयवृत्तिसामान्यस्य विशेषाद्भेदो दुरुपपादः, तथा च समानमसमानं च वृद्धिकारणं भवतीति न किंचित्सामान्यस्योक्तं स्यादिति। अस्मन्मते तु सामान्यं वृद्धिकारणत्वेन नियम्यते न तु वृद्धिः सामान्यकारणिकैवेति, तेनासमानादपि वृद्धिः प्रभावाद्भवतीति निर्दोषेति।

---

१. वैशेषिके [1]

२. सम्बन्धार्थत्वं [1]

३. तत्र मांसं मांसवर्धकं, उभयवृत्तिसामान्यात् [1]

नन्वेवमावश्यकत्वाल्लाघवाच्च सर्वत्र प्रभाव एव वृद्धिकारणतया कल्पतां किं सामान्येनेति चेत्, अत्राहुः—न हि सामान्यं वस्तुगत्या वृद्धिकारणं किंतर्हि कारणतावच्छेदकमेव। यत्पुनर्वृद्धिकारणमित्युच्यते तद्वृद्धिकारणस्य मांसादेर्लक्षणत्वेनेत्युक्तमेव तेन द्रव्यगुणकर्मणामेव समानानां वृद्धिकारणत्वे व्यवस्थिते यत्रासमानेभ्योऽपि वृद्धिर्दृश्यते तत्रैव गत्यन्तराभावात् प्रभावकल्पना प्रामाणिकी विकृतिविषमसमवायान्यथानुपपत्तिकल्पनीयत्वात् प्रभावस्य, यदुक्तं—"रसादिसाम्ये यत्कर्म विशिष्टं तत् प्रभावजम्।" (अ. हृ. सू. ९.२६) इति। प्रकृतिसमसमवायस्थले तु दृष्टसामग्रीत एव कार्योत्पत्तौ न प्रभावकल्पना मानाभावात्, तथा सर्वतन्त्रसिद्धान्तानां रसवीर्यविपाकानामप्यपलापप्रसङ्गात्; तस्माद्द्रव्यादित्रयं क्वचित् सामान्यमवलम्ब्य, क्वचित् विशेषमवलम्ब्य, क्वचिच्च प्रभावमवलम्ब्य कार्यविशेषान् जनयतीति सिद्धम्। ननु मांसादि द्रव्यत्वसामान्याद्वायुं कथं न वर्धयति ? अत्र कश्चित् मांसे स्निग्धत्वादिगुण एव वातप्रतिबन्धक इति सदपि साामन्यं न वर्धयति असति प्रतिबन्धके सामान्यं वृद्धिकारणमित्युक्तमेव, मांसत्वरूपो विशेषस्तु वायुं क्षपयति प्रतिबन्धकाभावादिति प्रतिबन्धकभावाभावौ फलबलगम्याविति व्याचष्टे। वस्तुतस्तु वृद्धिकारणलक्षणत्वेन सामान्यं वृद्धिकारणमित्युक्तम्। न हि मांसस्य द्रव्यत्वं लक्षणमतिव्यापकत्वात् किंतर्हि मांसत्वमेवेति न मांसगतद्रव्यत्वसामान्यकृता वायुवृद्धिराशङ्कनीयेति। एवं वक्ष्यमाणे विशेषेऽपि व्याख्येयम्। विशिष्यन्ते व्यावर्तन्ते पदार्था एभिरिति विशेषा व्यावर्तकधर्माः, ते च द्विविधाः—एके नित्यद्रव्यमात्रवृत्तयोऽन्त्या इत्यन्ते अवसाने भवन्तीत्यन्त्याः, यतो न व्यावर्तकान्तरमस्तीत्यर्थः; उत्पादविनाशयोरन्तेऽवसाने भवन्तीत्यन्तानि नित्यद्रव्याणि तेषु भवन्तीत्यन्त्या इत्यन्ये। एते हि विशेषरूपा एव व्यावृत्तिमात्रहेतुत्वात् न तु सामान्यरूपा अपि; अपरे तु अनुवृत्तेर्हेतुत्वेन सामान्यरूपा विशेषरूपाश्च; तदुक्तं **भाष्ये**—"तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सविशेषाख्यामपि लभते" इति। तत्रान्त्यविशेषाणामिह शास्त्रे चिकित्सायामनुपयोगात्तानुपेक्ष्य सामान्यविशेषरूपानेव विशेषान् ह्रासकारणत्वेनाह—ह्रासहेतुर्विशेषश्चेति। चकारादत्रापि सर्वदा सर्वभावानामिति पूर्ववद्योज्यम्। ह्रासोऽपचयः। गवेधुको हि गवेधुकत्वेन गवेधुकव्यक्त्यन्तरापेक्षया समानो, मांसापेक्षया व्यावृत्तत्वाद्विशेषः, न हि मांसे गवेधुकत्वमस्ति; अतो गवेधुको मांसह्रासहेतुः। अत्रापि ह्रासहेतुत्वं ह्रासहेतुद्रव्यादिलक्षणत्वेन सामान्यवज्ज्ञेयं; तथा ह्रासहेतुत्वमप्य-

सति विरोधके सामान्यवज्ज्ञेयं, तेन मन्दकलिकुचादीनां वातादिविरुद्ध-स्निग्धत्वादियोगेऽपि वाताद्यशमकत्वं द्रव्यस्यापथ्यत्वप्रभावादेव ज्ञेयम्। एवं अन्यत्राप्येवंजातीये व्याख्येयम्। विशेषश्चेह विरुद्धविशेषोऽभिप्रेतः; येनोत्तरत्र विरुद्धविशेषमेव ह्रासकारणतया तत्र तत्रोपदेक्ष्यति; यथा— "वृद्धिः समानैर्भावानां विपरीतैर्विपर्ययः" (अ० हृ० सू० १.१४) तथा "विपरीतगुणैर्देशमात्राकालोपपादितैः" (सू० १.६२) इत्यादि, तथा "विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति" (सू० १.५९), **जतूकर्णेऽपि**— "समानैः सर्वभावानां वृद्धिर्ह्रानिर्विपर्ययात्" इति। अविरुद्धविशेषस्तु न ह्रासे नापि वृद्धौ कारणं, यथा[1] अनुष्णाशीतः स्पर्शो वातस्य शैत्यं न वर्धयति नापि ह्रासयति, तथाऽपि स्वाग्निक्षीयमाणानां धातूनामसमानत्वेना-जनकत्वाद्ध्रासकारणमिव भवति; यतोऽसमानद्रव्योपयोगे ह्रासो विनश्वराणां भावानामापूरकहेत्वभावात् प्रत्यक्षसिद्ध एव; यथा—वहतो जलस्य पूर्वदेशसेतुना उत्तरजलस्य ह्रासः। अत एव मांसं शोणितादीन् प्रति अविरुद्धविशेषत्वेन न तथा ह्रासकारणं गुणसामान्यात्तु शोणितादीनां वर्धकमपि भवतीति ज्ञेयम्। आचार्येण पुनरविरुद्धविशेषोपयोगेऽप्येवंभूतं ह्रासं पश्यता सामान्यत एवोक्तं—ह्रासहेतुर्विशेष इति। ननु यदि सामान्यविशेषौ वृद्धि-ह्रासहेतुभूतौ तर्हि मांसादिशरीरधातुषु सर्वदा सामान्यविशेषयोः सत्त्वात्समानस्य मांसादेर्विशिष्टस्य च गवेधुकादेरनुपयोगेऽपि वृद्धिह्रासौ कुतो न स्यातामित्याह—प्रवृत्तिरुभयस्येति। सामान्यविशेषाभ्यां वृद्धौ ह्रासे च कर्त्तव्ये उभयस्येति सामान्यवतो विशेषवतश्च प्रवृत्तिरुपयोगोऽपि कारणं भवतीत्यर्थः; किंवा प्रवृत्तिरुचिता धातुप्रकृतिः धातुसाम्यमिति यावत्, सा उभयस्य सामान्यस्य विशेषस्य च कार्येति शेषः। तेन केवल-समानोपयोगाद्धातुवृद्ध्या धातुवैषम्यं, केवलविशिष्टोपयोगाच्च धातुक्षयाद्धातुवैषम्यं, युगपत्समानविशिष्टद्रव्योपयोगात्तु प्रवृत्तिर्धातुसाम्यरूपा भवतीत्युक्तं भवति। तुशब्दः पूर्वपक्षादेकद्रव्योपयोगलक्षणाद्व्यावर्तयति ॥४४॥

सामान्यमेकत्वकरं, विशेषस्तु पृथक्त्वकृत्।
तुल्यार्थता हि सामान्यं, विशेषस्तु विपर्ययः ॥४५॥

इदानीं वृद्धिह्रासकारणत्वेनोक्तयोः सामान्यविशेषयोर्लक्षणमाह—सामान्यमित्यादि। एकत्वमेकत्वप्रत्ययगतधीरिति यावत्, तत्करं; एतेन अनेका-

---

१—पृथिव्याः[1]

स्व(सु?)भिन्नदेशकालादिसु गवादिव्यक्तिषु 'अयं गौरयं गौः' इत्येवमाद्यनुगत-धीर्यन्निबन्धना तत्सामान्यमित्यर्थः। विशेषलक्षणं तु पृथक्त्वकृदिति। पृथक्त्वं व्यावृत्तिस्तत्करणं; एतेन यदेव गोत्वं गोव्यक्त्यन्तरापेक्षया सामान्यं, तदेव गोत्वमश्वाद्यपेक्षया व्यावृत्तबुद्धिकर्तृकयाऽश्वादीन् प्रति विशेष इत्यर्थः। न तु लक्षणद्वयमेतदात्मादिष्वतिव्याप्तं, तेषामप्यनुगतव्यावृत्तबुद्धिहेतुत्वात्। अथोच्यते—असाधारणत्वमिह विचक्षणाय, असाधारणत्वं च तन्निरुपितकारणताश्रय···· ···· ····आत्मादिष्वनुगतज्ञानत्वावच्छिन्नकार्यतानिरुपितकारणताश्रयत्वं नास्ति तेषां ज्ञानमात्रं प्रति कारणत्वात्, अतो नातिव्याप्तिरिति चेत् तथाऽपि तत्र पिण्डादावतिव्याप्तिः तत्र पिण्डादेस्तदनुगतज्ञानं प्रत्यसाधारणकारणत्वात्। न च उत्तरपिण्डादेरनुगतत्वाद्व्यभिचारितया कारणत्वमेव नास्तीति वाच्यं, गोत्वावच्छिन्नपिण्डस्य कारणत्वेन व्यभिचारनिरासात्। अथ तत्रापि पिण्डादौ कारणत्वं विषयत्वेनैव साक्षात्कारिज्ञानत्वेन च कार्यतानामसाधारण्येन कार्यकारणभाव इति चेत्तत्रापि इदं संयोगि इदं संयोगीत्येवंरूपायामनुगतबुद्धौ एक एव संयोगो निमित्तम्, अतः संयोगेऽव्याप्तिः। अत्रोच्यते—नित्यमेकमनेकवृत्तिसामान्यमित्येव लक्षणं, तच्च सामान्यविशेषयोः साधारणं न तु भेदकम्। अतस्तद्वाऽपेक्ष्य सामान्यविशेषयोर्भेदकौ बुद्धिविशेषौ गमकत्वाद्विशेषेण लक्षणतया उपन्यस्तौ। तथा च **कणादसूत्रं**–'सामान्यं विशेष इति बुद्ध्यपेक्षम्', बुद्धिरपेक्षा लिङ्गं लक्षणं वा यस्य तत्तथा। तत्रानुवृत्तबुद्धिः सामान्यस्य व्यावृत्तबुद्धिर्विशेषस्य लक्षणमिति एवण (····?) भाष्ये व्याख्यातम्। उक्तलक्षणन्तु समानानां भावः सामान्यमित्यनेन एकस्य धर्मस्यानेकवृत्तित्वं दर्शयता सूचितमेव, तदुक्त**माचार्यपादैः**—सामान्यमिति पदस्य समानानां भावः स्वाभाविकोऽनागन्तुको बहूनां धर्म इत्यर्थः, तथा च धर्मिणां बहुत्वे धर्मस्यानागन्तुकत्वे विवक्षिते नित्यमेकमनेकवृत्ति सामान्यमिति लक्षणं सूचितं भवतीति। तत्रानेकवृत्ति सामान्यमित्युक्ते संयोगादावतिव्याप्तिस्तद्वारणाय नित्यमित्युक्तम्। नित्यं सामान्यमित्युक्ते आकाशादावतिव्याप्तिस्तन्निरासाय वृत्तिपदं आकाशादीनामवृत्तित्वात्। न च संयोगध्वंसोऽप्यनेकवृत्तिर्नित्यश्चेति तत्रातिव्याप्तिरिति वाच्यं, वृत्तिपदस्य समवायपरत्वात्। नित्यं समवेतं यत्तत्सामान्यमित्युक्ते जलपरमाणुरूपादावतिव्याप्तिस्तद्वारणायानेकेति। एकमिति स्वरूपविधानं न तु लक्षणान्तर्गतं, किंवा एकं लक्षणमिति योज्यं, तेन लक्षणान्तरं च नित्यत्वे सति स्वाश्रयान्योन्याभावासमानाधिकरणत्वमित्यादि बोध्यमित्याहुः। अन्ये तु—सामान्यमेकत्वकरमिति ग्रन्थमन्यथा

व्याख्यानयन्ति । ननु सामान्यं वृद्धिकारणमिति यदुक्तं तदसङ्गतं सामान्यमन्तरेणापि पयसा शुक्रवृद्धिदर्शनादित्यत आह—सामान्यमेकत्वकरमिति । गुणसामान्यस्य एकत्वकरमिति साम्यजनकं, एतेन यद्यपि पयःशुक्रयोर्भिन्नजातीयत्वेन द्रव्यसामान्यं नास्ति तथाऽपि मधुरत्वादिगुणसामान्यद्वारा द्रव्यसामान्यमुपपाद्य वृद्धिरुपपादनीया । एतच्च न मनोरमम् । एवञ्च सति सामान्यलक्षणानभिधानेन ग्रन्थस्य न्यूनता स्यादिति । ननु यदेव गोत्वं सामान्यं तदेव विशेषोऽपि यदि तदा एकस्यैवैकबुद्धिकर्तृत्वं पृथग्बुद्धिकर्तृत्वं च कथमुपपद्यतां विरोधादित्यत आह—तुल्यार्थता इति । तुल्यार्थता एकसामान्यरूपाण्यत्र यानि तानि, विशेषस्तु विपर्यय इति अतुल्यता विशेष इत्यर्थः । अयं भावः—एकमेव गोत्वं यासु यासु व्यक्तिषु सम्बद्धमस्ति तत्र तत्रैकबुद्धिं नयति, यत्र यत्राश्वादिव्यक्तिषु न सम्बद्धं तत्र तत्र पृथग्बुद्धिर्भवतीति विषयभेदेन न विरोधः । किंवा, कथमनेकासु व्यक्तिषु सामान्यमेकबुद्धिमव्यभिचारिणीं करोतीत्याह—तुल्यार्थता हीत्यादि । तुल्यार्थता एकसामान्यरूपार्थयोगिता, एतेन यस्माद्भिन्नासु व्यक्तिषु सामान्यमेकरूपं सम्बद्धमस्ति, तदेकार्थावलम्बा सत्यपि व्यक्तिभेदे एकत्वबुद्धिर्युक्तेति । विशेषस्तु विपर्यय इति—अतुल्यार्थता विशेषः, गोगजयोरतुल्यगोत्वगजत्वरूपार्थयोः पृथग्बुद्धिर्युक्ता चेति । आ (स्यादि) ···· ···· सामान्यं वृद्धिकारणमिति यदुक्तं तन्नोपपद्यते, असमानेनास्यादिना (श्लेष्म) वृद्धिदर्शनादित्याह—तुल्यार्थता हीत्यादि । अयं भावः—यद्यपि आस्यारूपं कर्म न श्लेष्मणा सामान्यं[1] तथाऽपि पानीयादिकफसमानद्रव्यार्थक्रियाकारित्वात् कफवर्धकरूपतया आस्याऽपि कफसमानेत्युच्यत इत्याहुः ॥४५॥

सत्त्वमात्मा शरीरं च त्रयमेतत्त्रिदण्डवत् ।
लोकस्तिष्ठति संयोगात्तत्र सर्वं प्रतिष्ठितम् ॥४६॥

स पुमांश्चेतनं तच्च तच्चाधिकरणं स्मृतम् ।
वेदस्यास्य, तदर्थं हि वेदोऽयं संप्रकाशितः ॥४७॥

इदानीं तूद्देशक्रमप्राप्तं गुणाभिधानमतः प्रथमं गुणेऽभिधातव्ये गुणेषु प्रधानभूतं सत्त्वादिमेलकमायुर्वेदोपकार्यं पुरुषमाह—सत्त्वमित्यादि । सत्त्वं मनः । आत्मा चेतना (धातुः), यद् बहुत्वे आतमनि भोगस्तदसारं शरीरमिति । इन्द्रियाणामग्नि···· ···· ···· ····तथा शरीरग्रहणेनैव ग्रहणं

---

१. समानं [1]

ज्ञेयम् । संख्येयनिर्देशादेव संख्यायां लब्धायां त्रयमिति पदं मिलितानामेव पुरुषत्वमिति ज्ञापनार्थम् । त्रिदण्डवदिति त्रिदण्डश्च परस्परसंयोगविधृतः कुम्भादिधारकस्त्रिकाष्ठादियो (गस्त्रि) दण्डोपदिष्टः, तेन यथा त्रिदण्डेऽन्यतमापायेऽपि नावस्थानं तथा सत्त्वादीनामेकतमापायेऽपि न लोकस्थितिरित्युक्तं भवति । लोकत आलोकन इति लोको जङ्गमो भूतग्रामः । संयोगात्तिष्ठतीति सत्त्वादि(मेलक)स्य सम्यग्धृतनियन्त्रिताद्योगात् । तत्रेति लोके, सर्वमिति कर्म कर्मफलादि, वक्ष्यति च शारीरे—"अत्र कर्मफलं (चात्र) ज्ञानं चात्र (प्रतिष्ठितम्) ।" (शा. १.३७), इति । "(खादयश्चेतनाषष्ठा धातवः) पुरुषः स्मृतः ।" (शा. १.१६) इत्यन्यथैव पुरुषलक्षणं शारीरे करिष्यति; सुश्रुतेऽपि–"पञ्चमहाभूतशरीरिसमवायः पुरुष इत्युक्तवान्" (सु.सू. १.२२), अत्र पुनरन्यथेति कोऽभिप्रायः ? उच्यते—खादयश्चेतनाषष्ठा इत्यत्रापि खादिग्रहणेन खादिरिव………शरीरस्य ग्रहणं ज्ञेयम् । इन्द्रियाणां भौतिकत्वमिति मते तु इन्द्रियाणामपि खादिग्रहणेनैव ग्रहणं, चेतना (पदेन)……चेतनाधारः सान्तःकरण आत्मा गृह्यते । सुश्रुतेऽपि शरीरिपदेन शरीरसम्बन्धयोग्यस्यात्मनो ग्रहण(मतः मन)सोऽपि ग्रहणं ज्ञेयम्, यतः शरीरसम्बन्धयोग्यत्वमात्मनोऽनादि………………सम्बन्धादेव, तदुक्तं………………तथा "भूतैश्चतुर्भिः सहितैः सुसूक्ष्मैर्मनोजवो देहमुपैति देहात् ।" (शा० २.३१) इति । ननु तथाऽपि तत्र पञ्चमहाभूतशरीरिसमवाय इत्यनेन सम्बन्धविशेषस्यैव पुरुषत्वमुक्तम्, अत्र तु खादयश्चेतनाषष्ठा इत्यादिना तथा सत्त्वमात्मेत्यादिना च सम्बन्धिनामेव पुरुषत्वमुच्यत इति विरोधः, (उच्यते, यद्यपि) समवायशब्दः सम्बन्धवचनस्तथाऽपि सम्बन्धिपरतन्त्रत्वात् सम्बन्धस्य सम्बन्धिन एवात्र समवायः पुरुषशब्देन ग्राह्यः । न चैवं व्याख्याने मृतशरीरेऽपि पुरुषत्वप्रसक्तिः, अत्र हि व्यापकत्वेनात्मनः समवायेऽपि शरीरिशब्दाक्षिप्तमनः–सम्बन्धाभावात् । समवायपदन्तु यदुपन्यस्तं **सुश्रुतेन** तत्संयोगस्य प्राधान्य (ख्यापकम्), संयोग एव महाभूतशरीरिपदयोः प्रधानं न केवलानि पञ्चमहाभूतानि न वा केवला चिच्छक्तिरिति । यदि हि केवलानि महाभूतानि पुरुषः स्यात् तदा मृतशरीरेऽपि पञ्चमहाभूतानां विद्यमानत्वात् पुरुषत्वं स्यात् मृतोऽपि पञ्चमहाभूतावशेषत्वात् 'पञ्चत्वं गत' इत्युच्यते तथा…………(यदि केवलः) पुरुषः तस्य निर्विकारत्वात् तत्र न क्रिया नापि व्याधिरिति निष्प्रयोजनमिदं शास्त्रं स्यात्, तस्मात्संयोग एव प्रधानमिति । अत एवामुमेव सत्त्वादिमेलकं पुरुषं संयोगपुरुषशब्देन

शारीरे निर्दिशति "संयोगपुरुषस्येष्टो विशेषो वेदनाकृतः।" (शा० १.८५) इति। अन्ये तु—**सुश्रुते** समवायपदं समुदायवचनमाहुः। स पुमानिति स इति सत्त्वादिमेलकः पुमानिति भण्यते। चेतनं तच्चेति तत्सत्त्वादित्रयं चेतनं चैतन्यवत्। तच्चाधिकरणं स्मृतं तन्त्रस्येति अस्य तन्त्रस्य तत्सत्त्वादित्रयमधिकरणमुद्देश्यमित्यर्थः। अत्रैव हेतुमाह—तदर्थं हीत्यादि। तदर्थमिति तदुपकारार्थम् ॥४६–४७॥

खादीन्यात्मा मनः कालो दिशश्च द्रव्यसंग्रहः।
सेन्द्रियं चेतनं द्रव्यं, निरिन्द्रियमचेतनम् ॥४८॥

इदानीमायुर्वेदोपकार्यं पुरुषमभिधाय गुणाश्रयतया द्रव्यं प्रधानमिति गुणात्प्राग्द्रव्याण्युद्दिशति—खादीनीत्यादि। खादीनि पञ्च महाभूतानि, चकारो अवधारणे। एतानि नव द्रव्याणि, एतेन तमसो यद्द्रव्यत्वमुच्यते कैश्चित्तन्निरस्तं भवति। द्रव्यसङ्ग्रह इति संक्षेपेण सर्वद्रव्याणामेव ग्रहणं सङ्ग्रहः, अन्येषामिहैवान्तर्भावः स्यादिति भावः। द्रव्याण्युद्दिश्य तेषां विभागमाह—सेन्द्रियमित्यादि। सेन्द्रियस्य चेतनत्वे निरिन्द्रियस्याचेतनत्वं यद्यप्यर्थापत्तिलभ्यं तथाऽपि तद्वचनं नवज्वरे दिवास्वप्नेत्यादावेवम्भूतार्थापत्तेरनैकान्तिकत्वदर्शनाद्बोध्यम्। यद्यपि चात्मैव चेतनो न शरीरं नापि मनः; यदुक्तं—"चेतनावान् यतश्चात्मा ततः कर्ता निरुच्यते।" (शा. १.७६) इति, तथाऽपि संयुक्तसमवायेन शरीराद्यपि चेतनं सलिलौष्ण्यवत्। वृक्षादीनामपि सेन्द्रियत्वेन चेतनत्वं ज्ञेयं यतो वृक्षादयो जीवनमरणयोगिनो दृश्यन्ते। जीवनमात्मविशेषगुणजनकं मनःसंयोग इति मरणं च तादृशसंयोगध्वंस इति। आगमश्चामुमर्थं द्रढयति यथा—"नर्मदातीरसञ्जाताः सरलार्जुनपादपाः। नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिम् ॥" इति, तथा "वृक्षगुल्मं बहुविधं तथैव तृणजातयः। तमसाऽधर्मरूपेण च्छादिता कर्महेतुना॥ अन्तःसंज्ञाः भवन्त्येते सुखदुःखसमन्विताः॥" इत्यादि ॥४८॥

सार्था गुर्वादयो बुद्धिः प्रयत्नान्ताः परादयः।
गुणाः प्रोक्ताः

इदानीं गुणानामुद्देशमाह—सार्था इत्यादि। प्रोक्ता इति च्छेदः। अर्थाः शब्दस्पर्शरूपरसगन्धाः। एते च वैशेषिकाः, आकाशादिप्रतिनियतत्वात्। वैद्यकनये हि प्राधान्येनाकाशादीनामेव शब्दादय इति, अन्यगुणानां चान्यत्र दर्शनं भूतान्तरानुप्रवेशादिति। उक्तं हि—"विष्टं ह्यपरं परेण"

(न्या० द० अ० ३ आ० १ सू० ६६) इति । गुर्वादय इति—"गुरुलघुशीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिलश्लक्ष्णखरसूक्ष्मस्थूलसान्द्रद्रवाः" (सू० २५.३६; शा० ६.१०) विंशतिः; व्यवायि (विकासिनौ) सरतीक्ष्णयोरेव प्रकर्षरूपौ उक्तौ–'सरतीक्ष्णप्रकर्षौ तु कश्चित्तौ परिकल्पिताविति'। किंवा, गुर्वादय एते आविष्कृततमा एव यज्जःपुरुषीये उक्ताः, तेन गुणानामसंख्येयत्वादन्येऽपि ज्ञेया इति भावः। अत एव प्रमेहे श्लेष्मगुणेषु अच्छत्वादयो गुणाः पठ्यन्ते इति। एते च द्रव्याधेयाः वैद्यकनये गुणत्वेन परिभाष्यन्ते तथा यज्जःपुरुषीये आयुर्वेदोपयुक्तत्वात् परादिभ्य पृथक् पठ्यन्ते च। एषु च मध्ये केचित्सामान्यरूपा यथा—गुरुत्वं जलपृथिवीकारणं, लघुत्वं वायुजलसाधारणमित्यादि; केचिद्विशेषरूपा यथा द्रवत्वशैत्ये तोयस्यैव, "" वत्वकठिनत्वे पृथिव्यामेवेत्यादि ज्ञेयम्। बुद्धिर्ज्ञानम्; एतेन शारीरे वक्ष्यमाणानां स्मृत्यादीनां बुद्धिविशेषाणां ग्रहणं ज्ञेयम्। प्रय(त्नोऽन्ते) येषां निर्देशे ते, एतेनेच्छाद्वेषसुखदुःखप्रयत्नानां ग्रहणम्। शारीरे त्विच्छाद्वेषः सुखं दुःखं प्रयत्न इति निर्देशं करिष्यति। "परापरत्वे युक्तिश्च संख्या संयोग एव च। विभागश्च पृथक्त्वं च परिमाणमथापि च॥ (संस्कारोऽभ्यास इत्येते गुणा ज्ञेया परादयः।" (सू० २६.२९) इति) आत्रेयभद्रका(प्यो)ये वक्ष्यति। एते च गुणा नात्युपयुक्तत्वादन्ते पठिताः॥—

प्रयत्नादि कर्म चेष्टितमुच्यते ॥४९॥

(क्रमागतं कर्म निर्दिशति) प्रयत्नादीति। आदिशब्दः कारणवाची, प्रयत्नश्चात्मनि विशेषगुणः, प्रयत्नः (आदि)कारणं (यस्य तत् प्रयत्नादि)। प्रयत्नग्रहणं च कारणोपलक्षणम्, तेन संस्कारगुरुत्वादिजन्यनिखिलकर्मणो ग्रहणं; किंवा प्रयत्न ....प्रयत्नशब्दो वाच्य....उपचारात्। आदिशब्दात्तु गुरुत्वादिजन्यकर्मणो ग्रहणम् ॥४९॥

समवायोऽपृथग्भावो भूम्यादीनां गुणैर्मतः।
स नित्यो यत्र हि द्रव्यं न तत्रानियतो गुणः ॥५०॥

समवायस्यैकत्वाद्विभागो नास्तीति लक्षणमाह—समवाय इत्यादि। ननु समवायविशेषयोरकारणयोरपि यथा कारणत्वं तदुपपादितमेव, समवायस्य तु कारणत्वं दुर्घटं तत्कथं कारणनिरूपणाय समवायस्य निरूपणमिति ? सत्यं, समवायिकारणं द्रव्यमित्यग्रे वक्ष्यति। तच्च समवायि-

कारणज्ञानं समवायज्ञानाधीनमिति समवायिकारणनिरूपकत्वेन समवायस्यापि निरूपणमिति ज्ञेयम्। समवाय इति लक्ष्यनिर्देशः, अपृथग्भाव इति लक्षणम्; अपृथग्भावोऽयुतसिद्धिः, सहैवावस्थानमिति यावत्। अपृथग्भावमेव विशेषयन्नाह—भूम्यादीनां गुणैर्मत इति। भूम्यादीनां भूमिप्रकाराणां, भूमिश्च भूयसामाधेयानामाधारः, तेन भूमिशब्देनाधारमात्रं लक्ष्यते, भूम्यादीनामित्याधाराणामित्यर्थः। गुणैरित्यप्रधानैराधेयैरित्यर्थः, आधेयो ह्याधारापेक्षयाऽप्रधानम्, अप्रधाने च गुणशब्दो यथोक्तमिह, गुणीभूता अप्रधानीभूता इत्यर्थः, तेनाधाराणामाधेयैर्योऽपृथग्भावः स समवायः। तेन पृथिवीत्वगन्धयोरपृथक्सिद्धयोरप्याधाराधेयभावाभावान्न समवाय इत्युक्तं भवति। अत एवोक्तं **वैशेषिके**—“अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहेतिप्रत्ययहेतुः स समवायः” (प० ध० सं० द्रव्यपदार्थनिरूपणम्) इति **चक्रः**। एतच्चान्ये दूषयन्ति—सहैवावस्थानं हि एकत्रैवावस्थानं, स किं एकस्मिन् कालेऽवस्थाननियमः एकस्मिन्प्रदेश इति वा ? आद्ये तन्तुपटसमवायादावव्याप्तिः, स चेद्विहाय तन्तोः कालान्तरेऽप्यवस्थानात्; द्वितीये घटकपालयोरपि सम(वाय)प्रसङ्गः, उभयोरपि (एक) कालावस्थाननियमात्। अथवा युक्तविवक्षया आधाराणामाधेयैः सहावस्थाननियमो विवक्षितः तथा च घटकपालरूपयोराधाराधेयभावान्नातिव्याप्तिरिति चेन्न, पटनाशेऽप्याधारस्य तन्तोः आधेये पटे त्वस्यावस्थितेरुक्तरूपनियमव्याघातात्। यत् पुन**र्भाष्ये** आधार्याधारभूतानामित्युक्तं तद्वाच्यवाचकसम्बन्धनिरासतात्पर्यकमेवे**त्याचार्यपादै**रेव व्याख्यातम्। अथान्योन्यपरिहारेण पृथगाश्रयानाश्रितत्वमपृथग्भावशब्दार्थ इत्युच्यते, तथाऽपि घटरूपसमवायेऽव्याप्तिः, घटतद्रूपयोः पृथगाश्रयाश्रितत्वात् घटो हि कपालं रूपं हि घट इति। **अस्मत्पितृचरणास्तु** व्याख्यानयन्ति—असम्बद्धयोरविद्यमानत्वमपृथग्भावः, किंवा पृथग्भावः सम्बन्धविरहः, यथा—हिमवद्विन्ध्यौ पृथग्भूतौ असम्बद्धावित्यर्थः। तेनापृथग्भावः सम्बन्ध एव तथा च सम्बन्धः समवाय इत्युक्तिः। संयोगेऽतिव्याप्तिं निराकर्तुमाह—स नित्य इति। नित्यत्वं च प्रागभावाप्रतियोगित्वं, तेन विशेषणताख्यनित्यसम्बन्धे नातिव्याप्तिः। यद्वा सम्बन्धपदेनैव तद्व्युदासः, वैशेषिकनये त्वसंयोगसमवाययोरेव सम्बन्धत्वात्। भूम्यादीनां गुणैर्मत इति तु सम्बन्धमात्रोपलक्षणं; गुणैरिति गुणादिभिरित्यर्थः, तेन गुणगुणिनोः क्रियाक्रियावतोः, अवयवावयविनोः सामान्यसामान्यवतो विशेषनित्यद्रव्ययोश्चायं सम्बन्ध इत्युक्तं भवति। नित्यत्वे

हेतुमाह—यत्र हीत्यादि। हिशब्दो हेतौ, यत्र समवाये द्रव्यं समवायिकारणं यतो नास्ति। अयं भावः—भावा हि समवायिकारणं विना नोत्पद्यन्त इति नियमः, तथा च समवायस्य समवायिकारणं यत् स्यात् तत् किं समवायान्तरेण तेनैव समवायेन वा? नाद्यः, अनवस्थानात्, न द्वितीयः आत्माश्रयात् नहि स एव समवायः स्वेनैव समवेतः सम्भवति, ततः समवायिकारणाभावादेव समवायस्य नित्यत्वं सिद्धमित्यर्थः। हेत्वन्तरमाह—न तत्रानियतो गुण इति। अत्रापि काकाकि(काकतालीय ?) न्यायेन···· , तत्र समवाये गुणो नानियतः, किन्तु नियतो नित्य इति यथा—आकाशपरिमाणसमवाये परिमाणं नित्यं, तथा च तत्र समवायस्य नित्यत्वे सिद्धे अन्यत्रापि नित्यत्वं समवायस्यैकत्वात्, समवायस्य चैकत्वं धर्मिग्राहकप्रमाणसिद्धं इन्द्रियप्रत्यासत्तित्वेनेति समवायसिद्धिः। तथा हि गुणक्रियाजातिसाक्षात्कार इन्द्रियसम्बन्धसाध्यः जन्यसाक्षात्कारत्वात् घटसाक्षात्कारवत्। स च सम्बन्धो गुणादिभिः सह इन्द्रियस्य साक्षात्त्वे सम्भवतीति इन्द्रियसंयुक्ते सिध्यन् लाघवादेक एव सिध्यति अनुगतकार्यस्यानुगतकारणनियम्यत्वात्। न च समवायस्यैकत्वे य एको रूपसमवायः स एव (स्पर्श)समवायोऽपीति वायोरपि रूपवत्वप्रसङ्ग इति वाच्यं, वायो रूपसमवायत्वेऽपि रूपात्यन्ताभावस्य सत्त्वात्, यतो रूपात्यन्ताभावासहचरित एव रूपसमवायो रूपिधीप्रयोजकः। ननु वायुघटयोः रूपसमवायाविशेषेऽपि कथमेकत्र रूपमन्यत्र तदत्यन्ताभाव इति चेत्, अधिकरणस्वभावात्। अयमेव हि स्वभावो वायोर्घटादेश्च यदेको नीरूपोऽपरश्च रूपवानिति। किमत्र प्रमाणमिति चेत्, अबाधितनीरूपप्रतीतिरेव। प्रतीतिर्हि भगवती वस्तूपगत्यै नः शरणमिति भावः ॥५०॥

यत्राश्रिताः कर्मगुणाः कारणं समवायि यत्।
तद्द्रव्यं

द्रव्यलक्षणमाह—यत्राश्रिता इत्यादि। तद्द्रव्यमिति च्छेदः। आश्रिता इति समवेताः, तेन क्रियावत्त्वं गुणवत्त्वं समवायिकारणत्वञ्चेति लक्षणत्रयम्। क्रियावत्त्वं च यद्यप्याकाशादिषु नास्ति तथाऽपि द्रव्यस्यैवायमसाधारणो धर्म इति प्रतिपादनायेदमत्रोक्तम्। किंवा, क्रिया इति सत्तासाक्षाद्व्याप्यजातिमत्त्वमिह विवक्षितम्। गुणवत्त्वं च गुणात्यन्ताभावानधिकरणत्वं यत्किंचिद्गुणात्यन्ताभावानधिकरणत्वं वा? नाद्यः, असंभवात्, न हि सर्वस्मिन् द्रव्ये सर्वे गुणा वर्तन्ते। अल्पेऽप्यसंभवः संयोगस्याव्याप्य-

वृत्तित्वेन सर्वस्यैव द्रव्यस्य संयोगात्यन्ताभावाधिकरणत्वात् । मैवं, यत्र ये गुणा वर्तन्ते तत्र तदत्यन्ताभावानधिकरणत्वं लक्षणार्थः । ननु तथाऽपि गुणात्यन्ताभावेऽतिव्याप्तिः, तस्यापि गुणात्यन्ताभावानधिकरणत्वमेव, अन्यथाऽनवस्थापातात्, मैवं, भावत्वे सतीति विशेषणोऽयं, अतो नोक्त-दोषः । अन्ये तु—गुणात्यन्ताभावस्यापि गुणात्यन्ताभावाधिकरणत्वमेव अन्यथा तत्रापि गुणो वर्तेत अतो नातिव्याप्तिरित्याहुः; तन्न, अधिकरण-स्वभावादेव तत्र तदत्यन्ताभावप्रत्ययापत्तेः किं तदभावाङ्गीकारेण, अत एवाभावे अभावान्तरं नाङ्गीक्रियत इति सिद्धान्तः । **अस्मत्पितृचरणास्तु** गुणवत्त्वं गुणात्यन्ताभावविरोधित्वं गुणप्रागभावप्रध्वंसयोरपि गुणात्यन्ता-भावविरोधित्वादित्याहुः । ननु तथाऽपि षड्रसा इत्यादिप्रतीतेः गुणवत्त्वं संख्यामादाय रसादिष्वतिव्यापकं, न च तत्र भाक्तः प्रयोगः मुख्ये बाधका-भावात् वैपरीत्यस्यापि स्वभावत्वादिति चेन्न, रसादिस्वगुणेषु संख्याङ्गीकारे तदविनाभूतं परिमाणमपि तत्र मन्तव्यं तत् किं परिच्छिन्नमपरिच्छिन्नं वा ? आद्ये हरीतक्याद्यवयवे अवयविनो हरीतकीफलस्य तत्र सम्यक् समानदेशता न स्यात्, मूर्त्तत्वेनोभयोः समानदेशताविरोधात् । परिच्छिन्न-परिमाणयोगित्वं हि मूर्त्तत्वं अन्त्ये विभुत्वापत्तौ बहिरिन्द्रियप्रत्यक्षता न स्यादित्यन्यत्र विस्तरः ॥—

समवायी तु निश्चेष्टः कारणं गुणः ॥५१॥

गुणलक्षणमाह—"समवायी तु निश्चेष्टः कारणं गुण" इति । समवायी समवायाधेयः; तेनाकाशादिभ्यो व्यावृत्तिः; तेषामवृत्तिपदार्थत्वात् । समवाय-पदेन चाभावस्य व्युदासः । निर्गतश्चेष्टायाः निश्चेष्टः; चेष्टानिर्गतया चेह चेष्टाशून्यत्वं चोच्यते; तेन मूर्त्तद्रव्ये कर्मणि च नातिव्याप्तिः । तथाऽपि सामान्यविशेषयोरतिव्याप्तिः, अत उक्तं कारणमिति । चक्रस्तु—कारण-मितिपदेन समवायस्यापि व्यावृत्तिरित्याह, तन्न, यतः समवायीत्युक्ते समवायेऽतिप्रसक्तिरेव नास्ति । किंवा कारणपदस्योपरिसमवायनिवास-भावकल्पनया तत्र कारणमिति कारणजातीयं, तेन विभुद्रव्यपरिमाणा-न्त्यावयविरूपादिषु नाव्याप्तिः । अन्ये तु—योगिप्रत्यक्षज्ञानहेतुतया विभु-परिमाणादीनामपि कारणत्वमिति नाव्याप्तिरित्याहुः, तन्न तज्ज्ञानस्य विषयाजन्यत्वात् । किं च यतस्तथाविधकारणत्वं सामान्यादिष्वप्यस्तीति अतिव्याप्तिस्तदवस्थैव । अथ समवायीतिपदेन समवायाधारता समवाया-धेयता च युगपद्विवक्षिता; तेन समवायकेवलाधारस्य विभुद्रव्यस्य तथा

समवायकेवलाधेयस्य सामान्यादेश्च व्युदास इत्युच्यते तदा कारणपद-वैयर्थ्यमिति ध्येयं, तस्मात् कारणपदेन कारणजातीयविवक्षया सामान्यादीनां च व्युदासः सामान्यादौ जातेरभावादिति युक्तम्। संक्षेपतस्तल्लक्षणं—'कर्मभिन्नत्वे सति मात्राधारत्वं गुणत्वं', तत्र मात्रपदेन द्रव्यस्य निरासः ॥५१॥

संयोगे च विभागे च कारणं द्रव्यमाश्रितम्।
कर्तव्यस्य क्रिया कर्म कर्म नान्यदपेक्षते ॥५२॥

कर्मलक्षणमाह—संयोगे चेत्यादि। तत्र चकारौ युगपत् संयोगविभागौ प्रति कारणत्वं बोधयतः। तेन संयोगजनकसंयोगे विभागाकारणे विभाग-जनकविभागे च संयोगाकारणे नातिव्याप्तिः। द्रव्यमाश्रितमिति स्वरूपानुवादमात्र न तु लक्षणान्तर्गतम्। संयोगविभागकारणत्वाद्द्रव्येऽप्यतिव्याप्ति-रित्याह—कर्म नान्यदपेक्षत इति। द्रव्यन्तु संयोगे विभागे च जनयितव्ये कर्मापेक्षत इति नातिव्याप्तिः। तेन संयोगविभागेष्वनपेक्षकारणं यत्तत्कर्मेति लक्षणार्थः। अनपेक्षत्वं च स्वोत्पत्त्यनन्तरोत्पत्तिकपदार्थानपेक्षत्वं, एतेन यद्यपि कर्मणा संयोगे विभागे च जनयितव्ये संयोगविभागाश्रयतया द्रव्यं तथा पूर्वसंयोगध्वंसश्चापेक्ष्यते तथाऽपि तदुभयं कर्मोत्पत्त्यनन्तरोत्पत्तिकं न भवतीति नासंभवः। अथ कर्मशब्देन वमनादीनां तथाऽदृष्टस्य तथा क्रियायाश्चाभिधीयमानत्वात् कस्य कर्मण इदं लक्षणमित्यत आह—कर्तव्यस्य क्रिया कर्मेति। एतेन क्रियारूपस्य कर्मण इदं लक्षणं नादृष्टा-देरिति ॥५२॥

इत्युक्तं कारणं

उपसंहरति—इत्युक्तं कारणमिति। इतिशब्दः समाप्तौ; एतेनैतावदेव सामान्यादिषट्कं सर्वस्य कार्यजातस्य कारणं नान्यत् ॥—

कार्यं धातुसाम्यमिहोच्यते।
धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम् ॥५३॥

कार्यमाह—"कार्यं धातुसाम्यमिहोच्यते" इति। धातुसाम्यम् आरोग्यम्। इहेत्यायुर्वेदे; तेनान्यत्रान्यदपि घटादि कार्यमस्तीति दर्शयति। नन्विहापि तत् कार्यं किमिति नोच्यत इत्याह—"धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम्।" इति। चकारो हेतौ, यस्माद्धातुसाम्यक्रियैवायुर्वेद-प्रयोजनं, तस्मादायुर्वेदे धातुसाम्यमेव कार्यमुच्यते, अन्यत्तु अविवक्षित-त्वान्नोच्यत इत्यर्थः ॥५३॥

कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च ।
द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः ॥५४॥

आयुर्वेदोपयुक्तं कारणमप्यभिधातव्यं; तत्र व्याधिकारणमेव तावदाह–कालबुद्धीत्यादि । कालः शीतोष्णवर्षलक्षणः, बुद्धिः प्रज्ञा, इन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः; तत्सहचरितानि द्रव्यगुणकर्माणि इन्द्रियद्वारोपयुज्यमानानि; तेषां योगः सम्बन्धः । तस्य विशेषणत्रयं––मिथ्या न चाति चेति । तेन कालादीनां मिथ्यायोगः, तथा न च योगोऽयोग इत्यर्थः, तथाऽति च योगोऽतियोग इत्यर्थः । द्वयाश्रयाणामिति मनःशरीराश्रयाणाम्, तच्च मनःशरीराधिष्ठानत्वं पृथक् मिलितं च बोध्यम् । त्रिविध इति अयोगातियोगमिथ्यायोगरूपः । हेतुसंग्रह इति निखिलव्याधिबाह्यहेतूनां संकलय्य कथनम् । एते च कालादीनामतियोगायोगमिथ्यायोगास्तिस्रैषणीये स्वयमेवाचार्येण प्रपञ्चेन वाच्या इति नेह विधीयन्ते ॥५४॥

शरीरं सत्त्वसंज्ञं च व्याधीनामाश्रयो मतः ।
तथा सुखानां, योगस्तु सुखानां कारणं समः ॥५५॥

द्वयाश्रयाणामित्युक्तं तत् किं द्वयमित्याह—शरीरमित्यादि । सत्त्वसंज्ञं मनः । न केवलमेतद्द्वयं व्याधीनामेवाश्रयं किन्त्वारोग्यस्यापीत्याह—तथा सुखानामित्यादि । सुखानामिति आरोग्यानां, वचनं हि—सुखसंज्ञकमारोग्यम्" (सू० ९.४) इति । तथेति शरीरं मनश्चाश्रय इत्यर्थः, तेन शरीररोगाभावरूपस्यारोग्यस्य शरीरमाश्रयो, मानसरोगाभावरूपस्य तु मन इत्यर्थः । आरोग्य हेतुमाह–"योगस्तु सुखानां कारणं समः" इति कालबुद्धीन्द्रियार्थानां समः सम्यग्योगः सुखानामारोग्याणां कारणमित्यर्थः ॥५५॥

निर्विकारः परस्त्वात्मा सत्त्वभूतगुणेन्द्रियैः ।
चैतन्ये कारणं नित्यो द्रष्टा पश्यति हि क्रियाः ॥५६॥

ननु सत्त्वमात्मा शरीरं चेति वचनेन त्रयमुपात्तम्, अत्र शरीरमनसो व्याध्याश्रयतयोक्ते, आत्मनस्तु का व्यवस्थेत्याह–निर्विकार इत्यादि । आत्मा निर्विकारो निर्विकृतिः, तेन नीरोगत्वमात्मनः । पर इति सूक्ष्मः श्रेष्ठो वा, तेन शरीरात्ममेलको य आत्मशब्देनोच्यते तं व्यावर्तयति; यदुक्तं—"संयोगपुरुषस्येष्टो विशेषो वेदनाकृतः" (शा० १.८५) इति ।

---

१. सत्त्वशरीरात्म[1]

संयोगेऽपि चात्मादीनां मनस्येव वेदना भवति, ततो मनःसम्पृक्ते आत्मन्यपि संबद्धेत्युच्यते। ननु यद्यात्मा निर्विकारस्तदा ज्ञानरूपोऽपि विकारोऽस्य किं नास्तीत्याह—सत्त्वेत्यादि। सत्त्वं मनः, भूतगुणाः शब्दादयः, इन्द्रियाणि चक्षुरादीनि, एतैः करणभूतैश्चैतन्ये कारणं भवत्यात्मा। ननु चैतन्यरूप एवात्मा तत्कथं कार्यकारणभाव इत्यत आह—नित्य इति। आत्मा हि नित्यो ज्ञानमनित्यं; तत्कथं नित्यानित्ययोरेकरूपत्वमित्यर्थः। नित्यत्वं च धर्मिग्राहकप्रमाणसिद्धम्। ननु दृश्यते ज्ञानवतो रागद्वेषादयो विकाराः, तत्कथं निर्विकारत्वमित्यत आह—"द्रष्टा पश्यति हि क्रियाः" इति। द्रष्टा साक्षी, साक्षित्वं चास्य शारीरे प्रतिपादयिष्यामः। तेन यथा यतिः परमशान्तः साक्षी सङ्गतः क्रियाः सर्वाः पश्यन्न रागद्वेषादिना युज्यते, तथाऽऽत्माऽपि सुखदुःखाभ्युपरतमना न रागादिना युज्यते; दृश्यमानरागादिविकारस्तु मनसि, प्रकृतबुद्धौ वा सांख्यसिद्धान्तपरिग्रहाद्भवतीति भावः ॥५६॥

वायुः पित्तं कफश्चोक्तः शारीरो दोषसंग्रहः।
मानसः पुनरुद्दिष्टो रजश्च तम एव च ॥५७॥

विप्रकृष्टं विकाराणां हेतुमभिधाय सन्निकृष्टं दोषरूपं हेतुमाह—वायुरित्यादि। अत्र चकारोऽवधारणे, तेन शोणितस्य दोषत्वं यत्कैश्चिदुच्यते तन्निरस्तं भवति। युक्तं चैतत् यतः 'स्वातन्त्र्येण दूषकत्वं दोषत्वं' शोणितस्य तु वातादिसम्बन्धेनैव दूषकत्वात् न स्वातन्त्र्यम्। ननु किमिदं स्वातन्त्र्यं हेत्वन्तरनिरपेक्षत्वं दोषान्तरनिरपेक्षत्वं वा? आद्ये असम्भवः, वातादीनामपि हेतुसापेक्षाणामेव दूषकत्वात्। द्वितीये कफपित्तयोरव्याप्तिः, तयोः वातसापेक्षयोरेव दूषकत्वात्, यदुक्तं—"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः। वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥" इति। सत्यम्, प्रकृत्यारम्भकत्वे सति दुष्टिकारणत्वमित्येव लक्षणम्। न हि वातादिप्रकृतिवत् शास्त्रे शोणितादिप्रकृतिरुच्यत इति। दुष्टिकारणत्वं तु दोषाणां स्वरूपकथनमात्रं न तु लक्षणमिति, एतेन यदि शोणितं दोषः स्यात् वातादिवत् प्रकृत्यारम्भकं स्यात्, न चारभते तस्मात् त्रय एव दोषा इति सिद्धम्। ननु मा भूत् प्रकृत्यारम्भकत्वं रक्तस्य तथाऽपि दोषत्वमस्तु विपक्षे बाधकाभावात्, न हि प्रकृत्यनारम्भकस्य दोषत्वे काचित् क्षतिरिति। सत्यं, दोषत्वं हि धर्मः प्रकृतिकारणतावच्छेदकतया स्वीक्रियते स चेत् प्रकृत्यनारम्भके रक्तेऽपि स्वीक्रियेत तदा अवच्छेदकश्च न स्यात्

कारणातिरिक्तवृत्तित्वादिति। अत्र दोषाणां व्याधीन् प्रति समवायित्वे वमनलङ्घनाभ्यां स्वनिदानोत्पन्नकफनाशे सति तज्जन्यगुल्मतिमिरनाशः कथं न भवेत्; यदुक्तं--न वामयेत्तैमिरिकं न गुल्मिनम्'' (सु० चि० ३३.१४) इत्यादि, समवायिकारणनाशे च कार्यनाशस्यावश्यकत्वात्। तस्माद्दोषाणां निमित्तत्वे कथमुत्पन्ने व्याधौ दोषोच्छेदायौषधं विधीयते, न हि दण्डकुलालाद्युच्छेदे उत्पन्नस्य घटस्योच्छेद इति वाच्यम्। यत्र यावन्निमित्तकारणस्थायि कार्यं भवति तत्र निमित्तकारणनाशादपि कार्यनाशः यथा—वर्त्तितैलविनाशाद्दीपनाश इति **विजयरक्षितः**। अन्ये तु दोषान् प्रत्याख्याय ज्वरादयो न भवन्ति। अथ नित्यः सम्बन्ध इति **सुश्रुत**वचनाद्दोषाणां प्रायेण समवायित्वं, निमित्तत्वं तु व्याधिविशेषे एवेति। अत एव यत्र व्याधिविशेषे निमित्तत्वं तत्र दोषोच्छेदात् व्याधिनाशो न भवेत्, अनेनैवाभिप्रायेण यथाहि विद्युद्वाताशनिवर्षाण्याकाशं प्रत्याख्याय न भवन्तीत्यादिना ग्रन्थेनाकाशविद्युद्दृष्टान्ता **सुश्रुतेनापि** निवेशिताः। न च कफस्य गुल्मं प्रति निमित्तत्वे तज्जन्यगुल्मेषु कथं लिङ्गप्रादुर्भावः नहि कुलालस्य गौरत्वे घटस्यापि गौरत्वमिति वाच्यम्, कुपितकफसम्बन्धादपि तदुपपत्तेः, जपासंयुक्ते स्फटिके लौहित्यवत्। अत एव कफजन्यतिमिरगुल्मविषयकं यद् यद्भेषजं तत्सर्वं व्याधिविपरीतौषधोदाहरणतया ज्ञातव्यमित्याहुः। **रुद्रमिश्रास्तु**—दोषाणां सर्वत्र शरीरव्याधौ समवायित्वमेव उभयकल्पनाया गौरवपराहतत्वात्। वमनलङ्घनाभ्यां हि गुल्मतिमिरारम्भककफनाशः कर्तुमेव न पार्यते भेषजानां प्रतिनियतशक्तिकत्वात्। कथमेतदवगतमिति चेत्, न वामयेदित्यादिनिषेधसामर्थ्यादेव वमनलङ्घनयोर्हि तत्र सामर्थ्यविधानानुपपत्तेः। अपि च "शरीरं सत्त्वसंज्ञं च व्याधीनामाश्रयो मतः।'' (सू. १.५५) इति वचनेन शरीरमनसोः स्वसमवेतव्याधीन् प्रति समवायित्वमुच्यते, ततः शरीरं दोषदूष्यसमुदायरूपं समुदायिभ्योऽभिन्नमेवेति दोषदूष्ययोरपि समवायित्वमागतं तयोः शरीराभिन्नत्वात्। अपि च यत्संयोगो ह्यसमवायिकारणं तस्य समवायित्वमिति व्याप्तेश्च दोषाणां समवायित्वं सिद्धम्। तथा दोषाणां निमित्तत्वे प्रमाणमपि न पश्यामः, तथा **सुश्रुत**विरोधोऽपीत्याहुः ॥५७॥

प्रशाम्यत्यौषधैः पूर्वो दैवयुक्तिव्यपाश्रयैः।
मानसो ज्ञानविज्ञानधैर्यस्मृतिसमाधिभिः ॥५८॥

संप्रति दोषप्रशमकारणमाह—प्रशाम्यतीत्यादि। पूर्व इति शारीरः।

दोषग्रहणेन तज्जन्या व्याधयोऽपि गृह्यन्ते, विकृतदोषादनन्यत्वाद्व्याधीनाम्। दैवमदृष्टं तद्द्वारा यद्व्याधिप्रशमं करोति तद्दैवव्यपाश्रयि बलिमङ्गलादि; किंवा दैवं व्याधिजनकमदृष्टं तन्निवर्तनद्वारा यद्व्याधिप्रशमं करोति तद्दैवव्यपाश्रयम्। युक्तिः शरीरभेषजयोर्विशिष्टो योगः, तदपेक्षं यत्तद्युक्तिव्यपाश्रयं संशोधनसंशमनादि। ज्ञानम् अध्यात्मज्ञानं, विज्ञानं शास्त्रार्थज्ञानम् ॥५८॥

रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः।
विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति ॥५९॥

सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु।
विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति ॥६०॥

गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः।
श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः ॥६१॥

संप्रति शारीररोगाधिकारप्रवृत्तत्वादस्य तन्त्रस्य शरीररोगजनकवातादिलक्षणं तद्भेषजं चाह—रूक्ष इत्यादि। यद्यप्यनुष्णाशीतत्वं वायोः प्रत्यक्षसिद्धं तथाऽपि देहजनकादृष्टेन बाह्यवायुविलक्षणः शरीरी वायुरारब्धो यथा बाह्याग्निविलक्षणोऽन्तरग्निरित्यागमादुन्नीयते। अत एव शोषकाख्यवायुविशेषेऽपि शीतत्वं **पुराणेषूक्तं**—"तथेत्युक्त्वा तु शोषेण विवेश पवनो लघुः। शीतोऽतिरूक्षः शोषाय तद्देहस्यातिदुःसहः ॥" इति। अपि चाग्नीषोमीयत्वाज्जगत इत्युभयोरेव तुल्यतया बाह्यवायोरनुप्रवेशादनुष्णाशीतत्वं यथा जलानलयोः परस्परधिया तुल्यतयाऽनुप्रवेशादनुष्णाशीतत्वं जले अन्यतराधिक्यात्तु औष्ण्यं शैत्यं वा प्रत्यक्षसिद्धम्। एवं शारीरवायावपि अदृष्टमहिम्ना सोमगुणाधिक्यमेवेति शैत्यमुपपन्नम्, उक्तं च—"अग्नीषोममयं विश्वं यत एतदशेषतः" इति। दृश्यते च शीतेन वायोर्वृद्धिरुष्णेन प्रशमनं, केवलवातारब्धे च नोपशेते शीतमिति। पित्तगुणे सस्नेहमिति सह शब्द ईषदर्थे, तेन ईषत्स्नेहमित्यर्थः। एतेन स्निग्धेनापि सर्पिषा पित्तशमनमुपपद्यते जलानलारब्धे पित्ते रूक्षेणोष्णेन च तेजसा जलीयशैत्यस्नेहयोरभिभवात्। न चैवं पित्ते जलीयं यद्द्रवत्वं तदपि तेजसा कथं नाभिभूयत इति वाच्यं, यतोऽदृष्टनियत एवायं भूतगुणानामाविर्भावस्तिरोभावश्च; यतः पाञ्चभौतिकत्वेऽपि द्रव्याणां क्वचित्कश्चिदेव भूतगुण आविर्भूतो भवति न तु सर्वः; यथा—शालिषु तोयकृतं मधुरत्वं न तु गौरवमित्यादि। किंवा, पित्तं जलारब्धत्वेन सस्नेह-

मित्युत्सर्गः यदा तु तेजोंऽशभूयस्त्वेन रूक्षत्वं भवति तदा स्नेहेनोपशम इति ज्ञेयम्। अत एव जीर्णे ज्वरे निरामं पित्तं रूक्षमिति तत्रैव सर्पिर्विधीयते न तु सामे स्निग्धत्वादिति भावः। अत एव चिकित्सिते वक्ष्यति—"रूक्षं तेजो बलकरम्" इत्यादि। न च वाच्यं यदि सांसिद्धिकमपि पित्तस्य स्निग्धत्वमपैति तदा वातस्यापि रौक्ष्यं किमिति नापैति, यतो विचित्रा एव गुणा अप्रतिक्षेपणीयाः प्रतिक्षेपणीयाश्च तत्र ये सर्वदा न दृश्यन्ते वातशैत्यपित्तस्नेहादयः त एव प्रतिक्षेपणीयाः नान्ये तथैव दृष्टत्वात्। अन्ये तु स्नेहः पित्तगुणो द्रवयोगनिमित्तको न सांसिद्धिकः, तेन स्नेहापगमः पित्तस्य युज्यत एवेत्याहुः ॥५९-६१॥

विपरीतगुणैर्देशमात्राकालोपपादितैः।
भेषजैर्विनिवर्तन्ते विकाराः साध्यसंमताः ॥६२॥
साधनं न त्वसाध्यानां व्याधीनामुपदिश्यते।

ननु विपरीतगुणैरप्यल्पमात्रैस्तथाऽविपरीतदेशकालादिप्रतिबद्धैश्च न प्रशमो भवतीत्याह—विपरीतगुणैरित्यादि। साध्यत्वेन प्रामाणिकानां संमता इत्यर्थः। असाध्ये भेषजनिवृत्तिमाह—साधनमित्यादि। साधनमिति बलवत्प्रभावरसायनादिभिन्नं साधनमित्याहुः, तेन "ध्रुवं त्वरिष्टे मरणं ब्राह्मणैस्तत किलामलैः। रसायनतपोजप्यतत्परैर्वा निवार्यते।" (सु. सू. २८.५); इत्यनेन जातारिष्टत्वादसाध्येपि व्याधौ यच्चिकित्सितमुक्तं सुश्रुतेन तत्त्वविरोधि, यतो रसायनादयो बलवत्प्रभावा असाध्यमपि साधयन्ति। ननु यदि रिष्टसद्भावेऽपि रसायनादिना जीवनमित्युच्यते तर्हि "न त्वरिष्टस्य जातस्य नाशोऽस्ति मरणादृते।" (इ० २.२) इति वक्ष्यमाणवचनं मरणारिष्टयोः कार्यकारणभावप्रतिपादकं विरुध्यते रिष्टे सत्यपि मरणादर्शनात्। नैवं, रसायनादयो हि बलवत्प्रभावास्तत्र मरणरूपकार्यप्रतिबन्धकाः। प्रतिबन्धकसद्भावे च कार्यानुत्पत्तिः, तत्कारणत्वेन वह्न्यादीनामपि दाहाद्यकारणता स्यादिति। अन्ये तु द्विविधं रिष्टं नियतमनियतं च, तत्र "क्रियापथमतिक्रान्ताः केवलं देहमाश्रिताः। दोषाः कुर्वन्ति यल्लिङ्गं तदरिष्टं निरुच्यते॥"[१] (च. इ. ११।२९) इत्यनेनातुरगतमसाध्यदोषजन्यं यद्रिष्टं तन्नियतं नियमेन मारकमेव यत्तु नासाध्यदोषजन्यं तदनियतं, अनियतं तु मरणं व्यभिचरत्यपीत्याहुः ॥६२॥—

---

१. 'क्रियापथमतिक्रान्ताः केवलं देहमाप्लुताः।
चिह्नं कुर्वन्ति यद्दोषास्तदरिष्टं निरुच्यते॥' (च० नि०)

भूयश्चातो यथाद्रव्यं गुणकर्माणि वक्ष्यते ॥६३॥

किमेतान्येव गुणकर्माणि, उतापराण्यपीत्याह—भूय इत्यादि। गुणानां कर्माणि गुणकर्माणीत्यौपचारिकप्रयोगः। यथाद्रव्यमिति यस्मिन् द्रव्ये यद्यद्गुणकर्म तत्तस्मिन् द्रव्येऽन्नपानादौ कृत्स्ने वा तन्त्रे वक्ष्यते 'आचार्य' इति शेषः ॥६३॥

रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा।
निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः ॥६४॥

संप्रति दोषानभिधाय तत्प्रशमनप्रधानान् रसान् वक्तुमुद्यतो रसलक्षणपूर्वकं रसोत्पत्तिक्रममाह—रसनार्थ इत्यादि। रसनाग्राह्यो योऽर्थः स रस इति रसलक्षणम्। एतच्च षण्णामपि रसानामनुगतं रूपादिषु च व्यावृत्तत्वात् साधु लक्षणमित्याह **चक्रः। अस्मत्पितृचरणास्तु**—उभयथा सुश्रुत (दूषित ?)मेतल्लक्षणं रसत्वे रसाभावे चातिव्यापकं तयोरपि रसनेन्द्रियग्राह्यत्वात् तथातीन्द्रियरसे ······ चाव्यापकं तस्माद्रसनेन्द्रियग्राह्यवृत्ति गुणत्वावान्तरजातिमत्त्वं रसत्वमिति लक्षणतया बोद्धव्यमित्याहुः। तस्येति रसस्य। द्रव्यमिति समवायिकारणम्। क्षितिर्भूरेवेति, यथा आपः समवायिकारणं तथा क्षितिरपीत्यर्थः। रसस्य किं व्यक्तौ अप्क्षिती कारणं किंवा विशेषे इत्याह—निर्वृत्तौ चेत्यादि। निर्वृत्तौ अभिव्यक्तौ। तेन रसोऽभिव्यज्यमानो जलक्षित्याधार एव व्यज्यत इति दर्शयति। चकाराद्विशेषेऽपि मधुरादिलक्षणेऽपि अप्क्षिती प्रत्ययौ। तेन "सोमगुणातिरेकान्मधुरः, पृथिव्यग्निगुणातिरेकादम्लः" इत्यादिना जलपृथिव्योरपि विशेषकारणत्वं वक्ष्यमाणमुपपन्नं भवति। किंवा जलक्षिती विशेषे न कारणे "सोमगुणातिरेकान्मधुरः" इत्यादौ तु खादय एव तथा सन्निविशन्ति यथा सोमोऽतिरिक्तो भवति, तेन तत्रापि तथा ऊनत्वेन सन्निविष्टाः खादय एव विशेषहेतव इति। विशेषे च प्रत्ययाः खादयस्त्रय इति आकाशवाय्वग्नयो मधुरादिविशेषनिर्वृत्तौ प्रत्यया निमित्तकारणानि न पुनः समवायिकारणानि तेषां नीरसत्वादिति भावः ॥६४॥

स्वादुरम्लोऽथ लवणः कटुकस्तिक्त एव च।
कषायश्चेति षट्कोऽयं रसानां संग्रहः स्मृतः ॥६५॥

रसान्निर्भजते—स्वादुरित्यादि ॥६५॥

स्वाद्वम्ललवणा वायुं, कषायस्वादुतिक्तकाः।
जयन्ति पित्तं, श्लेष्माणं कषायकटुतिक्तकाः ॥६६॥

(कट्वम्ललवणाः पित्तं, स्वाद्वम्ललवणाः कफम् ।
कटुतिक्तकषायाश्च कोपयन्ति समीरणम् ॥ १)

रसानां कार्यमाह—स्वाद्वम्लेत्यादि। अत्र प्रशमकत्वेन ये रसा वातादीनां प्रोक्तास्तद्व्यतिरिक्तास्तु वर्धका बोद्धव्या इति **भट्टारचक्रौ,** तेन कट्वम्ललवणा इत्यादि पद्यमधिकमेवेति। अत्र रसकर्मातिदेशेनैव गुण-वीर्यविपाकानामपि कर्मनिर्देशः कृत एव यतो मधुरादिरसपुरस्कारेणैव सर्वगुणान् वीर्यविपाकांश्चात्रेयभद्रकाप्यीये वक्ष्यति ॥६६॥

किंचिद्दोषप्रशमनं किंचिद्धातुप्रदूषणम् ।
स्वस्थवृत्तौ मतं किंचित्त्रिविधं द्रव्यमुच्यते ॥६७॥

अतोऽवशिष्टं प्रभावकृतं द्रव्यकार्यं वक्तुं प्रभावभेदेन द्रव्यभेदमाह—किञ्चिदित्यादि। दोषप्रशमनमामलकदुरालभादि, धातुप्रदूषणं यवकमन्दक-विषादि, स्वस्थवृत्तौ स्वास्थ्यसुवृत्तौ मतं किञ्चिदिति रक्तशालिषष्टिका-न्तरीक्षजलादि ॥६७॥

तत् पुनस्त्रिविधं ज्ञेयं जाङ्गमौद्भिदपार्थिवम् ।
मधूनि गोरसाः पित्तं वसा मज्जाऽसृगामिषम् ॥६८॥

विण्मूत्रचर्मरेतोस्थिस्नायुश्रृङ्गनखाः खुराः ।
जङ्गमेभ्यः प्रयुज्यन्ते केशा लोमानि रोचनाः ॥६९॥

सुवर्णं समलाः पञ्च लोहाः ससिकताः सुधा ।
मनःशिलाले मणयो लवणं गैरिकाञ्जने ॥७०॥

भौममौषधमुद्दिष्टमौद्भिदं तु चतुर्विधम् ।
वनस्पतिस्तथा वीरुद्वानस्पत्यस्तथौषधिः ॥७१॥

फलैर्वनस्पतिः पुष्पैर्वानस्पत्यः फलैरपि ।
ओषध्यः फलपाकान्ताः प्रतानैर्वीरुधः स्मृताः ॥७२॥

मूलत्वक्सारनिर्यासनालस्वरसपल्लवाः ।
क्षाराः क्षीरं फलं पुष्पं भस्म तैलानि कण्टकाः ॥७३॥

पत्राणि शुङ्गाः कन्दाश्च प्ररोहाश्चौद्भिदो गणः ।

प्रकारान्तरेणापि द्रव्यभेदमाह—तत् पुनरित्यादि। गच्छतीति जङ्ग-मम्, उद्भिद्य पृथिवीं जायत इति औद्भिदं वृक्षादि, उक्तप्रकारद्वयव्यतिरिक्तः पृथिवीविकारः पार्थिवम्। अत्र द्रव्यशब्देन पार्थिवद्रव्यमेवाभिप्रेतं, तेन जलानिलाग्न्यादीनामग्रहणादव्याप्तिर्न वाच्या। यद्यपि जङ्गमानन्तरं

बहुप्रपञ्चत्वेन प्रधानत्वादौद्भिदमुद्दिष्टं, तथाऽप्यबहुवक्तव्यत्वात् सूचीकटाहन्यायेन पार्थिवमेव जङ्गमानन्तरं विवृणोति। सुवर्णमित्यादि उद्दिष्टमिति च्छेदः। सुवर्णं निर्मलं, तेन रजतताम्रत्रपुशीशलोहा इति मिलित्वा पञ्च लोहाः समलाः। शिलाजतुपाषाणपङ्कादीनां तु ग्रहणमुद्दिष्टशब्देन सूचितम्, उद्देशो ह्यल्पकथनम्। सुधा गाङ्गेटिका। आलं हरितालम्। अञ्जनं सौवीराञ्जनादि। फलैर्वनस्पतिरिति पुष्पं विना फलैर्विशिष्टा वटोदुम्बरादयो वनस्पतयः। पुष्पैर्वानस्पत्यः फलैरपीति पुष्पानन्तरं फलभाज इत्यर्थः। फलपाकान्ता इति फलान्ताः पाकान्ताः, तत्र फलान्तास्तिलमुद्गादयः, पाकान्ताश्च दूर्वादय इति तेषां फलाभावात्। प्रतानैरिति लतागुल्मैः। उद्भिद्य समुद्गतो गण औद्भिदः ॥६८-७३॥—

मूलिन्यः षोडशैकोना फलिन्यो विंशतिः स्मृताः ॥७४॥

महास्नेहाश्च चत्वारः पञ्चैव लवणानि च।
अष्टौ मूत्राणि संख्यातान्यष्टावेव पयांसि च ॥७५॥

शोधनार्थाश्च षड् वृक्षाः पुनर्वसुनिदर्शिताः।
य एतान् वेत्ति संयोक्तुं विकारेषु स वेदवित् ॥७६॥

सम्प्रत्यत्रैव जाङ्गमौद्भिदपार्थिवद्रव्ये यत् प्रशस्तं तदाह—मूलिन्य इत्यादि। षोडशेति च्छेदः ॥७४-७६॥

हस्तिदन्ती हैमवती श्यामा त्रिवृदधोगुडा।
सप्तला श्वेतनामा च प्रत्यक्श्रेणी गवाक्ष्यपि ॥७७॥

ज्योतिष्मती च बिम्बी च शणपुष्पी विषाणिका।
अजगन्धा द्रवन्ती च क्षीरिणी चात्र षोडशी ॥७८॥

शणपुष्पी च बिम्बी च च्छर्दने हैमवत्यपि।
श्वेता ज्योतिष्मती चैव योज्या शीर्षविरेचने ॥७९॥

एकादशावशिष्टा याः प्रयोज्यास्ता विरेचने।
इत्युक्ता नामकर्मभ्यां मूलिन्यः,

हस्तिदन्ती बृहत्फला गोडुम्बा, 'इयमेव नागदन्तीति भण्यते' इत्येके। हैमवती वचा। श्यामा श्याममूला त्रिवृत्। अधोगुडा वृद्धदारकः। सप्तला चर्मकषा। श्वेतनामा अपराजिता। प्रत्यक्श्रेणी दन्ती। बिम्बी ओष्ठोपमफला। शणपुष्पी घण्टारवा। विषाणिका आवर्तनिका। अजगन्धा

('फोकान्दी' इति ख्याता)। द्रवन्ती चांवितंपत्रा दन्ती। क्षीरिणी दुग्धिका। मूलिनीनां वमनादिविनियोगमाह–शणपुष्पीत्यादि ॥७७-७९॥–

फलिनीः शृणु ॥८०॥

शङ्खिन्यथ विडङ्गानि त्रपुषं मदनानि च।
धामार्गवमथेक्ष्वाकु जीमूतं कृतवेधनम्।
आनूपं स्थलजं चैव क्लीतकं द्विविधं स्मृतम् ॥८१॥

प्रकीर्या चोदकीर्या च प्रत्यक्पुष्पी तथाऽभया।
अन्तःकोटरपुष्पी च हस्तिपर्ण्याश्च शारदम् ॥८२॥

कम्पिल्लकारग्वधयोः फलं यत् कुटजस्य च।
धामार्गवमथेक्ष्वाकु जीमूतं कृतवेधनम् ॥८३॥

मदनं कुटजं चैव त्रपुषं हस्तिपर्णिनी।
एतानि वमने चैव योज्यान्यास्थापनेषु च ॥८४॥

नस्तः प्रच्छर्दने चैव प्रत्यक्पुष्पी विधीयते।
दश यान्यवशिष्टानि तान्युक्तानि विरेचने ॥८५॥

नामकर्मभिरुक्तानि फलान्येकोनविंशतिः।
सर्पिस्तैलं वसा मज्जा स्नेहो दृष्टश्चतुर्विधः ॥८६॥

पानाभ्यञ्जनबस्त्यर्थं नस्यार्थं चैव योगतः।
स्नेहना जीवना बल्या वर्णोपचयवर्धनाः ॥८७॥

स्नेहा ह्येते च विहिता वातपित्तकफापहाः।

शङ्खिनीत्यादि। शङ्खिनी श्वेतबुह्ला। (क्ली)तकं यष्टीमधु; अस्य यद्यपि मूलं सुश्रुते प्रशस्तमुक्तं, मूलेनैव च व्यवहारः; तथाऽपि फलिनीमध्ये पाठात् विरेचनं प्रति फलमेव प्रशस्तं ज्ञेयम्। धामार्गवः पीतघोषः। इक्ष्वाकुः तिक्तालाबूः। जीमूतो घोषकभेदः। कृतवेधनं ज्योत्स्निका। प्रकीर्योदकीर्ये करञ्जद्वयम्। प्रत्यक्पुष्पी अपामार्गः। अन्तःकोटरपुष्पी नीलबुह्ला। हस्तिपर्णी मोरटः, अस्याः शरत्कालप्रभवमेव फलं ग्राह्यं; अत उक्तं—हस्तिपर्ण्याश्च शारदमिति। कम्पिल्लकं गुण्डारोचनिका। फलिनीनां पञ्चकर्मविनियोगमाह—धामार्गवमित्यादि। नस्तः-

———

१. चीरित[1]

प्रच्छर्दन इति शिरोविरेचने। अभ्यञ्जन इति स्नेहाभ्यङ्गे, वर्त्यर्थमिति फलवर्त्यर्थम् ॥ ८०-८७ ॥—

सौवर्चलं सैन्धवं च बिडमौद्भिदमेव च ॥८८॥
सामुद्रेण सहैतानि पञ्च स्युर्लवणानि च।
स्निग्धान्युष्णानि तीक्ष्णानि दीपनीयतमानि च ॥८९॥
आलेपनार्थे युज्यन्ते स्नेहस्वेदविधौ तथा।
अधोभागोर्ध्वभागेषु निरूहेष्वनुवासने ॥९०॥
अभ्यञ्जने भोजनार्थे शिरसश्च विरेचने।
शस्त्रकर्मणि वर्त्यर्थमञ्जनोत्सादनेषु च ॥९१॥
अजीर्णानाहयोर्वाते गुल्मे शूले तथोदरे।
उक्तानि लवणान्यूर्ध्वं मूत्राण्यष्टौ निबोध मे ॥९२॥
मुख्यानि यानि दिष्टानि सर्वाण्यात्रेयशासने।
अविमूत्रमजामूत्रं गोमूत्रं माहिषं च यत् ॥९३॥
हस्तिमूत्रमथोष्ट्रस्य हयस्य च खरस्य च।
उष्णं तीक्ष्णमथोऽरूक्षं कटुकं लवणान्वितम् ॥९४॥
मूत्रमुत्सादने युक्तं युक्तमालेपनेषु च।
युक्तमास्थापने मूत्रं युक्तं चापि विरेचने ॥९५॥
स्वेदेष्वपि च तद्युक्तमानाहेष्वगदेषु च।
उदरेष्वथ चार्शःसु गुल्मकुष्ठकिलासिषु ॥९६॥
तद्युक्तमुपनाहेषु परिषेके तथैव च।
दीपनीयं विषघ्नं च क्रिमिघ्नं चोपदिश्यते ॥९७॥
पाण्डुरोगोपसृष्टानामुत्तमं शर्म चोच्यते।
श्लेष्माणं शमयेत् पीतं मारुतं चानुलोमयेत् ॥९८॥
कर्षेत् पित्तमधोभागमित्यस्मिन् गुणसंग्रहः।
सामान्येन मयोक्तस्तु पृथक्त्वेन प्रवक्ष्यते ॥९९॥
अविमूत्रं सतिक्तं स्यात् स्निग्धं पित्ताविरोधि च।
आजं कषायमधुरं पथ्यं दोषान्निहन्ति च ॥१००॥
गव्यं समधुरं किंचिद्दोषघ्नं क्रिमिकुष्ठनुत्।
कण्डूं च शमयेत् पीतं सम्यग्दोषोदरे हितम् ॥१०१॥

अर्शःशोफोदरघ्नं तु सक्षारं माहिषं सरम् ।
हास्तिकं लवणं मूत्रं हितं तु क्रिमिकुष्ठिनाम् ॥१०२॥
प्रशस्तं बद्धविण्मूत्रविषश्लेष्मामयार्शसाम् ।
सतिक्तं श्वासकासघ्नमर्शोघ्नं चौष्ट्रमुच्यते ॥१०३॥
वाजिनां तिक्तकटुकं कुष्ठव्रणविषापहम् ।
खरमूत्रमपस्मारोन्मादग्रहविनाशनम् ॥१०४॥
इतीहोक्तानि मूत्राणि यथासामर्थ्ययोगतः ।

अत्र स्त्रीमूत्रमेव प्रशस्तमिति स्त्रीलिङ्गपरिग्रहो दर्शयति। अत्र विषघ्नमित्यनेन केवलस्य विषहरत्वम्, अगदेष्वित्यनेन विषघ्नप्रयोगयौगिकत्वमिति न पौनरुक्त्यम्। उत्तमं शर्म चोच्यते इति आरोग्यरूपसुखकर्तृत्वात्। अधोगमिति अधोगतं पित्तं विरेचयति नोर्ध्वगम्। यथासामर्थ्ययोगत इति यादृशः शक्तियोगो मूत्राणां तथा ॥८८-१०४॥—

अतः क्षीराणि वक्ष्यन्ते कर्म चैषां गुणाश्च ये ॥१०५॥
अविक्षीरमजाक्षीरं गोक्षीरं माहिषं च यत् ।
उष्ट्रीणामथ नागीनां वडवायाः स्त्रियास्तथा ॥१०६॥
प्रायशो मधुरं स्निग्धं शीतं स्तन्यं पयो मतम् ।
प्रीणनं बृंहणं वृष्यं मेध्यं बल्यं मनस्करम् ॥१०७॥
जीवनीयं श्रमहरं श्वासकासनिबर्हणम् ।
हन्ति शोणितपित्तं च सन्धानं विहतस्य च ॥१०८॥
सर्वप्राणभृतां सात्म्यं शमनं शोधनं तथा ।
तृष्णाघ्नं दीपनीयं च श्रेष्ठं क्षीणक्षतेषु च ॥१०९॥
पाण्डुरोगेऽम्लपित्ते च शोषे गुल्मे तथोदरे ।
अतीसारे ज्वरे दाहे श्वयथौ च विशेषतः ॥११०॥
योनिशुक्रप्रदोषेषु मूत्रेषु प्रदरेषु च ।
पुरीषे ग्रथिते पथ्यं वातपित्तविकारिणाम् ॥१११॥
नस्यालेपावगाहेषु वमनास्थापनेषु च ।
विरेचने स्नेहने च पयः सर्वत्र युज्यते ॥११२॥
यथाक्रमं क्षीरगुणानेकैकस्य पृथक् पृथक् ।
अन्नपानादिकेऽध्याये भूयो वक्ष्याम्यशेषतः ॥११३॥

मनस्करमिति हृद्यम् ॥१०५-११३॥

अथापरे त्रयो वृक्षाः पृथग्ये फलमूलिभिः ।
स्नुह्यर्काश्मन्तकास्तेषामिदं कर्म पृथक् पृथक् ॥११४॥
वमनेऽश्मन्तकं विद्यात् स्नुहीक्षीरं विरेचने ।
क्षीरमर्कस्य विज्ञेयं वमने सविरेचने ॥११५॥

पृथग्ये फलमूलिभिरिति । पृथक्श(ब्द)योगादपादाने तृतीया । अश्मन्तको मालुआसदृशपत्रो वृक्षः ॥११४–११५॥

इमांस्त्रीनपरान् वृक्षानाहुर्येषां हितास्त्वचः ।
पूतीकः कृष्णगन्धा च तिल्वकश्च तथा तरुः ॥११६॥
विरेचने प्रयोक्तव्यः पूतीकस्तिल्वकस्तथा ।
कृष्णगन्धा परीसर्पे शोथेष्वर्शःसु चोच्यते ॥११७॥
दद्रुविद्रधिगण्डेषु कुष्ठेष्वप्यलजीषु च ।
षड्वृक्षाञ्छोधनानेतानपि विद्याद्विचक्षणः ॥११८॥
इत्युक्ताः फलमूलिन्यः स्नेहाश्च लवणानि च ।
मूत्रं क्षीराणि वृक्षाश्च षड् ये दिष्टाः पयस्त्वचः ॥११९॥

पूतीकः कण्टकिकरञ्जः । तिल्वको लोध्रः । कृष्णगन्धाया अपि बहिःपरिमार्जनत्वेन शोधनत्वं ज्ञेयम् ॥११६–११९॥

ओषधीर्नामरूपाभ्यां जानते ह्यजपा वने ।
अविपाश्चैव गोपाश्च ये चान्ये वनवासिनः ॥१२०॥
न नामज्ञानमात्रेण रूपज्ञानेन वा पुनः ।
ओषधीनां परां प्राप्तिं कश्चिद्वेदितुमर्हति ॥१२१॥
योगविन्नामरूपज्ञस्तासां तत्त्वविदुच्यते ।
किं पुनर्यो विजानीयादोषधीः सर्वथा भिषक् ॥१२२॥
योगमासां तु यो विद्याद्देशकालोपपादितम् ।
पुरुषं पुरुषं वीक्ष्य स ज्ञेयो भिषगुत्तमः ॥१२३॥
यथा विषं यथा शस्त्रं यथाऽग्निरशनिर्यथा ।
तथौषधमविज्ञातं विज्ञातममृतं यथा ॥१२४॥
औषधं ह्यनभिज्ञातं नामरूपगुणैस्त्रिभिः ।
विज्ञातं चापि दुर्युक्तमनर्थायोपपद्यते ॥१२५॥
योगादपि विषं तीक्ष्णमुत्तमं भेषजं भवेत् ।
भेषजं चापि दुर्युक्तं तीक्ष्णं संपद्यते विषम् ॥१२६॥

तस्मान्न भिषजा युक्तं युक्तिबाह्येन भेषजम् ।
धीमता किंचिदादेयं जीवितारोग्यकांक्षिणा ॥१२७॥
कुर्यान्निपतितो मूर्ध्नि सशेषं वासवाशनिः ।
सशेषमातुरं कुर्यान्न त्वज्ञमतमौषधम् ।१२८॥
दुःखिताय शयानाय श्रद्दधानाय रोगिणे ।
यो भेषजमविज्ञाय प्राज्ञमानी प्रयच्छति ॥१२९॥
त्यक्तधर्मस्य पापस्य मृत्युभूतस्य दुर्मतेः ।
नरो नरकपाती स्यात्तस्य संभाषणादपि ॥१३०॥
वरमाशीविषविषं क्वथितं ताम्रमेव वा ।
पीतमत्यग्निसन्तप्ता भक्षिता वाऽप्ययोगुडाः ॥१३१॥
न तु श्रुतवतां वेषं बिभ्रता शरणागतात् ।
गृहीतमन्नं पानं वा वित्तं वा रोगपीडितात् ॥१३२॥
भिषग्बुभूषुर्मतिमानतः स्वगुणसम्पदि ।
परं प्रयत्नमातिष्ठेत् प्राणदः स्याद्यथा नृणाम् ॥१३३॥

ओषध्यो येभ्यो ज्ञातव्यास्तानाह—ओषधीरित्यादि । ओषधीनां योगज्ञानस्य प्राधान्यं दर्शयति—न नामज्ञानेत्यादि ॥१२०–१३३॥

तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ॥१३४॥

अथ सम्यग्युक्तस्य भेषजस्य किं लक्षणं किंवा उपादेयस्य वैद्यस्य लक्षणमित्याह—तदेवेत्यादि ॥१३४॥

सम्यक्प्रयोगं सर्वेषां सिद्धिराख्याति कर्मणाम् ।
सिद्धिराख्याति सर्वैश्च गुणैर्युक्तं भिषक्तमम् ॥१३५॥

कथमारोग्याद्भेषजस्य सम्यग्योगो ज्ञायते इत्याह—सम्यक्प्रयोगमित्यादि ॥१३५॥

तत्र श्लोकाः—
आयुर्वेदागमो हेतुरागमस्य प्रवर्तनम् ।
सूत्रणस्याभ्यनुज्ञानमायुर्वेदस्य निर्णयः ॥१३६॥
संपूर्णं कारणं कार्यमायुर्वेदप्रयोजनम् ।
हेतवश्चैव दोषाश्च भेषजं संग्रहेण च ॥१३७॥
रसाः सप्रत्ययद्रव्यास्त्रिविधो द्रव्यसंग्रहः ।
मूलिन्यश्च फलिन्यश्च स्नेहाश्च लवणानि च ॥१३८॥

मूत्रं क्षीराणि वृक्षाश्च षड् ये क्षीरत्वगाश्रयाः ।
कर्माणि चैषां सर्वेषां योगायोगगुणागुणाः ॥१३९॥
वैद्यापवादो यत्रस्थाः सर्वे च भिषजां गुणाः ।
सर्वमेतत् समाख्यातं पूर्वाध्याये महर्षिणा ॥१४०॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
दीर्घञ्जीवितीयो नाम प्रथमोऽध्यायः ॥१॥

अध्यायोक्तमर्थमध्यायान्ते सङ्ग्रहणात्तत्र श्लोका इत्यादि। न च अध्यायोक्तोऽर्थः सङ्ग्रहेणोच्यतां नामतस्तत्र श्लोका इति तु व्यर्थं, विनाऽपि 'तत्र श्लोका' इति वचनेन तदर्थस्य लब्धत्वात् प्रस्तुतानुप्रयोगित्वाच्च, न हि 'तत्र श्लोका' इति वचनं प्रस्तुते किमपि साधयति। एवं वक्ष्यमाणेऽपि भवति चात्रेति न वाच्यं प्रयोजनाभावात्। अत्र केचिदितिहासधर्मशास्त्रेषु दृष्टत्वात् वेदादिधर्मप्रदर्शनार्थं तद्वचनं कृतं, अन्ये तु यत्र गद्यानन्तरं 'तत्र श्लोकाः' 'भवति चात्र' वा तन्यते तत्र गद्यपद्यव्यवच्छेदप्रदर्शनार्थं तेन गद्यपद्यव्यवच्छेदप्रदर्शनपरेण वचनेन मन्दबुद्धयोऽनुगृहीता भवन्ति। यत्र पुनः श्लोकवत्त्वेऽप्यध्यायसंग्रहश्लोकारम्भे 'तत्र श्लोका' इत्यादिकमुच्यते तत्रापि संग्राह्यसंग्रहयोर्भेदं दर्शयितुं, यत्र तूक्तादधिकमपि निगदति तत्र 'भवति चात्रे'ति करोति। हेतुरित्यायुर्वेदागमहेतुः, स च विघ्नभूता यदा रोगा इत्यादिनोक्तः। आगमस्य प्रवर्तनमिति हिताहितं सुखं दुःखमित्या-दिना। शेषं सुगमम् ॥१३६-१४०॥

॥ इति श्रीशिवदाससेनविरचितायां चरकतत्त्वप्रदीपिकायां
दीर्घञ्जीवितीयः समाप्तः ॥१॥

द्वितीयोऽध्यायः

अथातोऽपामार्गतण्डुलीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

अपामार्गस्य बीजानि पिप्पलीर्मरिचानि च ।
विडङ्गान्यथ शिग्रूणि सर्षपांस्तुम्बरूणि च ॥३॥

अजाजीं चाजगन्धां च पीलून्येलां हरेणुकाम् ।
पृथ्वीकां सुरसां श्वेतां कुठेरकफणिज्झकौ ॥४॥

शिरीषबीजं लशुनं हरिद्रे लवणद्वयम् ।
ज्योतिष्मतीं नागरं च दद्याच्छीर्षविरेचने ॥५॥

गौरवे शिरसः शूले पीनसेऽर्धावभेदके ।
क्रिमिव्याधावपस्मारे घ्राणनाशे प्रमोहके ॥६॥

पूर्वाध्याये पञ्चकर्माङ्गभूतान्यौषधानि कतिचिदेवोक्तानि, तथा पञ्चकर्मप्रवृत्ति[1]विषयोऽपि तत्र नोक्तः, तेनानन्तरमवशिष्टपञ्चकर्मोपयोगिद्रव्यस्य तथा पञ्चकर्मप्रवृत्तिविषयस्य चाभिधायकोऽपामार्गतण्डुलीयोऽभिधीयते । ये तु विवरणस्योद्देशक्रमानुसारित्वाद्वक्ष्यमाणोद्देशग्रन्थमेवाध्यायार्थसम्बन्धे हेतुमाहुस्तैरप्युद्देशक्रमोऽवश्यं हेत्वन्तरेण साधनीय इति किञ्चिल्लाघवम् । अत्रापामार्गबीजीय इति संज्ञायां प्राप्तायां तण्डुलीय इति संज्ञाकरणं निस्तुषाणामेवापामार्गबीजानां ग्रहणार्थम् । बीजग्रहणं च अङ्कुरजननसमर्थबीजभावानामेव तण्डुलानां ग्रहणार्थम् । तत्र प्रधानाङ्गशिरःशोधनत्वाच्छिरोविरेचनद्रव्याण्येव प्रथममाह—अपामार्गस्येत्यादि । पूर्वोक्तान्यपामार्गादीनि यत् पुनरिहोच्यन्ते तदाचार्य एवाध्यायान्ते पूर्वं मूलफलेत्यादिना श्लोकद्वयेन समाधास्यति । अजगन्धा अजमोदा । पीलु औत्तरापथिकं फलम् । पृथ्वीका कृष्णजीरकम् । सुरसा तुलसी । कुठेरकं कुठालिआ । फणिज्झकः पर्णासः । लवणद्वयं सौवर्चलं सैन्धवं च । ज्योतिष्मती लतापुटकी । अयं वर्गो व्यस्तः समस्तश्च शिरोविरेचने योज्यस्तदुक्तं—"समस्तं वर्गमर्धं वा

---

१. प्रभृति[1]

यथा"। शिरस इति गौरवे इत्यनेन शूल इत्यनेन च सम्बध्यते। क्रिमिव्याधिरिह शिरोगत एव बोध्यः, तस्य च शिरोविरेचनसाध्यत्वात्। प्रमोहको मूर्च्छा, इन्द्रियापटुत्वं वा ॥१-६॥

मदनं मधुकं निम्बं जीमूतं कृतवेधनम्।
पिप्पलीकुटजेक्ष्वाकूण्येलां धामार्गवाणि च ॥७॥
उपस्थिते श्लेष्मपित्ते व्याधावामाशयाश्रये।
वमनार्थं प्रयुञ्जीत भिषग्देहमदूषयन् ॥८॥

वमनद्रव्यमाह—मदनमित्यादि। जीमूतकृतवेधने घोषकभेदौ, इक्ष्वाकुस्तिक्तालाबुः। उपस्थिते इति आमाशयं गत्वोत्क्लेशाद् बहिर्निर्गमोन्मुखे। श्लेष्मपित्ते इति पित्तस्यापि वमनविषयत्वं कफस्थानसम्बन्धात्। यदुक्तं—"स्थानिस्था[१]नगतं दोषं स्थानिवत्समुपाचरेत्।" इति। देहमदूषयन्निति अयोगातियोगाभ्यां[२] देहदुष्टिर्यथा न भवतीत्यर्थः। एतच्च विरेचनेऽपि ज्ञेयम् ॥७-८॥

त्रिवृतां त्रिफलां दन्तीं नीलिनीं सप्तलां वचाम्।
कम्पिल्लकं गवाक्षीं च क्षीरिणीमुदकीर्यकाम् ॥९॥
पीलून्यारग्वधं द्राक्षां द्रवन्तीं निचुलानि च।
पक्वाशयगते दोषे विरेकार्थं प्रयोजयेत् ॥१०॥

विरेचनद्रव्याण्याह—त्रिवृतामित्यादि। नीलिका नीलबुध्ना। सप्तला चर्मकषा। कम्पिल्लकं गुण्डारोचनिका। गवाक्षी गोरक्षकर्कटी। क्षीरिणी दुग्धिका। उदकीर्यका करञ्जः। द्रवन्ती चिवितपत्रा दन्ती। निचुलं इज्जलमिति प्रसिद्धम्। दोषे इति-पित्तं कफपित्तं वा दोषशब्देनात्रोच्यते विरेचननिर्हरणयोग्यत्वात्, यदुक्तं—"पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत्।" इति। पित्ताशयश्चामाशयाधोभागः पक्वाशयगते इति पित्ताशयादेव पक्वाशयगमनायोन्मुखे इत्यर्थः ॥९-१०॥

पाटलिं चाग्निमन्थं च बिल्वं श्योनाकमेव च।
काश्मर्यं शालपर्णीं च पृश्निपर्णीं निदिग्धिकाम् ॥११॥
बलां श्वदंष्ट्रां बृहतीमेरण्डं सपुनर्नवम्।
यवान् कुलत्थान् कोलानि गुडूचीं मदनानि च ॥१२॥

---

१. दोष[1]

२. अतियोगायोगमिथ्यायोगैः[1]

पलाशं कत्तृणं चैव स्नेहांश्च लवणानि च।
उदावर्ते विबन्धेषु युञ्ज्यादास्थापनेषु च ॥१३॥
अत एवौषधगणात् संकल्प्यमनुवासनम्।
मारुतघ्नमिति प्रोक्तः संग्रहः पाञ्चकर्मिकः ॥१४॥

निरूहद्रव्याण्याह—पाटलिञ्चे[1]त्यादि। कट्तृणं गन्धतृणम्। स्नेहाः सर्पिस्तैलवसामज्जानः। लवणानि उक्तपञ्चलवणानि। आस्थापनेषु निरूहेषु। अनुवासनमाह—अत एवौषधगणात् संकल्प्यमनुवासनमित्यनुवासनविषयोऽभिहितः, इति समाप्तौ। सङ्ग्रह इत्यनेन रोगभिषग्जितीयादौ वक्ष्यमाणं पञ्चकर्म सूचयति ॥११-१४॥

तान्युपस्थितदोषाणां स्नेहस्वेदोपपादनैः।
पञ्च कर्माणि कुर्वीत मात्राकालौ विचारयन् ॥१५॥

पञ्चकर्माणि यथा कार्याणि तदाह—तानीत्यादि। स्नेहस्वेदोपपादनैरुपस्थिता उत्क्लिष्टा दोषा येषामित्यर्थः। अत्र पञ्चकर्मशब्देन योगरूढ्या वमनविरेचननिरूहानुवासननस्यान्येवोच्यन्ते, न तु स्नेहस्वेदादीनि, यदाह **भेलः**—"वमनं रेचनञ्चैव निरूहमनुवासनम्। नस्यकर्म तथा चोक्तं कर्म पञ्चविधं बुधैः।" इति। एतेन स्नेहपूर्विका दोषसंशुद्धिः पञ्चकर्मेति लक्षणमुक्तं भवति, स्नेहपूर्विकेति कवलग्रहादिव्यावृत्यर्थम्, दोषपदेन च रक्ताकृष्टेर्निरासः ॥१५॥

मात्राकालाश्रया युक्तिः, सिद्धिर्युक्तौ प्रतिष्ठिता।
तिष्ठत्युपरि युक्तिज्ञो द्रव्यज्ञानवतां सदा ॥१६॥

मात्राकालविचारफलमाह—मात्राकालेत्यादि। देहदोषाद्यपेक्षया भेषजस्य योजना युक्तिः। सिद्धिरारोग्यस्य निष्पत्तिः ॥१६॥

अत ऊर्ध्वं प्रवक्ष्यामि यवागूर्विविधौषधाः।
विविधानां विकाराणां तत्साध्यानां निवृत्तये ॥१७॥

वमनादिद्रव्याण्यभिधाय तदनन्तरप्रयोज्यत्वेन यवागूरभिधातुं प्रतिजानीते—अत ऊर्ध्वमित्यादि। यवागूर्द्विविधा—कल्कसाध्या कषायसाध्या च। तत्राद्या 'कर्षार्धं वा कणाशुण्ठ्योरित्यादिपरिभाषया कर्त्तव्या,

---

१. पाटलाञ्च (च. नि.)[1]

द्वितीया तु षडङ्गपरिभाषयेति ज्ञेयम् । अत्र तु साक्षाद्भेषजादीनां प्रमाणं नोक्तं मात्राया दोषादिभेदेनानियतत्वात् ॥१७॥

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
यवागूर्दीपनीया स्याच्छूलघ्नी चोपसाधिता ॥१८॥
दधित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता ।
पाचनी ग्राहिणी पेया सवाते पाञ्चमूलिकी ॥१९॥
शालपर्णीबलाबिल्वैः पृश्निपर्ण्या च साधिता ।
दाडिमाम्ला हिता पेया पित्तश्लेष्मातिसारिणाम् ॥२०॥
पयस्यर्धोदके च्छागे ह्रीबेरोत्पलनागरैः ।
पेया रक्तातिसारघ्नी पृश्निपर्ण्या च साधिता ॥२१॥
दद्यात् सातिविषां पेयां सामे साम्लां सनागराम् ।
श्वदंष्ट्राकण्टकारीभ्यां मूत्रकृच्छ्रे सफाणिताम् ॥२२॥
विडङ्गपिप्पलीमूलशिग्रुभिर्मरिचेन च ।
तक्रसिद्धा यवागूः स्यात् क्रिमिघ्नी ससुवर्चिका ॥२३॥
मृद्वीकासारिवालाजपिप्पलीमधुनागरैः ।
पिपासाघ्नी विषघ्नी च सोमराजीविपाचिता ॥२४॥
सिद्धा वराहनिर्यूहे यवागूर्बृंहणी मता ।
गवेधुकानां भृष्टानां कर्शनीया समाक्षिका ॥२५॥
सर्पिष्मती बहुतिला स्नेहनी लवणान्विता ।
कुशामलकनिर्यूहे श्यामाकानां विरूक्षणी ॥२६॥
दशमूलीशृता कासहिक्काश्वासकफापहा ।
यमके मदिरासिद्धा पक्वाशयरुजापहा ॥२७॥
शाकैर्मांसैस्तिलैर्माषैः सिद्धा वर्चो निरस्यति ।
जम्ब्वाम्रास्थिदधित्थाम्लबिल्वैः साङ्ग्राहिकी मता ॥२८॥
क्षारचित्रकहिङ्ग्वम्लवेतसैर्भेदिनी मता ।
अभयापिप्पलीमूलविश्वैर्वातानुलोमनी ॥२९॥
तक्रसिद्धा यवागूः स्याद् घृतव्यापत्तिनाशिनी ।
तैलव्यापदि शस्ता स्यात्तक्रपिण्याकसाधिता ॥३०॥
गव्यमांसरसैः साम्ला विषमज्वरनाशिनी ।
कण्ठ्या यवानां यमके पिप्पल्यामलकैः शृता ॥३१॥

ताम्रचूडरसे सिद्धा रेतोमार्गरुजापहा ।
समाषविदला वृष्या घृतक्षीरोपसाधिता ॥३२॥
उपोदिकादधिभ्यां तु सिद्धा मदविनाशिनी ।
क्षुधं हन्यादपामार्गक्षीरगोधारसैः शृता ॥३३॥

पिप्पलीत्यादौ उपसाधितेति वचनेन भेषजादीनामुचितपरिमाणग्रहणं सूचितं वृद्धवैद्यव्यवहारात्तु ज्ञातव्यमित्ययमर्थो विस्तरेण ज्वरचिकित्सिते वाच्य इति नेहोच्यते। दधित्थः कपित्थः। एषाञ्च कल्कः, तक्रं च जलस्थाने। ग्राहिणीति तत्र छेदः। सवाते इति वातातिसारे। स्वल्पपञ्चमूलसाधिता यवागूर्हिता 'ध्रुवाद्यैर्वाय्विवतीसारे' इति **जतूकर्ण**दर्शनात्। दाडिमाम्लेति यावता दाडिमेनाम्लत्वं भवति तावदेव दाडिमं देयमित्यर्थः। पयसीत्यादौ नागरं मुस्तं "रक्तातिसारेऽजाक्षीरक्रोष्ट्रीघनजलोत्पलै"रिति **जतूकर्ण**सम्वादात्, अन्ये तु नागरं शुण्ठी मधुरपाकित्वादित्याहुः। अत्र पयसीत्याद्या पृश्निपर्ण्यन्ता एकैव यवागूः। साम्लमिति दाडिमाम्लम्। फाणितो गुडः। विडङ्गेत्यादौ सुवर्चिका सर्जिकाक्षारः। मृद्वीकेत्यादौ पिपासाघ्नीति छेदः। गवेधुकानामित्यादौ गवेधुकं तण्डुलबीजं, एतत्तु तण्डुलस्थाने। बहुतिलेति तिलानां कल्कैः। कुशाम्लकेत्यादौ श्यामाकबीजं तण्डुलस्थाने। यमक इत्यादौ यमके घृततैले संस्कृता इत्यर्थः, मदिरा च जलस्थाने। शाकेत्यादौ शाकादिभिः समानैर्यवागूः साध्या। निरस्यतीति पुरीषवर्धकत्वेनाधः पुरीषं निःसारयति। दधित्थाम्लशब्देन कपित्थस्याम्लावस्थायामेव ग्रहणं सूचयति। तक्रसिद्धेत्यादौ तक्रमुदकस्थाने। पिण्याकस्तिलकल्कः। अत्र यमकं परिभर्जनार्थम्। समाषविदलेत्यादौ तण्डुलं माषविदलतुल्यं, क्षीरन्तु जलस्थाने, घृतं परिभर्जने बोध्यं, किंवा माषप्रकृतिकैवेयम्। अत्र मदशब्देन विषज-रौधिरमद्यमदानां त्रयाणामपि ग्रहणमविशेषात्। अपामार्गतण्डुलास्तण्डुलस्थाने, क्षीरं गोधामांसरसश्च जलस्थाने ॥१८-३३॥

तत्र श्लोकः—

अष्टाविंशतिरित्येता यवाग्वः परिकीर्तिताः ।
पञ्चकर्माणि चाश्रित्य प्रोक्तो भैषज्यसंग्रहः ॥३४॥

प्रतिलोमतन्त्रयुक्त्याऽध्यायसङ्ग्रहं करोति—अष्टाविंशतिरित्यादि ॥३४॥

पूर्वं मूलफलज्ञानहेतोरुक्तं यदौषधम् ।
पञ्चकर्माश्रयज्ञानहेतोस्तत् कीर्तितं पुनः ॥३५॥

दीर्घञ्जीवितीये मूलिनीफलिनीगणपठितानामपामार्गजीमूतादीनां पुनरभिधाने उपपत्तिमाह—पूर्वमित्यादि। मूलफलज्ञानहेतोरिति अस्य मूलेन व्यवहारोऽस्य फलेन व्यवहार इति ज्ञातुमित्यर्थः। पञ्चेति पञ्चकर्माश्रयत्वज्ञानार्थमित्यर्थः। यद्यपि मूलिन्यः फलिन्यः दीर्घञ्जीवितीये "शणपुष्पी च बिम्बी च" इत्यादिना ग्रन्थेन पञ्चकर्माश्रयत्वेनाप्राधान्यमप्यपामार्गादीनां शङ्क्यते, इत्युक्तं—"पञ्चकर्माश्रयज्ञानहेतोस्तत् कीर्तितं पुनरि"ति ॥३५॥

स्मृतिमान् हेतुयुक्तिज्ञो जितात्मा प्रतिपत्तिमान्।
भिषगौषधसंयोगैश्चिकित्सां कर्तुमर्हति ॥३६॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थानेऽपामार्गतण्डुलीयो नाम द्वितीयोऽध्यायः ॥२॥

एतदध्यायप्रतिपादितायाः पञ्चकर्मप्रवृत्तेर्दुर्ज्ञेयत्वेन यादृशेन वैद्येन चिकित्सा कर्तव्या तादृशं वैद्यमाह—स्मृतिमानित्यादि। उपपन्नायामापदि झटिति तत्प्रशमोपायज्ञानं प्रतिपत्तिः ॥३६॥

इति श्रीशिवदाससेनविरचितायां चरकतत्त्वप्रदीपिकायामपामार्गतण्डुलीयः समाप्तः ॥२॥

तृतीयोऽध्यायः

अथात आरग्वधीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

द्विविधं हि भेषजमन्तःपरिमार्जनं बहिःपरिमार्जनं च, तत्राद्यं प्रागुक्तं, द्वितीयमभिधातुमारग्वधीय आरभ्यते। यद्यप्यमी वक्ष्यमाणयोगाः कुष्ठचिकित्सित एव वक्तुमुचितास्तथाप्यस्मिन् भेषजचतुष्केऽन्तःपरिमार्जनौषधसूत्रणवद्बहिःपरिमार्जनौषधसूत्रणार्थमत्रोक्ता इति नोचिताऽऽशङ्का ॥१-२॥

आरग्वधः सैडगजः करञ्जो वासा गुडूची मदनं हरिद्रे।
श्र्याह्वः सुराह्वः खदिरो धवश्च निम्बो विडङ्गं करवीरकत्वक् ॥३॥
ग्रन्थिश्च भौर्जो लशुनः शिरीषः सलोमशो गुग्गुलुकृष्णगन्धे।
फणिज्झको वत्सकसप्तपर्णौ पीलूनि कुष्ठं सुमनःप्रवालाः ॥४॥
वचा हरेणुस्त्रिवृता निकुम्भो भल्लातकं गैरिकमञ्जनं च।
मनःशिलाले गृहधूम एला कासीसलोध्रार्जुनमुस्तसर्जाः ॥५॥
इत्यर्धरूपैर्विहिताः षडेते गोपित्तपीताः पुनरेव पिष्टाः।
सिद्धाः परं सर्षपतैलयुक्ताश्चूर्णप्रदेहा भिषजा प्रयोज्याः ॥६॥
कुष्ठानि कृच्छ्राणि नवं किलासं सुरेशलुप्तं किटिभं सदद्रु।
भगन्दरार्शांस्यपचीं सपामां हन्युः प्रयुक्तास्त्वचिरान्नराणाम् ॥७॥

कुष्ठं हरिद्रे सुरसं पटोलं निम्बाश्वगन्धे सुरदारुशिग्रू।
ससर्षपं तुम्बुरुधान्यवन्यं चण्डां च चूर्णानि समानि कुर्यात् ॥८॥
तैस्तक्रपिष्टैः प्रथमं शरीरं तैलाक्तमुद्वर्तयितुं यतेत।
तेनास्य कण्डूः पिडकाः सकोठाः कुष्ठानि शोफाश्च शमं व्रजन्ति ॥९॥
कुष्ठामृतासङ्गकटङ्कटेरीकासीसकम्पिल्लकमुस्तलोध्राः।
सौगन्धिकं सर्जरसो विडङ्गं मनःशिलाले करवीरकत्वक् ॥१०॥
तैलाक्तगात्रस्य कृतानि चूर्णान्येतानि दद्यादवचूर्णनार्थम्।
दद्रूः सकण्डूः किटिभानि पामा विचर्चिका चैव तथैति शान्तिम् ॥११॥
मनःशिलाले मरिचानि तैलमार्कं पयः कुष्ठहरः प्रदेहः।
तुत्थं विडङ्गं मरिचानि कुष्ठं लोध्रं च तद्वत् समनःशिलं स्यात् ॥१२॥

रसाञ्जनं सप्रपुनाडबीजं युक्तं कपित्थस्य रसेन लेपः ।
करञ्जबीजैडगजं सकुष्ठं गोमूत्रपिष्टं च परः प्रदेहः ॥१३॥

उभे हरिद्रे कुटजस्य बीजं करञ्जबीजं सुमनःप्रवालान् ।
त्वचं समध्यां हयमारकस्य लेपं तिलक्षारयुतं विदध्यात् ॥१४॥

मनःशिला त्वक् कुटजात् सकुष्ठात् सलोमशः सैडगजः करञ्जः ।
ग्रन्थिश्च भौर्जः करवीरमूलं चूर्णानि साध्यानि तुषोदकेन ॥१५॥

पलाशनिर्दाहरसेन चापि कर्षोद्धृतान्याढकसंमितेन ।
दर्वीप्रलेपं प्रवदन्ति लेपमेतं परं कुष्ठनिसूदनाय ॥१६॥

पर्णानि पिष्ट्वा चतुरङ्गुलस्य तक्रेण पर्णान्यथ काकमाच्याः ।
तैलाक्तगात्रस्य नरस्य कुष्ठान्युद्वर्तयेदश्वहनच्छदैश्च ॥१७॥

श्याह्वो नवनीतकोटिः[1] । सुराह्वो देवदारुः । करवीरकश्चेति **काश्मीरकाः** पठन्ति, करवीरकत्वगिति **गौडीयाः** । ग्रन्थिश्च भौर्ज इति भूर्जपत्रग्रन्थिः । लोमशो धातुकासीसस्तमालपत्रं वा । कृष्णगन्धा शोभाञ्जनम् । फणिज्झकः पर्णासभेदः । पीलु औत्तरापथिकं फलम् । सुमनःप्रवाला जातीपल्लवाः । निकुम्भो दन्ती । अञ्जनं रसाञ्जनम् । मनःशिलेत्यादौ अर्जुनस्थानेऽञ्जनेति केचित् पठन्ति; **वाग्भटेऽपि**—आगारधूमाञ्जनसर्जलोध्रकासीसमुस्तानि मनःशिलेति पठ्यते । आलं हरितालम् । अर्धरूपैरिति अर्धश्लोकैः । गोपित्तपीता इति पीतगोपित्ताः, किंवा गोपित्तभावनया पीतवर्णाः । परमत्यर्थं सिद्धाः । चूर्णीकृतानां प्रदेहाश्चूर्णप्रदेहाः; प्रदेहो लेपः, प्रदेहताकरणं चैषां योगानां कुष्ठहरगोमूत्रगोपित्तादिना बोध्यम् । उक्तानां योगानां विषयमाह—कुष्ठानीत्यादि । सुरसः पर्णासः । सर्षपं श्वेतम् । तुम्बुरु स्वनामख्यातम् । वन्यं कैवर्तमुस्तकम् । चण्डा चोरपुष्पी । प्रथमं तैलाक्तमित्यन्वयः । तैलं चेह सार्षपम् । अमृतासङ्गः तुत्थकम् । कटङ्कटेरी दारुहरिद्रा । सौगन्धिकं गन्धतृणं गन्धको वा । तद्वदिति प्रदेहात् कुष्ठहरम् । प्रपुन्नाड एडगजः । हयमारकस्य करवीरस्य त्वक् तथा मध्यं च तस्य पृथग्भावेन ग्राह्यम् । तुषोदकं सतुषैर्यवैः सन्धानविशेषकृतं काञ्जिकम् । पलाशस्य मूले छेदितेऽधः कुम्भं दत्वा उपरि वृक्षदाहाद् यो गलति स्वरसः स पलाशनिर्दाहरसः; अन्ये तु पलाशक्षारोदकमाहुः । अत्र मनःशिलादीनां प्रत्येकं कर्षः, तुषोदकं पलाशनिर्दाहरसो वा आढकमान इत्याह । पर्णानीत्या-

---

१. खोटिः[1]

दिना अश्वहनच्छदान्तेनैको योगः। अत्र पत्राणीति **काश्मीरकाः** पठन्ति, अश्वहनच्छदैः करवीरपत्रैः ॥१३-१७॥

कोलं कुलत्थाः सुरदारुरास्नामाषातसीतैलफलानि कुष्ठम्।
वचा शताह्वा यवचूर्णमम्लमुष्णानि वातामयिनां प्रदेहः ॥१८॥

आनूपमत्स्यामिषवेसवारैरुष्णैः प्रदेहः पवनापहः स्यात्।
स्नेहैश्चतुर्भिर्दशमूलमिश्रैर्गन्धौषधैश्चानिलहः प्रदेहः ॥१९॥

तक्रेण युक्तं यवचूर्णमुष्णं सक्षारमर्तिं जठरे निहन्यात्।
कुष्ठं शताह्वां सवचां यवानां चूर्णं सतैलाम्लमुशन्ति वाते ॥२०॥

उभे शताह्वे मधुकं मधूकं बलां प्रियालं च कशेरुकं च।
घृतं विदारीं च सितोपलां च कुर्यात् प्रदेहं पवने सरक्ते ॥२१॥

रास्ना गुडूची मधुकं बले द्वे सजीवकं सर्षभकं पयश्च।
घृतं च सिद्धं मधुशेषयुक्तं रक्तानिलार्तिं प्रणुदेत् प्रदेहः ॥२२॥
वाते सरक्ते सघृतं प्रदेहो गोधूमचूर्णं छगलीपयश्च।

तैलफलानि एरण्डफलतिलादीनि। अम्लमिति काञ्जिकादियोगात्। आनूपानां खड्गादीनां मत्स्यानां चामिषम्। "निरस्थि पिशितं पिष्टं (स्विन्नं गुडघृतान्वितम्। कृष्णामरिचसंयुक्तं) वेसवार इति स्मृतः ॥" इति। गन्धप्रधानान्यौषधान्यगुर्वादीनि ज्वराध्याये प्रतिपाद्यानि तैश्च सिद्धैः स्नेहैरिति योजना। उशन्ति कथयन्ति। उभे शताह्वे शतपुष्पामधुरिके। मधुशेषः सिक्थकम्। सिद्धमिति घृतदुग्धयुतं सत् किञ्चिदग्नौ साधितम् ॥१८-२२॥-

नतोत्पलं चन्दनकुष्ठयुक्तं शिरोरुजायां सघृतं प्रदेहः ॥२३॥

प्रपौण्डरीकं सुरदारु कुष्ठं यष्ट्याह्वमेला कमलोत्पले च।
शिरोरुजायां सघृतः प्रदेहो लोहैरकापद्मकचोरकैश्च ॥२४॥

रास्ना हरिद्रे नलदं शताह्वे द्वे देवदारूणि सितोपला च।
जीवन्तिमूलं सघृतं सतैलमालेपनं पार्श्वरुजासु कोष्णम् ॥२५॥

शैवालपद्मोत्पलवेत्रतुङ्गप्रपौण्डरीकाण्यमृणाललोध्रम्।
प्रियङ्गुकालेयकचन्दनानि निर्वापणः स्यात् सघृतः प्रदेहः ॥२६॥

सितालतावेतसपद्मकानि यष्ट्याह्वमैन्द्री नलिनानि दूर्वा।
यवासमूलं कुशकाशयोश्च निर्वापणः स्याज्जलमेरका च ॥२७॥

शैलेयमेलागुरुणी सकुष्ठे चण्डा नतं त्वक् सुरदारु रास्ना ।
शीतं निहन्यादचिरात् प्रदेहो विषं शिरीषस्तु ससिन्धुवारः ॥२८॥

शिरीषलामज्जकहेमलोध्रैस्त्वग्दोषसंस्वेदहरः प्रघर्षः ।
पत्राम्बुलोध्राभयचन्दनानि शरीरदौर्गन्ध्यहरः प्रदेहः ॥२९॥

नतं तगरपादिका । प्रपौण्डरीकं पुण्डरीयाकाष्ठम् । लौहमगुरु । एरका होग्गलः । चोरकं चोरपुष्पी । प्रपौण्डरीकादिभिश्चोरकान्तैश्चैको योगः । रास्नेत्यादौ नलदं मांसी । शताह्वे शतपुष्पामधुरिके । शैवालेत्यादौ तुङ्गः पुन्नागः । अमृणालमुशीरम् । कालीयकं कालियाकाष्ठम् । लता मञ्जिष्ठा । ऐन्द्री गोरक्षकर्कटी । नलिनं कमलम् । यवासो दुरालभा । कुशकाशयोश्च मूलम् । सितादिरेरकान्तः एको योगः । जलं बालकम् । एरका होग्गलः । चण्डा चोरपुष्पी । विषमित्यादि योगान्तरम् । सिन्धुवारो निर्गुण्डी । लामज्जकमुशीरम् । हेम नागकेशरम् । अभयं उशीरम् ॥२३–२९॥

तत्र श्लोकः—

इहात्रिजः सिद्धतमानुवाच द्वात्रिंशतं सिद्धमहर्षिपूज्यः ।
चूर्णप्रदेहान् विविधामयघ्नानारग्वधीये जगतो हितार्थम् ॥३०॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
आरग्वधीयो नाम तृतीयोऽध्यायः ॥३॥

अध्यायार्थं सङ्गृह्णाति—इहेत्यादि ॥३०॥

इति श्रीशिवदाससेनविरचितायां चरकतत्त्वप्रदीपिकायामारग्वधीयः समाप्तः ॥३॥

चतुर्थोऽध्यायः

अथातः षड्विरेचनशताश्रितीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

इह खलु षड् विरेचनशतानि भवन्ति, षड् विरेचनाश्रयाः, पञ्च कषाययोनयः, पञ्चविधं कषायकल्पनं, पञ्चाशन्महाकषायाः, पञ्च कषायशतानि, इति संग्रहः ॥३॥

भेषजचतुष्के पारिशेष्यात्पूर्वाध्यायानुक्तभेषजाभिधायकं षड्विरेचनशताश्रितीयमाह—अथेत्यादि। आश्रीयत इत्याश्रितम् आश्रय इत्यर्थः। तेन षड्विरेचनस्य शतानि चाश्रितानि चाधिकृत्य कृतोऽध्यायः षड्विरेचनशताश्रितीयः, तेन यदुक्तं "षड्विरेचनशतानि", "षड्विरेचनाश्रयाः", एतद्द्वयमधिकृत्य संज्ञेयं प्रणीतेति मन्तव्यम्। यद्यप्यध्यायादाविह खल्विति पदं श्रूयते, तथाऽपि तदप्रधानत्वात्तद्वारकमध्यायसंज्ञाकरणम्। विरेचनशब्देनेह च वमनं विरेचनं च गृह्यते। योगरूढेयं तेन निरूहनस्यादौ नातिप्रसक्तिः। वक्ष्यति च कल्पे—"उभयं वा दोष[1]मलविरेचनाद्विरेचनशब्दं[2] लभते" (क. १.४) इति ॥१-३॥

षड् विरेचनशतानि, इति यदुक्तं तदिह संग्रहेणोदाहृत्य विस्तरेण कल्पोपनिषदि व्याख्यास्यामः; (तत्र) त्रयस्त्रिंशद्योगशतं प्रणीतं फलेषु, एकोनचत्वारिंशज्जीमूतकेषु योगाः, पञ्चचत्वारिंशदिक्ष्वाकुषु, धामार्गवः षष्टिधा भवति योगयुक्तः, कुटजस्त्वष्टादशधा योगमेति, कृतवेधनं षष्टिधा भवति योगयुक्तं, श्यामात्रिवृद्योगशतं प्रणीतं दशापरे चात्र भवन्ति योगाः, चतुरङ्गुलो द्वादशधा योगमेति, लोध्रं विधौ षोडशयोगयुक्तं, महावृक्षो भवति विंशतियोगयुक्तः, एकोनचत्वारिंशत् सप्तलाशङ्खिन्योर्योगाः, अष्टचत्वारिंशद्दन्तीद्रवन्त्योः, इति षड्विरेचनशतानि ॥४॥

सङ्ग्रहेणेत्युद्देशमात्रेण। कल्प एवोपनिषत्, अत्युपयुक्तरहस्यविद्यो-

---

१. शरीर (च० नि०)

२. संज्ञां (च० नि०)

पदेशस्थानमुपनिषच्छब्देनोच्यते। षड्विरेचनशतान्येव विवृणोति—त्रयस्त्रिंशदित्यादि; त्रयस्त्रिंशताऽधिकं योगशतमित्यर्थः, तदधिकमित्यर्थे शदन्तविंशतेश्चेति डः। जीमूतको घोषकभेदः। धामार्गवः पीतघोषकः। कृतवेधनं ज्योत्स्निका। त्रयस्त्रिंशदित्यारभ्य कृतवेधनान्ता योगा वमनस्य, श्यामेत्यादिना तु विरेचनयोगानाह—श्यामा श्याममूला त्रिवृत्, त्रिवृदिति अरुणमूला त्रिवृत्। अत्रेति श्यामात्रिवृतोरेव। विधाविति विरेचनविधौ ॥४॥

षड् विरेचनाश्रया इति क्षीरमूलत्वक्पत्रपुष्पफलानीति ॥५॥

विरेचनाश्रया इति विरेचनाधिकरणानि, त्वगिति लोध्रत्वक्, पत्रमिति इक्ष्वाक्वादिपत्रम्। यद्यपि चैरण्डतैलताम्रपारदादीनामपि विरेचनाश्रयत्वं सम्भवति, तथाऽपि तेषामिह तन्त्रे कल्पस्थाने विरेचनाश्रयत्वेनानभिधानादध्यायादिप्रतिपादितेनेहशब्देन योगादिह षडेव विरेचनाश्रया इत्यविरुद्धमिति[1] **चक्रः**, अन्ये तु एरण्डतैलस्य फलाधानतया फलग्रहणेनैव ग्रहणं, ताम्रपारदादीनामप्येतद्द्रव्यसंस्कृतानामेव विरेचनत्वमिति सूक्तं षडेव विरेचनाश्रया इत्याहुः ॥५॥

पञ्च कषाययोनय इति मधुरकषायोऽम्लकषायः। कटुकषायस्तिक्तकषायः कषायकषायश्चेति तन्त्रे संज्ञा ॥६॥

अत्र पञ्च कषायशतानि पञ्चाशन्महाकषायव्याख्ययैव व्याख्यातानि भविष्यन्तीति तदुल्लङ्घ्य पञ्चकषाययोनय इति विवृणोति—पञ्चकषाययोनय इत्यादि। मधुरश्चासौ कषायश्चेत्यादि सर्वत्र कर्मधारयः। तन्त्रे संज्ञेत्यनेन लवणवर्जानामेव मधुरादिरसानां कषायसंज्ञेति स्वतन्त्रसमयादिति, उक्तं चैतत् तत्र पञ्चविधकल्पनाया एवासंभवात् तथा हि लवणे स्वरसस्यासंभवस्तथा कल्ककल्पनाऽपि न संभवति, लवणे द्रवयोगात् पानीयतापत्तेः, चूर्णता तु यद्यपि संभवति तथाऽपि लवणस्य चूर्णरूपता पूर्वस्मादचूर्णरूपान्न कञ्चन शक्तिविशेषमापादयतीति चूर्णकल्पनमकल्पनमेव, कल्पनायाः शक्तिविशेषकल्पनार्थत्वात्, एतच्चोत्तरत्रानुपदमेव प्रतिपादयिष्यति। शृतशीतफाण्टकषायकल्पनास्तु द्रव्यस्य कात्स्न्येनानुपयोज्यस्य तत्तत्संस्कारवशाद्द्रव्यस्य स्तोकावयवानुप्रवेशार्थमुपदिश्यन्ते,

———

१. षडाश्रया इत्यविरुद्धमेव (च० नि०)

लवणे चैतन्न संभवति, लवणं हि द्रवसम्बन्धेन सर्वात्मनैव द्रवमनुगतं भवतीति कल्पनानामसंभवादेव लवणस्य न कषायसंज्ञा ॥६॥

पञ्चविधं कषायकल्पनमिति तद्यथा—स्वरसः, कल्कः, शृतः; शीतः, फाण्टः, कषाय इति ।

(यन्त्रनिष्पीडिताद् द्रव्याद्रसः स्वरस उच्यते ।
यः पिण्डो रसपिष्टानां स कल्कः परिकीर्तितः ॥
वह्नौ तु क्वथितं द्रव्यं शृतमाहुश्चिकित्सकाः ।
द्रव्यादापोत्थितात्तोये प्रतप्ते निशि संस्थितात् ॥
कषायो योऽभिनिर्याति स शीतः समुदाहृतः ।
क्षिप्त्वोष्णतोये मृदितं तत् फाण्टं परिकीर्तितम् ॥)

तेषां यथापूर्वं बलाधिक्यम्; अतः कषायकल्पना व्याध्यातुरबलापेक्षिणी; न त्वेवं खलु सर्वाणि सर्वत्रोपयोगीनि भवन्ति ॥७॥

स्वरस इत्यादि। एषां लक्षणं; यथा—"स्वो रसः स्वरसः प्रोक्तः, कल्को दृषदि पेषितः। क्वथितस्तु शृतः, शीतः शर्वरीमुषितो मतः ॥ क्षिप्त्वोष्णतोये मृदितः फाण्ट इत्यभिधीयते।" फाण्टः कषायः इति कषायशब्दोऽयं स्वरसादिभिरपि सम्बध्यते, तेन स्वरसकषायः, कल्ककषाय इत्यादि योज्यम्। तेषामिति स्वरसादीनां बलाधिक्यमिति गुरुत्वं वीर्यातिशययोगित्वं च। न त्वेवमित्यादि—यस्माद्व्याध्यादिबलमपेक्ष्यैव स्वरसादीनामुपयोगः एवं कारणात् सर्वाणि स्वरसादीनि न सर्वत्र पुरुषे व्याधौ चोपयुज्यन्त इत्यर्थः। एतेन कल्पनानां प्रयोजनमुक्तम् ॥७॥

'पञ्चाशन्महाकषाया' इति यदुक्तं तदनुव्याख्यास्यामः; तद्यथा—जीवनीयो बृंहणीयो लेखनीयो भेदनीयः सन्धानीयो दीपनीय इति षट्कः कषायवर्गः; बल्यो वर्ण्यः कण्ठ्यो हृद्य इति चतुष्कः कषायवर्गः; तृप्तिघ्नोऽर्शोघ्नः कुष्ठघ्नः कण्डूघ्नः क्रिमिघ्नो विषघ्न इति षट्कः कषायवर्गः; स्तन्यजननः स्तन्यशोधनः शुक्रजननः शुक्रशोधन इति चतुष्कः कषायवर्गः; स्नेहोपगः स्वेदोपगो वमनोपगो विरेचनोपग आस्थापनोपगोऽनुवासनोपगः शिरोविरेचनोपग इति सप्तकः कषायवर्गः, छर्दिनिग्रहणस्तृष्णानिग्रहणो हिक्कानिग्रहण इति त्रिकः कषायवर्गः; पुरीषसंग्रहणीयः पुरीषविरजनीयो मूत्रसंग्रहणीयो मूत्रविरजनीयो मूत्रविरेचनीय इति पञ्चकः कषायवर्गः; कासहरः श्वासहरः शोथहरो ज्वरहरः श्रमहर इति पञ्चकः कषायवर्गः; दाहप्रशमनः शीतप्रशमन उदर्दप्रशमनोऽङ्गमर्दप्रशमनः शूलप्रशमन इति

पञ्चकः कषायवर्गः; शोणितस्थापनो वेदनास्थापनः संज्ञास्थापनः प्रजास्थापनो वयःस्थापन इति पञ्चकः कषायवर्गः; इति पञ्चाशन्महाकषाया महतां च कषायाणां लक्षणोदाहरणार्थं व्याख्याता भवन्ति । तेषामेकैकस्मिन् महाकषाये दश दशावयविकान् कषायाननुव्याख्यास्यामः; तान्येव पञ्च कषायशतानि भवन्ति ॥८॥

जीवनायायुषे हितो जीवनीय इत्यर्थः; एवमन्यत्रापि । षड्भिर्विहितो वर्गः षट्कः, एवं चतुष्क इत्यादिष्वपि बोध्यम् । अत्र जीवनीयादौ षट्के ईयान्तत्वं, बल्यादौ यत्प्रत्ययान्तत्वं, तृप्तिघ्नादौ घ्नान्तत्वमित्यादि वर्गभेदकथनं वैचित्र्येण ग्रन्थस्य पुष्कलाभिधानताप्रकार उपदर्श्यते । अयं च शास्त्रगुणः, यद्वक्ष्यति रोगभिषग्जितीये विमाने—"अनवपतितशब्दमकष्टशब्दं पुष्कलाभिधानम्" (वि० ८.३) इत्यादिशास्त्रगुणा इति । तृप्तिरनन्नाभिलाषः । स्नेहोपग इत्यादि, स्नेहस्य सर्पिरादेः स्नेहनक्रियायां सहायत्वेनोपगच्छन्तीति स्नेहोपगाः मृद्वीकादयः । एवं स्वेदोपग इत्यपि ज्ञेयम् । पुरीषविरजनीय इति पुरीषविरजनं दोषसम्बन्धनिरासं करोतीति पुरीषविरजनीयः । एवं मूत्रविरजनीय इत्यपि व्याख्येयम् । उदर्दो वरटीदष्टप्रतीकाशः शोथः, न पुनर्महारोगे वक्ष्यमाणो वातविकारः तिन्दुकादीनामुदर्दप्रशमनानां वातं प्रत्यननुकूलत्वात् । शोणितस्थापन इति विकृतं शोणितं विकृतिमपहृत्य प्रकृतौ स्थापयतीति शोणितस्थापनः, एवं वेदनां निहत्य शरीरं प्रकृतौ स्थापयतीति वेदनास्थापनः । संज्ञा ज्ञानं तस्याः स्थापनः । वयःस्थापन इत्यत्र वयःशब्देन प्राधान्याद् यौवनमुच्यते । महाकषायानुपसंहरति—इतीत्यादि । लक्षणोदाहरणार्थमिति लक्षणं जीवनीयत्वादिरसाधारणो धर्मः तदुदाहरणार्थमित्यर्थः । व्याख्याता इति जीवनोयादिसंज्ञामात्रेणोद्दिष्टाः, किंवा महतां कषायाणां यल्लक्षणमनेकैः कषायैर्मिलित्वा एकार्थजोवनादिसम्पादनं तस्योदाहरणार्थं दृष्टान्तार्थं व्याख्याताः । एतेनान्यान्यपि महाकषायाणि वातप्रशमन-पित्तप्रशमनादीनि एककार्यसंपादकानेकद्रव्यमयानि भवन्तीति सूचयति । (एकैक) द्रव्यरूपतया पञ्चकषायशतानि भवन्तीत्यर्थः ॥८॥

तद्यथा—जीवकर्षभकौ मेदा महामेदा काकोली क्षीरकाकोली मुद्गपर्णीमाषपर्ण्यौ जीवन्ती मधुकमिति दशेमानि जीवनीयानि भवन्ति (१),क्षीरिणीराजक्षवकाश्वगन्धाकाकोलीक्षीरकाकोलीवाट्यायनीभद्रौदनी-

भारद्वाजीपयस्यर्ष्यगन्धा इति दशेमानि बृंहणीयानि भवन्ति (२), मुस्तकुष्ठहरिद्रादारुहरिद्रावचातिविषाकटुरोहिणीचित्रकचिरबिल्वहैमवत्य इति दशेमानि लेखनीयानि भवन्ति (३), सुवहार्कोरुबुकाग्निमुखीचित्राचित्रकचिरबिल्वशङ्खिनीशकुलादनीस्वर्णक्षीरिण्य इति दशेमानि भेदनीयानि भवन्ति (४), मधुकमधुपर्णीपृश्निपर्ण्यम्बष्ठकीसमङ्गामोचरसधातकीलोध्रप्रियङ्गुकट्फलानीति दशेमानि सन्धानीयानि भवन्ति (५), पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेराम्लवेतसमरिचाजमोदाभल्लातकास्थिहिङ्गुनिर्यासा इति दशेमानि दीपनीयानि भवन्ति (६), इति षट्कः कषायवर्गः ॥९॥

जीवनीयगणे जीवन्ती स्वनामख्याता सुवर्णवर्णा (१)। बृंहणीये क्षीरिणी क्षीरलता, राजक्षवको दुग्धिका, वाट्यायनी बला, भद्रौदनी पीतबला, भारद्वाजी वनकार्पासी, पयस्या विदारीकन्दः, ऋष्यगन्धा ऋष्या (२)। मुस्तेत्यादौ चिरबिल्वः करञ्जः, हैमवती श्वेतवचा (३)। सरलेत्यादौ सरला त्रिवृत्, अग्निमुखी लाङ्गलिआ, चित्रा दन्ती, शङ्खिनी (श्वेत) बुह्मा, शकुलादनी कटुका, सुवर्णक्षीरी काङ्गु(ङ्कु ?)ष्ठप्रभवा (४)। सन्धानीये अम्बष्ठकी अर्कनिधिः, समङ्गा वराहक्रान्ता, सन्धानीयानीति भग्नसंधानीयानीत्यर्थः (५)। दीपनीये शृङ्गवेरः शुण्ठी, हिङ्गुनिर्यासो हिङ्गु (६) ॥९॥

ऐन्द्र्यृषभ्यतिरसर्ष्यप्रोक्तापयस्याश्वगन्धास्थिरारोहिणीबलातिबला इति दशेमानि बल्यानि भवन्ति (७), चन्दनतुङ्गपद्मकोशीरमधुकमञ्जिष्ठासारिवापयस्यासितालता इति दशेमानि वर्ण्यानि भवन्ति (८), सारिवेक्षुमूलमधुकपिप्पलीद्राक्षाविदारीकैटर्यहंसपादीबृहतीकण्टकारिका इति दशेमानि कण्ठ्यानि भवन्ति (९), आम्राम्रातकलिकुचकरमर्दवृक्षाम्लाम्लवेतसकुवलबदरदाडिममातुलुङ्गानीति दशेमानि हृद्यानि भवन्ति (१०), इति चतुष्कः कषायवर्गः ॥१०॥

ऐन्द्रीत्यादौ ऐन्द्री गोरक्षकर्कटी, ऋषभी शूकशिम्बा, अतिरसा शतावरी ऋद्धिर्वा, ऋष्यप्रोक्ता माषपर्णी, स्थिरा शालपर्णी, अतिबला पीतपुष्पबला (७)। चन्दनेत्यादौ तुङ्गः पुन्नागः, पयस्या क्षीरकाकोली विदारिकन्दो वा, सिता श्वेतदूर्वा, लता श्यामदूर्वा (८)। शारिवेत्यादौ शारिवा अनन्तमूलम्, कैटर्यः कट्फलः, हंसपादी स्वनामप्रसिद्धा हंसपदा-

कारपदा (९)। आम्रेत्यादौ आम्रातकः आमडा इति ख्यातः, वृक्षाम्लं महार्द्र इति व्याख्यातम् (१०) ॥१०॥

नागरचव्यचित्रकविडङ्गमूर्वागुडूचीवचामुस्तपिप्पलीपटोलानीति दशेमानि तृप्तिघ्नानि भवन्ति (११), **कुटजबिल्वचित्रकनागरातिविषाभयाधन्वयासकदारुहरिद्रावचाचव्यानीति दशेमान्यर्शोघ्नानि भवन्ति** (१२), **खदिराभयामलकहरिद्रारुष्करसप्तपर्णारग्वधकरवीरविडङ्गजाती–प्रवाला इति दशेमानि कुष्ठघ्नानि भवन्ति** (१३), **चन्दननलदकृतमालनक्तमालनिम्बकुटजसर्षपमधुकदारुहरिद्रामुस्तानीति दशेमानि कण्डूघ्नानि भवन्ति** (१४), **अक्षीवमरिचगण्डीरकेबुकविडङ्गनिर्गुण्डीकिणिहीश्वदंष्ट्रावृषपर्णिकाखुपर्णिका इति दशेमानि क्रिमिघ्नानि भवन्ति** (१५), **हरिद्रामञ्जिष्ठासुवहासूक्ष्मैलापालिन्दीचन्दनकतकशिरीषसिन्धुवारश्लेष्मातका इति दशेमानि विषघ्नानि भवन्ति** (१६), **इति षट्कः कषायवर्गः ॥११॥**

तृप्तिघ्नस्त्वेकादशो व्यक्त एव (११)। कुटजेत्यादौ धन्वयासो दुरालभा (१२)। खदिरेत्यादौ अरुष्करो भल्लातः (१३)। चन्दनेत्यादौ नलदं मांसी, कृतमालः सुवर्णहालिः, नक्तमालः करञ्जः (१४)। क्रिमिघ्ने अक्षीवोऽब्दकः स चौत्तरापथिकः, गण्डीरः शमठशाकं, केबुकं केउ इति ख्यातं, किणिही कटभी, आखुपर्णी मूषकपर्णी, वृषपर्णी तद्भेदः (१५)। हरिद्रेत्यादौ सुवहा रास्ना हाफरमाली वा, पालिन्दी श्यामलता, श्लेष्मातको बहुवारः (१६) ॥११॥

वीरणशालिषष्टिकेक्षुवालिकादर्भकुशकाशगुन्द्रेत्कटकत्तृणमूलानीति दशेमानि स्तन्यजननानि भवन्ति (१७), **पाठामहौषधसुरदारुमुस्तमूर्वागुडूचीवत्सकफलकिराततिक्तककटुरोहिणीसारिवा इति दशेमानि स्तन्यशोधनानि भवन्ति** (१८), **जीवकर्षभककाकोलीक्षीरकाकोलीमुद्गपर्णीमाषपर्णीमेदावृद्धरुहाजटिलाकुलिङ्गा इति दशेमानि शुक्रजननानि भवन्ति** (१९), **कुष्ठैलवालुककट्फलसमुद्रफेनकदम्बनिर्यासेक्षुकाण्डेक्षिवक्षुरकवसुकोशीराणीति दशेमानि शुक्रशोधनानि भवन्ति** (२०), **इति चतुष्कः कषायवर्गः ॥१२॥**

वीरणेत्यादौ इक्षुवालिका खङ्गलिका, दर्भ उल्लुआतृणं, गुन्द्रा घुल्वंचा (१७)। पाठेत्यादौ वत्सकफलमिन्द्रयवः (१८)। शुक्रजनने वृद्धरुहा शतावरी, वृक्षरुहापाठे वन्दाकः, जटिला उच्चटाफलं, कुलिङ्गस्तद्भेदः

(१९)। शुक्रशोधने इक्षुरकः (कोकिलाक्षः), वसुको वसुमुञ्चकः,[1] अत्र **जतूकर्णः** पठति एलवालुकं कट्फलस्थाने (२०) ॥१२॥

मृद्वीकामधुकमधुपर्णीमेदाविदारीकाकोलीक्षीरकाकोलीजीवकजीवन्तीशालपर्ण्य इति दशेमानि स्नेहोपगानि भवन्ति (२१), शोभाञ्जनकैरण्डार्कवृश्चीरपुनर्नवायवतिलकुलत्थमाषबदराणीति दशेमानि स्वेदोपगानि भवन्ति (२२), मधुमधुककोविदारकर्बुदारनीपविदुलबिम्बीशणपुष्पीसदापुष्पाप्रत्यक्पुष्पा इति दशेमानि वमनोपगानि भवन्ति (२३), द्राक्षाकाश्मर्यपरूषकाभयामलकबिभीतककुवलबदरकर्कन्धुपीलूनीति दशेमानि विरेचनोपगानि भवन्ति (२४), त्रिवृद्बिल्वपिप्पलीकुष्ठसर्षपवचावत्सकफलशतपुष्पामधुकमदनफलानीति दशेमान्यास्थापनोपगानि भवन्ति (२५), रास्नासुरदारुबिल्वमदनशतपुष्पावृश्चीरपुनर्नवाश्वदंष्ट्राग्निमन्थश्योनाका इति दशेमान्यनुवासनोपगानि भवन्ति (२६), ज्योतिष्मतीक्षवकमरिचपिप्पलीविडङ्गशिग्रुसर्षपापामार्गतण्डुलश्वेतामहाश्वेता इति दशेमानि शिरोविरेचनोपगानि भवन्ति (२७), इति सप्तकः कषायवर्गः ॥१३॥

स्नेहोपगे मधुपर्णी गुडूची (२१)। स्वेदोपगे वृश्चीरः श्वेतपुनर्नवा (२२)। वमनोपगे कोविदारः स्वनामख्यातः, कर्बुदारः श्वेतकाञ्चनः, विदुल इज्जलः, शणपुष्पी घण्टारवा, प्रत्यक्पुष्पी अपामार्गः, सदापुष्पी अर्कः (२३)। विरेचनोपगे कुवलादित्रयं बदरीभेदाः, पीलु औत्तरापथिकं फलम् (२४)। आस्थापनोपगः पञ्चविंशः सुगमः (२५)। अनुवासनोपगे श्वदंष्ट्रा गोक्षुरकः (२६)। विरेचनोपगे क्षवकः छिक्कापत्री, श्वेता अपराजिता, महाश्वेता तद्भेदः कटभी वा (२७) ॥१३॥

जम्ब्वाम्रपल्लवमातुलुङ्गाम्लबदरदाडिमयवयष्टिकोशीरमृल्लाजा इति दशेमानि छर्दिनिग्रहणानि भवन्ति (२८), नागरधन्वयवासकमुस्तपर्पटकचन्दनकिराततिक्तकगुडूचीह्रीबेरधान्यकपटोलानीति दशेमानि तृष्णानिग्रहणानि भवन्ति (२९), शटीपुष्करमूलबदरबीजकण्टकारिकाबृहतीवृक्षरुहाभयापिप्पलीदुरालभाकुलीरशृङ्ग्य इति दशेमानि हिक्कानिग्रहणानि भवन्ति (३०), इति त्रिकः कषायवर्गः ॥१४॥

———————

१. वसुहट्टकः[1]

छर्दिनिग्रहणेऽम्लेति बदरविशेषणम् (२८)। तृष्णानिग्रहणो व्यक्तः (२९)। शटीत्यादौ कुलीरश्रृङ्गी कर्कटश्रृङ्गी (३०) ॥१४॥

प्रियङ्ग्वनन्ताम्रास्थिकट्वङ्गलोध्रमोचरससमङ्गाधातकीपुष्पपद्मापद्मकेशराणीति दशेमानि पुरीषसंग्रहणीयानि भवन्ति (३१), जम्बुशल्लकीत्वक्कच्छुरामधूकशाल्मलीश्रीवेष्टकभृष्टमृत्पयस्योत्पलतिलकणा इति दशेमानि पुरीषविरजनीयानि भवन्ति (३२), जम्ब्वाम्रप्लक्षवटकपीतनोडुम्बराश्वत्थभल्लातकाश्मन्तकसोमवल्का इति दशेमानि मूत्रसंग्रहणीयानि भवन्ति (३३), पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्रमधुकप्रियङ्गुधातकीपुष्पाणीति दशेमानि मूत्रविरजनीयानि भवन्ति (३४), वृक्षादनीश्वदंष्ट्रावसुकवशिरपाषाणभेददर्भकुशकाशगुन्द्रेत्कटमूलानीति दशेमानि मूत्रविरेचनीयानि भवन्ति (३५), इति पञ्चकः कषायवर्गः ॥१५॥

पुरीषसङ्ग्रहणे अनन्ता अनन्तमूलं, कट्वङ्गः श्योनाकः, मोचरसः शाल्मलीवेष्टकः, पद्मा ब्राह्मणयष्टिका (३१)। पुरीषविरजनीये शल्लकी स्वनामप्रसिद्धा, कच्छुरा शूकशिम्बा, (शाल्मली) शाल्मलीवृक्षनिर्यासः, श्रीवेष्टो नवनीतखोटी (३२)। मूत्रसङ्ग्रहणे कपीतनो गन्धमुण्डः, अश्मन्तकोऽम्ललोटः, सोमवल्कः खदिरः (३३)। पद्मेत्यादौ पद्मनलिनपुण्डरीकशतपत्राणीति चत्वारः पद्मभेदाः, सौगन्धिकः सुन्धी (३४)। वृक्षादनीत्यादौ वृक्षादनी वन्दाकः विदारीकन्दो वा, वशिरं जामाता, दर्भ उलुआ तृणम् (३५) ॥१५॥

द्राक्षाभयामलकपिप्पलीदुरालभाश्रृङ्गीकण्टकारिकावृश्चीरपुनर्नवातामलक्य इति दशेमानि कासहराणि भवन्ति (३६), शटीपुष्करमूलाम्लवेतसैलाहिङ्ग्वगुरुसुरसतामलकीजीवन्तीचण्डा इति दशेमानि श्वासहराणि भवन्ति (३७), पाटलाग्निमन्थश्योनाकबिल्वकाश्मर्यकण्टकारिकाबृहतीशालपर्णीपृश्निपर्णीगोक्षुरका इति दशेमानि श्वयथुहराणि भवन्ति (३८), सारिवाशर्करापाठामञ्जिष्ठाद्राक्षापीलुपरूषकाभयामलकविभीतकानीति दशेमानि ज्वरहराणि भवन्ति (३९), द्राक्षाखर्जूरप्रियालबदरदाडिमफल्गुपरूषकेक्षुयवषष्टिका इति दशेमानि श्रमहराणि भवन्ति (४०), इति पञ्चकः कषायवर्गः ॥१६॥

द्राक्षेत्यादौ वृश्चीरः श्वेतपुनर्नवा, तामलकी भूम्यामलकी (३६)। शटीत्यादौ सुरसः पर्णासः, चण्डा चोरहुली (३७)। पाटलेत्यादि—

अत्र पाटलादिपञ्चकस्य प्रागुपादानात् महत्त्वं, शेषपञ्चकस्य तत्पश्चादुपादानात् स्वल्पत्वं सूच्यते अत एव बृहत्पञ्चमूलस्वल्पपञ्चमूलेति व्यवहारो दृश्यते। **सुश्रुते** तु गोक्षुरस्थाने एरण्डमूलं पठ्यते तेन यत्र यत्र सुश्रुतप्रयोगेषु कनीयःपञ्चमूल्या उपयोगः तत्र तत्र एरण्डमूलमेव गोक्षुरकं विहाय ग्राह्यम्, **चरक**प्रयोगेषु गोक्षुरमेवेति वचनादेवावसीयते इत्याहुः; दृश्यते च **शालिहोत्रा**दावप्येरण्डमूलमेवेति, सङ्ग्रहकारा अपि एरण्डादिपञ्चमूलमिति संज्ञामाहुः, तेन सुश्रुतेऽप्येरण्डपाठस्यानार्षता नाशङ्कनीयेत्याहुः (३८)। ज्वरहरे सारिवा अनन्तमूलम् (३९)। द्राक्षेत्यादौ फलगुः कोठोदुम्बरः (४०) ॥१६॥

लाजाचन्दनकाश्मर्यफलमधूकशर्करानीलोत्पलोशीरसारिवागुडूचीह्रीबेराणीति दशेमानि दाहप्रशमनानि भवन्ति (४१), तगरागुरुधान्यकशृङ्गवेरभूतीकवचाकण्टकार्यग्निमन्थश्योनाकपिप्पल्य इति दशेमानि शीतप्रशमनानि भवन्ति (४२), तिन्दुकप्रियालबदरखदिरकदरसप्तपर्णाश्वकर्णार्जुनासनारिमेदा इति दशेमान्युदर्दप्रशमनानि भवन्ति (४३), विदारिगन्धापृश्निपर्णीबृहतीकण्टकारिकैरण्डकाकोलीचन्दनोशीरैलामधुकानीति दशेमान्यङ्गमर्दप्रशमनानि भवन्ति (४४), पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचाजमोदाजगन्धाजाजीगण्डीराणीति दशेमानि शूलप्रशमनानि भवन्ति (४५), इति पञ्चकः कषायवर्गः ॥१७॥

लाजेत्यादौ गुडूचीस्थाने **जतूकर्णे** पद्मकः पठ्यते द्वयमप्येतदविरुद्धं, स्मृतिद्वैधवत् (४१)। तगरेत्यादौ भूतीको यमानी (४२)। उदर्दप्रशमने तिन्दुकः केन्दु इति ख्यातः, कदरः खदिरभेदः, अरिमेदो विट्खदिरः **इत्यमरः** (२.४.५०) (४३)। विदारिगन्धा शालपर्णी (४४)। अजमोदा फोकान्धी (४५) ॥१७॥

मधुमधुकरुधिरमोचरसमृत्कपाललोध्रगैरिकप्रियङ्गुशर्करालाजा इति दशेमानि शोणितस्थापनानि भवन्ति (४६), शालकट्फलकदम्बपद्मकतुम्बमोचरसशिरीषवञ्जुलैलवालुकाशोका इति दशेमानि वेदनास्थापनानि भवन्ति (४७), हिङ्गुकैटर्यारिमेदवचाचोरकवयस्थागोलोमीजटिलापलङ्कषाशोकरोहिण्य इति दशेमानि संज्ञास्थापनानि भवन्ति (४८), ऐन्द्रीब्राह्मीशतवीर्यासहस्रवीर्याऽमोघाऽव्यथाशिवाऽरिष्टावाटचपुष्पीविष्वक्सेनकान्ता इति दशेमानि प्रजास्थापनानि भवन्ति (४९), अमृताऽभया-

धात्रीमुक्ताश्वेताजीवन्त्यतिरसामण्डूकपर्णीस्थिरापुनर्नवा इति दशेमानि वयःस्थापनानि भवन्ति (५०), इति पञ्चकः कषायवर्गः ॥१८॥

रुधिरं कुङ्कुमम् (४६)। तुङ्गः पुन्नागः, वञ्जुलो वेतसः (४७)। कैटर्यः पर्वतनिम्बः, वयःस्था ब्राह्मी, गोलोमी भूतकेशः, पलङ्कषा गुग्गुलुः, जटिला जटामांसी (४८)। ऐन्द्री गोरक्षकर्कटी, शतवीर्यासहस्रवीर्ये कृष्ण-श्वेतदूर्वे; अमोघा पाटला, आमलकी, लक्ष्मणा वा; अव्यथा गुडूची, अरिष्टा कटुकी, विष्वक्सेनकान्ता प्रियङ्गुः (४९)। मुक्ता रास्ना; श्वेता-स्थाने श्रेयसीति केचित्, सा रास्नाभेदः (५०) ॥१८॥

इति पञ्चकषायशतान्यभिसमस्य पञ्चाशन्महाकषाया महतां च कषायाणां लक्षणोदाहरणार्थं व्याख्याता भवन्ति ॥१९॥

तेषामित्यादिना प्रतिज्ञातं पञ्चकषायशतव्याख्यानमुपसंहरति—इति पञ्चकषायशतानीति एकैकद्रव्यगणनयेति शेषः। अभिसमस्येति दशक-संख्यया वर्गीकृत्य, एतेन यान्येव जीवकादीनि प्रत्येकद्रव्यगणनया पञ्चाश-न्महाकषाया भवन्तीत्युक्तं भवति। लक्षणोदाहरणार्थमिति लक्षणार्थमुदा-हरणार्थं चेत्यर्थः तत्र मन्दबुद्धीनां लक्षणार्थं पञ्चकषायशतपञ्चाशन्महा-कषायज्ञानार्थमित्यर्थः, बुद्धिमतां तु उदाहरणार्थं दृष्टान्तार्थं; व्याख्याता इति जीवकादिस्वशब्देनोक्ताः, पूर्वन्तु व्याख्याता इति यदुक्तं तज्जी-वनीयादिसाधारणसंज्ञामात्रेण महाकषायकथने वर्तते इह तु व्याख्याता इति पदमेकैकजीवकादिद्रव्यकथने वर्तते इति ज्ञेयम् ॥१९॥

नहि विस्तरस्य प्रमाणमस्ति, न चाप्यतिसंक्षेपोऽल्पबुद्धीनां सामर्थ्या-योपकल्पते, तस्मादनतिसंक्षेपेणानतिविस्तरेण चोपदिष्टाः। एतावन्तो ह्यलमल्पबुद्धीनां व्यवहाराय बुद्धिमतां च स्वालक्षण्यानुमानयुक्ति-कुशलानामनुक्तार्थज्ञानायेति ॥२०॥

इदानीमतिविस्तराभिधानेऽतिसंक्षेपाभिधाने च दोषं दर्शयन्ननति-संक्षेपविस्तराभिधानमेव युक्तमित्याह—न हीत्यादि। प्रमाणमियत्ता-परिच्छेदः, तेन विस्तरो नाभिधातव्य इत्यर्थः। न चेत्यादिना तु अति-संक्षेपाभिधानमपि नोचितमित्याह—सामर्थ्यायेति चिकित्साव्यवहाराय। स्वलक्षणमेव स्वालक्षण्यं चातुर्वर्ण्यवत् स्वार्थिके, तेनानुमानं, तत्र कुशला अभिज्ञा इत्यर्थः। बुद्धिमन्तो हि जीवका (अत्र ग्रन्थत्रुटिरस्ति) ॥२०॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच--नैतानि भगवन्! पञ्चकषायशतानि पूर्यन्ते, तानि तानि ह्येवाङ्गान्युपप्लवन्ते तेषु तेषु महाकषायेष्विति ॥२१॥

तमुवाच भगवानात्रेयः—नैतदेवं बुद्धिमता द्रष्टव्यमग्निवेश । एकोऽपि ह्यनेकां संज्ञां लभते कार्यान्तराणि कुर्वन्, तद्यथा--पुरुषो बहूनां कर्मणां करणे समर्थो भवति, स यद्यत् कर्म करोति तस्य तस्य कर्मणः कर्तृ-करण-कार्यसंप्रयुक्तं तत्तद्गौणं नामविशेषं प्राप्नोति, तद्वदौषधद्रव्यमपि द्रष्टव्यम् । यदि चैकमेव किंचिद् द्रव्यमासादयामस्तथागुणयुक्तं यत् सर्वकर्मणां करणे समर्थं स्यात्, कस्ततोऽन्यदिच्छेदुपधारयितुमुपदेष्टुं वा शिष्येभ्य इति ॥२२॥

तत्र श्लोकाः--

यतो यावन्ति यैर्द्रव्यैर्विरेचनशतानि षट् ।
उक्तानि संग्रहेणेह तथैवैषां षडाश्रयाः ॥२३॥

रसा लवणवर्ज्याश्च कषाय इति संज्ञिताः ।
तस्मात् पञ्चविधा योनिः कषायाणामुदाहृता ॥२४॥

तथा कल्पनमप्येषामुक्तं पञ्चविधं पुनः ।
महतां च कषायाणां पञ्चाशत् परिकीर्तिता ॥२५॥

पञ्च चापि कषायाणां शतान्युक्तानि भागशः ।
लक्षणार्थं, प्रमाणं हि विस्तरस्य न विद्यते ॥२६॥

न चालमतिसंक्षेपः सामर्थ्यायोपकल्पते ।
अल्पबुद्धेरयं तस्मान्नातिसंक्षेपविस्तरः ॥२७॥

मन्दानां व्यवहाराय, बुधानां बुद्धिवृद्धये ।
पञ्चाशत्को ह्ययं वर्गः कषायाणामुदाहृतः ॥२८॥

तेषां कर्मसु बाह्येषु योगमाभ्यन्तरेषु च ।
संयोगं च प्रयोगं च यो वेद स भिषग्वरः ॥२९॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने षड्विरेचनशताश्रितीयो नाम चतुर्थोऽध्यायः ॥४॥

इति भेषजचतुष्कः ॥१॥

(आभ्यन्त) रेषु च वमनादिषु । संयोगं द्रव्याणामुचितं मेलकम् । प्रयोगं कालदेशप्रकृत्याद्यपेक्षया उपयोगम् ॥२३-२९॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां षड्विरेचनशताश्रितीय समाप्तः ॥४॥

॥ समाप्तश्च भेषजचतुष्कः ॥

पञ्चमोऽध्यायः

अथातो मात्राशितीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

इह शास्त्रप्रयोजनमारोग्यं, तदुक्तं—"धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम् ।" (सू० १.५३) इति। तच्च द्विविधं—व्याधिप्रध्वंसरूपं रोगोत्पादकसामग्रीविघटनद्वारा व्याधिप्रागभावरूपं च । तत्राद्यस्य साधनं भेषजचतुष्कमभिधाय द्वितीयसाधनतया स्वस्थचतुष्केऽभिधातव्ये तत्साधनेषु च मात्रावदन्नस्य च प्राधान्यसूचनाय तदभिधायको मात्राशितीयः प्रथमतोऽभिधीयते; **सुश्रुतेऽ**प्युक्तं[1]—"प्राणिनां पुनर्मूलमाहारो बलवर्णौजसां च।" (सु० सू० १.२८) इति। मात्राशितमधिकृत्य कृतोऽध्यायो मात्राशितीयः। मात्राशितीय इत्यर्थमाश्रित्येयं संज्ञा बोध्या न तु दीर्घञ्जीवितीयादिवत्शब्दमात्राश्रिता, इयं पुनरुक्तिः वैचित्र्यमात्रम् । अन्ये तु[2] मात्राशीय इति संज्ञाप्रणयने कष्टोच्चारणभयादितरपर्यायिशब्देन संज्ञाकथनमाहुः तन्नात्र भवसाक्षिकमित्युपेक्षणीयमेव ॥१॥२॥

मात्राशी स्यात् । आहारमात्रा पुनरग्निबलापेक्षिणी ॥३॥

ननु यदि मात्राशी स्यादित्यत्र मात्रापदेन (मात्रा) मात्रं विवक्षितं तदा तदभिधानमनर्थकं यत्किञ्चिन्मात्राभोजनस्य स्वतःसिद्धत्वात् तस्मात् सम्यग्यमात्रैव विवक्षिता, सा च किंस्वरूपेति जिज्ञासायां सम्यङ्मात्रास्वरूपं दर्शयति—आहारमात्रा पुनरग्निबलापेक्षिणीति। आहारमात्रा आहारसम्यङ्मात्रेत्यर्थः। अग्निबलापेक्षिणीति किन्तु शरीरबलापेक्षिण्येव, अत एव च भेदप्रतिपादनार्थं पुनःशब्दोऽप्युपात्त इति ॥३॥

यावद्ध्यशनमशितमनुपहत्य प्रकृतिं यथाकालं जरां गच्छति तावदस्य मात्राप्रमाणं वेदितव्यं भवति ॥४॥

अग्निबलापेक्षित्वमेव विशदयति—यावद्धीत्यादि। यावदिति यावत्परिमाणम्। अस्येति भोक्तुः। अशनमित्याहारः। प्रकृतिर्धातुसाम्यरूपा, ताम-

---

१. यदाह[1]

२. तथापि[1]

नुपहृत्य विकारमकृत्वेत्यर्थः। मात्राप्रमाणमिति मात्राव्यवस्था, मात्राप्रमाण-शब्देन च मात्राप्रमाणवदिति बोध्यं तेन तावच्छब्दरूपपरामृष्टेनाशनेन धर्मवाचिना सह प्रमाणमित्यस्य सामानाधिकारण्यमुपपद्यते ॥४॥

तत्र शालिषष्टिकमुद्गलावकपिञ्जलैणशशशरभशम्बरादीन्याहार-द्रव्याणि प्रकृतिलघून्यपि मात्रापेक्षीणि भवन्ति। तथा पिष्टेक्षुक्षीरविकृति-तिलमाषानूपौदकपिशितादीन्याहारद्रव्याणि प्रकृतिगुरूण्यपि मात्रामेवापे-क्षन्ते ॥५॥

इदानीं लघूनि गुरूणि च द्रव्याणि मात्रामपेक्ष्यैव स्वकार्यं जनयन्तीत्याह—तत्रेत्यादि। मात्रापेक्षिणीति स्वकार्यजनन इति शेषः। कपिञ्जलो गौरतित्तिरिः, एणः कृष्णसारः, शरभो महाशृङ्गो हरिणः, शम्बरस्तद्विशेषः। अपि समुच्चये, तेन संस्कारलघूनां लाजादीनामपि ग्रहणम्। एवं प्रकृतिगुरूण्यपीत्यत्रापि संस्कारगुरुशक्तुपिण्डिकादेर्ग्रहणं वाच्यम्। अन्नपानाध्याये—"शीतः स्निग्धोऽगुरुः स्वादुः" (सू० २७.१२) इति षष्टिकगुणकथने अगुरुरित्यकारप्रश्लेषो द्रष्टव्यः, तेनेह षष्टिकलघुत्वप्रतिपादनं न विरुध्यते। विकृतिशब्दः पिष्टेक्षुक्षीरैः सम्बध्यते, क्षीरविकृतिः क्षीरकृताः भक्ष्याः ॥५॥

न चैवमुक्ते द्रव्ये गुरुलाघवमकारणं मन्येत, लघूनि हि द्रव्याणि वाय्वग्निगुणबहुलानि भवन्ति; पृथ्वीसोमगुणबहुलानीतराणि, तस्मात् स्वगुणादपि लघून्यग्निसन्धुक्षणस्वभावान्यल्पदोषाणि चोच्यन्तेऽपि सौहित्योपयुक्तानि, गुरूणि पुनर्नाग्निसन्धुक्षणस्वभावान्यसामान्यात्, अतश्चातिमात्रं दोषवन्ति सौहित्योपयुक्तान्यन्यत्र व्यायामाग्निबलात्; सैषा भवत्यग्निबलापेक्षिणी मात्रा ॥६॥

ननु यदि लघुगुरुद्रव्याणां मात्रामेवापेक्ष्य स्वकार्यजननं ततश्च तद्गतं लाघवं गौरवं चाकिञ्चित्करमेव जातं मात्रयैवान्यथासिद्धेरित्याशंक्य निराचष्टे–न चैवमित्यादि। स्वगुणादपीति लघूनि मात्रया तावदग्निं दीपयन्त्येव स्वगुणाद् वाय्वग्निगुणबाहुल्यादप्यग्निसंधुक्षणस्वभावानि भवन्ति। तथा मात्राव्यतिक्रमे समानेऽपि गुरुद्रव्यापेक्षया लघुद्रव्ये विशेषं दर्शयति अपि सौहित्योपयुक्तानीति—सौहित्यं मात्रातिक्रमेण तृप्तिः। गुरुद्रव्ये विशेषं दर्शयति—गुरूणि पुनरित्यादि। असामान्यादिति विरोधे नञ्, असितमितिवत्, तेनाग्निविरुद्धपृथिवीतोयगुणबाहुल्यादित्यर्थः। एतेन तुल्येऽपि

मात्राव्यतिक्रमे लघुद्रव्यापेक्षया गुरुद्रव्ये महीयान् दोष इत्यर्थः। ननु व्यायामनित्येषु पुरुषेषु सौहित्योपयुक्तमपि गुरु द्रव्यं निर्दोषं दृश्यते, तत्कथमुक्तमतिमात्रं दोषवन्तीत्यत आह—अन्यत्र व्यायामाग्निबलादिति। व्यायामकृतमग्निबलं, व्यायामेत्युपलक्षणं तेन कालकृतमग्निबलं च बोध्यं, यद्वक्ष्यति—"पक्ता भवति हेमन्ते मात्राद्रव्यगुरुक्षमः।" (सू० ६.९) इति। उपसंहरति—सैषेत्यादि ॥६॥

न च नापेक्षते द्रव्य; द्रव्यापेक्षया च त्रिभागसौहित्यमर्धसौहित्यं वा गुरूणामुपदिश्यते, लघूनामपि च नातिसौहित्यमग्नेर्युक्त्यर्थम् ॥ ७ ॥

न केवलमग्निबलापेक्षयैव मात्रा विद्यते किन्तु द्रव्यापेक्षयापीत्याह—मात्रा न च नापेक्षते द्रव्यं, द्रव्यमपेक्षत इत्यर्थः। त्रिभागसौहित्यमर्धसौहित्यमिति विकल्पो गौरवतारतम्याभ्यां ज्ञेयः। अग्नेर्युक्तिः स्वमानावस्थितिः। ननु गुरूणां तावदतिमात्रोपयोगोऽग्निपरिपालनार्थं निषिध्यतां येन गुरूण्यग्न्यसमानानि, (लघूनि पुनरग्निसमानानि) तत् कथमेषामतिमात्रोपयोगो वह्निमांद्यमावहति ? उच्यते—असति प्रतिबन्धके सामान्यं वृद्धिकारणमित्युक्तं प्रकृते च मात्राकृतं गौरवं मन्दवह्निवृद्धिप्रतिबन्धकमतो नाग्निवृद्धिः, ह्रासस्तु भवत्येव गौरवस्य बलवत्वात् ॥ ७ ॥

मात्रावद्ध्यशनमशितमनुपहत्य प्रकृतिं बलवर्णसुखायुषा योजयत्युपयोक्तारमवश्यमिति ॥ ८ ॥

उक्तस्य मात्राभोजनस्य फलमाह—मात्रावद्धीत्यादि ॥ ८ ॥

भवन्ति चात्र—

गुरु पिष्टमयं तस्मात्तण्डुलान् पृथुकानपि।
न जातु भुक्तवान् खादेन्मात्रां खादेद् बुभुक्षितः ॥ ९ ॥

उक्तमर्थं श्लोकेनाह—गुरु पिष्टमयमित्यादि। पिष्टमयं पिष्टविकारः। तस्मादिति गुरुत्वात्। पृथुकाश्चिपिटाः। मात्रामित्यनपायिपरिमाणद्रव्यम् ॥ ९ ॥

वल्लूरं शुष्कशाकानि शालूकानि बिसानि च।
नाभ्यसेद्गौरवान्मांसं कृशं नैवोपयोजयेत् ॥ १० ॥
कूर्चिकांश्च किलाटांश्च शौकरं गव्यमाहिषे।
मत्स्यान् दधि च माषांश्च यवकांश्च न शीलयेत् ॥ ११ ॥

वल्लूरं शुष्कमांसम् । गौरवादित्यनभ्यासहेतुः । कृशमपुष्टम् । एतच्च शूकरगोमहिषमांसादि । यवकः शूकधान्यविशेषो न तु यवः तस्याभ्यस्य-मध्ये पठितत्वात् ॥ १०–११ ॥

षष्टिकाञ्छालिमुद्गांश्च सैन्धवामलके यवान् ।
आन्तरीक्षं पयः सर्पिर्जाङ्गलं मधु चाभ्यसेत् ॥ १२ ॥

अभ्यस्यान् दर्शयति—षष्टिकानित्यादि । पय इति क्षीरम् ॥ १२ ॥

तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते ।
अजातानां विकाराणामनुत्पत्तिकरं च यत् ॥ १३ ॥

इदानीं ग्रन्थविस्तरभयात् संक्षेपेण स्वास्थ्यपरिपालनोपायमाह—तच्चेत्यादि । स्वास्थ्यमिह उद्वेजकधातुवैषम्यविरहितधातुसाम्यम् । तच्च स्वास्थ्यमुभयथा परिपाल्यते विशुद्धाहाराचाराभ्यां सदा क्षीयमाणशरीर-पोषणेन, प्रत्यवायहेतुपरिहारेण च, यथा—दीपपरिपालनं स्नेहवर्तिदानात् पोषणेन क्रियते, तथा निर्वापकहेतुशलभवातादिपरिहारेण च । तत्र श्लोक-पूर्वार्धेन स्वास्थ्यपोषकहेतुरुक्तः, उत्तरार्धेन तु स्वास्थ्यविघातकहेतुपरि-हारोऽभिधीयते इति न पौनरुक्त्यम् । अनुत्पत्तिरिह उत्पादकसामग्रीवि-घटनं, अन्ये त्वाहुः—पूर्वार्धमाहारविहारार्थं, उत्तरार्धन्तु वमनाद्यर्थं; उक्तञ्च—"हैमन्तिकं दोषचयं वसन्ते ...."(शा. २.४५) इत्यादि । तन्न, नित्यमित्युक्तेः, न हि वमनादिकं नित्यमुपयुज्यते धातुक्षयादिदोषात् । **भट्टारहरिचन्द्रस्तु** अनुवृत्त्यनुत्पत्त्योरर्थान्तरत्वादपौनरुक्त्यमित्याह । तदपि न मनोरमं, स्वास्थ्यानुवृति-विकारानुत्पत्त्योर्विकारप्रागभावपरिपालनरूप-त्वेनानर्थान्तरत्वात् ॥ १३ ॥

अत ऊर्ध्वं शरीरस्य कार्यमक्ष्यञ्जनादिकम् ।
स्वस्थवृत्तिमभिप्रेत्य गुणतः संप्रवक्ष्यते ॥ १४ ॥

अत ऊर्ध्वमित्यादि । अत इति संक्षेपेण स्वास्थ्योपायकथनादूर्ध्वं अञ्जनादि संप्रवक्ष्यत इत्यन्वयः । कीदृशं कार्यमित्यवश्यकरणीयम् । गुणत इति गुणपुरस्कारेण । अञ्जनशब्दोऽभ्यञ्जनेऽपि वर्तते तद्व्यवच्छेदायाक्ष्य-ञ्जनमित्युक्तम् । स्वस्थवृत्तिमभिप्रेत्येति तेन रोगहरमात्रं यदञ्जनादि न तु स्वस्थवृत्तहितं तदिह प्रकरणे न वाच्यमित्यर्थः । एतेन यद्यप्येतदञ्जनादि रोगहरमपि भवति तथाऽपि सुस्थवृत्तिहितत्वेनास्मिन् प्रकरणे तदभिधानं न विरुध्यत इति ज्ञेयम् ॥ १४ ॥

सौवीरमञ्जनं नित्यं हितमक्ष्णोः प्रयोजयेत् ।
पञ्चरात्रेऽष्टरात्रे वा स्रावणार्थे रसाञ्जनम् ॥ १५ ॥

सौवीराञ्जनमिच्छन्ति आयुर्वेदार्थचिन्तका इति। रसाञ्जनमपि द्वेधा यथा—"रसाञ्जनमपि द्विधा—कृष्णस्रोतोजं पाषाणाकृति अन्यद्दार्वीकषायेण कृत्रिमं पीतलोहितमिति।" अत्र रसाञ्जनं दार्वीक्वाथसमुद्भूतमेव व्यवहरतीति **रुद्रमिश्र** इति। **अरुणदत्तो**ऽपि **वाग्भटटीकायां** "रसाञ्जनं दार्वीक्वाथसमुद्भवाख्यं योजयेत्" इत्याह। तत्र पञ्चरात्राष्टरात्रग्रहणमदूरान्तरकाले नियमप्रदर्शनार्थम्। तेन दोषबलमपेक्ष्यार्वाङ्मध्ये ऊर्ध्वं च स्रावणाञ्जनं कार्यम्; अत एव **वाग्भटे**—"योजयेत्सप्तरात्रेऽस्मात्स्रावणार्थं रसाञ्जनम्।" (अ. हृ. सू. २.६) इत्युक्तम् ॥ १५ ॥

चक्षुस्तेजोमयं तस्य विशेषाच्छ्लेष्मतो भयम् ।
ततः श्लेष्महरं कर्म हितं दृष्टेः प्रसादनम् ॥१६॥
दिवा तन्न प्रयोक्तव्यं नेत्रयोस्तीक्ष्णमञ्जनम् ।
विरेकदुर्बला दृष्टिरादित्यं प्राप्य सीदति ॥१७॥
तस्मात् स्राव्यं निशायां तु ध्रुवमञ्जनमिष्यते ।

स्रावणाञ्जनकरणे उपपत्तिमाह—चक्षुस्तेजोमयमित्यादि। तस्मादिति स्रावणस्य कफहरत्वात्। स्राव्यमिति स्रावौपयिकमञ्जनम्। निशायामिति स्रावणाञ्जनं कार्यमित्यर्थः। **शालाक्ये**ऽप्युक्तं—"विरेकदुर्बला दृष्टिरादित्यं प्राप्य सीदति। रात्रौ स्वप्नगुणाच्चाक्षि पुष्यत्यञ्जनकर्षितम् ॥" इति। सौवीराञ्जनं तु न चक्षुर्विरेचकं किन्तु प्रसादमात्रं करोति, तेन तद्दिवाऽपि न विरुध्यते। अन्ये तु—ध्रुवं नित्यं कर्तव्यं सौवीराञ्जनं यत्तन्निशि कर्तव्यं, स्रावणाञ्जनं तु श्लेष्मोद्रेकविषयिवमनवत् पूर्वाह्ण एव कर्तव्यमिति व्याचक्षते ॥१६–१७॥–

यथा हि कनकादीनां मलिनां विविधात्मनाम् ॥१८॥
धौतानां निर्मला शुद्धिस्तैलचेलकचादिभिः ।
एवं नेत्रेषु मर्त्यानामञ्जनाश्च्योतनादिभिः ॥१९॥
दृष्टिर्निराकुला भाति निर्मले नभसीन्दुवत् ।

अञ्जनगुणं दृष्टान्तमुपन्यस्योपपादयति—यथा हीत्यादि। नेत्रेष्विति गोलकेषु, दृष्टिरिति चक्षुरिन्द्रियं, आश्च्योतनं नेत्रविकारार्थं द्रवौषधदानं, आदिशब्देन पुटपाकादीनां ग्रहणम् ॥१८–१९॥–

हरेणुकां प्रियङ्गुं च पृथ्वीकां केशरं नखम् ॥२०॥

ह्रीबेरं चन्दनं पत्रं त्वगेलोशीरपद्मकम् ।
ध्यामकं मधुकं मांसी गुग्गुल्वगुरुशर्करम् ॥२१॥

न्यग्रोधोदुम्बराश्वत्थप्लक्षलोध्रत्वचः शुभाः ।
वन्यं सर्जरसं मुस्तं शैलेयं कमलोत्पले ॥२२॥

श्रीवेष्टकं शल्लकीं च शुकबर्हमथापि च ।
पिष्ट्वा लिम्पेच्छरेषीकां तां वर्ति यवसन्निभाम् ॥२३॥
अङ्गुष्ठसंमितां कुर्यादष्टाङ्गुलसमां भिषक् ।
शुष्कां निगर्भां तां वर्ति धूमनेत्रार्पितां नरः ॥२४॥

स्नेहाक्तामग्निसंप्लुष्टां पिबेत् प्रायोगिकीं सुखाम् ।

इदानीमञ्जनान्ते धूमपानमावश्यकमिति वक्ष्यति, तेनाञ्जनानन्तरं धूममाह—हरेणुकामित्यादि । हरेणुका रेणुकम् । पृथ्वीका कृष्णजीरकम् । केशरं नागकेशरम् । पद्मकं पद्मकाष्ठम् । ध्यामकं गन्धतृणम् । न्यग्रोधादीनां पञ्चानां त्वचः, शुभ इति कीटाद्यनुपहताः । वन्यं कैवर्तमुस्तकम् । श्रीवेष्टकं नवनीतखोटिः । शल्लकी शालाइ इति ख्यातं द्रव्यम् । शुकबर्हं ग्रन्थिपर्णः । शरेषीका शरपुष्पस्य नाली । यवसन्निभमिति लिम्पेदिति क्रियाविशेषणं, केचित्तु यवसन्निभामिति पठन्ति । अत्र संविधानं—पिष्टैर्भेषजैस्तथा शरेषीका[1] वेष्टनीया यथाऽष्टाङ्गुलायता अङ्गुष्ठपरिणाहा च वर्तिः स्यात्, ताश्च शुष्कीकृत्यानन्तरं शरेषीकामाकृष्य स्नेहेनाभ्यज्याग्निना एकस्मिन्नग्रेऽवदह्य वक्ष्यमाणधूमपाननलिकायां मूले[2]रन्ध्रे निवेश्यातो धूमः पेय इति । प्रायोगिकीति नित्यपेयधूमवर्तेः संज्ञा । सुखमित्यनेनाकटुत्वमनत्ययञ्च दर्शयति ॥२०–२४॥–

वसाघृतमधूच्छिष्टैर्युक्तियुक्तैर्वरौषधैः ॥२५॥
वर्ति मधुरकैः कृत्वा स्नैहिकीं धूममाचरेत् ।

स्नैहिकधूमवर्तिमाह—वसेत्यादि । वरौषधैरिति (मधुरकविशेषणम्), मधुरकाणि जीवनीयानि जीवकर्षभकादीनि । युक्तियुक्तैरित्यनेन तथा वसादिकं देयं यथा वर्तिः कर्तुं पार्यत इति दर्शयति । वर्तिकरणञ्च पूर्ववत् । स्नैहिकी स्नेहकारिका ॥२५॥–

---

१. शरिका[1]

२. अग्र [1]

श्वेता ज्योतिष्मती चैव हरितालं मनःशिला ॥२६॥
गन्धाश्चागुरुपत्राद्या धूमं मूर्धविरेचने ।

वैरेचनिकधूमपानवर्तिमाह—श्वेतेत्यादि । श्वेता श्वेतापराजिता । गन्धः गन्धद्रव्याणि, तेषां विशेषणमगुरुपत्राद्या इति; अगुरु च पत्राद्याश्च अगुरुपत्राद्याः; पत्राद्याश्च ज्वरे "अगुरुकुष्ठतगरपत्र" (चि० ३.२६७) इत्यादिगणे वक्ष्यमाणाः। अगुर्वाद्या इति तु न कृतं कुष्ठतगरयोरतितीक्ष्णत्वेन मस्तुलुङ्गस्रावकयोः परिहारार्थम् । उक्तं च **शालाक्ये—** "नतकुष्ठे स्रावयतो धूमवर्तिप्रयोजिते । मस्तुलुङ्गं विशेषेण तस्मात्ते नैव योजयेत् ।" इति ॥२६॥–

गौरवं शिरसः शूलं पीनसार्धावभेदकौ ॥२७॥
कर्णाक्षिशूलं कासश्च हिक्काश्वासौ गलग्रहः ।
दन्तदौर्बल्यमास्रावः श्रोत्रघ्राणाक्षिदोषजः ॥२८॥
पूतिर्घ्राणास्यगन्धश्च दन्तशूलमरोचकः ।
हनुमन्याग्रहः कण्डूः क्रिमयः पाण्डुता मुखे ॥२९॥
श्लेष्मप्रसेको वैस्वर्यं गलशुण्ड्युपजिह्विका ।
खालित्यं पिञ्जरत्वं च केशानां पतनं तथा ॥३०॥
क्षवथुश्चातितन्द्रा च बुद्धेर्मोहोऽतिनिद्रता ।
धूमपानात् प्रशाम्यन्ति बलं भवति चाधिकम् ॥३१॥
शिरोरुहकपालानामिन्द्रियाणां स्वरस्य च ।
न च वातकफात्मानो बलिनोऽप्यूर्ध्वजत्रुजाः ॥३२॥
धूमवक्त्रकपानस्य व्याधयः स्युः शिरोगताः ।

धूमपानगुणानाह—गौरवमित्यादि । शिरोरुहाः केशाः, कपालाश्च शिरस एव । बलिनोऽपीति बलवन्तोऽपीत्यर्थः ॥२७–३२॥–

प्रयोगपाने तस्याष्टौ कालाः संपरिकीर्तिताः ॥३३॥
वातश्लेष्मसमुत्क्लेशः कालेष्वेषु हि लक्ष्यते ।
स्नात्वा भुक्त्वा समुल्लिख्य क्षुत्वा दन्तान्निघृष्य च ॥३४॥
नावनाञ्जननिद्रान्ते चात्मवान् धूमपो भवेत् ।
तथा वातकफात्मानो न भवन्त्यूर्ध्वजत्रुजाः ॥३५॥
रोगास्तस्य तु पेयाः स्युरापानास्त्रिस्त्रयस्त्रयः ।

धूमपानकालं दर्शयति—प्रयोगेत्यादि। प्रयोगपाने इति प्रायोगिकधूमपाने एतेऽष्टौ कालाः, स्नैहिकपाने तु वातवृद्ध्युपलक्षितः कालः, वैरेचनिकपाने तु श्लेष्मवृद्ध्युपलक्षितः कालः। प्रायोगिक एव स्वस्थवृत्ताधिकारी, तेन तत्काल एव कण्ठरवेणाभिधीयते, किंवा प्रयुज्यत इति प्रयोगो धूमप्रकरणात् तस्य पाने एतेन धूमत्रयस्याप्येते काला इत्यर्थः। वातकफात्मान- इति व्यस्तसमस्ततया योज्यम्। एकैकस्मिन् धूमपानकाले कियन्तो धूमाभ्यवहारमोक्षाः कार्या इत्याह—पेयाः स्युरापानास्त्रिस्त्रयस्त्रय इति। आपाना इति धूमाभ्यवहारमोक्षाः; तद्विषयत्वादापानशब्दो धूमेऽपि वर्तते, तेन पेया इत्यनेन सामान्याधिकरण्यमविरुद्धम्। त्रिस्त्रयस्त्रय इति त्रयस्त्रयो धूमाभ्यवहारमोक्षाः, त्रिरिति वारत्रयं कर्तव्याः। त्रींस्त्रीनभ्यवहारान् कृत्वा तु विश्रामोऽन्तरा कर्तव्यः। एवं वारत्रयेण एकैकस्मिन् धूमपानकाले नव धूमाभ्यवहारमोक्षा इत्यर्थः ॥३३-३५॥–

परं द्विकालपायी स्यादह्नः कालेषु बुद्धिमान् ॥३६॥

प्रयोगे, स्नैहिके त्वेकं, वैरेच्यं त्रिचतुः पिबेत्।
हृत्कण्ठेन्द्रियसंशुद्धिर्लघुत्वं शिरसः शमः ॥३७॥
यथेरितानां दोषाणां सम्यक्पीतस्य लक्षणम्।

इदानीमष्टसु कालेषु मध्ये एकस्मिन्नेकस्मिन् धूमे यावान् यावान् पानकालस्तं दर्शयति—परमित्यादि। प्रयोगे इति च्छेदः, प्रायोगिके इत्यर्थः। कालेषु उक्तस्नानादिकालेषु मध्ये एकस्मिन् दिवसे यत् किञ्चित् कालद्वयं व्याप्य प्रायोगिकधूमं पिबेदित्यर्थः। स्नैहिके त्वे(कमिति स्नैहिकधूमे एकमेव कालं व्याप्य धूमं पिबेदिति योज्यम्। त्रिचतुरि)ति वैरेच्ये दोषापेक्षो[1] विकल्पः ॥३६-३७॥–

बाधिर्यमान्ध्यं मूकत्वं रक्तपित्तं शिरोभ्रमम् ॥३८॥
अकाले चातिपीतश्च धूमः कुर्यादुपद्रवान्।
तत्रेष्टं सर्पिषः पानं नावनाञ्जनतर्पणम् ॥३९॥

स्नैहिकं धूमजे दोषे वायुः पित्तानुगो यदि।
शीतं तु रक्तपित्ते स्याच्छ्लेष्मपित्ते विरूक्षणम् ॥४०॥

तत्रेत्यादि। तत्र अविधिप्रयुक्तधूमकृते दोषे यदि वायुर्वृद्धः पित्तमनु-

———

१. दोषबलापेक्षो [1]

बन्धरूपं[1] स्यात् तदा नावनं अञ्जनं तर्पणं च स्नैहिकं स्नेहकृतं कर्तव्यं, यत्र रक्तपित्ते यद्यनुबन्धरूपं भवतः तदा शीतं शीतद्रव्यकृतं नावनाद्येव, श्लेष्मपित्ते यद्यनुगे भवतः तदा विरूक्षणमपि नावनाद्येव। तर्पणन्तु नेत्रयोः पार्श्वं....माषादि....विधाय स्नेहादिना पूरणमुच्यते ॥ ३८-४० ॥

परं त्वतः प्रवक्ष्यामि धूमो येषां विगर्हितः।
न विरिक्तः पिबेद्धूमं न कृते बस्तिकर्मणि ॥४१॥

न रक्ती न विषेणार्तो न शोचन्न च गर्भिणी।
न श्रमे न मदे नामे न पित्ते न प्रजागरे ॥४२॥

न मूर्च्छाभ्रमतृष्णासु न क्षीणे नापि च क्षते।
न मद्यदुग्धे पीत्वा च न स्नेहं न च माक्षिकम् ॥४३॥

धूमं न भुक्त्वा दध्ना च न रूक्षः क्रुद्ध एव च।
न तालुशोषे तिमिरे शिरस्यभिहते न च ॥४४॥

न शङ्खके न रोहिण्यां न मेहे न मदात्यये।
एषु धूममकालेषु मोहात् पिबति यो नरः ॥४५॥
रोगास्तस्य प्रवर्धन्ते दारुणा धूमविभ्रमात्।

न विरिक्त इत्यादौ प्रतिनिषेध्यं नकारकरणं निषेध्यगौरवप्रदर्शनार्थम्। तथा धूमं न भुक्त्वेत्यत्र पुनर्धूमग्रहणं च दध्ना भुक्तवतो विशेषप्रतिषेधार्थम् ॥ ४१—४५ ॥—

धूमयोग्यः पिबेद्दोषे शिरोघ्राणाक्षिसंश्रये ॥४६॥

घ्राणेनास्येन कण्ठस्थे मुखेन घ्राणपो वमेत्।
आस्येन धूमकवलान् पिबन् घ्राणेन नोद्वमेत् ॥४७॥
प्रतिलोमं गतो ह्याशु धूमो हिंस्याद्धि चक्षुषी।

धूमयोग्य इत्यादौ घ्राणेनेति च्छेदः। कण्ठस्थे दोषे आस्येन धूमं पिबेदित्यन्वयः। धूमं पीत्वा कथं वमेदित्याह—मुखेनेत्यादि। घ्राणेन धूमं पीत्वा मुखेन धूमं वमेत्, आस्येन पीत्वा तु घ्राणेन धूमं न वमेत्। अत्र हेतुः प्रतिलोममित्यादि। प्रतिलोममिति विमार्गम्, हिंस्याद्धीति हिंस्यादेवेत्यर्थः ॥ ४६-४७ ॥—

१. वायुः पित्तानुगो वृद्धः [1]

ऋज्वङ्गचक्षुस्तच्चेताः सूपविष्टस्त्रिपर्ययम् ॥४८॥
पिबेच्छिद्रं पिधायैकं नासया धूममात्मवान् ।

सूपविष्ट इति सुखोपविष्टः। त्रिपर्ययमिति पर्ययाविच्छेदः, तेन वारत्रयमित्यर्थः। एतच्च यद्यपि आपानास्त्रिस्त्रयस्त्रय इत्यनेन प्रागेवोक्तं तथाऽपि त्रिपर्ययधूमपानपर्यन्तमृज्वङ्गचक्षुषा भवितव्यं नोपक्रम एवेति पुनरभिधानेन दर्शयति। छिद्रं पिधायेति नासया यदि धूमः पीयते तदा एकं नासापुटं पिधाय पुटान्तरेण पिबेदित्यर्थः ॥ ४८ ॥–

चतुर्विंशतिकं नेत्रं स्वाङ्गुलीभिर्विरेचने ॥४९॥
द्वात्रिंशदङ्गुलं स्नेहे प्रयोगेऽध्यर्धमिष्यते ।
ऋजु त्रिकोषाफलितं कोलास्थ्यग्रप्रमाणितम् ॥५०॥
बस्तिनेत्रसमद्रव्यं धूमनेत्रं प्रशस्यते ।

धूमभेदेन अत्र भेदमाह—चतुर्विंशतिकमित्यादि। नेत्रं नलिका। चतुर्विंशतिकमिति चतुर्विंशत्यङ्गुलम्। अध्यर्धमिति सार्धमित्यर्थः, इह वैरेचनिकनेत्रमेव चतुर्विंशत्यङ्गुलप्रमाणं सार्धं सत् षट्त्रिंशदङ्गुलप्रमाणं प्रायोगिकधूमपाने **जतूकर्ण**सम्वादात्, यदाह—"सार्धत्र्यंशयुतः पूर्णो हस्तः प्रायोगिकादिषु।" इति। अस्यार्थः—प्रायोगिके सार्धो हस्तः षड्त्रिंशदङ्गुलं नेत्रमित्यर्थः। हस्तस्त्र्यंशयुत इति हस्तो हि चतुर्विंशत्यङ्गुलः अस्य तृतीयोंऽशोऽष्टाङ्गुलः तेन युतो हस्तः एतेन स्नैहिकं द्वात्रिंशदङ्गुलमिति सिद्धं, वैरेचनं तु पूर्णो हस्तश्चतुर्विंशत्यङ्गुलमित्यर्थः। **अस्मत्पितृचरणास्तु**–अध्यर्धमिति द्वात्रिंशदङ्गुलमित्यनेनैव सम्बध्यते सन्निहितत्वात् बाधकं विना सन्निहितपरित्यागे मानाभावात्। न च **जतूकर्ण**वचनमेव बाधकमिति वाच्यं, तस्य स्मृतिद्वैधवदप्युपपत्तेः; त्वयाऽप्येतदभ्युपेयं अन्यथा **सुश्रुतादे**र्विरोधे किमुत्तरम्। **सुश्रुते**ऽप्युक्तं—"अङ्गुलान्यष्टचत्वारिंशत् प्रायोगिके" (सु० चि० ४०.५) इति। **चक्षुष्येणो**ऽप्याह—"चत्वारिंशदिहाष्टौ च प्रमाणेनाङ्गुलानि तु। नेत्रं प्रायोगिके प्रोक्तं व्यामार्धं तत् प्रमाणतः॥" इति। **वाग्भटे** तु प्रायोगिके चत्वारिंशदङ्गुलं नेत्रमुक्तं, यथा—"तीक्ष्णस्नेहनमध्येषु त्रीणि चत्वारि पञ्च च। अङ्गुलानां क्रमात्पातुः प्रमाणेनाष्टकानि तत्॥" (अ० हृ० सू० २१.८–९) इति। **करालस्तु** चत्वारिंशदित्याह यथा—"प्रायोगिके नेत्रमिष्टं द्विचत्वारिंशदङ्गुलम्।" इति। तस्मात् स्मृतिद्वैधात् सर्वेषामेव प्रामाण्यमिति युक्तमित्याहुः।

त्रिकोषाफलितामिति त्रिभिः कोषैः पर्वभिः समन्वितं, किंवा त्रिकोषस्त्रिभङ्गः तेन तस्मिन्नेत्रे स्थानत्रये भङ्गो वक्रता कार्या, स च त्रिभङ्गो नलिकात्रयेन घटनाद्भवतीत्याहुः। ऋजु त्रिकोषमच्छिद्रमिति **काश्मीर-**सम्मतः पाठः। **वाग्भटे**ऽपि—"बस्तिनेत्रसमद्रव्यं त्रिकोशं कारयेदृजु।" (अ० हृ० सू० २१.७) इत्युक्तम्। मूलं चास्याङ्गुष्ठप्रवेशं बोध्यं, यदाह **वाग्भटः**—"मूलाग्रेऽङ्गुष्ठकोलास्थिप्रवेशं धूमनेत्रकम्।" (अ०हृ०सू० २१.८) इति। बस्तिनेत्रसमद्रव्यमिति बस्तिनेत्रेण समं तुल्यं द्रव्यं निर्माणद्रव्यं सुवर्णरूप्यत्रपुशीशादिकं यस्य ॥४९-५०॥—

दूराद्विनिर्गतः पर्वच्छिन्नो नाडीतनूकृतः ॥५१॥
नेन्द्रियं बाधते धूमो मात्राकालनिषेवितः।
यदा चोरश्च कण्ठश्च शिरश्च लघुतां व्रजेत् ॥५२॥
कफश्च तनुतां प्राप्तः सुपीतं धूममादिशेत्।
अविशुद्धः स्वरो यस्य कण्ठश्च सकफो भवेत् ॥५३॥
स्तिमितो मस्तकश्चैवमपीतं धूममादिशेत्।
तालु मूर्धा च कण्ठश्च शुष्यते परितप्यते ॥५४॥
तृष्यते मुह्यते जन्तू रक्तं च स्रवतेऽधिकम्।
शिरश्च भ्रमतेऽत्यर्थं मूर्च्छा चास्योपजायते ॥५५॥
इन्द्रियाण्युपतप्यन्ते धूमेऽत्यर्थं निषेविते।

यथाविहितनलिकाकरणे गुणमाह—दूरादित्यादि ॥५१-५२॥—

वर्षे वर्षेऽणुतैलं च कालेषु त्रिषु ना चरेत् ॥५६॥
प्रावृट्शरद्वसन्तेषु गतमेघे नभस्तले।
नस्तःकर्म यथाकालं यो यथोक्तं निषेवते ॥५७॥
न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते।
न स्युः श्वेता न कपिलाः केशाः श्मश्रूणि वा पुनः ॥५८॥
न च केशाः प्रमुच्यन्ते वर्धन्ते च विशेषतः।
मन्यास्तम्भः शिरःशूलमर्दितं हनुसंग्रहः ॥५९॥
पीनसार्धावभेदौ च शिरःकम्पश्च शाम्यति।
सिराः शिरःकपालानां सन्धयः स्नायुकण्डराः ॥६०॥
नावनप्रीणिताश्चास्य लभन्तेऽभ्यधिकं बलम्।
मुखं प्रसन्नोपचितं स्वरः स्निग्धः स्थिरो महान् ॥६१॥

सर्वेन्द्रियाणां वैमल्यं बलं भवति चाधिकम्।
न चास्य रोगाः सहसा प्रभवन्त्यूर्ध्वजत्रुजाः ॥६२॥
जीर्यतश्चोत्तमाङ्गेषु जरा न लभते बलम्।

ऊर्ध्वजत्रुगदापहत्वसामान्याद्धूममनु नस्यमाह—वर्षे वर्षे इत्यादि। अणुस्रोतोगामितैलमणुतैलम्। तच्चात्रानुपदमेवाग्रे वक्ष्यमाणम्। **नस्य-गुणानाह**—नस्तःकर्मेत्यादि। यद्यपि स्नेहनस्वेदनभेदेन द्विविधमेव नस्यं वाच्यं तथाऽपि प्रकरणात् स्नेहननस्यगुणा एवैते बोध्या अत एव तदनन्तर-मणुतैलं वक्ष्यति। तेनात्र नस्तःशब्देन स्नेहविशेष उच्यते, तत्करणकं कर्म नस्तःकर्म; यदुक्तं **सुश्रुते**—"तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्क-न्धोरसां च बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेह उपादीयते तस्मिन् वैशेषिको नस्तःशब्दः।" (सु० चि० ४०.२२) इति; अन्ये तु नस्यसामान्य-गुणाभिधायक एवायं ग्रन्थ इत्याहुः। सिराः सन्धयः स्नायुकण्डराश्च शिरः कपालानामेव; कण्डराः स्थूलसिराः। उत्तमाङ्गेषु इति मस्तकेषु, अन्ये तु उत्तमेति जराविशेषणमाहुः प्रवृद्धाऽपीत्यर्थः, तेन वलीपलितादिलक्षणा जरा प्रवृद्धाऽपि अङ्गेषु मस्तकादिषु बलं न लभत इत्यर्थः ॥५६-६२॥–

चन्दनागुरुणी पत्रं दार्वीत्वङ्मधुकं बलाम् ॥६३॥
प्रपौण्डरीकं सूक्ष्मैलां विडङ्गं बिल्वमुत्पलम्।
ह्रीबेरमभयं वन्यं त्वङ्मुस्तं सारिवां स्थिराम् ॥६४॥
जीवन्तीं पृश्निपर्णीं च सुरदारु शतावरीम्।
हरेणुं बृहतीं व्याघ्रीं सुरभीं पद्मकेशरम् ॥६५॥
विपाचयेच्छतगुणे माहेन्द्रे विमलेऽम्भसि।
तैलाद्दशगुणं शेषं कषायमवतारयेत् ॥६६॥
तेन तैलं कषायेण दशकृत्वो विपाचयेत्।
अथास्य दशमे पाके समांशं छागलं पयः ॥६७॥
दद्यादेषोऽणुतैलस्य नावनीयस्य संविधिः।
अस्य मात्रां प्रयुञ्जीत तैलस्यार्धपलोन्मिताम् ॥६८॥
स्निग्धस्विन्नोत्तमाङ्गस्य पिचुना नावनैस्त्रिभिः।
त्र्यहात्त्र्यहाच्च सप्ताहमेतत् कर्म समाचरेत् ॥६९॥
निवातोष्णसमाचारी हिताशी नियतेन्द्रियः।
तैलमेतत्त्रिदोषघ्नमिन्द्रियाणां बलप्रदम् ॥७०॥
प्रयुञ्जानो यथाकालं यथोक्तानश्नुते गुणान्।

अणुतैलमाह—चन्दनेत्यादि। दार्व्यास्त्वक् दार्वीत्वक्, वन्यं कैवर्तमुस्तकं, सुरभी शूकशिम्बा, पद्मस्य केशरमिति समासः। माहेन्द्रे इत्यान्तरिक्षे। शतगुणत्वं दशगुणत्वं च तैलापेक्षया। अत्र क्वाथ्यभेषजं तावन्मात्रं ग्राह्यं यावता क्वाथार्थोपात्तं पानीयं भेषजाच्चतुर्गुणं स्यात्, "क्वाथ्याच्चतुर्गुणं वारि" इत्यस्याबाधितत्वात्, न तु भेषजाच्छतगुणेऽम्भसीति व्याख्येयं; यदाह **जतूकर्णः**—"पक्त्वाऽथाम्बुशतप्रस्थे दशभागस्थितेन तु। तैलप्रस्थं पचेत्तेन छागीक्षीरेण संयुतम्॥" इति। पिचुना तूलकपिण्डिकया। नावनैस्त्रिभिर्वारत्रयेणेत्यर्थः। तन्नस्यं कस्मिन् नरे कियन्तं कालं कुर्यादित्याह—त्र्यहादित्यादि। त्र्यहात्त्र्यहादिति एकैकं दिनमन्तरीकृत्य, सप्ताहमित्यन्तरितदिनानि वर्जयित्वा तेनैकैकस्मिन् ऋतौ षड्भिरन्तरितदिनैर्नस्यदिनैश्च सप्तभिः सह मिलित्वा त्रयोदशाहादेव नस्यप्रयोगः समाप्यत इत्यर्थः॥६३-७०॥–

आपोथिताग्रं द्वौ कालौ कषायकटुतिक्तकम्॥७१॥
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन्।
निहन्ति गन्धं वैरस्यं जिह्वादन्तास्यजं मलम्॥७२॥
निष्कृष्य रुचिमाधत्ते सद्यो दन्तविशोधनम्।
करञ्जकरवीरार्कमालतीककुभासनाः॥७३॥
शस्यन्ते दन्तपवने ये चाप्येवंविधा द्रुमाः।
सुवर्णरूप्यताम्राणि त्रपुरीतिमयानि च॥७४॥
जिह्वानिर्लेखनानि स्युरतीक्ष्णान्यनृजूनि च।
जिह्वामूलगतं यच्च मलमुच्छ्वासरोधि च॥७५॥
दौर्गन्ध्यं भजते तेन तस्माज्जिह्वां विनिर्लिखेत्।

दन्तकाष्ठविधिमाह—आपोथिताग्रमित्यादि। द्वौ कालाविति सायं प्रातरिति **चक्रः**, **पितृचरणास्तु**—द्वौ कालावित्यनेन प्रातःकालो भोजनानन्तरकालश्चोच्यते; उक्तं हि **वाग्भटे**—"प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम्। भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन्॥" (अ० हृ० सू० २.२-३) इत्याहुः। दन्तान् पुनातीति दन्तपवनं दन्तकाष्ठम्। मलं निष्कृष्य इत्यन्वयः। ककुभोऽर्जुनः, एवंविधा एवंरसाः न्यग्रोधखदिरादयः॥७१-७५॥—

धार्याण्यास्येन वैशद्यरुचिसौगन्ध्यमिच्छता॥७६॥

जातीकटुकपूगानां लवङ्गस्य फलानि च।
कक्कोलस्य फलं पत्रं ताम्बूलस्य शुभं तथा।
तथा कर्पूरनिर्यासः सूक्ष्मैलायाः फलानि च ॥७७॥

कटुकं लताकस्तूरी। फलानीति जातीकटुकपूगानामित्यनेन सम्बध्यते, लवङ्गस्येत्यत्र तु चकारेण वृन्तमिति समुच्चीयते। कर्पूरस्येति कर्पूर-वृक्षस्य ॥७६-७७॥

हन्वोर्बलं स्वरबलं वदनोपचयः परः।
स्यात् परं च रसज्ञानमन्ने च रुचिरुत्तमा ॥७८॥
न चास्य कण्ठशोषः स्यान्नौष्ठयोः स्फुटनाद्भयम्।
न च दन्ताः क्षयं यान्ति दृढमूला भवन्ति च ॥७९॥
न शूल्यन्ते न चाम्लेन हृष्यन्ते भक्षयन्ति च।
परानपि खरान् भक्ष्यांस्तैलगण्डूषधारणात् ॥८०॥
नित्यं स्नेहार्द्रशिरसः शिरःशूलं न जायते।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च ॥८१॥
बलं शिरःकपालानां विशेषेणाभिवर्धते।
दृढमूलाश्च दीर्घाश्च कृष्णाः केशा भवन्ति च ॥८२॥
इन्द्रियाणि प्रसीदन्ति सुत्वग्भवति चाननम्।
निद्रालाभः सुखं च स्यान्मूर्ध्नि तैलनिषेवणात् ॥८३॥
न कर्णरोगा वातोत्था न मन्याहनुसंग्रहः।
नोच्चैः श्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णतर्पणात् ॥८४॥
स्नेहाभ्यङ्गाद्यथा कुम्भश्चर्म स्नेहविमर्दनात्।
भवत्युपाङ्गादक्षश्च दृढः क्लेशसहो यथा ॥८५॥
तथा शरीरमभ्यङ्गाद्दृढं सुत्वक् च जायते।
प्रशान्तमारुताबाधं क्लेशव्यायामसंसहम् ॥८६॥
स्पर्शनेऽभ्यधिको वायुः स्पर्शनं च त्वगाश्रितम्।
त्वच्यश्च परमभ्यङ्गस्तस्मात्तं शीलयेन्नरः ॥८७॥
न चाभिघाताभिहतं गात्रमभ्यङ्गसेविनः।
विकारं भजतेऽत्यर्थं बलकर्मणि वा क्वचित् ॥८८॥

सुस्पर्शोपचिताङ्गश्च बलवान् प्रियदर्शनः ।
भवत्यभ्यङ्गनित्यत्वान्नरोऽल्पजर एव च ॥८९॥

स्नेहगण्डूषगुणमाह—हन्वोर्बलमित्यादि । शिरस्तैलगुणमाह–नित्यमित्यादि । मूर्ध्नि तैलनिषेवणादित्युक्त्वाऽपि स्नेहार्द्रशिरस इति यत् करोति तेन यावता तैलेनार्द्रं शिरः स्यात्तावत्तैलं सेव्यमिति दर्शयति । नोच्चैः श्रुतिर्न बाधिर्यमिति विशेषानुयुक्तम् । स्नेहाभ्यङ्गादित्यादि—उपाङ्गः स्नेहदानं, अक्षो रथस्य चक्रनिबन्धनकाष्ठम् । अभ्यङ्गस्य वातहितत्वे उपपत्तिमाह--स्पर्शनेत्यादि । परमत्यर्थं, बलकर्मणेति बलेन सम्पाद्यं कर्म बलकर्म गुरुभारहरणादि ॥७८-८९ ॥

खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयोः ।
सद्य एवोपशाम्यन्ति पादाभ्यङ्गनिषेवणात् ॥९०॥
जायते सौकुमार्यं च बलं स्थैर्यं च पादयोः ।
दृष्टिः प्रसादं लभते मारुतश्चोपशाम्यति ॥९१॥
न च स्याद् गृध्रसीवातः पादयोः स्फुटनं न च ।
न सिरास्नायुसंकोचः पादाभ्यङ्गेन पादयोः ॥९२॥

पादाभ्यङ्गगुणमाह—खरत्वमित्यादि । पादयोरिति पुनः पुनरभिधानं सम्बन्धिभेदेन सम्बन्धनीयं पादाभ्यङ्गस्य स्मरणार्थम् ॥९०-९२॥

दौर्गन्ध्यं गौरवं तन्द्रां कण्डूं मलमरोचकम् ।
स्वेदबीभत्सतां हन्ति शरीरपरिमार्जनम् ॥९३॥
पवित्रं वृष्यमायुष्यं श्रमस्वेदमलापहम् ।
शरीरबलसन्धानं स्नानमोजस्करं परम् ॥९४॥

त्वच्यत्वसामान्यादभ्यङ्गानन्तरमुद्वर्तनमाह–दौर्गन्ध्यमित्यादि । शरीरपरिमार्जनमुद्वर्तनं, स्वेदेन बीभत्सता स्वेदबीभत्सता । उद्वर्तनानन्तरीयत्वात् स्नानमाह—पवित्रमित्यादि । शरीरबलसन्धानमिति शरीरे बलं सम्यगाधीयतेऽनेनेति शरीरबलसन्धानं, किंवा शरीरस्य बलेन सन्धानं योजनं करोतीति शेषः ॥९३-९४॥

काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्रहर्षणम् ।
श्रीमत् पारिषदं शस्तं निर्मलाम्बरधारणम् ॥९५॥

वृष्यं सौगन्ध्यमायुष्यं काम्यं पुष्टिबलप्रदम् ।
सौमनस्यमलक्ष्मीघ्नं गन्धमाल्यनिषेवणम् ॥९६॥

धन्यं मङ्गल्यमायुष्यं श्रीमद्व्यसनसूदनम् ।
हर्षणं काम्यमोजस्यं रत्नाभरणधारणम् ॥९७॥

मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनम् ।
पादयोर्मलमार्गाणां शौचाधानमभीक्ष्णशः ॥९८॥

पौष्टिकं वृष्यमायुष्यं शुचि रूपविराजनम् ।
केशश्मश्रुनखादीनां कल्पनं संप्रसाधनम् ॥९९॥

चक्षुष्यं स्पर्शनहितं पादयोर्व्यसनापहम् ।
बल्यं पराक्रमसुखं वृष्यं पादत्रधारणम् ॥१००॥

ईतेः प्रशमनं बल्यं गुप्त्यावरणशङ्करम् ।
घर्मानिलरजोम्बुघ्नं छत्रधारणमुच्यते ॥१०१॥

स्खलतः संप्रतिष्ठानं शत्रूणां च निषूदनम् ।
अवष्टम्भनमायुष्यं भयघ्नं दण्डधारणम् ॥१०२॥

श्रीमदिति शोभाजनकम्। परिषदि शस्तं पारिषदम्। शस्तं मङ्गल्यम्। व्यसनं सर्पपिशाचाद्यभिघातः। मलमार्गा गुदोपस्थकर्णनेत्रनासास्रोतांसि। शौचाधानमिति यथायथं पानीयमृत्तिकादिभिः। अभीक्ष्णश इति पुनः पुनः। पौष्टिकमित्यादि। शुभदिनविहितस्य क्षौरकर्मणो धन्यत्वमायुष्यत्वं च **ज्योतिःशास्त्रादावुक्तम्।** कल्पनं छेदनं, एतच्च श्मश्रूनां नखानां च, सम्प्रसाधनं कङ्कतिकादिभिः केशश्मश्रूणामुपस्कारः, एवमलक्तकेन नखस्य च। चक्षुष्यमिति पादगतसिरयोश्चक्षुःप्रतिबद्धत्वात् पादसौहित्येन चक्षुषोऽपि सौहित्यमित्यर्थः, तदुक्तं—"चक्षुषि प्रतिबद्धे हि सिरे पादगते नृणाम्। अतश्चक्षुःप्रसादार्थी पादाभ्यङ्गं समाचरेत् ॥" इति। पादयोरिति स्पर्शनहितमित्यनेन व्यसनापहमित्यनेन च सम्बध्यते। पराक्रमश्चङ्क्रमणं, वृष्यत्वन्तु प्रभावात्। ईतेरित्यादि। ईतिः सर्पादिः। गुप्तिः पिशाचादिभ्यो रक्षा, आवरणमाच्छादनं, ताभ्यां शङ्करं कल्याणकरम्। अवष्टम्भनमिति बलप्रदम्। केचिदत्र उष्णीषधारणगुणं पठन्ति तत्पुनरनार्षं सङ्ग्रहेऽनुक्तत्वात् ॥९५–१०२॥

नगरी नगरस्येव रथस्येव रथी यथा ।
स्वशरीरस्य मेधावी कृत्येष्ववहितो भवेत् ॥१०३॥

इदानीमुक्तस्यानुक्तस्य च स्वस्थविधेरवधानेन कर्तव्यतामाह—नगरीत्यादि। नगरी रथी च नगररथयोरधिकृतः, कृत्येषु उक्तेष्वनुक्तेषु च ॥१०३॥

भवति चात्र—

वृत्त्युपायान्निषेवेत ये स्युर्धर्माविरोधिनः ।
शममध्ययनं चैव सुखमेवं समश्नुते ॥१०४॥

इदानीं स्वस्थेन सता यत् कर्तव्यं तथा उक्तार्थसङ्ग्रहं चाभिधत्ते—भवति चात्रेत्यादि। वृत्त्युपायाः कृष्यादयः। शमः शान्तिः, अध्ययनं वेदस्य, अनयोरपि निषेवेतेत्यनेन सम्बन्धः। एवमिति उक्तत्रितयसेवया, समश्नुते प्राप्नोति ॥१०४॥

तत्र श्लोकाः—

मात्रा द्रव्याणि मात्रां च संश्रित्य गुरुलाघवम् ।
द्रव्याणां गर्हितोऽभ्यासो येषां, येषां च शस्यते ॥१०५॥

अञ्जनं धूमवर्तिश्च त्रिविधा वर्तिकल्पना ।
धूमपानगुणाः कालाः पानमानं च यस्य यत् ॥१०६॥

व्यापत्तिचिह्नं भैषज्यं धूमो येषां विगर्हितः।
पेयो यथा यन्मयं च नेत्रं यस्य च यद्विधम् ॥१०७॥

नस्यकर्मगुणा नस्तःकार्यं यच्च यथा यदा ।
भक्षयेद्दन्तपवनं यथा यद्यद्गुणं च यत् ॥१०८॥

यदर्थं यानि चास्येन धार्याणि कवलग्रहे ।
तैलस्य ये गुणा दिष्टाः शिरस्तैलगुणाश्च ये ॥१०९॥

कर्णतैले तथाऽभ्यङ्गे पादाभ्यङ्गेऽङ्गमार्जने ।
स्नाने वाससि शुद्धे च सौगन्ध्ये रत्नधारणे ॥११०॥

शौचे संहरणे लोम्नां पादत्रच्छत्रधारणे ।
गुणा मात्राशितीयेऽस्मिंस्तथोक्ता दण्डधारणे ॥१११॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने मात्राशितीयो नाम पञ्चमोऽध्यायः समाप्तः ॥५॥

मात्रेत्यादिना तु अध्यायार्थसङ्ग्रहः। सर्वत्र उक्ता इति वक्ष्यमाणेनान्वयः। तत्र मात्रोक्ता यावद्ध्यस्याशनमित्यादिना। तथा द्रव्याण्युक्तानि तत्र शालीत्यादिना। तथा मात्रां चाश्रित्य गुरुलाघवमिति प्रकृतिलघून्यपि मात्रामेवापेक्षन्ते इत्यादिना। पानस्य मानं पानमानं तच्च आपानास्त्रिस्त्रयस्त्रय इत्यनेनोक्तम्। नस्तःकार्यं यदिति अणुतैलम्, यथेति पिचुनेत्यादि, यदेति प्रावृट्शरद्वसन्तेष्वित्यादि। शेषं सुबोधम् ॥१०५–१११॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
मात्राशितीयः समाप्तः ॥५॥

षष्ठोऽध्यायः

अथातस्तस्याशितीयमध्यायं व्याख्यास्यामः ॥१॥
इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वाध्याये प्रावृट्शरद्वसन्तेष्वित्यनेन ऋतवो नाममात्रेणोक्ताः **न** तु स्वरूपतः। तेन तत्स्वरूपज्ञानार्थं तथा पूर्वोक्तमात्रावदाहारस्य च स्वास्थ्यहेतुत्वं ऋतुसात्म्यमपेक्ष्य कृतस्याहारस्य स्यादतः ऋतुसात्म्यज्ञानार्थं च तस्याशितीयमभिधत्ते—अथात इत्यादि ॥१॥२॥

तस्याशिताद्यादाहाराद्बलं वर्णश्च वर्धते।
यस्यर्तुसात्म्यं विदितं चेष्टाहारव्यपाश्रयम् ॥३॥

अशिताद्यादिति अशितपीतलीढखादितात् ॥३॥

इह खलु संवत्सरं षडङ्गमृतुविभागेन विद्यात्। तत्रादित्यस्योदगयनमादानं च त्रीनृतूञ्छिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्, वर्षादीन् पुनर्हेमन्तान्तान् दक्षिणायनं विसर्गं च ॥४॥

ऋतुस्वरूपज्ञानं विना (ऋतु)सात्म्यज्ञानं न भवतीति प्रथममृतुस्वरूपमेवाह—इहेत्यादि। इहेति संवत्सरप्रतिपादनप्रस्तावे। ऋतुप्रतिपादनप्रसङ्गे संवत्सरप्रतिपादनं न युक्तमित्यत आह—षडङ्गमिति। षण्णामृतुरूपाणामङ्गानां समाहारः षडङ्गं, बहुव्रीहिर्वा। एतेन षण्णामृतूनां मिलितानां संवत्सरत्वमिति प्राकरणिकत्वं संवत्सरप्रतिपादनस्येति भावः। उदगयनमुत्तरायणं, प्राणिनां बलमादत्त इत्यादानम्। शिशिरादीनित्यत्र षष्ठीतत्पुरुषभ्रमनिरासार्थमाह—ग्रीष्मान्तानिति। एवं हेमन्तान्तानित्यत्रापि व्याख्येयम्। विसृजति ददातीति विसर्गः। ननु विमाने रोगभिषग्जितीये शिशिरं विहाय अन्यथैव ऋतुक्रमो वक्ष्यति अत्र पुनरन्यथेति कोऽभिप्रायः? अत्रोक्तं **जेज्जटेन** देशभेदेन ऋतुक्रमभेदप्रतिपादनमतो न विरोधः, उक्तं हि **काश्यपीये**—"भूयो वर्षति पर्जन्यो गङ्गायाः दक्षिणे जलम्। तत्रैव प्रावृड्वर्षाख्यावृतू तेषां प्रकल्पितौ। तस्या एवोत्तरे देशे हिमवद्विन्ध्यसङ्कुले। भूयः शीतमतस्तेषां हेमन्तशिशिरावृतू ॥" इति। एतच्चान्ये दूषयन्ति—देशभेदेन ऋतुभेदाद् देशभेदप्रयुक्ताहाराचारविशेषमेव गमयति यथा—**मरुदेशे** ग्रीष्मविधिरेव प्रधानतया क्रियते, आनूपे च वसन्तविधिरेव प्रधानतया

क्रियते । यदि तु देशविशेषनियत एव प्रावृडादिः शिशिरादिश्च क्रमः स्यात् तदा सुश्रुते प्रयोजनविशेषोक्त्या तत्कथनमसङ्गतं स्यादिति । तस्मादत्र रसबलोत्पादक्रमप्रतिपादनार्थं शिशिरादिक्रमो दर्शितः, रोगभिषग्जितीये तु दोषचयादिकारकः प्रावृडादिः ऋतुक्रमः संशोधनमधिकृत्योक्त इति न विरोधः । अत एव तदभिप्रायेण परिशेषतन्त्रकारो **दृढबलः** सिद्धिषु वक्ष्यति—"प्रावृट् शुक्रनभौ[1] ज्ञेयौ शरदूर्जसहौ पुनः । तपस्यश्च मधुश्चैव वसन्तः शोधनं प्रति ॥" (सि० ६.५) इति ॥४॥

विसर्गे पुनर्वायवो नातिरूक्षाः प्रवान्ति, इतरे पुनरादाने; सोमश्चाव्याहतबलः शिशिराभिर्भाभिरापूरयञ्जगदाप्याययति शश्वत्, अतो विसर्गः सौम्यः । आदानं पुनराग्नेयं; तावेतावर्कवायू सोमश्च कालस्वभावमार्गपरिगृहीताः कालर्तुरसदोषदेहबलनिर्वृत्तिप्रत्ययभूताः समुपदिश्यन्ते ॥५॥

यद्यप्यादानमुत्तरायणरूपत्वेन प्रशस्तत्वादग्रे उद्दिष्टं तथाऽपि विसर्गस्यापि बलजनकत्वेन श्रेष्ठत्वात्तद्गुणमेव प्रथमं दर्शयन्नाह—विसर्गे पुनरित्यादि । इतरे इति रूक्षा इत्यर्थः । सोमश्चाव्याहतबल इति विसर्गकालस्य सोमानुगुणत्वात् । शश्वदिति छेदः । सौम्य इति सोमगुणप्रधानः । आग्नेयमग्निगुणप्रधानम् । इदानीमर्कवायुसोमानां संवत्सरादिरूपकालव्यवस्थापकत्वं रसादिहेतुत्वं चोपपादयति । तावेतावित्यादि । कालस्वभावः कालस्य शीतदिगुणता । मार्गो दक्षिण उत्तरश्च, एते च कालस्वभावमार्गपरिग्रहाय यथासंभवं बोध्याः । तेन मार्गपरिग्रहोऽर्कस्यैव, कालस्वभावसम्बन्धस्तु त्रयाणामेव; तथा च मार्गविशेषसम्बन्धादर्कस्यायनसंवत्सरादिरूपकालव्यवस्थाहेतुत्वं कालस्वभावसम्बन्धात्तु त्रयाणामेव रसादिहेतुत्वमित्यर्थः । 'कालर्तु' इत्यत्र कालशब्दो गोबलीवर्दन्यायेन ऋतुव्यतिरिक्तसंवत्सरादिकालं समभिधत्ते, अन्ये तु योषिदार्तवव्यच्छेदाय कालेति धातुविशेषणमाहुः । देहस्य बलं देहबलम् । प्रत्ययभूता इति हेतुभूताः । अर्कवायू इति समासकरणात् मिलितयोर्वाय्वर्कयोरादानं प्रति कारणत्वं, सोमस्य तु पृथगेव विसर्गकारणत्वम् (अथ ग्रन्थत्रुटिरस्ति) ॥५॥

तत्र रविर्भाभिराददानो जगतः स्नेहं वायवस्तीव्ररूक्षाश्चोपशोषयन्तः शिशिरवसन्तग्रीष्मेषु यथाक्रमं रौक्ष्यमुत्पादयन्तो रूक्षान् रसांस्तिक्तकषायकटुकांश्चाभिवर्धयन्तो नृणां दौर्बल्यमावहन्ति ॥६॥

---

१. शुचि (च० नि०)

वर्षाशरद्धेमन्तेषु तु दक्षिणाभिमुखेऽर्के कालमार्गमेघवातवर्षाभिहतप्रतापे, शशिनि चाव्याहतबले, माहेन्द्रसलिलप्रशान्तसन्तापे जगति, अरूक्षा रसाः प्रवर्धन्तेऽम्ललवणमधुरा यथाक्रमं तत्र बलमुपचीयते नृणामिति ॥ ७ ॥

भवति चात्र—

आदावन्ते च दौर्बल्यं विसर्गादानयोर्नृणाम् ।
मध्ये मध्यबलं, त्वन्ते श्रेष्ठमग्रे च निर्दिशेत् ॥ ८ ॥

शीते शीतानिलस्पर्शसंरुद्धो बलिनां बली ।
पक्ता भवति हेमन्ते मात्राद्रव्यगुरुक्षमः ॥ ९ ॥

स यदा नेन्धनं युक्तं लभते देहजं तदा ।
रसं हिनस्त्यतो वायुः शीतः शीते प्रकुप्यति ॥१०॥

तस्मात्तुषारसमये स्निग्धाम्ललवणान् रसान् ।
औदकानूपमांसानां मेद्यानामुपयोजयेत् ॥११॥

बिलेशयानां मांसानि प्रसहानां भृतानि च ।
भक्षयेन्मदिरां सीधुं मधु चानुपिबेन्नरः ॥१२॥

गोरसानिक्षुविकृतीर्वसां तैलं नवौदनम् ।
हेमन्तेऽभ्यस्यतस्तोयमुष्णं चायुर्न हीयते ॥१३॥

अभ्यङ्गोत्सादनं मूर्ध्नि तैलं जेन्ताकमातपम् ।
भजेद्भूमिगृहं चोष्णमुष्णं गर्भगृहं तथा ॥१४॥

शीतेषु संवृतं सेव्यं यानं शयनमासनम् ।
प्रावाराजिनकौषेयप्रवेणीकुथकास्तृतम् ॥१५॥

गुरूष्णवासा दिग्धाङ्गो गुरुणाऽगुरुणा सदा ।
शयने प्रमदां पीनां विशालोपचितस्तनीम् ॥१६॥

आलिङ्ग्यागुरुदिग्धाङ्गीं सुप्यात् समदमन्मथः ।
प्रकामं च निषेवेत मैथुनं शिशिरागमे ॥१७॥

वर्जयेदन्नपानानि वातलानि लघूनि च ।
प्रवातं प्रमिताहारमुदमन्थं हिमागमे ॥१८॥

हेमन्तशिशिरौ तुल्यौ शिशिरेऽल्पं विशेषणम् ।
रौक्ष्यमादानजं शीतं मेघमारुतवर्षजम् ॥१९॥

तस्माद्धैमन्तिकः सर्वः शिशिरे विधिरिष्यते ।
निवातमुष्णं त्वधिकं शिशिरे गृहमाश्रयेत् ॥२०॥

कटुतिक्तकषायाणि वातलानि लघूनि च ।
वर्जयेदन्नपानानि शिशिरे शीतलानि च ॥२१॥

वसन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः ।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून् ॥२२॥

तस्माद्वसन्ते कर्माणि वमनादीनि कारयेत् ।
गुर्वम्लस्निग्धमधुरं दिवास्वप्नं च वर्जयेत् ॥२३॥

व्यायामोद्वर्तनं धूमं कवलग्रहमञ्जनम् ।
सुखाम्बुना शौचविधिं शीलयेत् कुसुमागमे ॥२४॥

चन्दनागुरुदिग्धाङ्गो यवगोधूमभोजनः ।
शारभं शाशमैणेयं मांसं लावकपिञ्जलम् ॥२५॥

भक्षयेन्निर्गदं सीधुं पिबेन्माध्वीकमेव वा ।
वसन्तेऽनुभवेत् स्त्रीणां काननानां च यौवनम् ॥२६॥

मयूखैर्जगतः स्नेहं ग्रीष्मे पेपीयते रविः ।
स्वादु शीतं द्रवं स्निग्धमन्नपानं तदा हितम् ॥२७॥

शीतं सशर्करं मन्थं जाङ्गलान्मृगपक्षिणः ।
घृतं पयः सशाल्यन्नं भजन् ग्रीष्मे न सीदति ॥२८॥

मद्यमल्पं न वा पेयमथवा सुबहूदकम् ।
लवणाम्लकटूष्णानि व्यायामं च विवर्जयेत् ॥२९॥

दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतले ।
भजेच्चन्दनदिग्धाङ्गः प्रवाते हर्म्यमस्तके ॥३०॥

व्यजनैः पाणिसंस्पर्शैश्चन्दनोदकशीतलैः ।
सेव्यमानो भजेदास्यां मुक्तामणिविभूषितः ॥३१॥

काननानि च शीतानि जलानि कुसुमानि च ।
ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः ॥३२॥

आदानदुर्बले देहे पक्ता भवति दुर्बलः ।
स वर्षास्वनिलादीनां दूषणैर्बाध्यते पुनः ॥३३॥

भूबाष्पान्मेघनिस्यन्दात् पाकादम्लाज्जलस्य च ।
वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादयः ॥३४॥

तस्मात् साधारणः सर्वो विधिर्वर्षासु शस्यते ।
उदमन्थं दिवास्वप्नमवश्यायं नदीजलम् ॥३५॥

व्यायाममातपं चैव व्यवायं चात्र वर्जयेत् ।
पानभोजनसंस्कारान् प्रायः क्षौद्रान्वितान् भजेत् ॥३६॥

व्यक्ताम्ललवणस्नेहं वातवर्षाकुलेऽहनि ।
विशेषशीते भोक्तव्यं वर्षास्वनिलशान्तये ॥३७॥

अग्निसंरक्षणवता यवगोधूमशालयः ।
पुराणा जाङ्गलैर्मांसैर्भोज्या यूषैश्च संस्कृतैः ॥३८॥

पिबेत् क्षौद्रान्वितं चाल्पं माध्वीकारिष्टमम्बु वा ।
माहेन्द्रं तप्तशीतं वा कौपं सारसमेव वा ॥३९॥

प्रघर्षोद्वर्तनस्नानगन्धमाल्यपरो भवेत् ।
लघुशुद्धाम्बरः स्थानं भजेदक्लेदि वार्षिकम् ॥४०॥

वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः ।
तप्तानामाचितं पित्तं प्रायः शरदि कुप्यति ॥४१॥

तत्रान्नपानं मधुरं लघु शीतं सतिक्तकम् ।
पित्तप्रशमनं सेव्यं मात्रया सुप्रकाङ्क्षितैः ॥४२॥

लावान् कपिञ्जलानेणानुरभ्राञ्छरभान् शशान् ।
शालीन् सयवगोधूमान् सेव्यानाहुर्घनात्यये ॥४३॥

तिक्तस्य सर्पिषः पानं विरेको रक्तमोक्षणम् ।
धाराधरात्यये कार्यमातपस्य च वर्जनम् ॥४४॥

वसां तैलमवश्यायमौदकानूपमामिषम् ।
क्षारं दधि दिवास्वप्नं प्राग्वातं चात्र वर्जयेत् ॥४५॥

दिवा सूर्यांशुसंतप्तं निशि चन्द्रांशुशीतलम् ।
कालेन पक्वं निर्दोषमगस्त्येनाविषीकृतम् ॥४६॥

हंसोदकमिति ख्यातं शारदं विमलं शुचि ।
स्नानपानावगाहेषु हितमम्बु यथाऽमृतम् ॥४७॥

शारदानि च माल्यानि वासांसि विमलानि च ।
शरत्काले प्रशस्यन्ते प्रदोषे चेन्दुरश्मयः ॥४८॥

·······वर्जनीयमाह—वसां तैलमित्यादि । शरत्काले सम्मततया इहैव हंसोदकमाह—दिवेत्यादि । सकलरात्रिदिनव्याप्त्यर्थमर्थलभ्यमपि दिवा निशीत्युक्तम् । चन्द्रांशुग्रहणेन निशि सौम्यांशसम्बन्धमात्रं लक्ष्यते अन्यथा पौर्णमास्यामेव परं सर्वनिशां व्याप्य चन्द्रांशुयोगनयादिति । कालेन शरत्कालस्वभावेन । पक्वं पैच्छिल्यादिदोषरहितम्, अत एव निर्दोषं दोषाजनकम् । हंसशब्देन सूर्याचन्द्रमसावभिधीयेते, ताभ्यां शोधितमुदकं हंसोदकम् ॥४५–४८॥

इत्युक्तमृतुसात्म्यं यच्चेष्टाहारव्यपाश्रयम् ।
उपशेते यदौचित्यादोकसात्म्यं तदुच्यते ॥४९॥

उपसंहरति—इत्युक्तमित्यादि । अयमितिशब्दोऽधिकारे इति **भट्टारः** । ऋतुसात्म्यप्रसङ्गेनाभ्याससात्म्यमप्याह—उपशेत इत्यादि । उपशेते सुखयति, अपथ्यमपि सद्विकारं न जनयति निर्गत इत्याह—औचित्यादनुगतत्वादित्यर्थः, यथाशीविषस्य विषम् । ओकोऽभ्यासः, तेन सात्म्यमोकसात्म्यम् ॥४९॥

देशानामामयानां च विपरीतगुणं गुणैः ।
सात्म्यमिच्छन्ति सात्म्यज्ञाश्चेष्टितं चाद्यमेव च ॥५०॥

देशसात्म्यं रोगसात्म्यं च दर्शयति—देशानामित्यादि । देशानामनूपादीनां, गुणैः स्नेहगौरवादिभिः सह विपरीतगुणं स्नेहगौरवविपरीतरौक्ष्यलाघवयुक्तं खगजाङ्गलमांसमध्वादि; अदनीयमाद्यम् । विकारेऽपतर्पणमित्यादि रोगसात्म्यमित्यर्थः । अत्रामयशब्देन आमयहेतुरप्युच्यते यथा धर्मशब्देन धर्महेतुर्यागादिरिति, तेन हेतुविपरीतस्यापि सात्म्यस्य ग्रहणम् । ननु·······मतीसारे·······मेवादि तदर्थकारि सात्म्यं कथमत्र नोक्तं ? उच्यते, सर्वत्रासम्भवात्, न तु निखिलं तदर्थकारि सम्भवति ततो बाहुल्यादत्र हेतुविपरीतमेवोक्तमिति **भट्टारः** । **चक्रस्तु** गुणशब्दोऽत्र धर्ममात्रवाची, तेन विपरीतप्रभावाणामपि ग्रहणम् । ततश्च प्रभाववैपरीत्यात् तद्विपरीतार्थकारिणां च ग्रहणमुपपन्नमित्याह–आद्यग्रहणाच्चौषधान्नयोर्ग्रहणम् । आद्यमिति अद् धातोः ऋहलोर्ण्यत् ॥५०॥

तत्र श्लोकः—

ऋतावृतौ नृभिः सेव्यमसेव्यं यच्च किंचन ।
तस्याशितीये निर्दिष्टं हेतुमत् सात्म्यमेव च ॥५१॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
तस्याशितीयो नाम षष्ठोऽध्यायः ॥६॥

अध्यायार्थसङ्ग्रहमाह—ऋताविव्यादि। हेतुमदिति उपपत्तिमत्, औचित्यादिहेतुनिर्देशोपपन्नमित्यर्थः ॥५१॥

इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
तस्याशितीयः समाप्तः ॥६॥

सप्तमोऽध्यायः

अथातो नवेगान्धारणीयमध्यायं व्याख्यास्यामः ॥ १ ॥

इति ह स्माह भगवानात्रेयः ॥ २ ॥

द्विविधं स्वास्थ्यकरणं— हितोपादानमहितपरिहारश्चेति । तत्राद्यमेव पूर्वाध्यायाभ्यां प्रपञ्चेनाभिहितं द्वितीयन्तु लेशत एव, अतस्तदपि प्रपञ्चेनाभिधेयम् । तत्रापि वेगविधारणं सकलरोगहेतुत्वेन बलवदेनःकारणं, तदुक्तं–"रोगाः सर्वेऽपि जायन्ते वेगोदीरणधारणैः ।" (अ० हृ० सू० ४.२२) इति; तेन तत् (अथ ग्रन्थत्रुटिरस्ति) ॥१-२॥

न वेगान् धारयेद्धीमाञ्जातान् मूत्रपुरीषयोः ।
न रेतसो न वातस्य न छर्द्याः क्षवथोर्न च ॥ ३ ॥

नोद्गारस्य न जृम्भाया न वेगान् क्षुत्पिपासयोः ।
न बाष्पस्य न निद्राया निःश्वासस्य श्रमेण च ॥ ४ ॥

एतान् धारयतो जातान् वेगान् रोगा भवन्ति ये ।
पृथक्पृथक् चिकित्सार्थं तान्मे निगदतः शृणु ॥ ५ ॥

बस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा ।
विनामो वंक्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे ॥ ६ ॥

स्वेदावगाहनाभ्यङ्गान् सर्पिषश्चावपीडकम् ।
मूत्रे प्रतिहते कुर्यात्त्रिविधं बस्तिकर्म च ॥ ७ ॥

पक्वाशयशिरःशूलं वातवर्चोऽप्रवर्तनम् ।
पिण्डिकोद्वेष्टनाध्मानं पुरीषे स्याद्विधारिते ॥ ८ ॥

स्वेदाभ्यङ्गावगाहाश्च वर्तयो बस्तिकर्म च ।
हितं प्रतिहते वर्चस्यन्नपानं प्रमाथि च ॥ ९ ॥

मेढ्रे वृषणयोः शूलमङ्गमर्दो हृदि व्यथा ।
भवेत् प्रतिहते शुक्रे विबद्धं मूत्रमेव च ॥१०॥

तत्राभ्यङ्गोऽवगाहश्च मदिरा चरणायुधाः ।
शालिः पयो निरूहश्च शस्तं मैथुनमेव च ॥११॥

सङ्गो विण्मूत्रवातानामाध्मानं वेदना क्लमः।
जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात् ॥१२॥

स्नेहस्वेदविधिस्तत्र वर्तयो भोजनानि च।
पानानि बस्तयश्चैव शस्तं वातानुलोमनम् ॥१३॥

कण्डूकोठारुचिव्यङ्गशोथपाण्ड्वामयज्वराः ।
कुष्ठहृल्लासवीसर्पाश्छर्दिनिग्रहजा गदाः ॥१४॥

भुक्त्वा प्रच्छर्दनं धूमो लङ्घनं रक्तमोक्षणम्।
रूक्षान्नपानं व्यायामो विरेकश्चात्र शस्यते ॥१५॥

मन्यास्तम्भः शिरःशूलमर्दितार्धावभेदकौ ।
इन्द्रियाणां च दौर्बल्यं क्षवथोः स्याद्विधारणात् ॥१६॥

तत्रोर्ध्वजत्रुकेऽभ्यङ्गः स्वेदो धूमः सनावनः।
हितं वातघ्नमाद्यं च घृतं चौत्तरभक्तिकम् ॥१७॥

हिक्का श्वासोऽरुचिः कम्पो विबन्धो हृदयोरसोः।
उद्गारनिग्रहात्तत्र हिक्कायास्तुल्यमौषधम् ॥१८॥

विनामाक्षेपसंकोचाः सुप्तिः कम्पः प्रवेपनम्।
जृम्भाया निग्रहात्तत्र सर्वं वातघ्नमौषधम् ॥१९॥

कार्श्यदौर्बल्यवैवर्ण्यमङ्गमर्दोऽरुचिर्भ्रमः ।
क्षुद्वेगनिग्रहात्तत्र स्निग्धोष्णं लघु भोजनम् ॥२०॥

कण्ठास्यशोषो बाधिर्यं श्रमः सादो हृदि व्यथा।
पिपासानिग्रहात्तत्र शीतं तर्पणमिष्यते ॥२१॥

प्रतिश्यायोऽक्षिरोगश्च हृद्रोगश्चारुचिर्भ्रमः।
बाष्पनिग्रहणात्तत्र स्वप्नो मद्यं प्रियाः कथाः ॥२२॥

जृम्भाऽङ्गमर्दस्तन्द्रा च शिरोरोगोऽक्षिगौरवम्।
निद्राविधारणात्तत्र स्वप्नः संवाहनानि च ॥२३॥

गुल्महृद्रोगसंमोहाः श्रमनिःश्वासधारणात्।
जायन्ते तत्र विश्रामो वातघ्न्यश्च क्रिया हिताः ॥२४॥

वेगनिग्रहजा रोगा य एते परिकीर्तिताः।
इच्छंस्तेषामनुत्पत्तिं वेगानेतान्न धारयेत् ॥२५॥

इमांस्तु धारयेद्वेगान् हितार्थी प्रेत्य चेह च ।
साहसानामशस्तानां मनोवाक्कायकर्मणाम् ।।२६।।

लोभशोकभयक्रोधमानवेगान् विधारयेत् ।
नैर्लज्ज्येर्ष्यातिरागाणामभिध्यायाश्च बुद्धिमान् ।।२७।।

परुषस्यातिमात्रस्य सूचकस्यानृतस्य च ।
वाक्यस्याकालयुक्तस्य धारयेद्वेगमुत्थितम् ।।२८।।

देहप्रवृत्तिर्या काचिद्विद्यते परपीडया ।
स्त्रीभोगस्तेयहिंसाद्या तस्या वेगान्विधारयेत् ।।२९।।

पुण्यशब्दो विपापत्वान्मनोवाक्कायकर्मणाम् ।
धर्मार्थकामान् पुरुषः सुखी भुङ्क्ते चिनोति च ।।३०।।

शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्धिनी ।
देहव्यायामसंख्याता मात्रया तां समाचरेत् ।।३१।।

लाघवं कर्मसामर्थ्यं स्थैर्यं दुःखसहिष्णुता ।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते ।।३२।।

श्रमः क्लमः क्षयस्तृष्णा रक्तपित्तं प्रतामकः ।
अतिव्यायामतः कासो ज्वरश्छर्दिश्च जायते ।।३३।।

(स्वेदागमः श्वासवृद्धिर्गात्राणां लाघवं तथा ।
हृदयाद्युपरोधश्च इति व्यायामलक्षणम् ।। १ ।।)

व्यायामहास्यभाष्याध्वग्राम्यधर्मप्रजागरान् ।
नोचितानपि सेवेत बुद्धिमानतिमात्रया ।।३४।।

एतानेवंविधांश्चान्यान् योऽतिमात्रं निषेवते ।
गजं सिंह इवाकर्षन् सहसा स विनश्यति ।।३५।।

(अतिव्यवायभाराध्वकर्मभिश्चातिकर्शिताः ।
क्रोधशोकभयायासैः क्रान्ता ये चापि मानवाः ।। १ ।।

बालवृद्धप्रवाताश्च ये चोच्चैर्बहुभाषकाः ।
ते वर्जयेयुर्व्यायामं क्षुधितास्तृषिताश्च ये ।। २ ।।)

उचितादहिताद्धीमान् क्रमशो विरमेन्नरः ।
हितं क्रमेण सेवेत क्रमश्चात्रोपदिश्यते ।।३६।।

प्रक्षेपापचये ताभ्यां क्रमः पादांशिको भवेत्।
एकान्तरं ततश्चोर्ध्वं द्व्यन्तरं त्र्यन्तरं तथा ॥३७॥

……दि। प्रक्षेपो हितस्य, अपचयो ह्रासोऽहितस्य, ताभ्यां हिताहिताभ्याम्। पादांशिकश्चतुर्थभागेन कृतः क्रमो भवति। एकान्तरमिति एकदिनावधि यथा स्यात्, अन्तरशब्दोऽवधिवचनः। एवं द्व्यन्तरं त्र्यन्तरमित्यत्रापि ज्ञेयम्। तदयं पिण्डार्थः—प्रथमदिवसे अपथ्यपादत्रयं पथ्यस्यैकः पादः एवं पथ्यैकपादाभ्यास एकदिनावधिः भवति, द्वितीये द्वौ पथ्यस्य द्वावपथ्यस्य, एवं तृतीये, एवं द्वितीयपादाभ्यासो द्व्यन्तरो भवति, चतुर्थे त्रयः पादाः पथ्यस्य एकोऽपथ्यस्य, एवं पञ्चमे षष्ठे च, एवं तृतीयपादाभ्यासस्त्र्यन्तरो भवति; सप्तमदिनमारभ्य चतुष्पादपथ्याभ्यासोऽनवधिरिति। अन्ये तु "पादेनापथ्यमभ्यस्तं पादपादेन वा त्यजेत्। निषेवेत हितं तद्वदेकद्वित्र्यन्तरीकृतम् ॥" (अ० हृ० सू० ७.४८) इति **वाग्भटेन** सहैकवाक्यतानुरोधादन्यथा व्याचक्षते—पादांशिक इति पादिक आंशिकश्चेत्यर्थः, अंशश्च पादस्यैव चतुर्थोभागः, तेनात्यन्तसात्म्यं यत्रापथ्यं भवति तत्र चतुर्थांशेनापि प्रक्षेपापचयक्रमः कार्य इति दर्शयति। तत्र प्रथमदिने षोडशोंऽशः पथ्यस्य अपथ्यस्य तु पञ्चदश भागाः; षोडशश्चेति भागत्रयं पथ्यस्य अपथ्यस्य तु त्रयोदश भागाः। एवं पञ्चमे षष्ठे च, एवञ्च त्र्यन्तरत्वमेषां तथाशब्दबलाच्च चतुःपञ्चान्तरता चास्मिन् पक्षे वोध्या यावत् सम्पूर्णचतुष्पादपथ्याभ्यासः पूर्यते; अन्ये तु अन्तरशब्दस्य व्यवधानवचनत्वमभिधायान्यथैव व्याख्यानयन्ति तत्तु विस्तरभयान्न लिखितम् ॥३६—३७॥

क्रमेणापचिता दोषाः क्रमेणोपचिता गुणाः।
सन्तो यान्त्यपुनर्भावमप्रकम्प्या भवन्ति च ॥३८॥

एतादृशक्रमविधानस्य फलमाह—क्रमेणेत्यादि। दोषाः क्रमेणापचिताः सन्तोऽपुनर्भावं यान्ति गुणाश्च क्रमेणोपचिताः सन्तोऽप्रकम्प्याः भवन्तोति योजना ॥ ३८ ॥

समपित्तानिलकफाः केचिद्गर्भादि मानवाः।
दृश्यन्ते वातलाः केचित्पित्तलाः श्लेष्मलास्तथा ॥३९॥

तेषामनातुराः पूर्वे वातलाद्याः सदातुराः।
दोषानुशयिता ह्येषां देहप्रकृतिरुच्यते ॥४०॥

अथ हेयोपादयत्वेनोक्तयोरपथ्यपथ्ययोः प्रकृतिभेदेन नानात्वं दृश्यते अतस्तत्प्रतिपादनार्थं प्रकृतिभेदमेव तावदाह—समपित्तेत्यादि। 'गर्भादि गर्भाधानादि यथा स्यात्' इदं सर्वत्र योज्यम्। वातला इति वातप्रधाना इत्यर्थः, एवं पित्तलाः श्लेष्मला इति ज्ञेयम्। तथाशब्देन द्वन्द्वजास्तिस्रः प्रकृतयोऽपि ज्ञेयाः। तेन यथा एकदोषजास्तिस्रः प्रकृतयस्तथा द्वन्द्वजा अपि तिस्रः प्रकृतयो भवन्तोति व्याख्येयम्। अत एव रोगभिषग्जितीये विमाने द्वन्द्वजास्तिस्रः प्रकृतयः कण्ठरवेणैव वक्ष्यन्ते। तेषामिति समदोषप्रकृत्यादीनां मध्ये पूर्व इति समप्रकृतयः। सदातुरत्वे हेतुमाह—दोषानुशयितेत्यादि। दोषशब्देन दूषणाख्यां क्रियां सूचयता उल्वणो दोषोऽभिधीयते। अनुशयिता अनुबन्धित्वं "भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः" इति **मेदिनिः**। तेन यस्मादुल्वणैर्दोषैर्देहानुबन्धो वातलादीनां अतस्ते सदातुराः सततं स्फुटिताङ्गत्वविषमाग्नित्वादिविकारयुक्ता इत्यर्थः। किंवा स्वस्थत्वेन व्यवह्रियमाणा अप्येते कस्माद्रोगिण इत्याह—दोषानुशयितेत्यादि। अनुशयिता सात्म्यत्वं विकाराजनकत्वमिति यावत्; तेन प्रवृद्धत्वे दुष्टिजननयोग्यानामपि वातादीनां तथाविधविकाराजनकत्वं देहप्रकृतिः। एतेनैषां प्रकृत्यारम्भकदोषाणां मुख्यं स्वास्थ्यं नास्ति, किं तर्हि उल्वणदोषान्तरवत् अतिशयितबाधाजनकत्वाभावात् सुस्था इति व्यपदिश्यन्त इति भावः; तदुक्तं **सुश्रुते**—"विषजातो यथा कीटो विषेण न विपद्यते। तद्वत्प्रकृतिभिर्देहस्तज्जातत्वान्न बाध्यते॥" (सु० शा० ४.७९) इति न बाध्यते नातिबाध्यत इत्यर्थः। एते च प्रकृत्यारम्भकदोषा यावज्जीवनपरावृत्तस्वभावा एव रिष्टं विना, तदुक्तं **सुश्रुते**—"प्रकोपो वाऽन्यथाभावो क्षयो वा नोपजायते। प्रकृतीनां स्वभावेन जायतेऽतिगतायुषि[1]॥" (सु० शा० ४.७८) इति। ननु यद्येवं तर्हि समप्रकृतेर्वातप्रकृतेर्वा आक्षेपकादिवातविकारे वातस्य प्रकृतिभूतस्याधिक्यं दृश्यते तथा वातप्रकृतेः पित्तविकारोत्पत्तौ वातप्रकृतेरन्यथाभावः पित्तप्रकृतित्वं दृश्यते तथा समप्रकृतेर्वा आक्षेपकादिर्यदाऽन्यतरदोषक्षयो भवति तदा प्राकृतस्वकर्महानिलक्षणप्रकृतिभूतदोषस्यापि क्षयो दृश्यते; यदुक्तं दोषक्षयलक्षणे—"कर्मणः प्राकृताद्धानिर्वृद्धिर्वाऽपि विरोधिनाम्।" (सू० १८.५२) इति। अत्र वदन्ति—प्रकृतिसमानदोषेण रोगोत्पत्तौ न प्रकृतिभूतदोषस्य वृद्धिः, किन्तु हेत्वन्तरजनितस्य वातादेस्तत्र विकारत्वं, प्रकृतिभूतदोषस्य पुनस्तत्र सहकारितामात्रं; यदुक्तं—

१. तु गतायुषः (सु. नि.)

"कालदूष्यप्रकृतिभिर्दोषस्तुल्यो हि सन्ततम्। निष्प्रत्यनीकः कुरुते तस्माज्ज्ञेयः सुदुःसहः ॥" (चि० ३.५५-५६) इति; तथा वातप्रकृतेः पित्तविकारोत्पत्तौ वातः प्रकृतिभूतस्तथैव करचरणस्फुटनादिकं कुर्वन्नास्ते न तस्यागन्तुना पित्तविकारेण किंचित् क्रियते तथा समप्रकृतौ यत् प्राकृतस्य कर्मणो हानिरूपं दोषक्षयलक्षणं दृश्यते तन्न प्रकृतिभूतदोषस्य किं तर्हि कारणान्तरजनितदोषस्यैवेति। ननु यदि प्रकृति(भूत)दोषस्य न वृद्धिर्नापि हानिस्तर्हि प्रकृतिभूतदोषचिकित्सितं वक्ष्यमाणं विफलमेव जातं यतश्चिकित्सितस्य प्रयोजनत्रयं—वृद्धस्य ह्रासः, क्षीणस्य च वृद्धिः, समस्य च प्रतिपालनमिति; एतत्त्रितयमपि प्रकृतौ नास्ति वृद्धिह्रासयोरसम्भवात्, नैवं, प्रकृतिभूतदोषसहकारेण आशयस्थानामप्रकृतिभूतदोषाणां प्रकोपो मा भूदित्येतदर्थं चिकित्सितस्य सफलत्वात्। अन्ये तु "प्रकोपो वाऽन्यथाभाव" इत्यादि**सुश्रुत**वचनस्यार्थान्तरं परिकल्प्य समादधते—यथा प्रकृतीनां क्षयो वा प्रकोपो वा उपजायते न पुनरन्यथाभावः समप्रकृतेर्वातप्रकृतित्वं वातप्रकृतेर्वा समप्रकृतित्वं पित्तप्रकृतित्वं चेत्यादिरूपः तेन क्षयवृद्धी प्रकृतीनामपि सम्भवत एव, केवलमन्यथाभाव एव रिष्टं विना न सम्भवतीति। अन्ये त्वाहुः—प्रकृतेः प्रकोपान्यथाभावक्षया न भवन्तीति प्रकृतित्वेनेति ब्रूमः, तेन समप्रकृतिर्वातप्रकृतिर्न स्यात्, वातप्रकृतिः पित्तप्रकृतिर्न स्यात् समप्रकृतिर्वा; विकारावस्था तु हीनाधिकवातत्वादिलक्षणा भवतीत्यर्थः। ननु दुष्टेन बीजेन प्रकृतिर्जन्यते, अनिलादिदुष्टं च बीजं गर्भजननासमर्थमिति शुक्रशोणितशुद्धावुक्तं **सुश्रुतेन** तत्कथं वातादिप्रकृतय इत्याह दुष्टबीजस्य गर्भाजनकत्वात्? उच्यते, यत्र सर्वमेव बीजं दूषितं भवति तत्रैव गर्भोपघातः, यदि बीजावयवदुष्टौ सत्यामपि गर्भप्रतिबन्धः स्यात् तदाऽन्धबधिरादेरप्यनुत्पादः स्यात्, तेन यथा दुष्ट्यारम्भकबीजभागे दुष्टे दुष्टेरेवाभावो न तु गर्भस्य, तथा समधातुप्रकृत्यारम्भकदोषाख्यबीजभागदुष्टे समधातुत्वस्यैवाभावो न तु गर्भस्येति ज्ञेयम् ॥ ३९-४० ॥

विपरीतगुणस्तेषां स्वस्थवृत्तेर्विधिर्हितः।
समसर्वरसं सात्म्यं समधातोः प्रशस्यते ॥४१॥

वातलादिषु यद्विधेयं तदाह—विपरीतगुण इत्यादि। तेषां वातलादीनाम्। विपरीतगुणो वातादिगतरौक्ष्यादिविपरीतस्नेहादिधर्मप्रयुक्त इत्यर्थः। समसर्वरसमिति समा अनुरूपा सर्वे रसा यत्र तत्तथा न तु समा-

स्तुल्याः, न हि स्वस्थभोजने यावन्मधुर उपयुज्यते तावन्मानाः कट्वादय इति ॥४१॥

द्वे अधः सप्त शिरसि खानि स्वेदवहानि च ।
मलायनानि बाध्यन्ते दुष्टैर्मात्राधिकैर्मलैः ॥४२॥

मलवृद्धिं गुरुतया लाघवान्मलसंक्षयम् ।
मलायनानां बुध्येत सङ्गोत्सर्गादतीव च ॥४३॥

इदानीं स्वास्थ्योत्पत्तिहेतुमभिधाय स्वास्थ्यप्रतिबन्धकदोषसंचयनिर्हरणमभिधातुं दोषसंचयस्य लक्षणान्येव तावद्वक्तुमाह--द्वे अध इत्यादि । द्वे अध इति गुदलिङ्गे । सप्त शिरसीति कर्णौ, नासापुटौ, नेत्रे, मुखञ्चेति; स्वेदवहानि खानि लोमकूपाः[1]; एतानि सर्वाणि मलस्यायनानि मार्गाः । दुष्टैरिति गोबलीवर्दन्यायेन क्षीणैः, मात्राधिकैरिति वृद्धैः । मलक्षयमलवृद्ध्योर्लक्षणमाह—मलवृद्धिमित्यादि । मलायनानां गुरुतया मलवृद्धिं, तेषामेव लाघवान्मलक्षयं बुध्येत तथा मलानां संसर्गादप्रवृत्तेर्मलक्षयं तथा मलानामतीसारो[2]त्सर्गान्मलवृद्धिं च जानीयादित्यर्थः ॥४२-४३॥

तान् दोषलिङ्गैरादिश्य व्याधीन् साध्यानुपाचरेत् ।
व्याधिहेतुप्रतिद्वन्द्वैर्मात्राकालौ विचारयन् ॥४४॥

तानिति मलवृद्धिक्षयजान्, आदिश्येति बुद्ध्वा । प्रतिद्वन्द्वैरिति प्रत्यनीकैः, तेन विपरीतार्थकारिणामपि ग्रहणम् ॥४४॥

विषमस्वस्थवृत्तानामेते रोगास्तथाऽपरे ।
जायन्तेऽनातुरस्तस्मात् स्वस्थवृत्तपरो भवेत् ॥४५॥

माधवप्रथमे मासि नभस्यप्रथमे पुनः ।
सहस्यप्रथमे चैव हारयेद्दोषसंचयम् ॥४६॥

स्निग्धस्विन्नशरीराणामूर्ध्वं चाधश्च नित्यशः ।
बस्तिकर्म ततः कुर्यान्नस्यकर्म च बुद्धिमान् ॥४७॥

यथाक्रमं यथायोग्यमत ऊर्ध्वं प्रयोजयेत् ।
रसायनानि सिद्धानि वृष्ययोगांश्च कालवित् ॥४८॥

---

१. स्वेदमुखानीति लोमकूपानि[1]

२. मतीवो[1]

रोगास्तथा न जायन्ते प्रकृतिस्थेषु धातुषु।
धातवश्चाभिवर्धन्ते जरा मान्द्यमुपैति च॥४९॥

विधिरेष विकाराणामनुत्पत्तौ निर्दशितः।
निजानामितरेषां तु पृथगेवोपदेक्ष्यते॥५०॥

विषम(स्वस्थवृत्तानामि)ति वैषम्यमतिक्रमः, अतिक्रान्तस्वस्थवृत्तानामित्यर्थः, जायन्त इति छेदः। अनातु(रस्तस्मादिति य)स्मात् स्वस्थवृत्तातिक्रमेण रोगा जायन्ते, अनातुर इति अनुत्पन्नरोगावस्थायामे(व स्वस्थवृत्तप)रेण भवितव्यं तथा रोगोत्पत्तिरेव न भवतीति भावः। तदेव स्वस्थवृत्तं दर्शयति—(माधवेति)। माधवो वैशाखः, तस्य प्रथमश्चैत्रः, नभस्यो भाद्रः, तस्य प्रथमः श्रावणः तथा स(हस्यः पौषस्तस्य प्रथ)मो मार्गशीर्षः। **हरिचन्द्रस्तु** सहशब्दोऽयं मार्गशीर्षवचनः तस्य प्रथमः कार्तिक इत्यादि व्याख्यातवान्, अतस्तन्मतानुसारिणा **वाग्भटेनाप्युक्तं**— "श्रावणे कार्तिके चैत्रे मासि साधारणे क्रमात्। ग्रीष्मवर्षाहिमचितान् वाय्वादीनाशु निर्हरेत्॥" (अ० हृ० सू० १३. ३३-३४) इति। एतस्मिन्पक्षे वर्षादिसंचितान् दोषान् त्रिमासान्तरितान् हरेदित्यनेन तन्त्रान्तरोक्तेन विरोधो भवति, यतः श्रावणे शोधनं कृत्वा पुनः कार्तिके क्रियमाणं द्विमासान्तरितं स्यात् तथा पुनश्चैत्रे क्रियमाणं चतुर्मासान्तरितं स्यादिति नैवं सर्वर्तुषु समकुपितदोषाभिप्रायेण त्रिमासान्तरितमिति युक्तं; वर्षासु तु दोषप्रकोपस्यातिबलवत्त्वात् द्विमासान्तरमेव दोषहरणमित्यविरोधः, किन्त्वेवमपि शोधनार्थं वक्ष्यमाणऋतुक्रमानुसारेण प्रावृड्वसन्तयोः प्रथमे मासे दोषप्रकोपः प्रकर्षप्राप्तो न भवतीति कृत्वा यथाऽन्तिममासे दोषनिर्हरणमभिहितं तथा शरदोऽप्यन्तिममासे मार्गशीर्ष एव शोधनं युज्यते न कार्तिक इति तस्मात् पूर्वव्याख्यैव युक्ता। अत एवोक्तं **कपिलबलेन**—"मधौ सहे नभसि च मासि दोषान् प्रवाहयेत्। वमनैश्च विरेकैश्च निरुहैः सानुवासनैः॥" इति। **अस्मत्पितृचरणास्तु—हरिचन्द्रवाग्भटकपिलबल**तन्त्रान्तरीयवचनानामविरोधनिमित्तं वाग्भ .... वक्ष्यते वाग्भटे कार्तिकशब्दः सामीप्यान्मार्गशीर्षवचनः उपचाराश्रयणं च कार्तिक .... प्रथमभागग्रहणार्थं अन्यथा मार्गशीर्ष प्रथमभागग्रहणार्थं .... इत्युक्ते मार्गशीर्षस्य मध्ये शेषेऽपि वा प्रोद्भूतशीते शोधनं प्रसज्जेत, तच्च न युक्तं, शीत(भिन्न)स्यैव शोधनविषयत्वादिति। यथायोग्यमिति यद्यस्य युज्यते वमनादि रसायनं च तत् (इ)त्यर्थः।

अत ऊर्ध्वमिति ऊर्ध्वाधःशोधनान्तरं एवं कृते किं स्यादित्याह—रोगास्तथा न जायन्ते इत्यादि। तथेति वमनादिना दोषनिर्हरणात्। धातवश्चाभिवर्धन्ते इति वृष्ययोगादित्यर्थः। जरा मान्द्यमुपैति चेति रसायनयोगादित्यर्थः। विधिरेष इत्यादि। निजानामिति छेदः। इतरेषामिति आगन्तूनां मानसानां च ॥४५-५०॥

ये भूतविषवाय्वग्निसंप्रहारादिसंभवाः।
नृणामागन्तवो रोगाः प्रज्ञा तेष्वपराध्यति ॥५१॥
ईर्ष्याशोकभयक्रोधमानद्वेषादयश्च ये।
मनोविकारास्तेऽप्युक्ताः सर्वे प्रज्ञापराधजाः ॥५२॥

आगन्तूनां स्वरूपमाह—ये भूतेत्यादि। प्रज्ञा तेष्वपराध्यतीति प्रज्ञापराधस्तेषां निदानमित्यर्थः। प्रज्ञापराधोऽज्ञानदुर्ज्ञाने। यद्यपि निजा अपि प्रज्ञापराधमूला एव, यदुक्तं—"प्रज्ञापराधाद्ध्यहितानर्थान् पञ्च निषेवते।" (सू० २८-३९) इति, तथाऽपि ते प्राधान्यात् प्रज्ञापराधजनितरूक्षभोजनादिजन्यत्वेन तथाऽन्तरा वातादिजन्यत्वेन प्रपञ्चेनोच्यन्ते। मानसानामपि प्रज्ञापराधजन्यत्वमाह—ईर्ष्येत्यादि ॥५१-५२॥

त्यागः प्रज्ञापराधानामिन्द्रियोपशमः स्मृतिः।
देशकालात्मविज्ञानं सद्वृत्तस्यानुवर्तनम् ॥५३॥
आगन्तूनामनुत्पत्तावेष मार्गो निदर्शितः।
प्राज्ञः प्रागेव तत् कुर्याद्धितं विद्याद्यदात्मनः ॥५४॥

आगन्तुमानसपरिहारे हेतुमाह—त्याग इत्यादि। इन्द्रियोपशम इति जितेन्द्रियत्वं, स्मृतिः शरीरादीनां विनश्वरस्वभावाद्यनुस्मरणं; यदुक्तम्—"स्मृत्वा स्वभावं भावानां स्मरन् दुःखात् प्रमुच्यते।" (शा० १.१४७) इति; एतच्च द्वयं मानसरोगप्रतिक्षेपकम्। देशेत्यादि(ना) पुनरागन्तुरोगपरिहारकथनं—देशज्ञानात् शून्यगृहाटव्याः तथा उपसर्गगृहीतस्य देशस्य वर्जनं भवति, कालज्ञानात् पौर्णमास्यादिवक्ष्यमाणभूताभिघातकालवर्जनं भवति, आत्मज्ञानाच्च स्वशक्तिपर्यालोचनया बलवत्त्वे ग्रहादिवर्जनं भवतीत्यादि व्याख्येयम्। सद्वृत्तमिन्द्रियोपक्रमणीये वक्ष्यमाणम्। आगन्तूनामित्यत्रागन्तुशब्देन भूतादिजन्यास्तथा मानसाश्चाभिप्रेताः। प्राज्ञ इत्यादि—प्रागेवेति अनुत्पन्नरोगावस्थायामेव ॥५३–५४॥

आप्तोपदेशप्रज्ञानं प्रतिपत्तिश्च कारणम्।
विकाराणामनुत्पत्तावुत्पन्नानां च शान्तये ॥५५॥

अतः किं तद्धितमित्याह—आप्तोपदेश इत्यादि । प्रज्ञानं प्रतिपत्तिरिति प्राज्ञैरुपदिष्टस्यार्थस्य सम्यगधिगमः ॥५५॥

पापवृत्तवचःसत्त्वाः सूचकाः कलहप्रियाः ।
मर्मोपहासिनो लुब्धाः परवृद्धिद्विषः शठाः ॥५६॥

परापवादरतयश्चपला रिपुसेविनः ।
निर्घृणास्त्यक्तधर्माणः परिवर्ज्या नराधमाः ॥५७॥

बुद्धिविद्यावयःशीलधैर्यस्मृतिसमाधिभिः ।
वृद्धोपसेविनो वृद्धाः स्वभावज्ञा गतव्यथाः ॥५८॥

सुमुखाः सर्वभूतानां प्रशान्ताः संशितव्रताः ।
सेव्याः सन्मार्गवक्तारः पुण्यश्रवणदर्शनाः ॥५९॥

आप्तोपदेशग्रहणेनार्थादनाप्तोपदेशस्याग्रहणमुक्तं, तत्र ये अनाप्तास्तानाह—पापवृत्तेत्यादि । वृत्तं चेष्टितं, सत्त्वं मनः, एतेषां पापत्वं पापहेतुत्वात् । सूचकाः पिशुनाः । शठाः क्रूराः । निर्घृणाः निर्दयाः । आप्तानाह—बुद्धीत्यादि । उपलक्षणे तृतीया, किंवा बुद्ध्यादिभिर्वृद्धा इत्यन्वयः, प्रभूतप्रशस्तबुद्ध्यादियुक्ता इत्यर्थः । गतव्यथा गतशोकादयः । सुमुखाः प्रसन्नवदनाः । संशितव्रता इति संशितं तीक्ष्णं व्रतं येषां ते तथा अतिदुष्करव्रतचारिण इत्यर्थः; अन्ये तु शंसितव्रता इति पठित्वा कथितव्रता इति व्याख्यानयन्ति ॥५६-५९॥

आहाराचारचेष्टासु सुखार्थी प्रेत्य चेह च ।
परं प्रयत्नमातिष्ठेद्बुद्धिमान् हितसेवने ॥६०॥

उक्तस्यार्थस्य निगमनेनावश्यकर्त्तव्यतामाह—आहारेत्यादि । यः प्रेत्य परलोकं गत्वा सुखार्थी तथा इह लोके च सुखार्थी सन् आहाराचारचेष्टासु मध्ये यद्धितं तस्य सेवने प्रयत्नमातिष्ठेदित्यन्वयः । आचारः शास्त्रविहितानुष्ठानम् । आहाराचारचेष्टास्वित्यनेन त्रितयमुक्तम् ॥६०॥

न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् ।
नामुद्गयूषं नाक्षौद्रं नोष्णं नामलकैर्विना ॥६१॥

ज्वरासृक्पित्तवीसर्पकुष्ठपाण्ड्वामयभ्रमान् ।
प्राप्नुयात्कामलां चोग्रां विधिं हित्वा दधिप्रियः ॥६२॥

तत्राचारचेष्टे इन्द्रियोपक्रमणीये प्रपञ्चेन वक्तव्ये, परिशिष्टस्याहारस्य दिङ्मात्रोदाहरणार्थं दधिभोजनविधिमाह—न नक्तमित्यादि ॥६१-६२॥

तत्र श्लोकाः—

वेगा वेगसमुत्थाश्च रोगास्तेषां च भेषजम्।
येषां वेगा विधार्याश्च यदर्थं यद्धिताहितम् ॥६३॥

उचिते चाहिते वर्ज्ये सेव्ये चानुचिते क्रमः।
यथाप्रकृति चाहारो मलायनगदौषधम् ॥६४॥

भविष्यतामनुत्पत्तौ रोगाणामौषधं च यत्।
वर्ज्याः सेव्याश्च पुरुषा धीमताऽऽत्मसुखार्थिना ॥६५॥

विधिना दधि सेव्यं च येन यस्मात्तदत्रिजः।
नवेगान्धारणेऽध्याये सर्वमेवावदन्मुनिः ॥६६॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
नवेगान्धारणीयो नाम सप्तमोऽध्यायः ॥७॥

॥ (इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां)
नवेगान्धारणीयः समाप्तः ॥७॥

अष्टमोऽध्यायः

अथात इन्द्रियोपक्रमणीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

स्वस्थचतुष्कपारिशेष्यादिन्द्रियोपक्रमणीयमाह—अथात इत्यादि। इन्द्रियस्योपक्रमणमिन्द्रियव्यापारः, तदधिकृत्य कृतोऽध्याय इत्यर्थः ॥१-२॥

इह खलु पञ्चेन्द्रियाणि, पञ्चेन्द्रियद्रव्याणि, पञ्चेन्द्रियाधिष्ठानानि, पञ्चेन्द्रियार्थाः, पञ्चेन्द्रियबुद्धयो भवन्ति, इत्युक्तमिन्द्रियाधिकारे ॥३॥

तत्र वक्ष्यमाणचेष्टाचारयोः प्रायेणेन्द्रियादिविषयत्वेनेन्द्रियादीन्येव तावदाह—इहेत्यादि। इहेतीह प्रकरणे, तेन प्रकरणान्तरे शारीरे सांख्यमतपरिग्रहादेकादशेन्द्रियाण्यपि वक्तव्यानीति सूचयति। इन्द्रियद्रव्याणीति इन्द्रियारम्भकद्रव्याणि। उक्तमिन्द्रियाधिकारे इति इन्द्रियकथनप्रसङ्गे पूर्वाचार्यैरुक्तमित्यर्थः, पञ्चेन्द्रियाणीत्यादि तु स्वयमेव ग्रन्थकृद्व्याकरिष्यति ॥३॥

अतीन्द्रियं पुनर्मनः सत्त्वसंज्ञकं, 'चेत' इत्याहुरेके, तदर्थात्मसंपदायत्तचेष्टं चेष्टाप्रत्ययभूतमिन्द्रियाणाम् ॥४॥

ननु मनोऽपीन्द्रियमस्ति तत्कथं पञ्चेन्द्रियाणीत्युक्तं इत्याशंक्य चक्षुरादिभ्यो विलक्षणधर्मयोगान्मनसः पृथक्कथनमित्यभिप्रेत्याह—अतीन्द्रियमित्यादि। अतीन्द्रियमिति अतिशयितमिन्द्रियमतीन्द्रियं चक्षुराद्यपेक्षया श्रेष्ठमित्यर्थः, मनःसापेक्षाणामेव चक्षुरादीनां स्वविषयज्ञानजनकत्वात्, अत एव वक्ष्यति—चेष्टाप्रत्ययभूतमिन्द्रियाणामिति। मनसस्तु स्वविषयज्ञानजनने न चक्षुराद्यपेक्षेति मनसः प्राधान्यमित्यर्थः; किंवा अतीन्द्रियमिति चक्षुरादीनां यदिन्द्रियत्वं बाह्यज्ञानकरणत्वं तदतिक्रान्तमित्यर्थः; किंवा चक्षुरादिभ्योऽप्यतीन्द्रियेभ्यः सूक्ष्मतरं, दुरवबोधत्वात्। सत्त्वमिति संज्ञा यस्य तत्तथा। चेत इत्या(हुरे)क इति परमतस्याप्रतिषेधात् स्वयमप्यनुमतम्। पर्यायकथनं च शास्त्रव्यवहारार्थम्। धर्मान्तरमाह—तदर्थेत्यादि। तस्य मनसोऽर्थस्तदर्थः, स च सुखादिः, आत्मा चेतनः, तयोः सम्पत् तदर्थात्मसम्पत्, एतदायत्ता चेष्टा व्यापारो यस्य

तत्तथा; तत्रार्थसम्पत् सुखादिसन्निकर्षः, आत्मसम्पत् आत्मग्रहणमनुशालित्वं[1] मनश्चेष्टा तु सुखादिज्ञानम्। चेष्टाप्रत्ययभूतमिन्द्रियाणामिति इन्द्रियाणां चक्षुरादीनां या चेष्टा स्वविषयरूपादिज्ञानलक्षणा, तत्र प्रत्ययभूतं कारणभूतम् (अथ ग्रन्थत्रुटिरस्ति) ॥४॥

स्वार्थेन्द्रियार्थसङ्कल्पव्यभिचरणाच्चानेकमेकस्मिन् पुरुषे सत्त्वं, रजस्तमःसत्त्वगुणयोगाच्च; न चानेकत्वं, नह्येकं ह्येककालमनेकेषु प्रवर्तते; तस्मान्नैककाला सर्वेन्द्रियप्रवृत्तिः ॥५॥

यद्गुणं चाभीक्ष्णं पुरुषमनुवर्तते सत्त्वं तत्सत्त्वमेवोपदिशन्ति मुनयो बाहुल्यानुशयात् ॥६॥

(ननु यद्येकस्मिन्नेव) पुरुषे कदाचिद्रजोयुक्तं कदाचित्तमोयुक्तं कदाचित्सत्त्वयुक्तं च मनो भवति, तत्कथमयं सात्त्विकोऽयं राजस इत्यादिप्रतिनियतव्यपदेशो भवतीत्याह—यद्गुणमित्यादि। येन गुणेन सत्त्वादीनामन्यतमेन युक्तं भूत्वा सत्त्वं मनः कर्तृ अभीक्ष्णं पुनः पुनः पुरुषमनुवर्तते तद्गुणे सक्तं सत्त्वं सात्त्विकं राजसं तामसं वा उपदिशन्ति बाहुल्यानुशयाद्बाहुल्यानुबन्धादित्यर्थः ॥६॥

मनःपुरःसराणीन्द्रियाण्यर्थग्रहणसमर्थानि भवन्ति ॥७॥

इन्द्रियाणां चेष्टाप्रत्ययभूनमिति यदुक्तं तत्र हेतुमाह—मनःपुरःसराणीत्यादि। (मनःपुरःसराणि) मनोऽधिष्ठितानीत्यर्थः ॥७॥

तत्र चक्षुः श्रोत्रं घ्राणं रसनं स्पर्शनमिति पञ्चेन्द्रियाणि ॥८॥

पञ्चेन्द्रियाणीत्यादि यदुक्तं तद्व्याकरोति—तत्रेत्यादि ॥८॥

पञ्चेन्द्रियद्रव्याणि—खं वायुर्ज्योतिरापो भूरिति ॥९॥

यद्यपि चक्षुरादीन्द्रियनिर्देशानुसारेण इन्द्रियद्रव्यनिर्देशे न खमित्यादिक्रमो युज्यते तथाऽपि व्यतिक्रमनिर्देशोऽयं सर्वेषामेवेन्द्रियाणां सर्वभूतमयत्वं वोधयति आधिक्यात्तु तैजसत्वादिव्यपदेश इति ॥९॥

पञ्चेन्द्रियाधिष्ठानानि—अक्षिणी कर्णौ नासिके जिह्वा त्वक् चेति ॥१०॥

---

१. अर्थग्रहणे यत्नशालित्वं[1]

पञ्चेन्द्रियाधिष्ठानानीति—अक्षिकर्णनासादौ तु एकेन्द्रियाधिष्ठानत्वे-नैकत्वमेवेति कृत्वा न पञ्चकत्वक्षतिः ॥१०॥

पञ्चेन्द्रियार्थाः—शब्दस्पर्शरूपरसगन्धाः ॥११॥

इन्द्रियार्था इति इन्द्रियविषयाः ॥११॥

पञ्चेन्द्रियबुद्धयः—चक्षुर्बुद्ध्यादिकाः; ताः पुनरिन्द्रियेन्द्रियार्थसत्त्वात्म-सन्निकर्षजाः, क्षणिकाः, निश्चयात्मिकाश्च, इत्येतत् पञ्चपञ्चकम् ॥१२॥

इन्द्रियबुद्ध्युत्पादसामग्रीमाह – ताः पुनरित्यादि। सन्निकर्षः सम्बन्धः; स च आत्ममनसोः मन-इन्द्रिययोः, इन्द्रियार्थयोरिति। क्षणिका इति आशुतरविनाशिन्यः। निश्चयात्मिका इति वस्तुस्वरूपपरिच्छेदात्मिकाः। इदानीमुक्तानां पञ्चपञ्चकानां तथा पञ्चकानुप्रविष्टस्य च मनःप्रभृतेः शुभाशुभप्रवृत्तिनिवृत्तिहेतुत्वेन स्वस्थाधिकारौपपत्तिकताभाह—इत्येतदि-त्यादि ॥१२॥

मनो मनोर्थो बुद्धिरात्मा चेत्यध्यात्मद्रव्यगुणसंग्रहः शुभाशुभप्रवृत्ति-निवृत्तिहेतुश्च, द्रव्याश्रितं च कर्म; यदुच्यते क्रियेति ॥१३॥

मनोऽर्थश्चिन्त्यरूपः। बुद्धिरिह मनोबुद्धिर्विवक्षिता, इन्द्रियबुद्धीनां पञ्चपञ्चकेनैव ग्रहणात्। आत्मानमधिकृत्य आत्मनो हिताहितमधिकृत्य यानि द्रव्याणि ये च गुणाः तेषां सङ्ग्रहोऽध्यात्मद्रव्यगुणसङ्ग्रहः। तत्र गुणा रूपादयो बुद्ध्यादयश्च, शेषं द्रव्यं, तेनायमर्थः—आत्मनोऽपकार-(कोपकार)काणां द्रव्यगुणानामयं सङ्ग्रहः शुभस्य धर्मस्य सुखस्य च अशुभस्याधर्मस्य असुखस्य च प्रवृत्तौ निवृत्तौ च हेतुर्भवति; तत्रोक्त-सङ्ग्रहस्य सम्यग्योगः शुभप्रवृत्तावशुभस्य च निवृत्तौ हेतुर्भवति, अयोगाति-योगमिथ्यायोगास्तु अशुभस्य प्रवृत्तौ शुभस्य च निवृत्तौ हेतुरित्यर्थः। न केवलमुक्तरूपोऽध्यात्मद्रव्यगुणसङ्ग्रह एव शुभाशुभादिहेतुः किं तर्हि कर्मापीत्याह—द्रव्याश्रितं च कर्म; यदुच्यते क्रियेति। आयुर्वेदप्रसिद्धपञ्च-कर्ममात्रे कर्मशब्दवाच्यताभ्रमनिरासार्थमाह—द्रव्याश्रितमिति। तथाऽन्य-द्रव्येष्वपि कर्मशब्दवाच्यत्वेनातिप्रसङ्गनिरासार्थमाह—यदुच्यते क्रियेति, कर्मणः पृथक्कृत्वाऽभिधानं पञ्चकादिषु द्रव्यगुणरूपेषु कर्मणोऽप्रविष्टत्वात् ॥१३॥

तत्रानुमानगम्यानां पञ्चमहाभूतविकारसमुदायात्मकानामपि सता-मिन्द्रियाणां तेजश्चक्षुषि, खं श्रोत्रे, घ्राणे क्षितिः, आपो रसने, स्पर्शनेऽ-

निलो विशेषेणोपपद्यते । तत्र यद्यदात्मकमिन्द्रियं विशेषात्तत्तदात्मकमेवार्थमनुगृह्णाति, तत्स्वभावाद्विभुत्वाच्च ॥१४॥

सम्प्रति वैद्यकनये पाञ्चभौतिकानामपि चक्षुरादीनां यथा तैजसत्वादिव्यपदेशो भवति तदाह—तत्रानुमानगम्यानामित्यादि । अनुमानं च चक्षुर्बुद्ध्यादयः करणजन्याः क्रियात्वात्, छिदिक्रियावदित्यादि । पञ्चमहाभूतविकारसमुदायात्मकानामिति–पञ्चमहाभूतानि पञ्चतन्मात्राणि तेषां विकारास्तानि पञ्चमहाभूतान्येव तत्समुदायजन्यानामित्यर्थः । विशेषेणेत्याधिक्येन । एवं च पाञ्चभौतिकत्वेऽपि चक्षुरादीनां तैजसत्वादिव्यपदेशो यथायथं तेजःप्रभृतीनामाधिक्यादित्यर्थः । ननु सांख्ये इन्द्रियाणामाहङ्कारिकत्वमुक्तं; यथा—"सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्" इति (सां० का० २५) तत् कथं इन्द्रियाणां भौतिकत्वमुच्यत इत्याशंक्य इन्द्रियाणां भौतिकत्वमुपपादयन्नाह—तत्र यद्यदात्मकमित्यादि । यदिन्द्रियं विशेषात् भूयस्त्वेन यदात्मकं यद्भूतारब्धं तदिन्द्रियं तद्भूतात्मकमेवार्थं विषयमनुधावति गृह्णाति, तेन यत्तेजःप्रधानं तत्तेजःप्रधानमेव विषयं गृह्णातीति व्याख्येयम् । अत्र हेतुमाह—तत्स्वभावादिति । ग्राह्याणां रूपादीनां यः स्वभावस्तैजसत्वादिश्चक्षुरादीनामपि तत्स्वभावत्वादित्यर्थः । एतेन यद्याहङ्कारिकमिन्द्रियं स्यादर्थश्च भौतिकः तदाऽतुल्यस्वभावात् तेषां न ग्राह्यग्राहकभावः स्यादिति भावः । **सुश्रुते**ऽप्युक्तं—"इन्द्रियेणेन्द्रियार्थं तु स्वं स्वं गृह्णाति मानवः । नियतं तुल्ययोनित्वान्नान्येनान्यमिति स्थितिः ॥" (सु० शा० १.१५) इति । हेत्वन्तरमाह—विभुत्वादिति शक्तत्वात्, समानजातीयतैजसादिग्रहण एव चक्षुरादीनां शक्तत्वादित्यर्थः । तदनेन ग्रन्थेन इदमनुमानं सूचितं—चक्षुस्तैजसं, रूपादीनां मध्ये रूप(स्यैव) प्रकाशकत्वात्, बाह्यालोकवत्; एवं रसनमाप्यं रूपादिषु मध्ये रसस्यैवप्रकाशकत्वात्, दन्तोदकवत्, तथा गन्धश्च सजातीयगुणोत्कर्षवदिन्द्रियग्राह्यो भूतविशेषगुणत्वाद्रूपवदित्यादि ॥१४॥

तदर्थातियोगायोगमिथ्यायोगात् समनस्कमिन्द्रियं विकृतिमापद्यमानं यथास्वं बुद्ध्युपघाताय संपद्यते, सामर्थ्ययोगात् पुनः प्रकृतिमापद्यमानं यथास्वं बुद्धिमाप्याययति ॥१५॥

शुभाशुभप्रवृत्तिनिवृत्तिहेतुरिति यदुक्तं तदुपपादयति—तदर्थेत्यादि । तदिति इन्द्रियम्, अर्थाः रूपादयः, तेषामतियोगो रूपाद्यतिदर्शनम्, अयोगो हीनमात्ररूपदर्शनं सर्वथाऽदर्शनं च, मिथ्यायोगो विकृतबीभत्सरूपादि-

दर्शनम् । समनस्कमिति विशेषणेन चक्षुराद्युपघातान्मनसोऽप्युद्विग्नत्वदैन्यादिलक्षणो विकारो भवतीति दर्शयति । यथास्वं·······या यस्यात्मीया बुद्धिः तदुपघाताय, सामर्थ्ययोगादिति रूपादीनां सम्यग्योगात् ।·······(आ)पद्यमानमिन्द्रियमित्यनुषङ्गः, आप्यायति सातत्येन जनयतीत्यर्थः ॥१५॥

मनसस्तु चिन्त्यमर्थः । तत्र मनसो मनोबुद्धेश्च त एव समानातिहीनमिथ्यायोगाः प्रकृतिविकृतिहेतवो भवन्ति ॥१६॥

पूर्वं (मनो) मनोऽर्थ (इत्युक्तं) ···· ···· मनोऽर्थ इत्यत आह— मनसस्तु चिन्त्यमर्थ इति । इन्द्रियान्तरनिरपेक्षं मनो यद्गृह्णाति (तच्चिन्त्यम्,) तच्चोपलक्षणं, तेन सुखाद्यपि ज्ञेयम् । त एवेति मनसा सह तद्विषयस्य चिन्त्यस्य सम्यग्यो(गस्तथाऽतिहीनमिथ्यायोगाः मनसः) मनोबुद्धेश्च यथायथं प्रकृतिविकृतिहेतवो भवन्तीत्यर्थः । चिन्त्यस्य मिथ्या(हीनातियोगाः मनसो) मनोबुद्धेश्च विकृतिहेतव इति अतिचिन्तनादिभिर्मनो विकृतं सत् मनोबुद्धिमपि वि(कृतां जनयतीति) भावः ॥१६॥

तत्रेन्द्रियाणां समनस्कानामनुपतप्तानामनुपतापाय प्रकृतिभावे प्रयतितव्यमेभिर्हेतुभिः; तद्यथा—सात्म्येन्द्रियार्थसंयोगेन बुद्ध्या सम्यगवेक्ष्यावेक्ष्य कर्मणां सम्यक् प्रतिपादनेन, देशकालात्मगुणविपरीतोपासनेन चेति । तस्मादात्महितं चिकीर्षता सर्वेण सर्वं सर्वदा स्मृतिमास्थाय सद्वृत्तमनुष्ठेयम् ॥१७॥

तदीदृशे कर्तव्यमाह—तत्रेत्यादि । अनुपतापायेति उपतापकहेतुपरिहारेण (विकारानुत्प)त्तये, प्रकृतिभाव इति भेषजोपयोगेनोत्पन्नविकारध्वंसनिमित्तं, तानेव हेतून्दर्शयति ···· ··· सात्म्येन्द्रियार्थसंयोगेनेन्द्रियार्थयोरुचितयोगेन तथा बुद्ध्या सम्यगवेक्ष्यावेक्ष्य हित(मिदमहितं चेदमिति; कर्म)णामाहाराचाराणां सम्यक् प्रतिपादनेनेत्यहितकर्मपरित्यागेन हितकर्माचरणेन च (विकारानुत्पत्त)ये प्रयतितव्यमित्यन्वयः । एतेनासात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिहाराभ्यां अनागताबाधप्रतिषेधोपाय उक्तो भवति । देशकालेत्यादिना उत्पन्नविकारध्वंसोपायमाह—गुणशब्दस्य दे(शकालात्मभिः प्र)त्येकमन्वयः । आत्मशब्देन प्रकृतिविकारयोर्ग्रहणम् । देशादिगुणविपरीतोपसेवनेन (प्रय)तितव्यमिति पूर्वेणान्वयः । तस्मादिति यस्मात् हितकर्मणामनुष्ठानमारोग्यहेतुः (त)स्मादित्यर्थः । स्मृतिमास्थायेति सद्वृत्तोपदेशं स्मृत्वा ॥१७॥

तद्धयनुतिष्ठन् युगपत् संपादयत्यर्थद्वयमारोग्यमिन्द्रियविजयं चेति; तत् सद्वृत्तमखिलेनोपदेक्ष्यामोऽग्निवेश ! तद्यथा—देवगोब्राह्मणगुरुवृद्धसिद्धाचार्यानर्चयेत्, अग्निमुपचरेत्, ओषधीः प्रशस्ता धारयेत्, द्वौ कालावुपस्पृशेत्, मलायनेष्वभीक्ष्णं पादयोश्च वैमल्यमादध्यात्, त्रिः पक्षस्य केशश्मश्रुलोमनखान् संहारयेत्, नित्यमनुपहतवासाः सुमनाः सुगन्धिः स्यात्, साधुवेशः, प्रसिद्धकेशः, मूर्धश्रोत्रघ्राणपादतैलनित्यः, धूमपः, पूर्वाभिभाषी, सुमुखः, दुर्गेष्वभ्युपपत्ता, होता, यष्टा, दाता, चतुष्पथानां नमस्कर्ता, बलीनामुपहर्ता, अतिथीनां पूजकः, पितृभ्यः पिण्डदः, काले हितमितमधुरार्थवादी, वश्यात्मा, धर्मात्मा, हेतावीर्ष्युः, फले नेर्ष्युः, निश्चिन्तः, निर्भीकः, ह्रीमान्, धीमान्, महोत्साहः, दक्षः, क्षमावान्, धार्मिकः, आस्तिकः, विनयबुद्धिविद्याभिजनवयोवृद्धसिद्धाचार्याणामुपासिता, छत्री दण्डी मौली सोपानत्को युगमात्रदृग्विचरेत्, मङ्गलाचारशीलः, कुचेलास्थिकण्टकामेध्यकेशतुषोत्करभस्मकपालस्नानबलिभूमीनां परिहर्ता, प्राक् श्रमाद् व्यायामवर्जी स्यात्, सर्वप्राणिषु बन्धुभूतः स्यात्, क्रुद्धानामनुनेता, भीतानामाश्वासयिता, दीनानामभ्युपपत्ता, सत्यसंधः, सामप्रधानः, परपरुषवचनसहिष्णुः, अमर्षघ्नः, प्रशमगुणदर्शी, रागद्वेषहेतूनां हन्ता च ॥१८॥

अर्थद्वयमित्यस्येव विवरणमा(रोग्यमिन्द्रियवि)जयं चेति। द्वौ कालाविति प्रातर्मध्याह्ने च, उपस्पृशेत् स्नायात्, अन्ये तु द्वौ कालौ संध्या···· ···· तेत्याहुः स चार्थेन (चानार्ष ?)शब्द इत्युपेक्षणीयः। त्रिः पक्षस्येति पञ्चभिः पञ्चभिर्दिनैः; उक्तं च—क्षौरं कुर्यात् पञ्चमे पञ्चमेऽह्नीति। किंवा पक्षरूपावयवयोगात् पक्षो मासः; उक्तं च **क्षार(पाणौ—** "त्रिर्मा)सस्य लोमनखान् संहारयेत्" इति। अनुपहतवासा अम्लानवासाः। प्रसिद्धकेश इति पु(ष्पादिभिर्भू)षितकेशः "प्रसिद्धौ भूषिते ख्याते" इति **मेदिनिः,** अन्ये तु प्रसाधितकेश इत्याहुः। (पूर्वं केशसंहरण)-वचनं तीर्थादिप्राप्तनिमित्तकृतमुण्डनस्नातकादिविषयमिति न विरोधः। पूर्वाभि(भाषी प्रथमसंभाष)णशीलः। दुर्गेष्वभ्युपपत्तेति सङ्कटपतितानां परित्राता। वश्यात्मा वश्येन्द्रियः। हे(तावीर्ष्युरि)ति हेतौ ईर्ष्यां कुर्यात् येन हेतुनाऽयं सम्पन्नः स हेतुः कथं मे भवेदिति प्रयत्नवता भवि(तव्यमिति दर्शयति। फ)ले नेर्ष्युरिति परसम्पत्तौ द्वेषो न कार्य इत्यर्थः। निर्भीक इति उपस्थिते अपरिहार्ये भय(हेतौ बोद्धव्यं), शक्यपरिहारेषु तु

दृष्टप्रत्यवायहेतुषु भेत्तव्यमेव। विनयेत्यादौ वृद्धशब्दस्य विनयादि(भिः प्रत्येकमन्व)यः, विनयादिभिर्महानित्यर्थः। अभिजनो विशुद्धं कुलम्। उपासना तत्समीपावस्थानं (तेनाचारव्य)वहारशिक्षा भवतीति भावः। युगमात्रदृगिति युगं हस्तचतुष्टयं "युग्मे हस्तचतुष्केऽपि (वृद्धिनामौषधेऽपि च" इति) मेदिनिः। चेलं भय(काया ?)ग्रवसनम्। सर्वप्राणिषु बन्धुभूत इति बन्धुभूतः कारुणिकः स्यादित्यर्थः। द(ीनानाम)भ्युपत्तेति उपकारार्थं स्वीकर्त्तेत्यर्थः। सत्यसन्ध इति सत्यप्रतिज्ञः। अमर्षघ्न अमर्षोऽक्षा(न्तिः)। प्रशमगुणदर्शी शान्तिं गुणत्वेन द्रष्टुं शीलं यस्येत्यर्थः ॥१८॥

नानृतं ब्रूयात्, नान्यस्वमाददीत, नान्यस्त्रियमभिलषेन्नान्यश्रियं, न वैरं रोचयेत्, न कुर्यात् पापं, न पापेऽपि पापी स्यात्, नान्यदोषान् ब्रूयात्, नान्यरहस्यमागमयेत्, नाधार्मिकैर्न नरेन्द्रद्विष्टैः सहासीत नोन्मत्तैर्न पतितैर्न भ्रूणहन्तृभिर्न क्षुद्रैर्न दुष्टैः, न दुष्टयानान्यारोहेत्, न जानुसमं कठिनमासनमध्यासीत, नानास्तीर्णमनुपहितमविशालमसमं वा शयनं प्रपद्येत, न गिरिविषममस्तकेष्वनुचरेत्, न द्रुममारोहेत्, न जलोग्रवेगमवगाहेत, न कुलच्छायामुपासीत, नाग्न्युत्पातमभितश्चरेत्, नोच्चैर्हसेत्, न शब्दवन्तं मारुतं मुञ्चेत्, नानावृतमुखो जृम्भां क्षवथुं हास्यं वा प्रवर्तयेत्, न नासिकां कुष्णीयात्, न दन्तान् विघट्टयेत्, न नखान् वादयेत्, नास्थीन्यभिहन्यात्, न भूमिं विलिखेत्, न छिन्द्यात्तृणं, न लोष्टं मृद्नीयात्, न विगुणमङ्गैश्चेष्टेत, ज्योतींष्यनिष्टममेध्यमशस्तं च नाभिवीक्षेत, न हुंकुर्याच्छवं, न चैत्यध्वजगुरुपूज्याशस्तच्छायामाक्रामेत्, न क्षपास्वमरसदनचैत्यचत्वरचतुष्पथोपवनश्मशानाघातनान्यासेवेत, नैकः शून्यगृहं न चाटवीमनुप्रविशेत्, न पापवृत्तान् स्त्रीमित्रभृत्यान् भजेत, नोत्तमैर्विरुध्येत, नावरानुपासीत, न जिह्मं रोचयेत्, नानार्यमाश्रयेत्, न भयमुत्पादयेत्, न साहसातिस्वप्नप्रजागरस्नानपानाशनान्यासेवेत, नोर्ध्वजानुश्चिरं तिष्ठेत्, न व्यालानुपसर्पेन्न दंष्ट्रिणो न विषाणिनः, पुरोवातातपावश्यायातिप्रवाताञ्जह्यात्, कलिं नारभेत, नासुनिभृतोऽग्निमुपासीत नोच्छिष्टः, नाधः कृत्वा प्रतापयेत्, नाविगतक्लमो नानाप्लुतवदनो न नग्न उपस्पृशेत्, न स्नानशाटचा स्पृशेदुत्तमाङ्गं, न केशाग्राण्यभिहन्यात्, नोपस्पृश्य ते एव वाससी बिभृयात्, नास्पृष्ट्वा रत्नाज्यपूज्यमङ्गलसुमनसोऽभिनिष्क्रामेत्, न पूज्यमङ्गलान्यपसव्यं गच्छेन्नेतराण्यनुदक्षिणम् ॥१९॥

नानृतं ब्रूयादित्यत्र पापजनकमिति शेषः। आगमयेदिति बुध्येत किंवा प्रकाशयेत्। नाधार्मिकैरित्यादि अधार्मिकसङ्गातिनिषेधार्थम्। भ्रूणो गर्भः। [अनुपहितमनुपधानमगण्डुकमित्यर्थः। जलोग्रवेगमिति जलस्य वेगं जलसमूहवेगं वा। नाग्न्युत्पातमभितश्चरेदिति—(उत्पा)त उपप्लवः प्रकृतेराकस्मिकोऽन्यथाभाव इति **स्वभूतिः**, किंवा अग्निमण्डले ज्योतिः श ···· ···· ···· त्पातः सोऽग्न्युत्पातशब्देनोच्यते। कृष्णीयादिति विघट्टयेत्। नास्थीन्यभिहन्यादि····त **स्वभूतिः**, किंवा स्फोटयेत्। न भूमिं विलिखेदित्यत्र कारणं विनेति शेषः, अत ए···· ···· ···· ··· द्विलिखेद्गुरुमित्युक्तम्। विगुणमिति प्रकृतिविपरीतम्। ज्योतींषि अतिभास्वरतेजां(सि)। न हुङ्कुर्यादिति यः शवं हुङ्करोति तेन सोमो बहिर्निरस्तो भवती**त्यागमः**। इह सद्वृत्तोपदेशे न नखान् वादयेत् इत्यादौ यत्र साक्षाद्दृष्टं फलं न सम्भवति तत्रादृष्टफलमेव वचनप्रामाण्यादुन्नीयते। चैत्यो (ग्रामप्रधानतरुः, **अरु**)णस्तु चैत्यो विशिष्टदेवताधिष्ठितो लोकप्रसिद्धो वृक्षविशेष इत्याह, बुद्धालय इत्यन्ये। चत्वरं (त्रिपथं, अन्ये त्वाहुः नगरनिवा)सिनः यत्र संहतीभूयः प्रायः कथां कुर्वते स उच्यत **इत्यरुणः**। आघातनं वधस्थानम्। अवरानिति (नीचान्। जि)ह्मं कुटिलम्। आरात् दूरात् पापेभ्यो याति इत्यार्यः, तद्विपरीतोऽनार्यः। न साहसेत्यादौ अतिश(ब्दः स्वप्नादि)भिः शयनान्तैः प्रत्येकमभिसम्बध्यते। स्वप्नो निद्रा, शयनं जाग्रत एव तस्यैव स्थितिः। ऊर्ध्वजानुर्द(ण्डायमा)नः। व्यालानिति सर्पान्। असुनिभृतोऽनवहितः। नाधः कृत्वा प्रतापयेदिति अग्निमधः कृत्वा न प्रता(पयेदि)त्यन्वयः। अनाप्लुतवदनोऽप्रक्षालितमुखः। उपस्पृशेत् स्नायात्। ते एव वाससी इति स्नानवाससी। अपसव्यमिति वामम् ॥१९॥

नारत्नपाणिर्नास्नातो नोपहतवासा नाजपित्वा नाहुत्वा देवताभ्यो नानिरूप्य पितृभ्यो नादत्त्वा गुरुभ्यो नातिथिभ्यो नोपाश्रितेभ्यो नापुण्यगन्धो नामाली नाप्रक्षालितपाणिपादवदनो नाशुद्धमुखो नोदङ्मुखो न विमना नाभक्ताशिष्टाशुचिक्षुधितपरिचरो न पात्रीष्वमेध्यासु नादेशे नाकाले नाकीर्णे नादत्त्वाऽग्रमग्नये नाप्रोक्षितं प्रोक्षणोदकैर्न मन्त्रैरनभिमन्त्रितं न कुत्सयन्न कुत्सितं न प्रतिकूलोपहितमन्नमाददीत, न पर्युषितमन्यत्र मांसहरितकशुष्कशाकफलभक्ष्येभ्यः, नाशेषभुक् स्यादन्यत्र दधिमधुलवणसक्तुसर्पिर्भ्यः, न नक्तं दधि भुञ्जीत, न सक्तूनेकान्श्नीयान्न निशि न भुक्त्वा न बहून्न द्विर्नोदकान्तरितान्, न छित्त्वा द्विजैर्भक्षयेत् ॥२०॥

न देवताभ्योऽनिरूप्येति अदत्वा, निर्पूर्वस्य रूपस्य कृतसंप्रसारणस्य ल्यपि रूपम्। आकीर्णं इति बहुजनाकीर्णे। न पर्युषितमित्यादि अपक्वं यन्मांसं तदेव पर्युषितमुपादेयं पक्वपर्युषितं तु निषिद्धमेव; यदुक्तं—"सिद्धं पर्युषितं तद्वद्दुर्गन्धि ग्रथितं च यत्। क्रिमिजग्धं च यन्मांसमायुःकामो विवर्जयेत्॥" इति सिद्धपर्युषितमिति पक्वं सत् पर्युषितमित्यर्थः। हरितकमार्द्रकादि, शुष्कशाकं शुष्कपत्रादि। नाशेषभुक् स्यादिति निःशेषभोजी न स्यादित्यर्थः। न नक्तं दधि भुञ्जीतेति "दिवा कपित्थे वसति रात्रौ दध्नि च सक्तुषु। अलक्ष्मीः कलहाधारा कोविदारे कृतालया॥" **इत्यागमः**। एतच्च यद्यपि पूर्वमुक्तं तथाऽपि प्रकरणवशात् पुनरुच्यत इति न दोषः, तदुक्तं—"अधिकरणवशाद्दाढर्यात् गुणदोषप्राप्तितोऽनुसम्बन्धात्। स्तुत्यर्थं संशयतः शिष्यधियां चाभिवृद्ध्यर्थम्। तन्त्रे यत्पुनरुक्तं पुनरुक्तं नेष्यते तद्धि।" इति। न सक्तूनित्यादौ एकानिति केवलान् घृतशर्करारहितानित्यर्थः। नोदकान्तरितानिति नोदकं पृथक् पीत्वेत्यर्थः॥२०॥

नानृजुः क्षुयान्नाद्यान्न शयीत, न वेगितोऽन्यकार्यः स्यात्, न वाय्वग्निसलिलसोमार्कद्विजगुरुप्रतिमुखं निष्ठीविका(वात)वर्चोमूत्राण्युत्सृजेत्, न पन्थानमवमूत्रयेन्न जनवति नान्नकाले, न जपहोमाध्ययनबलिमङ्गलक्रियासु श्लेष्मसिङ्घाणकं मुञ्चेत्॥२१॥

क्षुयादिति क्षवथुं कुर्यात्॥२१॥

न स्त्रियमवजानीत, नातिविश्रम्भयेत्, न गुह्यमनुश्रावयेत्, नाधिकुर्यात्। न रजस्वलां नातुरां नामेध्यां नाशस्तां नानिष्टरूपाचारोपचारां नादक्षां नादक्षिणां नाकामां नान्यकामां नान्यस्त्रियं नान्ययोनिं नायोनौ न चैत्यचत्वरचतुष्पथोपवनश्मशानाघातनसलिलौषधिद्विजगुरुसुरालयेषु न सन्ध्ययोर्नातिथिषु नाशुचिर्नाजग्धभेषजो नाप्रणीतसङ्कल्पो नानुपस्थितप्रहर्षो नाभुक्तवान्नात्यशितो न विषमस्थो न मूत्रोच्चारपीडितो न श्रमव्यायामोपवासक्लमाभिहतो नारहसि व्यवायं गच्छेत्॥२२॥

नाति विश्रम्भयेदिति ना(तिप्र)श्रयवतीं कुर्यात्, किंवा विश्रम्भो विश्वासः; नाधिकुर्यादिति (न) सर्वत्राधकुर्यात्। अशस्तां.........कुष्ठादिसम्बन्धेनाप्रशस्ताम्। अन्ययोनिमित्यवर्णां, ओषध्यादिभिरालयशब्दः सम्बध्य(ते । अ)तिथिर्निषिद्धतिथिः। अजग्धभेषज इति अनुपयुक्त-

वृष्यभेषजः। सङ्कल्पो मैथुनेच्छा। (अनुपस्थितप्रहर्ष अजातध्वजोच्छ्रा)यः। अरहसि अविजने ॥२२॥

न सतो न गुरून् परिवदेत्, नाशुचिरभिचारकर्मचैत्यपूज्यपूजाध्ययनमभिनिर्वर्तयेत् ॥२३॥

न विद्युत्स्वनार्तवीषु नाभ्युदितासु दिक्षु नाग्निसंप्लवे न भूमिकम्पे न महोत्सवे नोल्कापाते न महाग्रहोपगमने न नष्टचन्द्रायां तिथौ न सन्ध्ययोर्नामुखाद्गुरोर्नावपतितं नातिमात्रं न तान्तं न विस्वरं नानवस्थितपदं नातिद्रुतं न विलम्बितं नातिक्लीबं नात्युच्चैर्नातिनीचैः स्वरैरध्ययनमभ्यस्येत् ॥२४॥

अभ्युदितासु दिक्ष्विति दिक्षु दाहवतीषु। महाग्रहोपगमनं (चन्द्रसूर्यग्र)हः। अवपतितमिति हीनवर्णम्। तान्तं रूक्षस्वरम्। अतिक्लीबमित्यतिविलम्बितोच्चारणम् ॥२३-२४॥

नातिसमयं जह्यात्, न नियमं भिन्द्यात्, न नक्तं नादेशे चरेत्, न सन्ध्यास्वभ्यवहाराध्ययनस्त्रीस्वप्नसेवी स्यात्, न बालवृद्धलुब्धमूर्खक्लिष्टक्लीबैः सह सख्यं कुर्यात्, न मद्यद्यूतवेश्याप्रसङ्गरुचिः स्यात्, न गुह्यं विवृणुयात्, न कञ्चिदवजानीयात्, नाहंमानी स्यान्नादक्षो नादक्षिणो नासूयकः; न ब्राह्मणान् परिवदेत्, न गवां दण्डमुद्यच्छेत्, न वृद्धान्न गुरून्न गणान्न नृपान् वाऽधिक्षिपेत्, न चातिब्रूयात्, न बान्धवानुरक्तकृच्छ्रद्वितीयगुह्यज्ञान् बहिष्कुर्यात् ॥२५॥

अतिसमयो मिलित्वा बहुभिः कृतो नियमः। न सन्ध्यास्वित्यादौ पुनः स्त्रीनिषेधः सन्ध्यासु यावदकर्तव्यस्य न्यूनतापरिहारार्थमुक्तः, पूर्वं तु स्त्री यथा न सेव्या तन्निखिलेनोपदिशता न सन्ध्ययोरित्युक्तं, तेन प्रकरणभेदान्न पौनरुक्त्यम्। क्लीबो हीनसत्त्वः षण्डो वा। क्लिष्टो निन्दितरोगादिना। गणानिति मिलितान्। कृच्छ्रद्वितीय आपदि सहायः। न बहिष्कुर्यादिति आत्मीयान् (बहिः)कृत्वा स्थापयेदित्यर्थः ॥२५॥

नाधीरो नात्युच्छ्रितसत्त्वः स्यात्, नाभृतभृत्यः, नाविश्रब्धस्वजनः, नैकः सुखी, न दुःखशीलाचारोपचारः, न सर्वविश्रम्भी, न सर्वाभिशङ्की, न सर्वकालविचारी ॥२६॥

शीलं स्वाभाविकवृत्तम्, आचारः शास्त्रोक्तव्यवहारः, उपचारः

परिच्छदः, तेषां च दुःख(त्वं) दुःखहेतुत्वात् । सर्वविश्रम्भीति सर्वेषु विश्वस्तः ॥२६॥

न कार्यकालमतिपातयेत्, नापरीक्षितमभिनिविशेत्, नेन्द्रियवशगः स्यात्, न चञ्चलं मनोऽनुभ्रामयेत्, न बुद्धीन्द्रियाणामतिभारमादध्यात्, न चातिदीर्घसूत्री स्यात्, न क्रोधहर्षावनुविदध्यात्, न शोकमनुवसेत्, न सिद्धावुत्सेकं यच्छेन्नासिद्धौ दैन्यं, प्रकृतिमभीक्ष्णं स्मरेत्, हेतुप्रभावनिश्चितः स्याद्धेत्वारम्भनित्यश्च, न कृतमित्याश्वसेत्, न वीर्यं जह्यात्, नापवादमनुस्मरेत् ॥२७॥

नापरीक्षितमभिनिविशेदिति—अपरीक्षितं लघ्वीकुर्यादित्यर्थः । चञ्चलमिति हेतुगर्भं मनोविशेषणम् । बुद्धीन्द्रियाणामिति द्वन्द्वस्तत्पुरुषो वा । दीर्घसूत्री चिरक्रियः । न क्रोधहर्षावनुविदध्यादित्यत्र तथा न शोकमनुवसेदित्यत्र च अनुशब्द आयामे "आयामे च समीपे च यथासादृश्ययोरनु" इति **मेदिनिकरः** । तेन चिरं क्रोधहर्षौ न कुर्यात्, चिरं च न शोकवशः स्यादित्यर्थः । उत्सेकं हर्षातिशयम् । प्रकृतिमिति शरीरादीनां विनश्वरादिस्वभावम् । हेतुप्रभावनिश्चितः स्यादिति---अस्ति शुभाशुभहेतुसम्बन्धात् तत्फलसम्बन्ध इति निश्चयमुपेयादित्यर्थः । हेत्वारम्भनित्य इति शुभहेतुयागाद्यारम्भपरः स्यादित्यर्थः ॥२७॥

नाशुचिरुत्तमाज्याक्षततिलकुशसर्षपैरग्निं जुहुयादात्मानमाशीर्भिराशासानः, अग्निर्मे नापगच्छेच्छरीराद्वायुर्मे प्राणानादधातु विष्णुर्मे बलमादधातु इन्द्रो मे वीर्यं शिवा मां प्रविशन्त्वाप आपो हि ष्ठेत्यपः स्पृशेत्, द्विः परिमृज्योष्ठौ पादौ चाभ्युक्ष्य मूर्धनि खानि चोपस्पृशेदद्भिरात्मानं हृदयं शिरश्च ॥२८॥

उत्तमाज्यं गव्यघृतम् । आशासान इति च्छेदः । अग्निर्मे इत्यादिनाऽऽपो हि ष्ठेत्यन्तः स्नानमन्त्रः ॥२८॥

ब्रह्मचर्यज्ञानदानमैत्रीकारुण्यहर्षोपेक्षाप्रशमपरश्च स्यादिति ॥२९॥

मैत्री सर्वभूतेष्वात्मनी(व) प्रवृत्तिः ॥२९॥

तत्र श्लोकाः—

पञ्चपञ्चकमुद्दिष्टं मनो हेतुचतुष्टयम् ।
इन्द्रियोपक्रमेऽध्याये सद्वृत्तमखिलेन च ॥३०॥

स्वस्थवृत्तं यथोद्दिष्टं यः सम्यगनुतिष्ठति।
स समाः शतमव्याधिरायुषा न वियुज्यते ॥३१॥

नृलोकमापूरयते यशसा साधुसंमतः।
धर्मार्थाविति भूतानां बन्धुतामुपगच्छति ॥३२॥

परान् सुकृतिनो लोकान् पुण्यकर्मा प्रपद्यते।
तस्माद्वृत्तमनुष्ठेयमिदं सर्वेण सर्वदा ॥३३॥

सङ्ग्रहे हेतुचतुष्टयमिति समातिहीनमिथ्यायोगाः ॥३०-३३॥

यच्चान्यदपि किंचित् स्यादनुक्तमिह पूजितम्।
वृत्तं तदपि चात्रेयः सदैवाभ्यनुमन्यते ॥३४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
इन्द्रियोपक्रमणीयो नामाष्टमोऽध्यायः ॥८॥

इति स्वस्थचतुष्को द्वितीयः ॥२॥

अनुक्तप्रवृत्तसङ्ग्रहार्थमाह—यच्चान्यदित्यादि। इह अनुक्तमिति ग्रन्थविस्तरभयादिति भावः ॥३४॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
इन्द्रियोपक्रमणीयः समाप्तः ॥८॥

॥ समाप्तश्च स्वस्थचतुष्कः ॥

नवमोऽध्यायः

अथातः खुड्डाकचतुष्पादमध्यायं व्याख्यास्यामः ॥१॥
इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वन्तु आतुरहितो भेषजचतुष्कः स्वस्थहितश्च स्वस्थचतुष्कोऽभिहितः, सम्प्रत्युभयहितत्वेन निर्देशचतुष्कोऽभिधीयते। स्वस्थातुरहितवैद्यभेषजादिनिर्देशात् निर्देशचतुष्क इति संज्ञा। तत्रापि स्वस्थातुरहितेषु प्रधानभूतचिकित्साङ्गवैद्यादिपादचतुष्टयाभिधायकत्वेन खुड्डाकचतुष्पादमाह— अथात इत्यादि। खुड्डाकशब्दोऽल्पवचनः। चत्वारः पादा वैद्यादयो यत्राध्याये स, तथा अल्पत्वं चास्याध्यायस्य वक्ष्यमाणमहाचतुष्पादापेक्षया ॥१-२॥

भिषग्द्रव्याण्युपस्थाता रोगी पादचतुष्टयम्।
गुणवत् कारणं ज्ञेयं विकारव्युपशान्तये ॥३॥

तानेव चतुरः पादानाह—भिषगित्यादि। अत्र भिषजः प्राधान्यात् प्रागुद्देशः, प्राधान्यं च स्वयमेव वक्ष्यति – गुणवदिति श्रुते पर्यवदातत्वमित्यादिवक्ष्यमाणषोडशगुणयुक्तम्। ननु वैद्यादिव्यापार एव रोगप्रशमे हेतुर्न तु स्वरूपतो वैद्यादय इति, अत एव चतुर्णां भिषगादीनामित्यादिना वैद्यादिव्यापारमेव विकारप्रशमहेतुत्वेन वक्ष्यति तत्कथमुक्तं पादचतुष्टयं विकारव्युपशान्तये कारणमिति ? नैवं, नहि व्यापारेण व्यापारविशेषोऽन्यथासिद्धः कर्तुं पार्यते तथा सति चक्षुरादीनामपि रूपादिज्ञानं प्रति कारणत्वं न स्यात्, इन्द्रियार्थसन्निकर्षेन चान्यथासिद्धेः। तस्माद्वैद्यादय एव स्वव्यापारद्वारा कारणानीति न दोषः ॥३॥

विकारो धातुवैषम्यं, साम्यं प्रकृतिरुच्यते।
सुखसंज्ञकमारोग्यं, विकारो दुःखमेव च ॥४॥

विकारव्युपशान्तय इत्युक्तं तत्किं विकारस्वरूपमित्यत आह–विकारो धातुवैषम्यमिति। धातुशब्देन वातादीनां तथा रजस्तमसोः ग्रहणं, तेन शारीरमानसव्याधिसाधारणमेव तल्लक्षणं ज्ञेयं धातूनां वैषम्यन्तु व्यवह्रियमाणस्वास्थ्यहेतोः स्वमानात् न्यूनाधिक(त्वं) वा। यद्यपि धातुवैषम्यज

एव विकारो यद्वक्ष्यति—"स्वधातुवैषम्यनिमित्तजा ये विकारसङ्घा बहवः शरीरे" (सू० १९.६) इति, तथा **सुश्रुते**ऽप्युक्तं—"वातपित्तकफ-(शोणित)सन्निपातनिमित्तजा" (सु० सू० १.२५ (२) इति, तथाऽपि धातुवैषम्यकार्याः ज्वरादयोऽत्र धातुवैषम्यशब्देनाभिधीयन्ते उपचारात्, उपचाराश्रयणं च यत्तु वैषम्यमुद्वेजकविकारोत्पादनसमर्थं तस्यैव विकार-त्वमिति ज्ञापनार्थमन्यथा रात्रिदिनभोजनावस्थाजनितस्य धातुवैषम्य-स्याल्पत्वेन धातुसाम्यव्यवहार एव। अनयोरेवारोग्यरोगयोः पारिभाषिकं संज्ञाद्वयमाह—"सुखसंज्ञकमारोग्यं विकारो दुःखमेव च।" इति। संज्ञक-ग्रहणेन तथा एव च ग्रहणेन पारिभाषिकीयं संज्ञा न तु लक्षणमिति दर्शयति। तेन स्रक्चन्दनादिजन्यसुखे तद्धेतौ वा स्रक्चन्दनादौ अथवाऽऽ-त्मगुणे दुःखहेतौ वा शीतेत्यादौ नातिव्याप्तिः शङ्कनीया तस्या लक्षणदोष-त्वात्, लक्षणन्तु धातुवैषम्यं धातुसाम्यमित्येव; किवा ननु रात्रिदिन-भोजनानां तासु तास्ववस्थासु श्लेष्मप्रकोपणान्नित्यं धातुवैषम्यमस्ति, तत् कुतो धातुसाम्यमित्यत आह—"सुखसंज्ञकमारोग्यं" इति सुखसंज्ञकं सुखमिति व्यवह्रियमाणमित्यर्थः। एतेन यद्यपि रात्रिदिनभोजनानां तासु तास्ववस्थासु श्लेष्मप्रकोपणादि नित्यमेव धातुवैषम्यमस्ति तथाऽपि लोके तादृशधातुवैषम्ये सुखमिति व्यवहारादारोग्यशब्देनाभिधानं युक्तमेवेत्यर्थः। सुखसंज्ञकमित्यत्र संज्ञकग्रहणेन दुःखाभाव एवेयं सुखसंज्ञा न पुनः परमार्थ-सुखे स्रक्चन्दनादेरिति बोधयति। तथा धातुवैषम्यमात्रस्य बाधितत्वे उक्तरूपधातुवैषम्यस्यापि बाधितत्वं स्यादित्यत आह—विकारो दुःखमेव चेति दुःखमिति दुःखजनकं उद्वेजकज्वरादिविकारोत्पादकं यद्धातुवैषम्य-कृदित्यर्थः। एतेन तत्र भोजनाद्यवस्थाप्रतिनियतस्य धातुवैषम्यस्य दुःखा-जनकत्वान्न विकारत्वमिति भावः। अन्ये त्वाहुः—धातुशब्देन रसादीनां च ग्रहणं तेषामेव धातुशब्दवाच्यत्वात्, तेन धातुवैषम्यमिति यल्लक्षणं तत् शारीरव्याधेरेव, शारीरमानसव्याधिसाधारणन्तु लक्षणं विकारो दुःखमेव चेति; अस्मिंस्तु पक्षे दुःखस्यात्मविशेषस्य न व्याधित्वं किन्तु दुःखहेतुदोषदूष्यसम्मूर्छनविशेषस्यैवेति (एते)न दुःखेषु शीता(द्युपा)-धिषु नातिव्याप्तिः तेषां सम्मूर्छनविशेषाभावात्, **सुश्रुते**ऽप्युक्तं—"तद्दुःख-सयोगा व्याधय" (सु० सू० १.२३) इति। **सुश्रुते**ऽपि संयोगशब्देन सम्यग्योगवाचिना यथोक्तपुरुषसम्मूर्छनविशेषो लभ्यते तेन दुःखार्थं संयुज्यमानानां शीताद्युपाधीनां शरीरसम्मूर्छनविशेषाभावान्न व्याधित्व-मिति ॥४॥

चतुर्णां भिषगादीनां शस्तानां धातुवैकृते।
प्रवृत्तिर्धातुसाम्यार्था चिकित्सेत्यभिधीयते ॥५॥

विकारलक्षणानन्तरं विकारप्रशमहेतोश्चिकित्साया लक्षणमाह—चतुर्णामित्यादि। शस्तानामिति वक्ष्यमाणगुणयोगेन प्रशस्तानाम्। धातुवैकृतमिति विषयोपदर्शनार्थमुक्तं, तेन धातुवैकृते रोगे या धातुसाम्यार्था भिषगादीनां प्रवृत्तिः सा चिकित्सेत्यर्थः ॥५॥

श्रुते पर्यवदातत्वं बहुशो दृष्टकर्मता।
दाक्ष्यं शौचमिति ज्ञेयं वैद्ये गुणचतुष्टयम् ॥६॥

पूर्वं गुणवदित्युक्तं तत्र के ते गुणा इत्यत आह—श्रुते पर्यवदातत्वमित्यादि। श्रुते पर्यवदातत्वमिति निर्मलज्ञानवत्त्वम् ॥६॥

बहुता तत्र योग्यत्वमनेकविधकल्पना।
संपच्चेति चतुष्कोऽयं द्रव्याणां गुण उच्यते ॥७॥

तत्रेति प्रतिकार्ये व्याधौ, अनेकविधकल्पनेति नानाविधस्वरसादिकल्पनायोग्यत्वम्। सम्पदिति स्वरसादिसम्पत्तिः ॥७॥

उपचारज्ञता दाक्ष्यमनुरागश्च भर्तरि।
शौचं चेति चतुष्कोऽयं गुणः परिचरे जने ॥८॥

स्मृतिर्निर्देशकारित्वमभीरुत्वमथापि च।
ज्ञापकत्वं च रोगाणामातुरस्य गुणाः स्मृताः ॥९॥

निर्देशकारित्वमिति वैद्योपदिष्टार्थकर्तृता। अथापि चेतिशब्देन क्वचिद्भीरुत्वं तथाऽस्मृतिरपि गुणो भवतीति दर्शयति; यथा—उन्मादे सर्पेणोद्धृतदंष्ट्रेणेत्यादिना त्रासनमुक्तं, तत्र यदि रोगी अभीरुः स्यात्तदा न चिकित्सा फलति; अस्मृतिस्तु ज्वरवेगागमनकालास्मरणेऽभिप्रेता, यदुक्तं—"ज्वरे वेगं च कालं च चिन्तयञ्ज्वर्यते तु यः। तस्येष्टैश्च विचित्रैश्च प्रयोगैर्नाशयेत् स्मृतिम् ॥" (चि० ३.३२३–३२४) इति ॥९॥

कारणं षोडशगुणं सिद्धौ पादचतुष्टयम्।
विज्ञाता शासिता योक्ता प्रधानं भिषगत्र तु ॥१०॥

———

१. विषये (च. नि.)

इदानीमुक्तेषु पादेषु वैद्यस्य प्राधान्यमाह—कारणमित्यादि। यद्यपि ····रारोग्ये पादचतुष्टयमेव कारणं तथाऽप्यत्र एषु मध्ये भिषगेव प्रधानं कुत इत्यत्र हेतुगर्भाणि विशेषणान्याह—विज्ञातेत्यादि। विज्ञाता औषधस्य, शासिता परिचारकस्यातुरस्य च शासनमेवं कुरु (एवं मा कुर्वि) त्याज्ञापनं, योक्ता आतुरं प्रत्यौषधाद्युपयोक्ता। एतेन वैद्यपराधीना भेषजादीनां प्रवृत्तिः, वैद्यस्तु स्वतन्त्र एव प्रधानम् ॥१०॥

पक्तौ हि कारणं पक्तुर्यथा पात्रेन्धनानलाः।
विजेतुर्विजये भूमिश्चमूः प्रहरणानि च ॥११॥
आतुराद्यास्तथा सिद्धौ पादाः कारणसंज्ञिताः।
वैद्यस्यातश्चिकित्सायां प्रधानं कारणं भिषक् ॥१२॥

एतदेव प्राधान्यं दृष्टान्तमुपन्यस्योपपादयति—पक्तौ हीत्यादि। पक्तौ पाके कर्तव्ये पात्रादि पक्तुः कारणमुपकरणम्। भूमिर्युद्धार्थगुणो देशः। वैद्यस्य सिद्धौ वैद्यकर्तृके आरोग्ये ॥११-१२॥

मृद्दण्डचक्रसूत्राद्याः कुम्भकारादृते यथा।
नावहन्ति गुणं वैद्यादृते पादत्रयं तथा ॥१३॥

अन्वयदृष्टान्तेन प्राधान्यमभिधाय व्यतिरेकदृष्टान्तेनापि वैद्यस्य प्राधान्यं दर्शयति—मृद्दण्डेत्यादि। नावहन्ति न निष्पादयन्ति। गुणं साध्यमित्यर्थः ॥१३॥

गन्धर्वपुरवन्नाशं यद्विकाराः सुदारुणाः।
यान्ति यच्चेतरे वृद्धिमाशूपायप्रतीक्षिणः ॥१४॥
सति पादत्रये ज्ञाज्ञौ भिषजावत्र कारणम्।

अन्वयेन व्यतिरेकेण च पृथग्दृष्टान्तद्वयं दर्शयित्वा कौशलेनैकत्र दृष्टान्ते गन्धर्वपुरेऽन्वये गुणं व्यतिरेके च दोषं दर्शयन्नाह—गन्धर्वेत्यादि। पादत्रये सत्यपि अभिज्ञवैद्योपक्रान्ता विकारा गन्धर्वपुरवदाशु नाशं यान्तीति, यत् तथा इतरे अनभिज्ञवैद्योपक्रान्ता विकारा गन्धर्वपुरवदाशु वृद्धिं यान्तीति यत अत आशुविकारशान्तौ आशुविकारवृद्धौ च यथासंख्यं ज्ञाज्ञौ भिषजौ कारणम्। ननु केचन विकाराः स्वभावादेव नश्यन्ति स्वभावादेव वर्धन्त इति न भिषगादिकारणापेक्षेत्यत आह—उपायप्रतीक्षिण इति। वृद्धौ शान्तौ च कारणसापेक्षाः। एतेन कारणसापेक्षाणां न तदन्तरेणोदय इत्यन्वयव्यतिरेकाभ्यां तथाविधभिषजोः कारणत्वमिति भावः ॥१४॥—

वरमात्मा हुतोऽज्ञेन न चिकित्सा प्रवर्तिता ॥१५॥

पाणिचाराद्यथाऽचक्षुरज्ञानाद्भीतभीतवत् ।
नौर्मारुतवशेवाज्ञो भिषक् चरति कर्मसु ॥१६॥

इदानीमज्ञवैद्येन चिकित्सा न कार्येत्याह—वरमित्यादि । पाणिचारात् हस्तपरामर्शतः । कर्मसु चिकित्सासु यद्यनभिज्ञः ॥१५॥१६॥

यदृच्छया समापन्नमुत्तार्य नियतायुषम् ।
भिषङ्मानी निहन्त्याशु शतान्यनियतायुषाम् ॥१७॥

यदृच्छया समापन्नमिति यदृच्छया घुणाक्षरन्यायेन समापन्नं सम्यगुपक्रान्तम् । नियतायुषमित्यनेनायुर्बलेनैवोत्तीर्णव्याधिमित्यर्थः । आत्मानमभिषजं भिषक्त्वेन मन्यते भिषङ्मानी । अनियतायुषामिति यत्रायुःकारणं बलवत् कर्म नास्ति, तत्र पुरुषकारापराधेन वैद्यदोषान्मरणं भवतीति दर्शयति ॥१७॥

तस्माच्छास्त्रेऽर्थविज्ञाने प्रवृत्तौ कर्मदर्शने ।
भिषक् चतुष्टये युक्तः प्राणाभिसर उच्यते ॥१८॥

शास्त्र इति शास्त्रधारणे । अर्थविज्ञान इति शास्त्रार्थबोधे । प्रवृत्तौ स्वयं कर्मकरणे । युक्त इति उद्युक्तः उद्योगनिष्पादितगुणप्रकर्ष इति यावत् । प्राणान् गच्छतो व्यावर्तयतीति प्राणाभिसरः ॥१८॥

हेतौ लिङ्गे प्रशमने रोगाणामपुनर्भवे ।
ज्ञानं चतुर्विधं यस्य स राजार्हो भिषक्तमः ॥१९॥

शस्त्रं शास्त्राणि सलिलं गुणदोषप्रवृत्तये ।
पात्रापेक्षीण्यतः प्रज्ञां चिकित्सार्थं विशोधयेत् ॥२०॥

विद्या वितर्को विज्ञानं स्मृतिस्तत्परता क्रिया ।
यस्यैते षड्गुणास्तस्य न साध्यमतिवर्तते ॥२१॥

विद्या मतिः कर्मदृष्टिरभ्यासः सिद्धिराश्रयः ।
वैद्यशब्दाभिनिष्पत्तावलमेकैकमप्यतः ॥२२॥

यस्य त्वेते गुणाः सर्वे सन्ति विद्यादयः शुभाः ।
स वैद्यशब्दं सद्भूतमर्हन् प्राणिसुखप्रदः ॥२३॥

लिङ्गे इति पूर्वरूपादिचतुष्टये प्रशमने उत्तररोगध्वंसे। रोगाणामपुनर्भवे इति अनागताबाधप्रतीकारे। पात्रापेक्षीणीति गुणवति पात्रे सद्गुणानि, दोषवति पात्रे दोषवन्ति भवन्तीत्यर्थः। विशोधयेदिति सद्गुरुसच्छास्त्रसेवादिभिर्निर्मलीकुर्यादित्यर्थः। विद्या वैद्यकशास्त्रज्ञानम्। वितर्कः शास्त्रमूलक ऊहापोहः। विज्ञानं शास्त्रान्तरज्ञानम्। स्मृतिः पूर्वोदितार्थानुसन्धानम्। तत्परता चिकित्सायां प्रयत्नातिशयवत्त्वम्। क्रिया पुनः पुनश्चिकित्साकरणम्। मतिरिति सहजविशुद्धमतिः। सिद्धिः प्रायशो व्याधिप्रशामकत्वम्। आश्रयः सद्गुर्वाश्रयणम्। सद्भूतमिति यथार्थम् ॥१९-२३॥

शास्त्रं ज्योतिः प्रकाशार्थं दर्शनं बुद्धिरात्मनः।
ताभ्यां भिषक् सुयुक्ताभ्यां चिकित्सन्नापराध्यति ॥२४॥

चिकित्सिते त्रयः पादा यस्माद्वैद्यव्यपाश्रयः।
तस्मात् प्रयत्नमातिष्ठेद्भिषक् स्वगुणसंपदि ॥२५॥

(नापराध्यति) अयशोभाग् न भवतीत्यर्थः। वैद्यव्यपाश्रया इति उक्तविधवैद्याधीनाः ॥२४-२५॥

मैत्री कारुण्यमार्तेषु शक्ये प्रीतिरुपेक्षणम्।
प्रकृतिस्थेषु भूतेषु वैद्यवृत्तिश्चतुर्विधा ॥२६॥

वैद्येन यादृश्या बुद्ध्या व्यवहर्तव्यं तां दर्शयति—मैत्रीत्यादि। मैत्री सर्वभूतेष्वात्मनीवाप्रातिकूल्येन प्रवृत्तिः। आर्तेषु कारुण्यं दुःखप्रहाणेच्छा। शक्ये साध्ये व्याधौ प्रीतिः। प्रकृतिरिति मरणं, प्रकृतिस्थेषु असाध्यव्याधिगृहीतत्वादासन्नमरणेषु उपेक्षा जिहासा ॥२६॥

तत्र श्लोकौ—

भिषग्जितं चतुष्पादं पादः पादश्चतुर्गुणः।
भिषक् प्रधानं पादेभ्यो यस्माद् वैद्यस्तु यद्गुणः ॥२७॥

ज्ञानानि बुद्धिर्ब्राह्मी च भिषजां या चतुर्विधा।
सर्वमेतच्चतुष्पादे खुड्डाके संप्रकाशितम् ॥२८॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
खुड्डाकचतुष्पादो नाम नवमोऽध्यायः ॥९॥

भिषग्जितं चिकित्सितं, पादः पादश्चतुर्गुण इति प्रतिपादं चत्वारो गुणा उक्ता इत्यर्थः। ज्ञानानीति हेतौ लिङ्ग इत्यादिना। ब्राह्मो मोक्षानुकूला बुद्धिः मैत्रीकारुण्यादिका ॥२७-२८॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
खुड्डाकचतुष्पादः समाप्तः ॥९॥

दशमोऽध्यायः

अथातो महाचतुष्पादमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

चतुष्पादं षोडशकलं भेषजमिति भिषजो भाषन्ते, यदुक्तं पूर्वाध्याये षोडशगुणमिति, तद्भेषजं युक्तियुक्तमलमारोग्यायेति भगवान् पुनर्वसुरात्रेयः ॥३॥

पूर्वाध्यायप्रतिपादितस्य पादचतुष्टयस्य रोगहेतुतां व्यवस्थापयितुं महाचतुष्पादोऽभिधीयते। महत्त्वं चास्य पूर्वाध्यायापेक्षया बहुप्रपञ्चत्वेन ज्ञेयम्। पूर्वपक्षावताराय भूमिकां रचयति—चतुष्पादमित्यादि। षोडशकलमिति पूर्वाध्यायोक्तषोडशगुणम्। एतदेव विवृणोति—यदुक्तमित्यादि। युक्तियुक्तमिति—युक्तिः वैद्यादीनामारोग्यार्था प्रवृत्तिः, तेन वैद्यादीनां स्वरूपसत्त्वमात्रं नारोग्यकारणमित्युक्तम्। अलमिति समर्थम् ॥१-३॥

नेति मैत्रेयः, किं कारणं? दृश्यन्ते ह्यातुराः केचिदुपकरणवन्तश्च परिचारकसंपन्नाश्चात्मवन्तश्च कुशलैश्च भिषग्भिरनुष्ठिताः समुत्तिष्ठमानाः, तथायुक्ताश्चापरे म्रियमाणाः; तस्माद्भेषजमकिञ्चित्करं भवति, तद्यथा—श्वभ्रे सरसि च प्रसिक्तमल्पमुदकं, नद्यां वा स्यन्दमानायां पांसुधाने वा पांसुमुष्टिः प्रकीर्ण इति; तथाऽपरे दृश्यन्तेऽनुपकरणाश्चापरिचारकाश्चानात्मवन्तश्चाकुशलैश्च भिषग्भिरनुष्ठिताः समुत्तिष्ठमानाः, तथायुक्ता म्रियमाणाश्चापरे। यतश्च प्रतिकुर्वन् सिध्यति, प्रतिकुर्वन् म्रियते; अप्रतिकुर्वन् सिध्यति, अप्रतिकुर्वन् म्रियते; ततश्चिन्त्यते भेषजमभेषजेनाविशिष्टमिति ॥४॥

किं कारणमित्यत्र निषेध इति शेषः। आरोग्यभेषजयोः कार्यकारणभावे बाधकमन्वयव्यभिचारं दर्शयति। दृश्यन्त इत्यादि। उपकरणं भेषजम्। अनुष्ठिताश्चिकित्सितुमुपक्रान्ताः। तथायुक्ता इति उपकरणवत्त्वादिविशेषणविशिष्टाः। एतेन यस्माद्भेषजे सत्यप्यारोग्यं न दृश्यते तस्माद्भेषजं नारोग्यकारणमिति सिद्धम्। यत्रापि सति भेषजे आरोग्यं दृश्यते तत्रापि भेषजव्यतिरिक्तं कर्मैव दैवसंज्ञकं कारणं, भेषजन्तु तत्र दैवागत-

सन्निधानमकारणमेवेत्यर्थः। अत्रैवार्थे दृष्टान्तद्वयं दर्शयति—तद्यथेत्यादि। स्यन्दमानायामिति वहमानायाम्। एतेन श्वभ्रे गर्ते यथा स्वल्पं जलं श्वभ्रपूरणेऽकिञ्चित्करमेवं म्रियमाणेऽपि भेषजं, यथा च सरसि अन्यत एव सम्पूर्णेऽल्पमुदकमकिञ्चित्करम् एवमन्यत एवारोग्यहेतोः कर्मणो रोगप्रशमने जायमाने भेषजमकिञ्चित्करमिति सरोदृष्टान्तेन दर्शयति। एवं वहमानायां नद्यां प्रकीर्णः पांसुमुष्टिर्नदीवेगरोधे यथा अकिञ्चित्करमेवं म्रियमाणेऽपि भेषजं; यथा च पांसुराशौ अन्यत एवोपचितप्रकीर्णे पांसुमुष्टिरकिञ्चित्कर एवमन्यत एवारोग्यकारणात्कर्मणो रोगप्रशमने जायमाने भेषजमकिञ्चित्करमित्यर्थः। अन्वयव्यभिचारमभिधाय व्यतिरेकव्यभिचारमाह—तथायुक्ता इति अनुपकरणवत्त्वादिविशेषणविशिष्टाः। पूर्वपक्षार्थं सङ्कलय्याह—यतश्चेत्यादि। प्रतिकुर्वन्निति अन्तर्भावितण्यर्थत्वात् प्रतिकारयन्नित्यर्थः, किंवा वैद्यादिद्वारा आतुर एवात्मानं प्रतिकुर्वन्नित्यर्थः, एतेन दैववशादेवातुरो जीवति म्रियते वा, रोगी भवत्यरोगो (वा), न दृष्टभेषजमत्र किञ्चित्करमिति पूर्वपक्षार्थः ॥४॥

मैत्रेय! मिथ्या चिन्त्यत इत्यात्रेयः; किं कारणं, ये ह्यातुराः षोडशगुणसमुदितेनानेन भेषजेनोपपद्यमाना म्रियन्त इत्युक्तं तदनुपपन्नं, न हि भेषजसाध्यानां व्याधीनां भेषजमकारणं भवति; ये पुनरातुराः केवलाद्भेषजादृते समुत्तिष्ठन्ते, न तेषां संपूर्णभेषजोपपादनाय समुत्थानविशेषो नास्ति; यथा हि पतितं पुरुषं समर्थमुत्थानायोत्थापयन् पुरुषो बलमस्योपादध्यात्, स क्षिप्रतरमपरिक्लिष्ट एवोत्तिष्ठेत्, तद्वत् संपूर्णभेषजोपलम्भादातुराः; ये चातुराः केवलाद्भेषजादपि म्रियन्ते, न च सर्व एव ते भेषजोपपन्नाः समुत्तिष्ठेरन्, नहि सर्वे व्याधयो भवन्त्युपायसाध्याः, न चोपायसाध्यानां व्याधीनामनुपायेन सिद्धिरस्ति, न चासाध्यानां व्याधीनां भेषजसमुदायोऽयमस्ति, न ह्यलं ज्ञानवान् भिषङ्मुमूर्षुमातुरमुत्थापयितुं; परीक्ष्यकारिणो हि कुशला भवन्ति, यथा हि योगज्ञोऽभ्यासनित्य इष्वासो धनुरादायेषुमस्यन्नातिविप्रकृष्टे महति काये नापराधवान् भवति, संपादयति चेष्टकार्यं, तथा भिषक् स्वगुणसंपन्न उपकरणवान् वीक्ष्य कर्मारभमाणः साध्यरोगमनपराधः संपादयत्येवातुरमारोग्येण; तस्मान्न भेषजमभेषजेनाविशिष्टं भवति ॥ ५ ॥

सिद्धान्तमाह—मिथ्येत्यादि। वक्ष्यमाणविधया व्यतिरेकव्यभिचारस्य वैदिकस्थानेऽकिंचित्करत्वात्तत्परिहारोऽनतिप्रयोजन इत्यभिसन्धाय भेषज-

मभेषजेनाविशिष्टमिति यदुक्तं तदेव परिहरति—ये ह्यातुरा इत्यादि। केवलादिति सम्पूर्णात् षोडशकलादित्यर्थः। यद्यपि अदृष्टकृतारोग्यस्थलेऽपि भेषजव्यतिरेको नास्ति अन्यतोऽदृष्टमहिम्ना यदृच्छोपनीतस्य व्याध्यादि-विपरीतदेशकालादिरूपयत्किञ्चिद्भेषजस्य तत्रापि सत्त्वात् तथाऽपि षोडशकलभेषजव्यतिरेकोऽस्त्येवेति, अत एव केवलादिति विशेष(ण)-मुक्तम्। कोऽसावुत्थाने विशेष इति जिज्ञासायां दृष्टान्तमुपन्यस्य विशेषं दर्शयति—यथा हीत्यादि। तद्वदिति क्षिप्रतरमक्लिष्टा एवोत्तिष्ठन्ते इत्यर्थः। एतेन यद्यपि षोडशकलभेषजरहितारोग्यस्थले अदृष्टमेवोत्थाने कारणं तथाऽपि यदि दृष्टमपि भेषजं तत्रानुबलं स्यात्तदा (दृष्टा)-दृष्टोभयबलाच्छीघ्रमेवारोग्यं स्यादिति न भेषजम(भेषजेना)विशिष्ट-मित्यर्थः। ननु भेषजमन्तरेणाप्यारोग्यमिति व्यतिरेकव्यभिचारस्य जागरूकत्वात् कथं कारणताग्रहः, न च तृणारणिमणिन्यायेनारोग्यविशेषं प्रत्येव कारणत्वमिति न व्यभिचार इति वाच्यं, वैजात्यकल्पने हि कार्य-गतवैजात्यं प्रयोजकं, न च कार्ये आरोग्ये किञ्चिद्विशेषमनुभवति एवं पश्यामो येन तदन्यथाऽनुपपत्याऽदृष्टव्यतिरिक्तं भेषजरूपं विजातीयं कारणं कल्पनीयमिति। अत्राहुः—भेषजता यदाहाराचारादिरूपं यस्य दोषस्य विकारस्य वा विपरीतं तदसति प्रतिबन्धके तं शमयतीति दृष्टं यथा—कटुकेन श्लेष्मक्षयोऽग्निना शीतप्रशमः, आहारेण क्षुधापगमः, पानीयेन तृषा(प)गमः, स्नेहेन वायुप्रशमः, शीतेन पित्तप्रशम इति सर्वेषाम-बाधितप्रत्यक्षेण, तथा आरोग्यभेषजयोः कार्यकारणभावाभावे आरोग्या-र्थिनां भेषजे (निरर्थके) प्रवृत्तिरेव न स्यादित्यन्यथानुपपत्तिमूलयाऽ-र्थापत्या, (तथा) तथा ज्वरहरं कासी दशमूलीं पिबेदित्यागमसहस्रैश्च आरोग्यभेषजयोः कार्यकारणभावेऽवधृते यत्रापाततः सर्वजनप्रसिद्धदश-मूलादि भेषजमदृष्ट्वैव भेषजव्यतिरेकाभिभावो भवति तत्रापि बलवज्जीव-नादृष्टेन यदृच्छोपनीतस्य दोषादिविपरीतदेशकालाहाराचारादेर्भेषजस्य कारणत्वं केन वार्यते ? न चैवमावश्यकत्वाल्लाघवाच्चादृष्टमेव कारणमस्तु किं पुनरि……ना भेषजेनेति वाच्यं, दृष्टकारणमात्राच्छेदा(पायात्)। न चेष्टापत्तिः, दृष्टकारणानभ्युपगमे दृष्टस्याप्यनुत्पत्तिप्रसङ्गात्, अदृष्टस्यापि दृष्टयागादिजन्यत्वात्। **प्राञ्चस्तु** लौकिकस्थले कारणतया अन्वयव्यति-रेकगम्यत्वे वैदिकस्थलेऽन्वयमात्रागम(स्यै)व कारणता, सति सङ्गे वैदिककर्मणि तदुत्प(न्न)फलस्यावश्यकत्वमित्यन्वयमात्रज्ञानादेवोपपत्तेः व्ययिरेकभागस्य गौरवेणातन्त्रत्वात्। अत एव वैदिकस्थले व्यतिरेकव्य-

भिचारोऽप्रयोजकः, एतदेवोक्तमा**चार्यचरणैः** आगममूलत्वाच्चास्यार्थस्य न दोषो नयति। न च तत्र दोषावहो व्यभिचार इत्यादिकष्टकल्पना युक्ता, उक्तविधया ऋजुमार्गेनैवोपपत्तेः। अपि च यदि व्यभिचारो वैदिकस्थलेऽपि कारणताग्रहपरिपन्थो स्यात् तदा यवैर्यजेत व्रीहिभिर्नेत्यादौ विकल्पितं कारणं कारणमेव न स्यात्, यवकरण(क)व्रीहिकरणकयागयोरेकजातीयफलत्वेन परस्परं व्यभिचारात्। न च तत्रापि फलवैजात्यकल्पनं न्याय्यं, फलवैजात्ये राजसूय-वाजपेययोरिव द्वयोरप्यनुष्ठानप्रसङ्गात्। न च विकल्पे उभयानुष्ठानमुक्तं, विकल्पत्वव्याघातात्। अत एव विकल्पे उभयमप्याश्रीयत इत्यपि वचनं घटते, एकजातीयफलस्यैकेनैवोपपत्तेरपरानुष्ठानवैयर्थ्यात्। लौकिकपक्षे तु तृणारणिमण्यादौ कार्यत्रैजात्यमावश्यकं तत्र कारणताया अन्वयव्यतिरेकगम्यत्वेन व्यतिरेकाव्यभिचारस्यावश्यकत्वात्, विकल्पस्थले तु फलवैजात्यकल्पने राजसूय-वाजपेयादावपि वैकल्पिकी कारणता स्यादिति। ननु यवैर्यजेत व्रीहिभिर्नेत्यादौ फलवैजात्याभावे कारणत्वं दुर्घटं, नियतपूर्ववर्त्तिन एव तथात्वात्; न हि यवकरणकयागनिष्पाद्ये फले व्रीहिकरणकयागस्य पूर्ववर्त्तित्वं न वा व्रीहिकरणकयागनिष्पाद्ये यवकरणकयागस्येति चेन्न, एवं सङ्गात् वैदिककर्मणः फलावश्यकता च इत्युक्तेः, फलानन्तर्येण यवस्यैव वैदिककारणत्वात्। नियतपूर्ववर्त्तित्वं त्वन्वयव्यतिरेकगम्या कारणता लौकिक्येवेति, लोकवेदसाधारणी तु कारणता सहकारिवैकल्यप्रयुक्तकार्याभावत्वमित्याहुः। तदेवं व्यवस्थिते यद्यपि भेषजमन्तरेणाप्यारोग्यं तथाऽपि सति षोडशकले भेषजे आरोग्यमावश्यकमिति चेत् तर्हि असाध्यव्याधीनामपि भेषजसाध्यत्वप्रसङ्ग इत्यत आह—ये चातुरा इत्यादि। म्रियन्त इति भविष्यत्सामीप्ये वर्तमाना मरणयोग्याः भवन्तीत्यर्थः। सर्व एवेति साध्यव्याधयोऽसाध्यव्याधयश्च, असाध्यव्याधिषु षोडशकलभेषजोपपन्नत्वाभावेन समुत्थानाभावादिति भाव एतदेवाह—नहीत्यादि। उपायः षोडशकलं भेषजं, असाध्यव्याधिषु षोडशकलं भेषजमेवाशक्योत्पादमिति तत्साध्यत्वं दूरं पराहतमित्यर्थः। ये तु भेषजसाध्यव्याधयस्ते सत्यामेव भेषजसम्पत्तौ जीवन्ति असत्यान्तु बलवज्जीवनकर्माभावे म्रियन्त एवेति दर्शयन्नाह—न चोपायसाध्यानामित्यादि। उपायेन दृष्टार्थेनैव साध्या उपायसाध्याः। इदमत्राभिसंहितं—द्विविधं कर्म बलवदबलवच्च। तत्र बलवन्नियतविपाककालं, तथेदं कर्मास्मिन्नेव काले मारयति; अबलवच्च मारकं कर्म मारयत्येव परं कालानियमेन यदा दृष्टसामग्रीमपथ्यादिरूपां च सहकारिणीं प्राप्नोति

तदा मारयति, यद्वक्ष्यति—"कर्म किंचित् क्वचित् काले विपाके नियतं महत्। किंचित्त्वकालनियतं प्रत्ययैः प्रतिबोध्यते ॥" (वि० ३.३५) इति। न च वाच्यं अदृष्टमेव दृष्टनिरपेक्षं सर्वत्र कारणं, तच्च नियत[1]-विपाकमेवेति दत्तोत्तरत्वात्; किञ्च यद्दृष्टेनानुपपन्नं तत्रैवादृष्टकल्पना प्रामाणिकी, यत्तु दाहादि दृष्टेनैवाग्निसंबन्धेनोपपद्यते तत्र का कथाऽदृष्टस्य दृष्टकार्यान्यथाऽनुपपत्तिकल्पनीयस्य ? तेन य एव दुर्बलेन कर्मणा दृष्टबलवदपथ्यसेवाजनितदोषबलादारब्धा व्याधयस्ते बलवता चतुष्पाद-सम्पन्नभेषजेन दोषोच्छेदकेन परं साध्याः, तदभावे तु दुर्बलेनापि कर्मणा दृष्टदोषबलादारब्धा व्याधयो न निवर्तन्त इति। यदुक्तं—"दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते। दैवेन चेतरत् कर्म विशिष्टेनोपहन्यते ॥" (वि० ३.३३-३४) इति। अन्वयव्यभिचारं परिहरति—ये पुनरित्यादि। अयमत्रोपस्कारः-ये आतुराः भेषजेनोपपद्यमानाः म्रियन्ते ते किं भेषजसाध्या न वा, यदि तावद्भेषजसाध्याः तर्हि कथं भेषजस्याकारणत्वं विरोधादित्यभि-प्रायवानाह—न हि भेषजसाध्यानामित्यादि। अथ साध्याः तर्हि कथम-न्वयव्यभिचारो यथोक्तषोडशकलभेषजसमुदायस्यैवाभावादित्याह—न चासाध्यानामित्यादि। कुतो नास्तीत्याह—न ह्यलमित्यादि। न ह्यलं न समर्थ इत्यर्थः; असाध्ये व्याधौ चिकित्सां कुर्वन् वैद्यो यद्यसाध्यतां जानाति तदा न प्रवर्तत एव, अथ न जानाति तदा ज्ञानवानेव न भवतीति कथं चतुष्पादसम्पत्तिरिति भावः। चतुष्पादसम्पदाऽवश्यं व्याधि-प्रशमो भवतीति दृष्टान्तेनाह—यथा हीत्यादि। अस्यन् क्षिपन्। अनपराध इति लक्ष्यभ्रंशरहितः। इष्टं कार्यं लक्ष्यवेधनम् ॥५॥

इदं च नः प्रत्यक्षं—यदनातुरेण भेषजेनातुरं चिकित्सामः, क्षामम-क्षामेण, कृशं च दुर्बलमाप्याययामः, स्थूलं मेदस्विनमपतर्पयामः, शीते-नोष्णाभिभूतमुपचरामः, शीताभिभूतमुष्णेन, न्यूनान् धातून् पूरयामः, व्यतिरिक्तान् ह्रासयामः, व्याधीन् मूलविपर्ययेणोपचरन्तः सम्यक् प्रकृतौ स्थापयामः; तेषां नस्तथा कुर्वतामयं भेषजसमुदायः कान्ततमो भवति ॥६॥

भेषजस्य रोगप्रशमकत्वे प्रत्यक्षमपि प्रमाणयति—इदं चेत्यादि। अनातुरेणेत्यातुरगुणविपरीतेन। एतदेव विवृणोति—क्षाममक्षामेणेत्यादि।

---

१. नियतकाल[1]

क्षामो निर्द्रवः। आप्याययाम इति सन्तर्पयामः। व्यतिरिक्तानिति विशेषेणातिरिक्तानधिकान्। मूलविपर्ययेणेति हेतुविपर्ययेण, तच्च प्रभावादि(ति) बोध्यं; तेन विषविकारस्य विषोपचारणमेतत्प्रकारं[1] चान्यदुपगृहीतं स्यात् ॥६॥

भवन्ति चात्र—

साध्यासाध्यविभागज्ञो ज्ञानपूर्वं चिकित्सकः।
काले चारभते कर्म यत्तत् साधयति ध्रुवम् ॥७॥

स्वार्थविद्यायशोज्यानिमुपक्रोशमसंग्रहम् ।
प्राप्नुयान्नियतं वैद्यो योऽसाध्यं समुपाचरेत् ॥८॥

ज्ञानपूर्वमिति भेषजादिज्ञानपूर्वं, यत् कर्म चिकित्सक आरभते तत्कर्म चिकित्सितरूपं कर्त्तृ साधयति साध्यमिति शेषः। असाध्यव्याधिचिकित्सायां दोषमाह—स्वार्थविद्येत्यादि। ज्यानिर्हानिः। उपक्रोशो जनापवादः। असङ्ग्रहश्चिकित्सार्थमनुपादानम् ॥७-८॥

सुखसाध्यं मतं साध्यं कृच्छ्रसाध्यमथापि च।
द्विविधं चाप्यसाध्यं स्याद्याप्यं यच्चानुपक्रमम् ॥९॥

साध्यानां त्रिविधश्चाल्पमध्यमोत्कृष्टतां प्रति।
विकल्पो, न त्वसाध्यानां नियतानां विकल्पना ॥१०॥

साध्यासाध्ययोर्भेदकथमपूर्वकं लक्षणमाह—सुखसाध्यमित्यादि। अनुपक्रममिति चिकित्सानर्हम्। प्रकारान्तरेण साध्ययाप्ययोर्भेदमाह—साध्यानामित्यादि। साधनं चिकित्सा, तद्योग्यानां तेन याप्यस्यापि ग्रहणम्। अल्पमध्यमोत्कृष्टतां प्रतीति अल्पमध्यमोत्कृष्टतायोगादित्यर्थः, तेनाल्पोपायसाध्यो मध्यमोपायसाध्य उत्कृष्टोपायसाध्य इति भेदत्रयं साध्यानां स्यात्। एवं याप्यानामप्यल्पोपाययाप्यत्वादिभेदो बोध्यः। असाध्यानां नियतानामिति नियमेन ये असाध्या अनुपक्रमा तेषामीदृशी विकल्पना नास्ति, असाध्ये उपायस्याकिंचित्करत्वेन भेदकत्वाभावात् ॥९-१०॥

हेतवः पूर्वरूपाणि रूपाण्यल्पानि यस्य च।
न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेत् ॥११॥

———————

१. मेतत् प्रत्यक्षं[1]

न च कालगुणस्तुल्यो न देशो दुरुपक्रमः।
गतिरेका नवत्वं च रोगस्योपद्रवो न च ॥१२॥
दोषश्चैकः समुत्पत्तौ देहः सर्वौषधक्षमः।
चतुष्पादोपपत्तिश्च सुखसाध्यस्य लक्षणम् ॥१३॥

अथ साध्यादिलक्षणमाह—हेतव इत्यादि। न दोषः प्रकृतिर्भवेदिति व्याध्यारम्भको यो दोषः स चेत्पुरुषस्य प्रकृतिर्न स्यादित्यर्थः। देशो भूमिरातुरश्च, तत्र भूमिरूपो देशो दुरुपक्रमो यथा—वातव्याधौ तुल्यगुणो मरुरित्यादि। देहो दुरुपक्रमो यथा—सर्वव्याधीनामेव मर्मलक्षणो देशः, तथा वातव्याधे पक्वाशय इत्यादि। गतिरिति मार्गः, गतिस्तिस्रैषणीये वाच्या। इदं चोत्सर्गवचनं तेन क्वचिद्व्याधिप्रभावादन्यथापि भवति यथा—"ज्वरे तुल्यर्तुदोषत्वं प्रमेहे तुल्यदूष्यता। रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणम्।" इति। ननु दोषश्चैकः समुत्पत्तावित्यसङ्गतं, सर्वेषामेव रोगाणां त्रिदोषजत्वात्, यदुक्तं—"न रोगोऽप्येकदोषज" इति, नैवं "सर्वदेहचरास्तु वातपित्तश्लेष्माण" इति वचनात् एकस्मिन् दोषे दुष्टे तत्कृता इतरदोषेऽप्यवश्यम्भाविनी काचिद्दुष्टिः दुष्टदोषसम्बन्धात्; किं च स्वकारणाद्वृद्धो वायुः शीतस्य श्लेष्मणो बलमादधाति, लाघवात्तेजोरूपस्य पित्तस्य; पित्तं च कटुत्वाद्वायोः द्रवत्वात् श्लेष्मणः, श्लेष्माऽपि शैत्याद्वायोः द्रवत्वात् पित्तस्येति अभिप्रेत्य उक्तं—"न रोगोऽप्येकदोषज" इति। अनेनैवाभिप्रायेण "एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्" इत्युक्तम्। यत्र तु स्वकारणादेको द्वौ त्रयोऽपि वा कुपितास्तत्र एकज-द्वन्द्वज-त्रिदोषजव्यपदेश इति सिद्धान्तः। एवं सर्वत्रैवंजातीये ज्ञेयम् ॥११-१३॥

निमित्तपूर्वरूपाणां रूपाणां मध्यमे बले।
कालप्रकृतिदूष्याणां सामान्येऽन्यतमस्य च ॥१४॥
गर्भिणीवृद्धबालानां नात्युपद्रवपीडितम्।
शस्त्रक्षाराग्निकृत्यानामनवं कृच्छ्रदेशजम् ॥१५॥
विद्यादेकपथं रोगं नातिपूर्णचतुष्पदम्।
द्विपथं नातिकालं वा कृच्छ्रसाध्यं द्विदोषजम् ॥१६॥

कृच्छ्रसाध्यलक्षणमाह—निमित्तपूर्वरूपाणामित्यादि। कालप्रकृति-दूष्याणाम्मध्ये एकतमस्य दोषेण सह सामान्ये सतीत्यर्थः। गर्भिण्यादीनां

सर्व एव व्याधिः कृच्छ्रसाध्य इति ज्ञेयम्। नात्युपद्रवपीडितमिति स्वतन्त्रमेव लक्षणम्। शस्त्रक्षाराग्निकृत्याः शस्त्रादिसाध्याः; एषां यो व्याधिस्तं कृच्छ्रसाध्यं विद्यादित्यन्वयः। कृच्छ्रदेशो मर्मसन्ध्यादिः। नातिपूर्णचतुष्पदमित्येकपथमित्यस्य विशेषणम्। नातिकालमिति द्विपथमित्यस्य विशेषणम् ॥१४-१६॥

शेषत्वादायुषो याप्यमसाध्यं पथ्यसेवया।
लब्धाल्पसुखमल्पेन हेतुनाऽऽशुप्रवर्तकम् ॥१७॥
गम्भीरं बहुधातुस्थं मर्मसन्धिसमाश्रितम्।
नित्यानुशायिनं रोगं दीर्घकालमवस्थितम्।
विद्याद्द्विदोषजं, तद्वत् प्रत्याख्येयं त्रिदोषजम्।
क्रियापथमतिक्रान्तं सर्वमार्गानुसारिणम् ॥१९॥
औत्सुक्यारतिसंमोहकरमिन्द्रियनाशनम्।
दुर्बलस्य सुसंवृद्धं व्याधिं सारिष्टमेव च ॥२०॥

शेषत्वादित्यादिना विद्याद्द्विदोषजमित्यन्तेन याप्यलक्षणमाह—एतादृशमसाध्यं व्याधिमायुषः शेषत्वात् याप्यं विद्यादित्यन्वयः। याप्यमसाध्यमिति याप्यसंज्ञकमसाध्यमित्यर्थः, एतेनायुःशेषे सत्येव याप्यव्याधिप्रादुर्भावो भवतीति शेषत्वादायुषः इत्यनेन बोधयति। कीदृशं—पथ्यसेवया लब्धाल्पसुखम्। प्रवर्तनं प्रवर्तः, अल्पेनापि हेतुना आशु शीघ्रं प्रवर्तनं यस्य, स्वार्थे कः। दन्त्यसकारपाठेऽपि सुष्ठुता शीघ्रत्वमेव। गम्भीरं गम्भीरमेदःप्रभृतिधातुगतम्। नित्यानुशायी नित्यानुषङ्गी। प्रत्याख्येयलक्षणमाह—तद्वदित्यादि। तद्वदित्यनेन गम्भीरादियाप्यलक्षणयुक्तं सत्त्रिदोषजं प्रत्याख्येयं विद्यादिति बोधयति। औत्सुक्यं हर्षोद्रेकः, अरतिरनवस्थितचित्ततारूपा, सम्मोहो मानसो मोहः ॥१७-२०॥

भिषजा प्राक् परीक्ष्यैवं विकाराणां स्वलक्षणम्।
पश्चात्कर्मसमारम्भः कार्यः साध्येषु धीमता ॥२१॥
साध्यासाध्यविभागज्ञो यः सम्यक्प्रतिपत्तिमान्।
न स मैत्रेयतुल्यानां मिथ्याबुद्धिं विवर्धयेत् ॥२२॥

न स मैत्रेयतुल्यानां मिथ्याबुद्धिं विवर्धयेदिति एवंगुणस्य वैद्यस्य नियमेन व्याधिनिवर्तकत्वादिति भावः ॥२१-२२॥

तत्र श्लोकौ--

इहौषधं पादगुणाः प्रभावो भेषजाश्रयः ।
आत्रेयमैत्रेयमती मतिद्वैविध्यनिश्चयः ॥२३॥

चतुर्विधविकल्पाश्च व्याधयः स्वस्वलक्षणाः ।
उक्ता महाचतुष्पादे येष्वायत्तं भिषग्जितम् ॥२४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने महाचतुष्पादो नाम दशमोऽध्यायः ॥१०॥

सङ्ग्रहे औषधमिति भेषजलक्षणं तच्च चतुष्पादं षोडशकलमित्यनेन, पादगुणा इति यदुक्तं पूर्वाध्याये षोडशकलमित्यनेन पादगुणस्मरणं, प्रभावो भेषजाश्रय इति तद्भेषजं युक्तियुक्तमलमारोग्यायेति ॥२३--२४॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां महाचतुष्पादः समाप्तः ॥१०॥

एकादशोऽध्यायः

अथातस्तिस्रैषणीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वाध्याये सुखसाध्यादिलक्षणमुक्तं, तच्च सुखसाध्यत्वादिज्ञानं रोगमार्गज्ञानाधीनं, अतो व्याधिमार्गाभिधायकतयाऽनन्तरं तिस्रैषणीयमाह—अथात इत्यादि। तिस्रैषणाशब्दोऽस्मिन्नस्तीत्यर्थे ईयस्तद्धित इति योगविभागादीयः ॥१–२॥

इह खलु पुरुषेणानुपहतसत्त्वबुद्धिपौरुषपराक्रमेण हितमिह चामुष्मिंश्च लोके समनुपश्यता तिस्र एषणाः पर्येष्टव्या भवन्ति। तद्यथा—प्राणैषणा, धनैषणा, परलोकैषणेति ॥३॥

इहेति बुभुक्षुमुमुक्षुपुरुषाधिकारे, एतच्च यथायोग्यं बोध्यं, तेन धनैषणा बुभुक्षुणैवेष्टव्या, अन्यद् द्वयन्तूभाभ्यामेव। इष्यते अन्विष्यते अनयेत्येषणा। परलोकोपकारकस्य धर्मस्य तथा तत्त्वज्ञानस्य च एषणा परलोकैषणा। कामैषणा तु प्राणैषणाधनैषणयोरन्तर्भावनीया, शरीरधनसाध्यत्वात् कामस्य, एवं मोक्षैषणापि प्राणैषणापरलोकैषणयोरन्तर्भाव्या, मोक्षोऽपि शरीरजन्यतत्त्वज्ञानेन परलोकोपकारकेण यतः साध्यते ॥३॥

आसां तु खल्वेषणानां प्राणैषणां तावत् पूर्वतरमापद्येत। कस्मात्? प्राणपरित्यागे हि सर्वत्यागः। तस्यानुपालनं—स्वस्थस्य स्वस्थवृत्तानुवृत्तिः, आतुरस्य विकारप्रशमनेऽप्रमादः, तदुभयमेतदुक्तं वक्ष्यते च; तद्यथोक्तमनुवर्तमानः प्राणानुपालनाद्दीर्घमायुरवाप्नोतीति प्रथमैषणा व्याख्याता भवति ॥४॥

प्राणैषणायाः प्रथमानुष्ठाने उपपत्तिमाह—आसां त्वित्यादि। तिसृणामेषणानां मध्ये द्वयोरेव पूर्वत्वं, तृतीयायाः सर्वोत्तरत्वेनापूर्वत्वात्; तेन द्वयोस्तरप् इति तरप्प्रत्ययस्य साधुत्वम्। प्राणशब्दो जीवित(वचन एक)वचनान्तोऽप्यस्ति, तेन प्राणप्रत्यवमर्शकं तस्येति पदं न विरुध्यते। प्राणानुपालनादिति करणे ल्युट्, प्राणानुपालनसाधनादित्यर्थः ॥४॥

अथ द्वितीयां धनैषणामापद्येत, प्राणेभ्यो ह्यनन्तरं धनमेव पर्येष्टव्यं भवति; न ह्यतः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः, तस्मादुपकरणानि पर्येष्टुं यतेत। तत्रोपकरणोपायानुव्याख्यास्यामः; तद्यथा—कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि, यानि चान्यान्यपि सतामविगर्हितानि कर्माणि वृत्तिपुष्टिकराणि विद्यात्तान्यारभेत कर्तुं; तथा कुर्वन् दीर्घजीवितं जीवत्यनवमतः पुरुषो भवति। इति द्वितीया धनैषणा व्याख्याता भवति ॥५॥

अथेति प्राणैषणानन्तरम्। द्वितीयामिति प्राणैषणानन्तरं धनैषणा एवावश्यमुपादेयत्वात् तस्या एव द्वितीयत्वमिति भावः। एतदेवाह—प्राणेभ्यो ह्यनन्तरमित्यादि। पापशब्देन पापकार्यं दुःखमुच्यते। पापीय इत्यादि अतिशयितं पापमित्यर्थः। प्राणो उपक्रियतेऽनेनेति उपकरणं धनम्। अन्यान्यपीति प्रतिग्रहाध्यापनादीनि। वृत्तिर्वर्तनं, पुष्टिः धनसम्पत्तिः। जीवतीति धारयतीत्यर्थः, धातूनामनेकार्थत्वात्; किंवा दीर्घं जीवितमिति कालाध्वनोरत्यन्तसंयोग इति द्वितीया, तेन दीर्घं जीवितं जीवतीति क्रियाविशेषणमाहुः ॥५॥

अथ तृतीयां परलोकैषणामापद्येत। संशयश्चात्र, कथं ? भविष्याम इतश्च्युता नवेति; कुतः पुनः संशय इति, उच्यते—सन्ति ह्येके प्रत्यक्षपराः परोक्षत्वात् पुनर्भवस्य नास्तिक्यमाश्रिताः, सन्ति चागमप्रत्ययादेव पुनर्भवमिच्छन्ति; श्रुतिभेदाच्च—

'मातरं पितरं चैके मन्यन्ते जन्मकारणम।
स्वभावं परनिर्माणं यदृच्छां चापरे जनाः ॥ इति।'
अतः संशयः—किं नु खल्वस्ति पुनर्भवो न वेति ॥६॥

परलोकैषणां व्याकरोति—अथेत्यादि। अथ चार्वाकाद्यसम्मतत्वेन परलोकः प्रमाणेन व्यवस्थापनीयः, प्रमाणं च सन्दिग्धसाध्यविषयकं संशयं विना न प्रवर्तते; अतः परलोकविषयकसंशयस्वरूपं जिज्ञासुः पृच्छति—संशयश्चात्र कथमिति—अत्र परलोके किंप्रकारकः संशय इत्यर्थः। संशयस्वरूपमाह—भविष्याम इतश्च्युता न वेति—इतः शरीराच्च्युताः देहान्तरे भविष्यामो न वेति संशय इत्यर्थः। उपसंहारे तु यद्यपि परलोकोऽस्ति न वेति विप्रतिपत्तौ सिद्धः सिद्धिव्याघातः तथाऽपि अहं सुखदुःखोभयजनकमदीयदेहान्यदेहवान्न वेति विप्रतिपत्तिस्वरूपे तात्पर्यमित्यवधेयम्।

संशयहेतुं पृच्छति—कुतः पुनः संशय इति। तत्र वादिविप्रतिपत्तिमेव संशयहेतुमाह—उच्यत इत्यादि। प्रत्यक्षपरा इति प्रत्यक्षमात्रं मन्यमानाः। अस्ति पुनर्भव इति येषां मतं तान् दर्शयति—सन्ति चेति अपर इति शेषः। इच्छन्तीत्यत्र ये इति शेषः। आगमे वेदे, प्रत्ययान्निश्चयादागमप्रामाण्यादित्यर्थः। संशयहेत्वन्तरमाह—श्रुतिभेदाच्चेति। श्रूयत इति श्रुतिः, प्रतिवादिवाक्यं श्रुतिभेदमेवाह—मातरमित्यादि। एके मन्यन्ते जन्मकारणमिति वाक्यं मातरं पितरं तथा स्वभावं तथा परनिर्माणमिति स्थानत्रयेऽपि प्रत्येकं सम्बध्यते; यदृच्छां चापरे जना इत्यत्र तु मन्यन्ते जन्मकारणमित्येव सम्बध्यते। तत्र परलोकं मन्यमानानां परेषामभिप्रायः—मातापितरावेवात्मान्तरनिरपेक्षावपत्योत्पादने कारणं, तेन पूर्वशरीरं परित्यज्य शरीरान्तरपरिग्रहरूप आत्मनः परलोको नास्तीति प्रथमवादिनोऽभिप्रायः। तथा परिदृश्यमानभूतानामेवायं स्वभावो यत् संयोगविशेषान्मिलिताः सन्तश्चेतनं पुरुषादिलक्षणं कार्यविशेषमारभन्ते, तेन नात्र कश्चिच्चेतनाहेतुरात्मा विद्यते यस्य परलोकः स्यादिति स्वभाववादिनोऽभिप्रायः। परेण ऐश्वर्यादिगुणयुक्तेनामुना संसार्यात्मनिरपेक्षेण निर्माणं परनिर्माणं, अत्रापि परस्यात्मनः प्रभावादेव भूतानि चेतयन्ते न पुनः संसार्यात्माऽस्तीति परलोकाभावः। यदृच्छा कारणाप्रतिनियमेन कार्योत्पादः, न कारणप्रतिनियमेन कार्योत्पादोऽवधारयितुं शक्यते, अवधारकप्रमाण्यानवधारणात्, तस्मादचेतनेभ्योऽपि भूतेभ्यश्चेतनोत्पत्तिर्भविष्यतीति न जन्मान्तरीयात्मसिद्धिरिति यादृच्छिकाभिप्रायः। उपसंहरति--इत्यतः संशय इति। एतानि च पुनर्भवप्रतिक्षेपकानि वचनानि पुनर्भवास्तित्ववादिवचनेन समं वादिविप्रतिरूपतायाः संशयकारणानि भवन्तीत्यर्थः॥ ६॥

तत्र बुद्धिमान्नास्तिक्यबुद्धिं जह्याद्विचिकित्सां च। कस्मात्? प्रत्यक्षं ह्यल्पम्; अनल्पमप्रत्यक्षमस्ति, यदागमानुमानयुक्तिभिरुपलभ्यते; यैरेव तावदिन्द्रियैः प्रत्यक्षमुपलभ्यते, तान्येव सन्ति चाप्रत्यक्षाणि॥ ७॥

पुनर्भवास्तित्वपक्षं व्यवस्थापयति—तत्रेत्यादि। विचिकित्सामिति परलोकविषयकं संशयमिति जह्यादित्यर्थः। अत्रैव हेतुं पृच्छति—कस्मादिति। तत्र अप्रत्यक्षत्वात् ये परलोकं न मन्यन्ते तन्मतं दूषयति—प्रत्यक्षं हीत्यादि। अयं भावः–यथा अव्यभिचारिप्रमाजनकत्वेन प्रत्यक्षस्य प्रामाण्यं तथा आगमादीनामपि, ततश्च प्रत्यक्षमात्राविषयत्वेन पुनर्भावाभावो न युक्त इति प्रकरणार्थः। अपि च येन वादिना प्रत्यक्षं प्रमाणमित्युच्यते

तेनापि प्रत्यक्षसाधनेन्द्रियाण्यवश्यमभ्युपेयानि तानि पुनरनुमेयानीति। कथं न प्रत्यक्षं प्रमाणमित्याह—यैरेव तावदित्यादि। न चक्षुःकर्णादेरेव इन्द्रियत्वं प्राप्यकारित्वानुपपत्तेरित्याद्यन्यत्र विस्तरः ॥ ७ ॥

सताञ्च रूपाणामतिसन्निकर्षादतिविप्रकर्षादावरणात् करणदौर्बल्यान्मनोनवस्थानात् समानाभिहारादभिभवादतिसौक्ष्म्याच्च प्रत्यक्षानुपलब्धिः, तस्मादपरीक्षितमेतदुच्यते—प्रत्यक्षमेवास्ति, नान्यदस्तीति ॥८॥

अपि च प्रत्यक्षानुपलब्धिमात्रं न वस्त्वभावनिश्चायकमित्याह—सताञ्चेत्यादि। सतामिति प्रत्यक्षेणैव गृह्यमाणत्वेन सतामित्यर्थः। अतिसन्निकर्षादनुपलब्धिर्यथा—नयनगतकज्जलादेः, अतिविप्रकर्षाद्यथा—दूराकाशगतस्य पक्षिणः, आवरणाद्यथा—कुड्यादिपिहितस्य घटादेः, करणदौर्बल्याद्यथा—कामलाद्युपहतस्य चक्षुषः पटशौक्ल्याद्यप्रतिभान, मनोऽनवस्थानाद्यथा—कान्तामुखनिरीक्षणप्रतिहतमनसः पार्श्वगतवचनाद्यनवबोधः, समानाभिहाराद्यथा—तोयदावमुक्तानामुदविन्दूनां जलाशये पतितानां भेदेनाग्रहणम्, अभिभवाद्यथा—मध्यन्दिने उल्कापातस्य, अतिसौक्ष्म्याद्यथा—त्रिचतुर्हस्तप्रमाणदेशवर्तिनः क्रिमिविशेषलिक्षादेः ॥८॥

श्रुतयश्चैता न कारणं, युक्तिविरोधात्—

आत्मा मातुः पितुर्वा यः सोऽपत्यं यदि संचरेत्।
द्विविधं संचरेदात्मा सर्वो वाऽवयवेन वा ॥ ९ ॥

सर्वश्चेत् संचरेन्मातुः पितुर्वा मरणं भवेत्।
निरन्तरं, नावयवः कश्चित्सूक्ष्मस्य चात्मनः ॥१०॥

सम्प्रति श्रुतिभेदवादिमतं दूषयति—श्रुतयश्चेत्यादि। न कारणमित्यत्र पुनर्भवप्रतिषेध इति शेषः। युक्तिरुपपत्तिः। अयमर्थः—अपत्यशरीरे मातापित्रोः कारणत्वमुभयवादिसिद्धं, केवलमपत्ये चैतन्यहेतोरात्मनः परलोकादागमनमस्ति न वेति विप्रतिपत्तिः। आद्ये सिद्धं न समीहितं, प्रेत्यभावस्य सिद्धत्वात्। द्वितीये कथमपत्ये चैतन्यं चैतन्यहेतोरात्मनोऽभावात्। अथ मातापित्रोश्चैतन्यहेतुर्य आत्मा तत एवापत्येऽपि चैतन्यमिति मन्यते तदपि नोपपद्यते वैकल्योपहतत्वादित्याह—आत्मा मातुरित्यादि। येन वादिना मातापित्रात्मसम्बन्धादेवापत्ये चैतन्यमित्युच्यते, स तु वादी प्रष्टव्यः—किं मातापित्रोर्य आत्मा स मातरं पितरं परित्यज्य सर्वात्मनै-

वापत्यं सञ्चरेत् एकदेशेन वा ? तत्राद्यं दूषयति—सर्वश्चेत्यादि। निरन्तरमिति च्छेदः, यदि मातुरात्मा पितुर्वात्मा सर्वात्मनाऽपत्यं सञ्चरेत्तदा निरन्तरं तत्कालमेव मातुः पितुर्वा मरणं स्यादित्यर्थः। द्वितीयं पक्षं दूषयति—नावयव इत्यादि। सूक्ष्मस्य निरवयवस्य ॥ ९-१०॥

बुद्धिर्मनश्च निर्णीते यथैवात्मा तथैव ते।
येषां चैषा मतिस्तेषां योनिर्नास्ति चतुर्विधा ॥११॥

अथ मा भून्मातापित्रात्मसञ्चारः तयोस्तु बुद्धिर्मनो वाऽपत्यं सञ्चरिष्यति तत एवापत्ये चैतन्यं भविष्यतीत्यत आह—बुद्धिरित्यादि। बुद्धिमनसोः सर्वात्मना सञ्चारे तयो मातापित्रोरबुद्धित्वामनस्कत्वापत्तिः नाप्येकदेशेन, आत्म(वद्) बुद्धिमनसोरपि निरवयवत्वादित्यर्थः। दूषणान्तरमाह—एषामित्यादि। मातापितरावेव चैतन्ये कारणमिति येषां मतिस्तेषां मते जरायुजाण्डजस्वेदजोद्भिज्जलक्षणा चतुर्विधा योनिर्नास्ति नोपपद्यते। यतः संस्वेदजानां मशकादीनां उद्भिज्जानां च गण्डूपदादीनां मातापितरौ न विद्येते, ततस्तेषामचैतन्यं स्यात्, मातापित्रोश्चेतनाकारणयोरभावात् ॥ ११ ॥

विद्यात् स्वाभाविकं षण्णां धातूनां यत् स्वलक्षणम्।
संयोगे च विभागे च तेषां कर्मैव कारणम् ॥१२॥

स्वभाववादिनो भूतचैतन्यपक्षं दूषयति—विद्यादित्यादि। स्वभावकृतं स्वाभाविकम्। षण्णां धातूनामिति पृथिव्यप्तेजोवाय्वाकाशात्मनाम्, एषां च धातुत्वं शरीरधारणाज्जगद्धारणाच्च। लक्षणमिति पृथिव्याः काठिन्यादि, अपां द्रवत्वादि, तेजस उष्णत्वादि, वायोस्तिर्यग्गमनादि, आकाशस्याप्रतीघातादि, आत्मनो ज्ञानादि; एतेनैतदेव परमेषां लक्षणं स्वभावकृतं, न पुनरात्मरहितानामेषां चैतन्यमपि स्वाभाविकमस्ति। तेन चैतन्यस्य शरीरारम्भकभूतेष्वभावात्तदारब्धशरीरेऽपि न चैतन्यं भवितुमर्हति, पृथिव्यादिविशेषगुणानां कारणगुणपूर्वकत्वात्। न चास्ति शरीरकारणेषु भूतेषु सूक्ष्ममात्रया चैतन्यं शरीरे तु स्फुटमतो न कारणगुणपूर्वकतेति चेन्न, घटादावपि चैतन्यप्रसङ्गात्। अथास्ति सूक्ष्ममात्रया तत्रापि चैतन्यमिति चेन्न, मानाभावात्, प्रमाणागोचरस्याप्यङ्गीकारे शशविषाणादेरपि स्वीकारप्रसङ्गात्। नापि चैतन्यं शरीरगुणः तत्कार्यत्वात् क्रियादिवदिति तत्कार्यत्वस्य प्रदीपादावनैकान्तिकत्वात्। अथ संयोगविशेषादेरात्मरहि-

तानां शरीरारम्भकभूतानां चैतन्यमिति चेन्न, मृतशरीरेऽपि चैतन्यप्रसङ्गात् भूतसंयोगस्य तदाऽप्यनिवृत्तिः। अथ मृतशरीरे सर्वाणि भूतानि न सन्तीति कथं तत्र तत्संयोग इति चेन्न, 'शरीरं हि गते तस्मिन्' (शा० १.७४) इति भूतसंयोगमात्रस्य चैतन्यकारणत्वे मानाभावात्। अपि च आत्मरहितानां भूतानां संयोगविशेषादेश्चैतन्यसम्भवे बहूनि चेतनानि स्युः बाल्याद्यवस्थाभेदात्, ततो ज्ञातृभेदात् प्रतिसन्धानानुपपत्तिरिति भावः। अथात्मसम्बन्धेन चैतन्यमस्तु तावतापि कथं प्रेत्यभावसिद्धिरिति ब्रूषे तर्हि सम्बन्धः कर्मणा विना न भवतीति जन्मान्तरकृतकर्मस्वीकारापत्तिरित्यभिप्रायवानाह—संयोगे चेत्यादि। संयोगे गर्भोत्पत्तौ भूतानामात्मसम्बन्धे तथा विभागे भूतानामात्मनो वियोगरूपे मरणे कर्मैव जन्मान्तरकृतमेव नान्यत् तथा च **कणादसूत्रं** तत्संयोगविभागाविति ताभ्यां धर्माधर्माभ्यां जन्ममरणरूपसंयोगविभागावित्यर्थः॥ १२॥

अनादेश्चेतनाधातोर्नेष्यते परनिर्मितिः।
पर आत्मा स चेद्धेतुरिष्टोऽस्तु परनिर्मितिः॥१३॥

अस्तु तर्हि परनिर्मितिपक्ष एवेति चेन्न, विकल्पासहत्वात्। परनिर्माणपक्षे किं परेणात्मना संसार्यात्मनो निर्माणमित्युच्यते आत्मरहितस्य शरीरमात्रस्य वा परनिर्माणमभिप्रेतं? तत्राद्यं दूषयति—अनादेरित्यादि। अनादेरिति प्रागभावाप्रतियोगिनः। न चापक्षधर्मत्वं हेतोः शङ्कनीयं, शरीरे नित्यस्य प्रतिपादयिष्यमाणत्वात्। द्वितीयेऽनुमतिरेवोत्तरमित्याह—पर आत्मा इत्यादि। हेतुरिष्ट इति शरीरोत्पादे इति शेषः। अस्तु परनिर्मितिरिति ईदृशि प्रेत्यभावाविरोधिनि परनिर्मितिवस्तुनि न नः क्षतिरिति। न च परमात्मप्रभावादेव भूतानि चेतयन्त इति युक्तं, घटादीनामपि चैतन्यप्रसङ्गात्। न च कानिचिदेव चेतयन्ते न सर्वाणीति वाच्यं, विनिगमकाभावादिति स्वयमूह्यम्॥ १३॥

न परीक्षा न परीक्ष्यं न कर्ता कारणं न च।
न देवा नर्षयः सिद्धाः कर्म कर्मफलं न च॥१४॥

नास्तिकस्यास्ति नैवात्मा यदृच्छोपहतात्मनः।
पातकेभ्यः परं चैतत् पातकं नास्तिकग्रहः॥१५॥

चरमं पक्षं दूषयति—न परीक्षेत्यादि। यदृच्छावादी खलु एकमपि प्रमाणं न मन्यते, तेन तन्मते परीक्षादिहेतूनां प्रमाणसंभा ···· ···· यो न

सन्ति, ततश्च प्रमाणं विनैव यत्किंचित् प्रलपतो यादृच्छिकस्य वचनमुपेक्षणीयम्। यदृच्छोपहतात्मन इति यदृच्छया प्रमाणशून्यपक्षतया उपहत आत्मा बुद्धिर्यस्य ···· ···· (यादृच्छिक)पक्षस्य वर्जनीयतां दर्शयति—पातकेभ्य इत्यादि नास्तिकतां परित्यज्य कर्तव्यं ···· ···· ॥ १४-१५ ॥

तस्मान्मतिं विमुच्यैताममार्गप्रसृतां बुधः।
सतां बुद्धिप्रदीपेन पश्येत्सर्वं यथातथम् ॥१६॥

(नास्तिकतापरित्यागेन यथाकर्तव्यतामाह—तस्मादि)त्यादि। एतां मतिमिति नास्तिक्यबुद्धिम्। बुद्धेः प्रकाशको दीपः प्रत्यक्षादिप्रमाणं ते(न पश्येदित्यर्थः। यथा)तथमिति यथास्वरूपम् ॥ १६ ॥

द्विविधमेव खलु सर्वं सच्चासच्च; तस्य चतुर्विधा परीक्षा—आप्तोपदेशः, प्रत्यक्षम्, अनुमानं, युक्तिश्चेति ॥१७॥

प्रमाणेन सर्वं पश्येदित्युक्तमतः प्रमाणविषयस्य विभागः कथं (स्यादि)त्याह—द्विविधमित्यादि। परीक्ष्यतेऽनया परीक्षा प्रमाणम् १७ ॥

आप्तास्तावत्—
रजस्तमोभ्यां निर्मुक्तास्तपोज्ञानबलेन ये।
येषां त्रिकालममलं ज्ञानमव्याहतं सदा ॥१८॥

आप्ताः शिष्टा विबुद्धास्ते तेषां वाक्यमसंशयम्।
सत्यं, वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमाः ॥१९॥

आप्तोपदेशस्याप्तज्ञानजन्यत्वात् प्रथममाप्तस्वरूपमाह—आप्तास्तावदित्यादि। ज्ञायतेऽनेनेति ज्ञानं योगः, तेन तद्वदनेन ज्ञानमव्याहतमिति नानुपपत्तिः, किंवा रजस्तमोविनिर्मुक्तता हेतुः, सत्यमिति च्छेदः। तद्वाक्यसत्यत्वे हेतुमाह—वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमा इति। नीरजस्तमा इति तमप्प्रत्ययान्तः शब्दः, नीरजस्त्वप्रकर्षेण च तमोऽपि निरस्तं भवति "नारजस्कं तमः" (वि० ६.९) इति वचनेन रजस्तमसोः नित्यसम्बन्धस्योक्तत्वात्। कस्मादिति—असत्यं हि मिथ्याज्ञानादभिधीयते, सम्यग्ज्ञानेऽपि रागद्वेषाभ्यां वा, तत्त्रितयमेवाप्ते नास्तीत्यर्थः। 'नीरजस्तमसो मृषा' इत्यपि पाठः ॥ १८-१९ ॥

आत्मेन्द्रियमनोर्थानां सन्निकर्षात् प्रवर्तते।
व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते ॥२०॥

लौकिकप्रत्यक्षलक्षणमाह—आत्मेन्द्रियेत्यादि । व्यक्ता इत्यनेनायथार्थबुद्धिं संशयं च व्यवच्छिनत्ति । तदात्वे इति तत्क्षणम्; एतच्च प्रत्यक्षज्ञानानन्तरोत्पन्नानुमानज्ञाने स्मरणे च परम्परया आत्मेन्द्रियमनोऽर्थसन्निकर्षजे प्रत्यक्षताभ्रमनिरासार्थम् । आत्मादिचतुष्टयसन्निकर्षाभिधानं च प्रत्यक्षकारणाभिधानपरं; तेनेन्द्रियजन्यज्ञानत्वमात्रं लक्षणतया बोध्यम् । तथा च सन्निकर्षस्य संयोगादित्वेऽननुगम इत्यपि दूषणं परिहृतं भवति, सन्निकर्षस्य लक्षणान्तर्भूतत्वात् । जनकं चेन्द्रियत्वेन विवक्षितं, तेन स्मृत्यर्थमित्यादौ नातिव्याप्तिः, तत्र हि मनस इन्द्रियत्वेन न हेतुत्वं किन्तु मनस्त्वेनेति. इन्द्रियत्वं च न शरीरसंयुक्तं साक्षात्प्रतीतिसाधनमतीन्द्रियमिति साक्षात्प्रतीतिसाधनत्वेनेन्द्रियनिरूपणं तन्निरूपणे चेन्द्रियनिरूपणमित्यन्योन्याश्रयप्रसङ्गात् । तस्मात् स्मृतिजनकज्ञानहेतुमनसः संयोगाश्रयत्वं प्राणशरीरात्मव्यवच्छेदाय, पूर्वविशेषणं आकाशादिव्यवच्छेदाय, ज्ञानहेतुपदं ज्ञानहेतुत्वाल्लोकादिसंयोगाश्रयत्वं घटादावपि, तद्व्यवच्छेदाय मन इति दिक् ॥२०॥

प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते ।
वह्निर्निगूढो धूमेन मैथुनं गर्भदर्शनात् ॥२१॥
एवं व्यवस्यन्त्यतीतं बीजात् फलमनागतम् ।
दृष्ट्वा बीजात् फलं जातमिहैव सदृशं बुधाः ॥२२॥

अत्र अनुमानस्वरूपमाह—प्रत्यक्षपूर्वमित्यादि । प्रत्यक्षग्रहणं व्याप्तिग्राहकप्रमाणोपलक्षकं, तेन प्रत्यक्षपूर्वमित्यस्य व्याप्तिग्राहकप्रमाणपूर्वकमित्यर्थः । एतेन व्याप्तिग्रहणानन्तरं मीयते निश्चीयते येन तदनुमानं गमनं व्याप्तिविशिष्टपक्षधर्मरूपं लिङ्गमित्यर्थः । एतेन लिङ्गदर्शनमनुमितिकरणमित्याहुः, व्याप्तिबलौपाधिकसम्बन्धः तथा सिसाधयिषति साध्यधर्मापेक्ष इति····विस्तरस्तु प्रकृतानु(प)योगान्न कृतः । त्रिविधमिति पूर्ववत् शेषवत् सामान्यतो दृष्टञ्चेति । एतल्लक्षणं च **तत्त्वकौमुद्यां न्यायवार्त्तिकतात्पर्यटीकायां** चानुसन्धेयम्; अन्ये तु केवलान्वयि केवलव्यतिरेकि (अन्वयव्यतिरेकि) चेति त्रैविध्यं; यद्वा कार्यात् कारणानुमानं, यथा—धूमादेरग्न्यनुमानं; तथा कारणाच्च कार्यानुमानं यथा—बधिरस्य भेरीदण्डसंयोगविशेषात् शब्दानुमानं यथा वा चन्द्रोदयात् समुद्रतटानुमानमिति; तथा अकार्यकारणभूतानाञ्चाव्यभिचारिसाहचर्यादनुमानं यथा—गुरुत्वाद्रसानुमानं, संख्याभ्यो वा परिमाणानुमानमित्याहुः । त्रिकालविषयत्वमनुमानस्य यद्दर्शितं तदेवोदाहरणमुपन्यस्य स्पष्टयति—वह्निरित्यादि ।

निगूढ इति अदृश्यत्वेन वर्तमानः, एतेन वर्तमानविषयत्वं, मैथुनमित्यादिना अतीतमित्यनेनातीतविषयत्वं; बीजादित्यादिना जाता इत्यन्तेन भविष्यद्‌विषयत्वं दर्शितम्। बीजात् कारणात् सदृशं फलं कारणानुरूपं कार्यं जातमिति दृष्ट्वा कारणान्तरादपि अनागतं सदृशं फलं तेन व्यवस्यति अनुमिनोति, यथा—धार्मिकस्य यथाविधि गङ्गास्नानादिकं दृष्ट्वा तदनुरूपभाविस्वर्गाद्यनुमानं; यथा वा शाखाया गौरवं दृष्ट्वा भाविपतनानुमानमित्यादि ॥ २१-२२ ॥

जलकर्षणबीजर्तुसंयोगात् सस्यसंभवः।
युक्तिः षड्धातुसंयोगाद्गर्भाणां संभवस्तथा ॥२३॥
मथ्यमन्थनमन्थानसंयोगादग्निसंभवः।
युक्तियुक्ता चतुष्पादसंपद्व्याधिनिबर्हणी ॥२४॥

सहचारदर्शनरूपाया युक्तेरुदाहरणे ज्ञाते युक्तिलक्षणं सुखेन ज्ञायते इत्यभिप्रायेण तदुदाहरणान्येव प्रथमतो दर्शयति—जलकर्षणेत्यादि। कर्षणशब्देन कर्षणसंस्कृता भूमिरुच्यते, जलकर्षणबीजर्तुसंयोगात् सस्यसंभवो भवतीति यज्ज्ञानं तद्युक्तिरिति योज्यम्। एवं षड्धातुसंयोगाद्गर्भसम्भवो भवतीति यज्ज्ञानं तद्युक्तिरित्यादि। मथ्यं मन्थनकाष्ठयन्त्रकं, मन्थनं मन्थानरज्जुः, मन्थानं भ्रम्यमाणकाष्ठम् ॥२३-२४॥

बुद्धिः पश्यति या भावान् बहुकारणयोगजान्।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया ॥२५॥

युक्तेरुदाहरणमुक्त्वा युक्तेर्लक्षणमाह—बुद्धिरित्यादि। या बुद्धिः कारणयोगेन जायमानानर्थान् बहु भूयो भूयः पश्यति प्रमिमीते सा बुद्धिर्युक्तिरिति योजना। तेन जलकर्षणादिकारणयोगे सति सस्यं जायत इत्यादि भूयः सहचारदर्शनस्य युक्तित्वमिति भावः। एषा तु यद्यपि परमार्थतो न प्रमाणं किन्तु प्रमाणसहकारिण्येव तथाऽपि प्रमाणसहायत्वेन व्याप्रियमाणत्वात् तथा तथैव प्रायो लोकानां व्यवहारादिह प्रमाणसमकक्षत्वेनोपन्यस्ता अत एव विमाने युक्तिं विना यथोक्तं प्रमाणत्रयं दर्शयिष्यति। त्रिकालविषयत्वं चास्यास्त्रिकालानुमानसहायत्वेनैव। त्रिवर्गः साध्यते ययेति—प्रायस्त्रिवर्गसाधने प्रवृत्तिर्जनानां बहुतरशिष्टप्रवृत्तिदर्शनादेव, प्रमाणपरिच्छेदेन तु प्रचारो विरल एवेति। अन्ये तु युक्तेः स्वतन्त्रप्रमाणत्वमाहुः, तत्तु न मनोरममित्युपेक्षणीयम् ॥२५॥

एषा परीक्षा नास्त्यन्या यया सर्वं परीक्ष्यते ।
परीक्ष्यं सदसच्चैवं तया चास्ति पुनर्भवः ॥२६॥

उपसंहरति—एषा परीक्षेत्यादि । सदसदिति भावाभावरूपम् । सर्वमेव परीक्ष्यं यया परीक्ष्यत इत्यन्वयः । नास्त्यन्येत्यनेनार्थापत्त्यादीनामेष्वेवान्तर्भावं सूचयति, तथाहि जीवन् देवदत्तो गृहे नास्तीत्यत्र जीवतो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पना अर्थापत्तिरभिमता परेषां, साऽप्यनुमानमेव, सतो गृहाभावदर्शनेन लिङ्गेन बहिर्भावानुमानादिति । तथा भूतलादावभावग्राहकं प्रमाणमनुपलम्भाख्यमिति केचित्, तदपि पक्षेऽन्तर्भूतं चक्षुरादिनैवाभावग्रहणात्, न चेन्द्रियमधिकरणग्रह एवोपक्षीणमभावग्रहपर्यन्तं तद्व्यापारसत्त्वात्, यत्र तु कार्याभावेन कारणाभावज्ञानं तदपि व्याप्तिमूलकत्वेनानुमानमेवेति । सम्भवोऽपि न मानान्तरं, तदुदाहरणं हि खार्यां द्रोणः सम्भवतीत्यादि; तत्र खार्यां द्रोणेऽवगमस्याविनाभावसम्बन्धमूलकत्वादनुमानमेवेति । यत्तु सम्भवति ब्राह्मणे विद्या, सम्भवति क्षत्रिये शौर्यमित्यादि तत्प्रमाणमेव न भवत्यनिश्चायकत्वात् । तथा ऐतिह्यमपि इह राट्पक्षः प्रतिवसतीत्यादिपदपारम्पर्यं न प्रमाणान्तरम्, आप्तोक्तत्वेन शब्द एवान्तर्यातम्, अनाप्तोक्तञ्चेदमप्रमाणमेवेति । उपमानमपि यथा गौस्तथा गवय इति वाक्यं, तस्याप्तोक्तत्वेन आगम एवान्तर्भाव इति दिक् । विस्तरस्तु तत्र तत्रैवानुसन्धेय इति । प्रकृते परीक्षां योजयति—तया चास्ति पुनर्भव इति अस्तीत्युपलभ्यत इत्यर्थः ॥३६॥

आप्तागमस्तावद्वेदः, यश्चान्योऽपि कश्चिद्वेदार्थादविपरीतः परीक्षकैः प्रणीतः शिष्टानुमतो लोकानुग्रहप्रवृत्तः शास्त्रवादः, स चाऽऽप्तागमः, आप्तागमादुपलभ्यते दानतपोयज्ञसत्याहिंसाब्रह्मचर्याण्यभ्युदयनिःश्रेयसकराणीति ॥२७॥

तत्र शब्दस्य पुनर्भवप्रतिपादकत्वं दर्शयति—आप्तागम इत्यादि । यश्चान्य इति आयुर्वेदस्मृतीतिहासादिः । शास्त्ररूपो वादः शास्त्रवादः । आप्तागमादित्यादौ अभ्युदयः स्वर्गः, (निःश्रेयसं मोक्षः) एतेन दानादिजन्यजन्मान्तरोपभोग्यस्वर्गस्य तथा तत्त्वज्ञानजन्यमरणाभावरूपमोक्षस्य चोपदेशेनात्मनः परलोकः कथितो भवतीति भावः ॥२७॥

न चानतिवृत्तसत्त्वदोषाणामदोषैरपुनर्भवो धर्मद्वारेषूपदिश्यते ॥२८॥

आगमान्तरमाह—न चेति। सत्त्वं मनः, तस्य दोषो रजस्तमसी, तेन अनुपहतमनोदोषाणामपुनर्भवो धर्मद्वारेषु धर्मशास्त्रेषु, अदोषैः रागादिरहितैर्महर्षिभिर्नोपदिश्यते, किन्तु पुनर्भव एवोपदिश्यते इत्यर्थः ॥२८॥

धर्मद्वारावहितैश्च व्यपगतभयरागद्वेषलोभमोहमानैर्ब्रह्मपरैराप्तैः कर्मविद्भिरनुपहतसत्त्वबुद्धिप्रचारैः पूर्वैः पूर्वतरैर्महर्षिभिर्दिव्यचक्षुभिर्दृष्ट्वोपदिष्टः पुनर्भव इति व्यवस्येदेवं पुनर्भवम् ॥२९॥

आगमानन्तरमृषिवचनमाह—धर्मद्वारेत्यादि। ब्रह्म अध्यात्मज्ञानम्। कर्मविद्भिरिति यस्य कर्मणो यत्फलं तज्जानद्भिः। कथमेते कर्मफलमतीन्द्रियं जानन्तीत्याह—अनुपहतसत्त्वबुद्धिप्रचारैरिति अव्याहतमनोबुद्धिप्रचारैरिति, अत एव दिव्यचक्षुर्भिः दिव्यमतीन्द्रियार्थदर्शि चक्षुः समाधिरूपं ज्ञानं येषाम्। दृष्ट्वोपदिष्ट इति स्वयमनुभूय कथित इति। व्यवस्येदेवं पुनर्भवमिति इत्येवमुक्तविधया आगमेन पुनर्भवं व्यवस्येन्निश्चिनुयादित्यर्थः ॥२९॥

प्रत्यक्षमपि चोपलभ्यते—मातापित्रोर्विसदृशान्यपत्यानि, तुल्यसंभवानां वर्णस्वराकृतिसत्त्वबुद्धिभाग्यविशेषाः, प्रवरावरकुलजन्म, दास्यैश्वर्यं, सुखासुखमायुः, आयुषो वैषम्यम्, इह कृतस्यावाप्तिः, अशिक्षितानां च रुदितस्तनपानहासत्रासादीनां प्रवृत्तिः, लक्षणोत्पत्तिः, कर्मसादृश्ये फलविशेषः, मेधा क्वचित् क्वचित् कर्मण्यमेधा, जातिस्मरणम्—इहागमनमितश्च्युतानाञ्च भूतानामिति, समदर्शने प्रियाप्रियत्वम् ॥३०॥

यद्यपि पुनर्भवस्य परोक्षत्वेन प्रत्यक्षस्य तद्ग्राहकता नास्ति तथाऽपि पुनर्भवग्राहकानुमानस्य लिङ्गग्रहणेन तद्व्यापारं दर्शयति—प्रत्यक्षमपीत्यादि। उपलभ्यत इत्यत्र पुनर्भवानुमानसहकारितयेति शेषः। विसदृशानीति कश्चित् कुरूपः, कश्चित् सुरूपः। तुल्यसम्भवानां तुल्योत्पादकारणानां कश्चिद्गौर, कश्चित्कृष्णः, एवं स्वरादावपि विशेषो बोध्यः। दास्यैश्वर्यमिति कस्यचिद्दास्यं, कस्यचिदैश्वर्यम्। सुखासुखमित्यायुषो विशेषणम्। एतेन प्रत्यक्षपरिदृश्यमान कार्यवैचित्र्यं कारणवैजात्यमन्तरेणानुपपद्यमानं जन्मान्तरकृतं तत्तद्विजातीयमदृष्टमनुमापयति। अशिक्षितानां चेत्यादि—रुदितादयोऽमी अव्युत्पन्नबालगोचरतया बोध्याः; एते च रुदितादयो यथायोगमिष्टानिष्टस्मरणमन्तरा न भवन्ति, स्मरणं च पूर्वज्ञानं विना न भवतीति पूर्वजन्मज्ञानानुमानात् परलोकानुमापकाः

भवन्ति। लक्षणोत्पत्तिरिति सामुद्रकप्रतिपादितलक्षणोत्पत्तिः। कर्मसादृश्ये सेवादिसादृश्ये। मेधा क्वचिदिति चित्रलेखनास्त्रविद्यादौ। इहागमनमितश्च्युतानां भूतानामिति—इतो जन्मनश्च्युतानामिह जन्मनि पुनरागमनम्, अनेन च नामभ्रान्त्या यमपुरुषैर्नीतस्य पुनरागमनं दृश्यते। समदर्शने तुल्याकारेऽपि क्वचित् पुरुषे प्रियत्वं क्वचित् पुनरप्रियत्वमिति ॥३०॥

अत एवानुमीयते—यत् स्वकृतमपरिहार्यमविनाशि पौर्वदेहिकं दैवसंज्ञकमानुबन्धिकं कर्म, तस्यैतत् फलम्, इतश्चान्यद्भविष्यतीति, फलाद्बीजमनुमीयते; फलं च बीजात् ॥३१॥

एते च लक्षणोत्पत्त्यादयो विशेषा अपि ऐहिककारणान्तरं विना भवन्तः कार्यत्वेन पूर्वजन्मकृतकर्मस्वरूपकारणानुमापकाः मन्तव्याः एतदेवाह—अत एवानुमीयते इति। स्वकृतम् आत्मना कृतम्। अविनाशीत्युपभोगं विना। पौर्वदैहिकमिति पूर्वदेहकृतम्। जन्मान्तराण्यनुबध्नातीत्यानुबन्धिकम्। तस्यैतत् फलमिति उक्तसदृशापत्योत्पादादि अनुमीयत इत्यन्वयः। इतश्चान्यद्भविष्यतीति अत्राप्यनुमीयत इत्यन्वयः, इह जन्मनि कृतात् कर्मणः, अन्यदिति भाविजन्मान्तरं, भविष्यतीत्यनुमीयत इत्यर्थः। एतच्चानुमानद्वयं यथासंख्यं कार्यकारणलिङ्गकमित्याह – फलादित्यादि। फलादिति विसदृशजात्यादिकार्यात् बीजमिति जन्मान्तरकृतकर्मरूपं कारणमनुमीयते; तथा फलं च भाविजन्मान्तरसुखदुःखादि कार्यं बीजादिति एतज्जन्मकृतकर्मरूपात् कारणादनुमीयते। तदत्र पूर्वोक्तसंशये विधिकोटिं साध्यं कृत्वा इदमनुमानं प्रयोक्तव्यम्—अहं सुखदुःखोभयजनकमदीयदेहान्यदेहवान्, शरीरित्वात्, यो यः शरीरी स स सुखदुःखोभयजनकमदीयदेहान्यदेहवान्, यथा चैत्रः सुखदुःखोभयजनकमदीयदेहान्यदेहवत्त्वव्याप्यशरीरित्ववांस्तथाऽहं तस्मात्तथेति ॥३१॥

युक्तिश्चैषा—षड्धातुसमुदयाद्गर्भजन्म, कर्तृकरणसंप्रयोगात् क्रिया, कृतस्य कर्मणः फलं नाकृतस्य, नाङ्कुरोत्पत्तिरबीजात्; कर्मसदृशं फलं, नान्यस्माद्बीजादन्यस्योत्पत्तिः; इति युक्तिः ॥३२॥

प्रत्यक्षवत् युक्तिरपि परलोकसाधने व्याप्रियत इत्याह—युक्तिश्चैषेत्यादि। षड्धातुसमुदयः गर्भजन्मनि करणत्वेन प्रत्येति स च सम्बन्धो जन्मान्तरकृतकर्मणा भवतीति परलोकसिद्धिरिति भावः। कर्तृकरणसंप्रयोगात् क्रियेति—अत्रापि कर्तारं विना क्रिया न भवतीति दृष्ट्वा

परिदृश्यमानयागादिक्रिया आत्मानं कर्तारमनुमापयति, स चात्मा परलोक-सम्बन्ध एवेति परलोकसिद्धिरिति भावः। कृतस्य कर्मण इत्यादि—यथा बीजमन्तरेण नाङ्कुरोत्पत्तिस्तथा जन्मान्तरकृतकर्मव्यतिरेकेण न परिदृश्यमानदास्यैश्वर्यादि फलमिति; जन्मान्तरकृतकर्मसिद्धौ प्रेत्यभाव-सिद्धिरित्यर्थः। कर्मसदृशं फलमिति—शुभकर्मणः शुभमैश्वर्यादि, अशुभस्य कर्मणः पुनरशुभं दारिद्र्यादीति। अत्र दृष्टान्तमाह—नान्यबीजादन्य-स्योत्पत्तिरिति बीजसदृशं फलमित्यर्थः। युक्तिमुपसंहरति—इति युक्ति-रिति ॥३२॥

एवं प्रमाणैश्चतुर्भिरुपदिष्टे पुनर्भवे धर्मद्वारेष्ववधीयेत; तद्यथा—गुरुशुश्रूषायामध्ययने व्रतचर्यायां दारक्रियायामपत्योत्पादने भृत्यभरणेऽतिथिपूजायां दानेऽनभिध्यायां तपस्यनसूयायां देहवाङ्मानसे कर्मण्यक्लिष्टे देहेन्द्रियमनोर्थबुद्ध्यात्मपरीक्षायां मनःसमाधाविति; यानि चान्यान्यप्येवंविधानि कर्माणि सतामविगर्हितानि स्वर्ग्याणि वृत्तिपुष्टिकराणि विद्यात्तान्यारभेत कर्तुं; तथा कुर्वन्निह चैव यशो लभते प्रेत्य च स्वर्गम्। इति तृतीया परलोकैषणा व्याख्याता भवति ॥३३॥

एवं प्रमाणैः परलोकं व्यवस्थाप्य परलोकहितधर्मसाधनान्याह—एवमित्यादि। धर्मद्वारेष्विति धर्मसाधनेषु। अवधीयेतेति तत्परेण भवितव्यमित्यर्थः। कानि तानि धर्मसाधनानीत्याह—तद्यथेत्यादि। अनभिध्यायामिति—अभिध्या परस्वलोभः तन्निराकरणमनभिध्या। गुरुशुश्रूषायामित्यादिसप्तम्यन्तैः सह अवधीयेतेत्यस्य प्रत्येकमन्वयः। देहादिपरीक्षायां तेषां क्षयित्वादिस्वरूपचिन्तनं ततश्च शमोपपन्ना मतिर्भवतीति भावः। मनःसमाधिर्मनसो नियमनम्। धर्मसाधनानामतिविस्तरत्वेन सर्वेषां वक्तुमशक्यत्वात् संक्षेपेणाह—यानीत्यादि। वृत्तिर्जीवनं, पुष्टिः···त्वादिभवनं, तत्समर्थानीत्यर्थः। धनैषणा-परलोकैषणे प्रसङ्गसङ्गत्यैव व्याख्याते, प्राणानुपालनाभिधानं तु प्रकृतम्, अत एवोक्तं तदुभयमुक्तं वक्ष्यते चेति ॥३३॥

अथ खलु त्रय उपस्तम्भाः, त्रिविधं बलं, त्रीण्यायतनानि, त्रयो रोगाः, त्रयो रोगमार्गाः, त्रिविधा भिषजः, त्रिविधमौषधमिति ॥३४॥

त्रय उपस्तम्भा इति—आहारः, स्वप्नो, ब्रह्मचर्यमिति; एभिस्त्रिभिर्युक्ति-

युक्तैरुपस्तब्धमुपस्तम्भैः शरीरं बलवर्णोपचयोपचितमनुवर्तते यावदायुःसंस्कारात् संस्कारमहितमनुपसेवमानस्य, य इहैवोपदेक्ष्यते ॥३५॥

तेन त्रिसंख्यावच्छिन्नत्वप्रसङ्गेनान्यान्यपि प्राणानुपालनानि स्वस्थातुरहितान्याह—प्रधानस्य उप समीपं गत्वा स्तम्भयति धारयतीत्युपस्तम्भः, तेन शरीरस्यार्थसम्वर्तकेन कर्मणा ध्रियमाणस्याहारादयो धारकत्वेनोपस्तम्भा उच्यन्ते। आयतनानीति व्याधिहेतवः। विवृणोति—त्रय इत्यादि। ब्रह्मचर्यशब्देन इन्द्रियसंयमसौमनस्यप्रभृतयो ब्रह्मज्ञानानुगुणाः गृह्यन्त इति **चक्रः**। अन्ये तु अब्रह्मचर्यमित्यकारप्रश्लेषात् स्त्रीसेवेत्याहुः। **वाग्भटे**ऽप्युक्तं—'आहारशयनाब्रह्मचर्यैर्युक्त्या निषेवितैः। शरीरं धार्यते नित्यमागारमिव धारणैः ॥' (अ० हृ० सू० ७.५२) इति। न च तत्रापि ब्रह्मचर्यमित्येव पाठ इति वाच्यम्, तदनन्तरं 'ग्राम्यधर्मे त्यजेन्नारीमनुत्तानां रजस्वलाम्' इत्यादिना स्त्रीसेवाविधेरुद्दिष्टत्वात्। अत एव अत्राब्रह्मचर्यं स्त्रीसेवेति **अरुणदत्तो**ऽपि व्याचष्टे इति। युक्तियुक्तैरिति—युक्तिः प्रशस्ता योजना तया उपयुक्तैरित्यर्थः। यावदायुःसंस्कारादिति—संस्कारशब्दः कारणवचनः, तेनायुःकारणं धर्माधर्मावसानं यावदित्यर्थः। संस्कारमहितमनुपसेवमानस्येति शरीरस्य अहितं कारणमसात्म्येन्द्रियार्थसंयोगादिकमसेवमानस्येत्यर्थः, एतेन सात्म्येन्द्रियार्थसंयोगादिसेवायां सत्यामाहारादीनां शरीरोपस्तम्भकत्वमिति दर्शयति। य इहैवोपदेक्ष्यते इति त्रीण्यायतनानीत्यादिग्रन्थेनेत्यर्थः ॥३४–३५॥

त्रिविधं बलमिति—सहजं, कालजं, युक्तिकृतं च। सहजं यच्छरीरसत्त्वयोः प्राकृतं, कालकृतमृतुविभागजं वयःकृतं च, युक्तिकृतं पुनस्तद्यदाहारचेष्टायोगजम् ॥३६॥

युक्तिराहारचेष्टयोः सम्यग्योजना। सत्त्वं मनः, मनोबलं यदुत्साह उच्यते। प्राकृतं जन्मप्रभृति स्वाभाविकं, दृश्यन्ते हि केचित् स्वभावादेव बलिनो दुर्बलाश्च। ऋतुविभागो हेमन्तादिः। आहारो मांससर्पिरादिः। चेष्टा उचितव्यायामादिरूपा। योगो रसायनादिप्रयोगः ॥३६॥

त्रीण्यायतनानीति—अर्थानां कर्मणः कालस्य चातियोगायोगमिथ्यायोगाः। तत्रातिप्रभावतां दृश्यानामतिमात्रं दर्शनमतियोगः, सर्वशोऽदर्शनमयोगः, अतिश्लिष्टातिविप्रकृष्टरौद्रभैरवाद्भुतद्विष्टबीभत्सनविकृतवित्रासनादिरूपदर्शनं मिथ्यायोगः; तथाऽतिमात्रस्तनितपटहोत्क्रुष्टादीनां शब्दानामतिमात्रं श्रवणमतियोगः, सर्वशोऽश्रवणमयोगः, परुषेष्टविनाशोप-

घातप्रधर्षणभीषणादिशब्दश्रवणं मिथ्यायोगः, तथाऽतितीक्ष्णोग्राभिष्यन्दिनां गन्धानामतिमात्रं घ्राणमतियोगः, सर्वशोऽघ्राणमयोगः, पूतिद्विष्टामेध्यक्लिन्नविषपवनकुणपगन्धादिघ्राणं मिथ्यायोगः; तथा रसानामत्यादानमतियोगः, सर्वशोऽनादानमयोगः, मिथ्यायोगो राशिवर्ज्येष्वाहारविधिविशेषायतनेषूपदेक्ष्यते; तथाऽतिशीतोष्णानां स्पृश्यानां स्नानाभ्यङ्गोत्सादनादीनां चात्युपसेवनमतियोगः, सर्वशोऽनुपसेवनमयोगः, स्नानादीनां शीतोष्णादीनां च स्पृश्यानामनानुपूर्व्योपसेवनं विषमस्थानाभिघाताशुचिभूतसंस्पर्शादयश्चेति मिथ्यायोगः ॥३७॥

अर्थानामित्यनेन इन्द्रियार्थानां रूपादीनां तथा रूपैकार्थसमवेतानां राजादीनामाकृतिविशेषाणां तथा स्पर्शस्य स्पर्शव्यतिरिक्तानां च स्नानाभ्यङ्गादीनां, तथा रसस्य रसव्यतिरिक्तानां च प्रकृतिसंयोगसंस्कारादीनां ग्रहणं, सर्वेषामेवेन्द्रियग्राह्यत्वात्। कर्मण इति त्रिविधस्य कायिकवाचिकमानसिकस्य। कालस्येति शीतोष्णवर्षलक्षणस्य। तत्रेत्यादिना रूपातियोगादीन् विवृणोति— अतिप्रभावतामित्यातपाग्निप्रभृतीनां सर्वशोऽदर्शनमयोग इति अत्राप्यतिप्रभावतामित्यन्वयः। सर्वश इति सर्वथाऽदर्शनमित्यर्थः, तेनातिभास्वररूपस्य हीनमात्रदर्शनं न विकारजनकमिति बोधयति। अतिश्लिष्टमतिनयनप्रत्यासन्नं गण्डस्थलादि, अतिविप्रकृष्टमपि नयनस्यैव, रौद्रमद्भुतकारणात्मकं, भैरवं भयजनकमद्भुतमपि व्याघ्रादि, द्विष्टं यद्यस्य द्वेष्यं, बीभत्सनं मनस उद्वेजकं, विकृतं हीनाङ्गादि, वित्रासनं झटिति भयजनकं पिशाचादि; आदिशब्दादमेध्यादीनां ग्रहणम्। अतिमात्रस्तनितं प्रवृद्धो मेघध्वनिः, अतिमात्रशब्दस्य स्तनितादिभिः सर्वैरन्वयः। पटहोत्क्रुष्टं पटहशब्दः, किंवा (ग्रन्थत्रुटिरस्ति) ॥३७॥

तत्रैकं स्पर्शनमिन्द्रियाणामिन्द्रियव्यापकं चेतःसमवायि, स्पर्शनव्याप्तेर्व्यापकमपि च चेतः, तस्मात् सर्वेन्द्रियाणां व्यापकस्पर्शकृतो यो भावविशेषः सोऽयमनुपशयात् पञ्चविधस्त्रिविधविकल्पो भवत्यसात्म्येन्द्रियार्थसंयोगः; सात्म्यार्थो ह्युपशयार्थः ॥३८॥

स्पर्शनव्याप्तेर्व्यापकमपि चेत इति स्पर्शनेनेन्द्रियाणां व्याप्तिः स्पर्शनव्याप्तिः तस्याश्चेतो व्यापकम्; एतदुक्तं भवति—"यावति प्रदेशे स्पर्शनं तिष्ठति तावन्तं देशं मनोऽपि प्रत्यक्षेणार्थग्रहणार्थं भ्रमति, तेन यस्मिन् प्रदेशे यदा मनो वर्तते तदा तेन प्रदेशेन (चक्षुरादिरूपेणार्थं गृह्णातीति न

युगपज्ज्ञानोत्पत्तिः। व्यापकश्चासौ स्पर्श)श्चेति व्यापकस्पर्शः, तेन कृतस्तन्निबन्धनः सर्वेन्द्रियाणां भावविशेषः स्वभावविशेषोऽर्थग्रहणकारणीभूतः स्पर्श इत्यर्थः। असात्म्येन्द्रियार्थसंयोगं विभजते–सोऽयमित्यादि। सोऽयमिति उक्तरीत्या एकरूपो योऽसात्म्येन्द्रियार्थसंयोगः स एवानुपशयाच्चक्षुरादिपञ्चकस्य दुःखकर्तृत्वात् पञ्चविधविकल्पश्चक्षुरसात्म्येन्द्रियार्थसंयोगो घ्राणासात्म्येन्द्रियार्थसंयोग इत्यादिरूपः सन्, पुनस्त्रिविधविकल्पो भवत्ययोगातियोगमिथ्यायोगरूपेणेति भावः। एवं चैकप्रकारः तथा त्रिप्रकारः तथा पञ्चदशप्रकारो भवत्यसात्म्येन्द्रियार्थसंयोग इत्यर्थः। ननु असात्म्यशब्देन सात्म्यविपरीत उच्यते तत्र सात्म्यशब्दार्थ एव न ज्ञायत इति जिज्ञासायां तदर्थमाह—सात्म्यार्थो ह्युपशयार्थ इति, उपशयो हि सुखजनकत्वम् ॥३८॥

कर्म वाङ्मनःशरीरप्रवृत्तिः। तत्र वाङ्मनःशरीरातिप्रवृत्तिरतियोगः; सर्वशोऽप्रवत्तिरयोगः; वेगधारणोदीरणविषमस्खलनपतनाङ्गप्रणिधानाङ्गप्रदूषणप्रहारमर्दनप्राणोपरोधसंक्लेशनादिः शारीरो मिथ्यायोगः, सूचकानृताकालकलहाप्रियाबद्धानुपचारपरुषवचनादिर्वाङ्मिथ्यायोगः, भयशोकक्रोधलोभलोहमानेर्ष्यामिथ्यादर्शनादिर्मानसो मिथ्या योगः ॥३९॥

इदानीमर्थानामयोगातियोगमिथ्यायोगानभिधाय कर्मणोऽपि तानभिधातुं कर्मस्वरूपमाह—कर्म वाङ्मनःशरीरप्रवृत्तिरिति। प्रवृत्तिश्चेष्टा। अत्र विहितानामेव वाङ्मनःकायकर्मणामतिप्रवृत्तिरतियोगोऽप्रवृत्तिरयोग इति बोध्यं, अविहिताचरणस्य तु सर्वस्य मिथ्यायोगत्वेन वक्तव्यत्वात्। मिथ्यायोगानाह—वेगविधारणेत्यादि। वेगोदीरणमनुपस्थितवेगोदीरणम्। विषमशब्दोऽङ्गप्रणिधानान्तैः सम्बध्यते। स्खलनमुच्चप्रदेशात्, विषममङ्गानां प्रणिधानं विषमोऽङ्गन्यासः। अङ्गप्रदूषणमतिकण्डूयनादिभिः। प्राणोपरोधोऽयथाबलमारम्भादिः। संक्लेशनं मद्यातपवृष्ट्यादिभिः। वाङ्मिथ्यायोगमाह—सूचकेत्यादि। सूचकवचनं परोक्षे परनिन्दा, परिपाटिरहितं वचनमनुपचारवचनं, परुषं निष्ठुरं, इहानृतवचनादयोऽधर्मद्वारेण रोगकराः ॥३९॥

संग्रहेण चातियोगायोगवर्जं कर्म वाङ्मनःशरीरजमहितमनुपदिष्टं यत्तच्च मिथ्यायोगं विद्यात् ॥४०॥

अनुक्तमिथ्यायोगसङ्ग्रहार्थमाह–सङ्ग्रहेणेत्यादि। अहितमिह जन्मनि, अनुपदिष्टमित्यनेन परलोकाहितपरदारसेवादीनां ग्रहणम् ॥४०॥

इति त्रिविधविकल्पं त्रिविधमेव कर्म प्रज्ञापराध इति व्यवस्येत् ॥४१॥

ननु कालबुद्धीन्द्रियार्थानामित्यादिना ग्रन्थेनाऽसात्म्येन्द्रियार्थसंयोग-प्रज्ञापराधपरिणामरूपाः त्रैविध्येन सर्व एव बाह्यहेतवः सङ्गृहीताः तन्नोपपद्यते कर्मासम्यग्योगमादाय तस्य चतुर्थत्वापत्तेरित्याशङ्कानिवारणचिकीर्षुः प्रज्ञापराध एव नामरूपत्रैविध्ये तस्यान्तर्भावमाह—त्रिविधविकल्पमित्यादि। त्रिविधविकल्पमित्यतियोगायोगमिथ्यायोगरूपं, त्रिविधमिति कायवाङ्मनोरूपं, प्रज्ञापराध इति व्यवस्येदिति सर्वस्यैव कर्मासम्यग्योगस्य प्रज्ञापराधमूलकत्वादिति भावः। यद्यपि असात्म्येन्द्रियार्थसंयोगस्यापि प्रज्ञापराधमूलकत्वं यद्वक्ष्यति "प्रज्ञापराधाद्धाऽहितानर्थान्निषेवते" इति; तथाऽपि प्रत्यासन्नकारणत्वेनासात्म्येन्द्रियार्थसंयोग एवायं पृथक् तन्त्रेषूच्यते, प्रज्ञापराधस्य परदारसेवादिमूलकत्वात्। अतएवोन्मादनिदाने साक्षादे**वाचार्यः** कर्मजस्य "प्रज्ञापराधात् संभूते व्याधौ कर्मज आत्मनः। नाभिशंसेद्बुधो देवान्न पितॄन्न च राक्षसान्।" (नि० ७.२१) इति। जनपदोद्ध्वंसनीयेऽपि "तस्य मूलमधर्मः, तन्मूलं वा पूर्वकृतं कर्म;[१] तयोर्योनिः प्रज्ञापराध एव।" (वि० ३.२०) इति ॥४१॥

शीतोष्णवर्षलक्षणाः पुनर्हेमन्तग्रीष्मवर्षाः संवत्सरः, स कालः। तत्रातिमात्रस्वलक्षणः कालः कालातियोगः, हीनस्वलक्षणः (कालः) कालायोगः, यथास्वलक्षणविपरीतलक्षणस्तु (कालः) कालमिथ्यायोगः। कालः पुनः परिणाम उच्यते ॥४२॥

कालातियोगादीन् दर्शयति—शीतोष्णेत्यादि। संवत्सर इत्यनेन शीतादित्रयस्य प्रत्येकं चतुर्मासात्मकत्वं दर्शयति। तेन मार्गशीर्षादि मासचतुष्टयं शीतमित्यादि बोध्यम्। तत्रेत्यादौ स्वलक्षणं शीतादि, यथास्वलक्षणात् शीतादेर्विपरीतं लक्षणं यथा—हेमन्ते वर्षः, वर्षासु शीतमित्यादि। इदानीं कालातियोगादेः परिणामसंज्ञया एकरूपतां दर्शयन् पूर्वोक्तायतनत्रैविध्यं न विरुध्यत इत्याह—कालः पुनः परिणाम उच्यत इति। अतियुक्तायुक्त-

———

१. वाऽसत्कर्म पूर्वकृतं (च० नि०)

मिथ्यायुक्तस्वलक्षणकः काल इत्यर्थः। परिणाम उच्यत इत्यनेन उक्तरूपकालस्य परिभाषिकी संज्ञा इत्थमिति दर्शयति। एतेनाधर्मस्य कालपरिणामेन रोगजनकत्वेन परिणामेऽन्तर्भाव इति ॥४२॥

इत्यसात्म्येन्द्रियार्थसयोगः, प्रज्ञापराधः, परिणामश्चेति त्रयस्त्रिविधविकल्पा हेतवो विकाराणा; समयोगयुक्तास्तु प्रकृतिहेतवो भवन्ति ॥४३॥

आयतनत्रैविध्यमुपसंहरति—इतीत्यादि। तत्र इति अर्थकर्मकालाः, त्रिविधविकल्पा इति अयोगातियोगमिथ्यायोगभेदभिन्ना असात्म्येन्द्रियार्थसंयोगादिसंज्ञका विकाराणां हेतवो भवन्तीत्यर्थः ॥४३॥

सर्वेषामेव भावानां भावाभावौ नान्तरेण योगायोगातियोगमिथ्यायोगान् समुपलभ्येते; यथास्वयुक्त्यपेक्षिणौ हि भावाभावौ ॥४४॥

इदानीं धातुसाम्यवैषम्यहेतुत्वेन सम्यग्योगादीन् प्रतिपाद्य बाह्यानामपि वृक्षघटादीनां सम्यक्स्थितिविनाशयोः सम्यग्योगावेव हेतू इति दृष्टान्तार्थं भावस्वरूपज्ञानार्थञ्चाह—सर्वेषामित्यादि। भावः सम्यगवस्थानं, अभावोऽसम्यगवस्थानं विनाशो वा; योगात्सम्यग्योगाद्भावः, अयोगादिभ्यस्त्वभावः; यथास्वयुक्तिः या यस्य भावस्य अभावस्य वा युक्तिः स्वकारणयुक्तिः, तदपेक्षिणौ भवत इत्यन्वयः। यथा—वृक्षस्य भावः सम्यगवस्थानमनत्यल्पपानीयातपादिस्वकारणयोगमपेक्षते, अभावस्तु पानीयातपातियोगायोगौ वज्राघातादिरूपं च मिथ्यायोगमपेक्षत इत्यादि स्वयमूह्यम् ॥४४॥

त्रयो रोगा इति—निजागन्तुमानसाः। तत्र निजः शारीरदोषसमुत्थः, आगन्तुर्भूतविषवाय्वग्निसंप्रहारादिसमुत्थः, मानसः पुनरिष्टस्य लाभाल्लाभाच्चानिष्टस्योपजायते ॥५४॥

त्रयो रोगा इति यदुक्तं तद्विवृणोति—त्रय इत्यादि। इष्टस्य लाभाज्जायते कामहर्षादिः, अनिष्टस्य प्रियवियोगादेर्लाभाज्जायते शोकादिः, यदा तु इष्टालाभाल्लाभाचानिष्टस्येति पाठः; तदा चकारादिष्टलाभोऽपि हेतुर्बोध्यः ॥४५॥

तत्र बुद्धिमता मानसव्याधिपरीतेनापि सता बुद्ध्या हिताहितमवेक्ष्यावेक्ष्य धर्मार्थकामानामहितानामनुपसेवने हितानां चोपसेवने प्रयतितव्यं, न ह्यन्तरेण लोके त्रयमेतन्मानसं किंचिन्निष्पद्यते सुखं वा दुःखं वा;

तस्मादेतच्चानुष्ठेयं—तद्विद्यानां चोपसेवने प्रयतितव्यम्, आत्मदेशकुलकालबलशक्तिज्ञाने यथावच्चेति ॥४६॥

संप्रति मानसव्याधिचिकित्साया अल्पव्यक्तत्वेन इहैव तच्चिकित्सामाह—तत्रेत्यादि। अत्रापिशब्दात् शारीरव्याधियुक्तेनापि वक्ष्यमाणमनुष्ठेयमिति सूचयति। एतत्त्रयं हितरूपधर्मार्थकामत्रितयमन्तरेणेत्यन्वयः। एतच्चेति वक्ष्यमाणं किं तदित्याह—तद्विद्येत्यादि। तद्विद्य इति मानसव्याधिभेषजवेदी। आत्मदेशेत्यादि—कोऽहं, किं मे हितमित्यात्मज्ञानं; को देशः, अस्मिन् देशे किमुचितमिति देशज्ञानं, एवं कालादेरपि ज्ञानं बोध्यम् ॥४६॥

भवति चात्र—

मानसं प्रति भैषज्यं त्रिवर्गस्यान्ववेक्षणम्।
तद्विद्यसेवा विज्ञानमात्मादीनां च सर्वशः ॥४७॥

उक्तमेवार्थं शिष्यहितैषितया सुखग्रहणार्थं श्लोकेनाह—भवति चात्रेत्यादि। मानसमिति मनोविकारमित्यर्थः। त्रिवर्गस्येति धर्मार्थकामस्य ॥४७॥

त्रयो रोगमार्गा इति—शाखा, मर्मास्थिसन्धयः, कोष्ठश्च। तत्र शाखा रक्तादयो धातवस्त्वक् च, स बाह्यो रोगमार्गः; मर्माणि पुनर्बस्तिहृदयमूर्धादीनि, अस्थिसन्धयोऽस्थिसंयोगास्तत्रोपनिबद्धाश्च स्नायुकण्डराः, स मध्यमो रोगमार्गः; कोष्ठः पुनरुच्यते महास्रोतः शरीरमध्यं महानिम्नमामपक्वाशयश्चेति पर्यायशब्दैस्तन्त्रे, स रोगमार्ग आभ्यन्तरः ॥४८॥

इदानीं सुखसाध्यत्वादिज्ञानार्थं पूर्वोद्दिष्टान् रोगमार्गान् विवृणोति—त्रय इत्यादि। यद्यपि मर्मास्थिसन्धी द्वौ तथाऽपि मध्यमत्वेन मर्मास्थिसन्धिभ्यामेक एव मार्ग इति भावः। शाखादीन् विवृणोति—तत्रेत्यादि। अत्र रक्तादीनां शाखेतिसंज्ञाकरणं वृक्षशाखावद्बाह्यत्वज्ञापनार्थम्। त्वक्चेति त्वक्शब्देनात्र तात्स्थ्याद् रसस्याप्यभिधानम्। ननु तर्हि रक्तादय इत्यपनीय रसादय इत्येव कुतो नोक्तमिति चेत्, सत्यं, हृदयस्थायिनो रसस्य शाखासंज्ञायां बाह्यरोगमार्गत्वं स्यादिति, तेन हृदयस्थरसस्य कोष्ठग्रहणेनैव ग्रहणादाभ्यन्तररोगमार्गत्वमेवेति बोध्यम्; अनेन न्यायेन यकृत्प्लीहाश्रितं शोणितं कोष्ठत्वेनैवाभिप्रेतमिति तस्यापि न शाखासंज्ञा तुल्यन्यायात्। उक्तं च कोष्ठविवरणे—"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुण्डुकः फुफ्फुसश्च कोष्ठ इत्यभि-

धीयते ॥" (सु० चि० २.१२-१३) इति। रुधिरस्य स्थानं यकृत्प्लीहानौ। स इति शाखासञ्ज्ञकः, तत्रेत्यस्थिसन्धौ, कण्डरा स्थूलसिरा। आमपक्वाशय इति मिलिता संज्ञा ॥४८॥

तत्र गण्डपिडकालज्यपचीचर्मकीलाधिमांसमषककुष्ठव्यङ्गादयो विकारा बहिर्मार्गजाश्च विसर्पश्वयथुगुल्मार्शोविद्रध्यादयः शाखानुसारिणो भवन्ति रोगाः, पक्षवधग्रहापतानकार्दितशोषराजयक्ष्मास्थिसन्धिशूलगुदभ्रंशादयः शिरोहृद्बस्तिरोगादयश्च मध्यममार्गानुसारिणो भवन्ति रोगाः; ज्वरातीसारच्छर्द्यलसकविसूचिकाकासश्वासहिक्कानाहोदरप्लीहादयोऽन्तर्मार्गजाश्च विसर्पश्वयथुगुल्मार्शोविद्रध्यादयः कोष्ठानुसारिणो भवन्ति रोगाः ॥४९॥

संप्रति मार्गभेदानभिधाय तदाश्रितान् व्याधीनाह—तत्रेत्यादि। बहिर्मागजा इति विसर्पादिविशेषणं अन्तर्मागजविसर्पादिव्युदासार्थम्। पक्षशब्दस्य वधग्रहाभ्यामन्वयः, शोषो व्यवायादिजनितधातुशोषः, राजयक्ष्मा तु वक्ष्यमाणविशिष्टसम्प्राप्तिको विशिष्टलक्षणश्चेति भेदः। ज्वरस्यामाशयसमुत्थत्वादन्तर्मार्गजत्वं बोध्यम्। अन्तर्मार्गजाश्चेति विसर्पादिविशेषणं बहिर्मार्गजविसर्पादिव्युदासार्थं, बहिर्मार्गजविसर्पो यः कराद्याश्रितो भवति, अन्तर्मार्गजस्तु यो बस्तिहृदयाद्याश्रितो भवति। बहिर्मार्गजस्तु गुल्मो यो बहिरुत्तुण्डितो भवति बहिश्च पच्यते, अन्यस्तु सर्वः कोष्ठगत एव। बहिर्वल्याश्रितमर्शः शाखागतं, अन्यत्तु कोष्ठगतम् ॥४९॥

त्रिविधा भिषज इति—

भिषक्छद्मचराः सन्ति सन्त्येके सिद्धसाधिताः।
सन्ति वैद्यगुणैर्युक्तास्त्रिविधा भिषजो भुवि ॥५०॥

वैद्यभाण्डौषधैः पुस्तैः पल्लवैरवलोकनैः।
लभन्ते ये भिषक्शब्दमज्ञास्ते प्रतिरूपकाः ॥५१॥

श्रीयशोज्ञानसिद्धानां व्यपदेशादतद्विधाः।
वैद्यशब्दं लभन्ते ये ज्ञेयास्ते सिद्धसाधिताः ॥५२॥

प्रयोगज्ञानविज्ञानसिद्धिसिद्धाः सुखप्रदाः।
जीविताभिसरास्ते स्युर्वैद्यत्वं तेष्ववस्थितम् ॥५३॥

भिषक्छद्मचरा इति भिषग्वेशचराः। सिद्धेन प्रसिद्धेन साधिताः सिद्धसाधिताः। क्रमेण तेषां लक्षणमाह—वैद्यभाण्डेत्यादि। वैद्यभाण्डं

वैद्योपकरणं बस्तिनेत्रादि। पुस्तैरिति पुस्तकैः, पल्लवैरिति मन्त्रप्रणिधानार्थं, अवलोकनैरिति साभिनयनिरीक्षणैः, प्रतिरूपका इति वैद्याभासाः, श्रीयशोज्ञानविज्ञानैः प्रसिद्धानां भिषजां व्यपदेशात् तत्सम्बन्धेन कीर्तनात् अमुकस्य पुत्रोऽमुकस्य पौत्र इत्यादिरूपात्। अतद्विधा इति श्रीयशोज्ञानहीना इत्यर्थः। विज्ञानं शास्त्रज्ञानम्। सिद्धिरारोग्यनिष्पत्तिः। जीविताभिसरा इति गच्छज्जीवितमभिसरति व्यावर्तयतीति जीविताभिसराः, किंवा जीवितरक्षार्थमभिसरन्तीति जीविताभिसराः ॥५०-५३॥

त्रिविधमौषधमिति—दैवव्यपाश्रयं, युक्तिव्यपाश्रयं, सत्त्वावजयश्च। तत्र दैवव्यपाश्रयं मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि, युक्तिव्यपाश्रयं पुनराहारौषधद्रव्याणां योजना, सत्त्वावजयः पुनरहितेभ्योऽर्थेभ्यो मनोनिग्रहः ॥५४॥

दैवव्यपाश्रयमिति—दैवमदृष्टं, तज्जननद्वारा यद्व्याधिहरं मन्त्रादि, किंवा देवशब्देन देवा उच्यन्ते, तानाश्रित्य यदुपकरोति तत्तथा; मन्त्रादयो हि देवप्रभावादेव व्याधिहराः। प्रणिपातो नमस्कारः, गमनं देवालयाभिगमनं तीर्थादिगमनं च ॥५४॥

शरीरदोषप्रकोपे खलु शरीरमेवाश्रित्य प्रायशस्त्रिविधमौषधमिच्छन्ति—अन्तःपरिमार्जनं, बहिःपरिमार्जनं, शस्त्रप्रणिधानं चेति। तत्रान्तःपरिमार्जनं यदन्तःशरीरमनुप्रविश्यौषधमाहारजातव्याधीन् प्रमार्ष्टि, यत्पुनर्बहिःस्पर्शमाश्रित्याभ्यङ्गस्वेदप्रदेहपरिषेकोन्मर्दनाद्यैराभयान् प्रमार्ष्टि तद्बहिःपरिमार्जनं, शस्त्रप्रणिधानं पुनश्छेदनभेदनव्यधनदारणलेखनोत्पाटनप्रच्छनसीवनैषणक्षारजलौकसश्चेति ॥५५॥

प्रकारान्तरेणापि भेषजत्रैविध्यमाह—शरीरेत्यादि। अत्र प्रायशःशब्दः शरीरदोषप्रकोप इत्यनेन सम्बध्यते; तेन मानसदोषजेऽप्युन्मादादावञ्जनादि भवतीति दर्शयति; किंवा प्रायशस्त्रिविधमिति शारीरेऽपि दैवव्यपाश्रयं स्वस्त्ययनादि दर्शयति ॥५५॥

भवन्ति चात्र—

प्राज्ञो रोगे समुत्पन्ने बाह्येनाभ्यन्तरेण वा।
कर्मणा लभते शर्म शस्त्रोपक्रमणेन वा ॥५६॥

बालस्तु खलु मोहाद्वा प्रमादाद्वा न बुध्यते।
उत्पद्यमानं प्रथमं रोगं शत्रुमिवाबुधः ॥५७॥

अणुर्हि प्रथमं भूत्वा रोगः पश्चाद्विवर्धते।
स जातमूलो मुष्णाति बलमायुश्च दुर्मतेः ॥५८॥

न मूढो लभते संज्ञां तावद्यावन्न पीड्यते।
पीडितस्तु मतिं पश्चात् कुरुते व्याधिनिग्रहे ॥५९॥

अथ पुत्रांश्च दारांश्च ज्ञातींश्चाहूय भाषते।
सर्वस्वेनापि मे कश्चिद्भिषगानीयतामिति ॥६०॥

तथाविधं च कः शक्तो दुर्बलं व्याधिपीडितम्।
कृशं क्षीणेन्द्रियं दीनं परित्रातुं गतायुषम् ॥६१॥

स त्रातारमनासाद्य बालस्त्यजति जीवितम्।
गोधा लाङ्गूलबद्धेवाकृष्यमाणा बलीयसा ॥६२॥

तस्मात् प्रागेव रोगेभ्यो रोगेषु तरुणेषु वा।
भेषजैः प्रतिकुर्वीत य इच्छेत् सुखमात्मनः ॥६३॥

वैद्यभेदाभिधानप्रसङ्गेनातुरभेदमप्याह—प्राज्ञ इत्यादि। मोहो रोगाज्ञानम्। बाल इत्यज्ञः। प्रमादो रोगं बुद्ध्वा तत्प्रतीकारेऽनवधानम्। शत्रुसादृश्यमेवाह—अणुर्हीत्यादि। संज्ञामिति शीघ्रप्रतिकर्त्तव्यताज्ञानम्। गोधादृष्टान्तेन जीवनार्थं यत्नं कुर्वन्नपि विपद्यत इति दर्शयति। प्रतीति यत्नमिति शेषः ॥५६-६३॥

तत्र श्लोकौ—

एषणाः समुपस्तम्भा बलं कारणमामयाः।
तिस्रैषणीये मार्गाश्च भिषजो भेषजानि च ॥६४॥

त्रित्वेनाष्टौ समुद्दिष्टाः कृष्णात्रेयेण धीमता।
भावा भावेष्वसक्तेन येषु सर्वं प्रतिष्ठितम् ॥६५॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
तिस्रैषणीयो नामैकादशोऽध्यायः ॥११॥

अध्यायार्थसङ्ग्रहमाह—एषणा इत्यादि। भावा इति च्छेदः; अष्टौ भावास्त्रित्वेन समुद्दिष्टा इत्यन्वयः। कीदृशेन भावेषु अप्रसक्तेन ॥६४-६५॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
तिस्रैषणीयः समाप्तः ॥११॥

द्वादशोऽध्यायः

अथातो वातकलाकलीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वाध्याये बाह्या एव व्याधिहेतवः प्रपञ्चेनोक्ता न तु आभ्यन्तरा वातादयः, अतस्तदभिधानार्थं वातकलाकलीयोऽभिधीयते। कला गुणः, अकला इति विरोधे नञ्, दोष इत्यर्थः ॥१-२॥

वातकलाकलाज्ञानमधिकृत्य परस्परमतानि जिज्ञासमानाः समुपविश्य महर्षयः पप्रच्छुरन्योऽन्यं--किंगुणो वायुः, किमस्य प्रकोपणम्, उपशमनानि वाऽस्य कानि, कथं चैनमसङ्घातवन्तमनवस्थितमनासाद्य प्रकोपणप्रशमनानि प्रकोपयन्ति प्रशमयन्ति वा, कानि चास्य कुपिताकुपितस्य शरीराशरीरचरस्य शरीरेषु चरतः कर्माणि बहिः शरीरेभ्यो वेति ॥३॥

असङ्घातमिति पित्तश्लेष्मवदकठिनावयवम्। अनवस्थितमिति चलस्वभावम्। अनासाद्येति चलत्वेन अनिविडावयवत्वेन चेति बोध्यम्। शरीरेभ्यो वा बहिश्चरतः कानि कर्माणीत्यन्वयः ॥३॥

अत्रोवाच कुशः साङ्कृत्यायनः—रूक्षलघुशीतदारुणखरविशदाः षडिमे वातगुणा भवन्ति ॥४॥

रूक्षेत्यादौ रूक्षादिशब्दाः भावप्रधानाः। दारुणत्वं चलत्वं, शोषणाद्वा काठिन्यजनकत्वम् ॥४॥

तच्छ्रुत्वा वाक्यं कुमारशिरा भरद्वाज उवाच—एवमेतद्यथा भगवानाह, एत एव वातगुणा भवन्ति, स त्वेवंगुणैरेवंद्रव्यैरेवंप्रभावैश्च कर्मभिरभ्यस्यमानैर्वायुः प्रकोपमापद्यते, समानगुणाभ्यासो हि धातूनां वृद्धिकारणमिति ॥५॥

कुमारशिरा इति भरद्वाजविशेषणमात्रेयगुरुभरद्वाजव्युदासार्थम्। एवंप्रभावैरिति प्रभावाद्रौक्ष्यादिजनकैर्धावनजागरणादिभिः, प्रभावाभिधानं कर्मणां निर्गुणत्वात् ॥५॥

तच्छ्रुत्वा वाक्यं काङ्कायनो बाह्लीकभिषगुवाच--एवमेतद्यथा भगवानाह, एतान्येव वातप्रकोपणानि भवन्ति; अतो विपरीतानि वातस्य प्रशमनानि भवन्ति, प्रकोपणविपर्ययो हि धातूनां प्रशमकारणमिति ॥६॥

तच्छ्रुत्वा वाक्यं बडिशो धामार्गव उवाच--एवमेतद्यथा भगवानाह, एतान्येव वातप्रकोपणप्रशमनानि भवन्ति। यथा ह्येनमसङ्घातमनवस्थितमनासाद्य प्रकोपणप्रशमनानि प्रकोपयन्ति प्रशमयन्ति वा, तथाऽनुव्याख्यास्यामः—वातप्रकोपणानि खलु रूक्षलघुशीतदारुणखरविशदशुषिरकराणि शरीराणां, तथाविधेषु शरीरेषु वायुराश्रयं गत्वाऽऽप्यायमानः प्रकोपमापद्यते; वातप्रशमनानि पुनः स्निग्धगुरूष्णश्लक्ष्णमृदुपिच्छिलघनकराणि शरीराणां, तथाविधेषु शरीरेषु वायुरसज्यमानश्चरन् प्रशान्तिमापद्यते ॥७

शरीराणामिति शरीरावयवानाम्। शुषिरकराणि व्रणादौ छिद्रकराणि। तथाविधेष्विति रूक्षादिगुणयुक्तेषु। आश्रयमिति समानगुणस्थानम्। आप्यायमानश्चीयमानः। दारुणविपरीतो मृदुः, शुषिरविपरीतो घनः। असज्यमानोऽनवतिष्ठमानः, क्षीयमानगुण इति यावत्। एतेन यद्यपि चलेन असंहतेन च वायुना वातकारणानां वातशमनानां वा तथाविधः सम्बन्धो न सम्भवति तथाऽपि शरीरसम्बद्धैस्तैर्वातस्य शरीरचारिणः सम्बन्धो भवति, ततश्च वातस्य समानगुणयोगाद्वृद्धिः विपरीतगुणयोगाच्च ह्रास उपपन्न एवेति ॥६-७॥

तच्छ्रुत्वा बडिशवचनमवितथमृषिगणैरनुमतमुवाच वार्योविदो राजर्षिः—एवमेतत् सर्वमनपवादं यथा भगवानाह। यानि तु खलु वायोः कुपिताकुपितस्य शरीराशरीरचरस्य शरीरेषु चरतः कर्माणि बहिः शरीरेभ्यो वा भवन्ति, तेषामवयवान् प्रत्यक्षानुमानोपदेशैः साधयित्वा नमस्कृत्य वायवे यथाशक्ति प्रवक्ष्यामः—वायुस्तन्त्रयन्त्रधरः, प्राणोदानसमानव्यानापानात्मा, प्रवर्तकश्चेष्टानामुच्चावचानां, नियन्ता प्रणेता च मनसः, सर्वेन्द्रियाणामुद्योजकः, सर्वेन्द्रियार्थानामभिवोढा, सर्वशरीरधातुव्यूहकरः, सन्धानकरः शरीरस्य, प्रवर्तको वाचः, प्रकृतिः स्पर्शशब्दयोः, श्रोत्रस्पर्शनयोर्मूलं, हर्षोत्साहयोर्योनिः, समीरणोऽग्नेः, दोषसंशोषणः, क्षेप्ता बहिर्मलानां, स्थूलाणुस्रोतसां भेत्ता, कर्ता गर्भाकृतीनाम्, आयुषोऽनुवृत्तिप्रत्ययभूतो भवत्यकुपितः। कुपितस्तु खलु शरीरे शरीरं नानाविधैर्विकारैरुपतपति बलवर्णसुखायुषामुपघाताय, मनो व्याहर्षयति, सर्वेन्द्रि-

याण्युपहन्ति, विनिहन्ति गर्भान् विकृतिमापादयत्यतिकालं वा धारयति, भयशोकमोहदैन्यातिप्रलापाञ्जनयति, प्राणांश्चोपरुणद्धि। प्रकृतिभूतस्य खल्वस्य लोके चरतः कर्माणीमानि भवन्ति; तद्यथा—धरणीधारणं, ज्वलनोज्ज्वालनम्, आदित्यचन्द्रनक्षत्रग्रहगणानां सन्तानगतिविधानं, सृष्टिश्च मेघानाम्, अपां विसर्गः, प्रवर्तनं स्रोतसां, पुष्पफलानां चाभिनिर्वर्तनम्, उद्भेदनं चौद्भिदानाम्, ऋतूनां प्रविभागः, विभागो धातूनां, धातुमानसंस्थानव्यक्तिः, बीजाभिसंस्कारः, शस्याभिवर्धनमविक्लेदोपशोषणे, अवैकारिकविकारश्चेति। प्रकुपितस्य खल्वस्य लोकेषु चरतः कर्माणीमानि भवन्ति; तद्यथा—शिखरिशिखरावमथनम्, उन्मथनमनोकहानाम्, उत्पीडनं सागराणाम्, उद्वर्तनं सरसां, प्रतिसरणमापगानाम्, आकम्पनं च भूमेः, आधमनमम्बुदानां, नीहारनिर्ह्रादपांशुसिकतामत्स्यभेकोरगक्षाररुधिराश्माशनिविसर्गः, व्यापादनं च षण्णामृतूनां, शस्यानामसङ्घातः, भूतानां चोपसर्गः, भावानां चाभावकरणं, चतुर्युगान्तकराणां मेघसूर्यानलानिलानां विसर्गः; स हि भगवान् प्रभवश्चाव्ययश्च, भूतानां भावाभावकरः, सुखासुखयोर्विधाता, मृत्युः, यमः, नियन्ता, प्रजापतिः, अदितिः, विश्वकर्मा, विश्वरूपः, सर्वगः, सर्वतन्त्राणां विधाता, भावानामणुः, विभुः, विष्णुः, क्रान्ता लोकानां, वायुरेव भगवानिति ॥८॥

अनपवादं निर्दोषम्। शरीराशरीरचरस्येत्यस्यैव विवरणं शरीरेषु चरतो बहिः शरीरेभ्यो वेति; अवयवानित्येकदेशान्, कात्स्न्र्याभिधानस्याशक्यत्वात्; साधयित्वा प्रतिपाद्य, तत्र शरीरेषु चरतोऽप्रकुपितस्य वायोः कर्माणि प्रथममाह—वायुस्तन्त्रयन्त्रधर इत्यादि। तन्त्रं शरीरं, तदेव यन्त्रमनेकावयवघटितत्वात्। उच्चावचानामिति नानाविधानाम्। नियन्ता अनिष्टे विषये प्रवर्तमानस्य मनसो नियामकः, प्रणेता ईशितेऽर्थे मनसः, उद्योजकः प्रेरकः, सर्वेन्द्रियार्थानामभिवोढेति सर्वेषामिन्द्रियाणामर्थानां च सम्बन्धकारकः, एतच्च पूर्वाध्यायप्रतिपादितेन न्यायेन स सर्वेन्द्रियाणां स्पर्शनेन्द्रियमिव कारणं; वायोरभिघातेन शब्दोत्पत्तेः, किंवा शब्दकारणत्वं वायोर्नित्यमाकाशानुप्रवेशात्; उक्तं हि—"विष्टं ह्यपरं परेण" इति। श्रोत्रस्पर्शनयोर्मूलमिति—(मूलं) प्रधानकारणं, श्रवणमलत्वं च वायोः समनन्तरोक्तयुक्त्या तथा कर्णशष्कुलीरचनाविशेषे व्याप्रियमाणत्वेन च बोध्यम्। उत्साहः कार्येषूद्यमो मनसः। योनिरभिव्यक्तिकारणम्। दोषसंशोषणो इति शरीरक्लेदशोषणः। क्षेप्ता बहिर्मलानामिति मलानां बहिः क्षेप्तेत्य-

न्वयः। भेत्तेति भेदेन व्यवस्थापकः, एतच्च शरीरोत्पत्तिकाले बोध्यम्। अनुवृत्तिप्रत्ययभूत इति अनुवृत्तिहेतुभूतः, गर्भानित्युभयत्र सम्बध्यते। अत्र यानि वायुकर्माण्युक्तानि तेषु कानिचिद्वाक्प्रवर्तनादीनि प्रत्यक्षाणि, मनःप्रेरणाद्यनुमेयं, गर्भाकृतिकरणाद्यागमगम्यमिति। एवं वक्ष्यमाणेष्वप्यूह्यम्। शरीरेभ्यो बहिश्चरतो वायोः प्रकृतिभूतस्य कमाण्याह—प्रकृतिभूतस्येत्यादि। सन्तानगतिविधानमिति आदित्यादीनां सन्तानेनाविच्छेदेन गतिविधानम्। स्रोतसामिति नदीप्रवाहानाम्। प्रविभागो विभक्तलक्षणम्। धातूनां पृथिव्यादीनां, प्रविभागो विभक्तत्वेनावस्थितिः। धातुमानसंस्थानव्यक्तिरिति—धातवो गैरिकादयः, मानं परिमाणं, संस्थानमाकृतिः, तयोर्व्यक्तिरभिव्यक्तिः, (तत्र) कारणमिति यावत्। बीजात् शाल्यादेरभिसंस्कारोऽङ्कुरप्रादुर्भावः। अविक्लेदः पाककालादर्वाक् अविक्लिन्नत्वं शस्यानामेव, उपशोषणं चार्द्रणाम्। अवैकारिकविकारः प्राकृतं रूपं एतेन सर्वस्यैव जगतः प्राकृतरूपवायोः कारणत्वमिति संक्षेपोक्तिः। अनोकहो वृक्षः। उद्वर्तनं (ऊर्ध्वं वर्तनं) उन्मार्गगमनं वा। प्रतिसरणं प्रतीपगमनम्। निर्ह्लादो मेघं विना गर्जितम्, एषां विसर्गो विसर्जनम्। असङ्घातोऽनुपचय अनुत्पादो वा। उपसर्गो मरकादिप्रादुर्भावः। मेघसूर्येत्यादौ विसर्गः सृष्टिः। वायुरिह देवतारूपोऽभिप्रेतः, तेन तस्य भूतरूपचतुर्युगान्तकरानिलकरणमविरुद्धम्। एवमन्यदपि अनुपपद्यमानं समाधेयम्। इदानीं देवतारूपस्यः वायोः स्वरूपमाह—स हीत्यादि। अव्ययोऽक्षयः। सर्वतन्त्राणामिति सर्वकर्मणाम्, ''इतिकर्त्तव्यतायाञ्च तन्त्रमुक्तम्'' इति मेदिनिः ॥८॥

तच्छ्रुत्वा वार्योविदवचो मरीचिरुवाच—यद्यप्येवमेतत्, किमर्थस्यास्य वचने विज्ञाने वा सामर्थ्यमस्ति भिषग्विद्यायां; भिषग्विद्यामधिकृत्येयं कथा प्रवृत्तेति ॥९॥

वार्योविद उवाच—भिषक् पवनमतिबलमतिपरुषमतिशीघ्रकारिणमात्ययिकं चेन्नानुनिशम्येत्, सहसा प्रकुपितमतिप्रयतः कथमग्रेऽभिरक्षितुमभिधास्यति प्रागेवैनमत्ययभयात्; वायोर्यथार्था स्तुतिरपि भवत्यारोग्याय बलवर्णविवृद्धये वर्चस्वित्वायोपचयाय ज्ञानोपपत्तये परमायुःप्रकर्षाय चेति ॥१०॥

सामर्थ्यमिति प्रयोजनम्। वर्चस्वित्वं (तेजस्वित्वम्) ॥९-१०॥

मरीचिरुवाच—अग्निरेव शरीरे पित्तान्तर्गतः कुपिताकुपितः शुभा-

शुभानि करोति; तद्यथा--पक्तिमपक्तिं दर्शनमदर्शनं मात्रामात्रत्वमूष्मणः प्रकृतिविकृतिवर्णौ शौर्यं भयं क्रोधं हर्षं मोहं प्रसादमित्येवमादीनि चापराणि द्वन्द्वानीति ॥११॥

पित्तान्तर्गत इति अग्निरेव भगवान् पित्तरूपेण शरीरान्तर्गतो भूत्वा कुपिताकुपितः सन् शुभाशुभानि करोतीत्यर्थः। एवं श्लेष्मान्तर्गत इति वक्ष्यमाणेऽपि व्याख्येयम्, अन्ये तु पित्तान्तर्गतः पित्तोष्मरूपतया। मात्रामात्रत्वं प्रकृतिविकृतिवर्णौ च त्वग्गतस्य भ्राजकपित्तस्य, भयशौर्यादयो (हृदयस्थस्य साधकस्य, रञ्जकस्य तु) बहिःस्फुटकार्यादर्शनादुदाहरणं न कृतम् ॥११॥

तच्छ्रुत्वा मरीचिवचः काप्य उवाच—सोम एव शरीरे श्लेष्मान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति; तद्यथा--दार्ढ्यं शैथिल्यमुपचयं कार्श्यमुत्साहमालस्यं वृषतां क्लीबतां ज्ञानमज्ञानं बुद्धिं मोहमेवमादीनि चापराणि द्वन्द्वानीति ॥१२॥

सोमो जलदेवता, चन्द्रो वा ॥१२॥

तच्छ्रुत्वा काप्यवचो भगवान् पुनर्वसुरात्रेय उवाच—सर्व एव भवन्तः सम्यगाहुरन्यत्रैकान्तिकवचनात्; सर्व एव खलु वातपित्तश्लेष्माणः प्रकृतिभूताः पुरुषमव्यापन्नेन्द्रियं बलवर्णसुखोपपन्नमायुषा महतोपपादयन्ति सम्यगेवाचरिता धर्मार्थकामा इव निःश्रेयसेन महता पुरुषमिह चामुष्मिश्च लोके; विकृतास्त्वेनं महता विपर्ययेणोपपादयन्ति ऋतवस्त्रय इव विकृतिमापन्ना लोकमशुभेनोपघातकाल इति ॥१३॥

तदृषयः सर्व एवानुमेनिरे वचनमात्रेयस्य भगवतोऽभिननन्दुश्चेति ॥१४॥

भवति चात्र--

तदात्रेयवचः श्रुत्वा सर्व एवानुमेनिरे।
ऋषयोऽभिननन्दुश्च यथेन्द्रवचनं सुराः ॥१५॥

ऐकान्तिकवचनादिति—ऐकान्तिकवचनं वायुरेव पित्तमेव कफ एवेत्यवधारणवचनम्। निःश्रेयसेनेति सुखेन। विपर्ययेणेति विपर्ययोऽव्यापन्नेन्द्रियादिवैपरीत्यम्। ऋतवस्त्रय इति शीतो(ष्णवर्षलक्ष)णाः। उपघातकाल इति विनाशकाले ॥१३-१५॥

तत्र श्लोकौ—

गुणाः षड् द्विविधो हेतुर्विविधं कर्म यत् पुनः ।
वायोश्चतुर्विधं कर्म पृथक् च कफपित्तयोः ॥१६॥

महर्षीणां मतिर्या या पुनर्वसुमतिश्च या ।
कलाकलीये वातस्य तत् सर्वं संप्रकाशितम् ॥१७॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते
सूत्रस्थाने वातकलाकलीयो नाम
द्वादशोऽध्यायः समाप्तः ॥१२॥

इति निर्देशचतुष्कः ॥३॥

सङ्ग्रहेण (गुणाः) षडिति रूक्षादयः । द्विविधो हेतु(रिति)—वातप्रकोपहेतुर्वातप्रशमहेतुश्चेति । वायोः पुनर्विविधमेव यन्निखिलं कर्म तच्चतुर्विधं कृत्वा उक्तमिति योज्यं; न हि चतुर्विधव्यतिरेकेण वायोः पृथग्विधं कर्मोक्तम् । चातुर्विध्यं च कुपिताकुपितशरीराशरीरचरभेदेन ॥१६-१७॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
वातकलाकलीयः समाप्तः ॥१२॥

॥ समाप्तश्च नैर्देशिकचतुष्कः ॥

त्रयोदशोऽध्यायः

अथातः स्नेहाध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

निर्देशचतुष्कान्तर्गतवातकलाकलीये वातादयोऽभिहिताः, तेषां भेषजं यथा कल्पनीयं तदुपदेष्टुं कल्पनाचतुष्कोऽभिधीयते। तत्रापि दोष-प्रधानस्य वातस्य प्रधानभेषजं स्नेह इति (तत्) प्रतिपादकः स्नेहाध्याय एव प्रागभिधीयते। स्नेहस्य प्रतिपादकोऽध्यायः स्नेहाध्यायः ॥१-२॥

सांख्यैः संख्यातसंख्येयैः सहासीनं पुनर्वसुम्।
जगद्धितार्थं पप्रच्छ वह्निवेशः स्वसंशयम् ॥३॥

संख्या सम्यग्ज्ञानं, तेन व्यवहरन्तीति सांख्याः। संख्यातं ज्ञातं संख्येयं यैस्ते तथा। स्वसंशयमिति आत्मनः (संशयविषयम्), संशयविषय(कः) प्रश्नश्च गुरुबुद्धिप्रकाशनार्थं क्रियते; यदुक्तं **भरद्वाजे**—"अप्रदुष्टेन भावेन प्रसन्नेनान्तरात्मना। शिष्येन सम्यक् पृष्टस्य गुरोर्बुद्धिः प्रकाशते ॥" इति ॥३॥

किंयोनयः कति स्नेहाः के च स्नेहगुणाः पृथक्।
कालानुपाने के कस्य कति काश्च विचारणाः ॥४॥
कति मात्राः कथंमानाः का च केषूपदिश्यते।
कश्च केभ्यो हितः स्नेहः प्रकर्षः स्नेहने च कः ॥५॥
स्नेह्याः के के न च स्निग्धास्निग्धातिस्निग्धलक्षणम्।
किं पानात् प्रथमं पीते जीर्णे किंच हिताहितम् ॥६॥
के मृदुक्रूरकोष्ठाः का व्यापदः सिद्धयश्च काः।
अच्छे संशोधने चैव स्नेहे का वृत्तिरिष्यते ॥७॥
विचारणाः केषु योज्या विधिना केन तत् प्रभो!।
स्नेहस्यामितविज्ञान! ज्ञानमिच्छामि वेदितुम् ॥८॥

विचारणास्वरूपमग्रेऽभिधास्यति। का चेति मात्रा, प्रकर्ष इति कालप्रकर्षः, के न चेति के च न स्नेह्या इत्यर्थः। किं पानादित्यत्र किमि-

त्यस्य पूर्वेणान्वयः; स्नेहपानात् प्रथमं, तथा पीते च स्नेहे तथा जीर्णे च स्नेहे किं हिताहितमिति योज्यम् । सिद्धयो व्यापत्प्रतिकारार्थं भेषजानि । अच्छ इति संशोधनस्य पृथङ्निर्देशात् गोबलीवर्दन्यायेन संशमन इत्यर्थः । वृत्तिरिति प्रवृत्तिरुपचारविधानम् । ज्ञानमिति शास्त्रम् ॥४-८॥

अथ तत्संशयच्छेत्ता प्रत्युवाच पुनर्वसुः ।
स्नेहानां द्विविधा सौम्य ! योनिः स्थावरजङ्गमा ॥९॥

तिलः प्रियालाभिषुकौ बिभीतक-
श्चित्राभयैरण्डमधूकसर्षपाः ।
कुसुम्भबिल्वारुकमूलकातसी-
निकोचकाक्षोडकरञ्जशिग्रुकाः ॥१०॥

स्नेहाशयाः स्थावरसंज्ञितास्तथा
स्युर्जङ्गमा मत्स्यमृगाः सपक्षिणः ।
तेषां दधिक्षीरघृतामिषं वसा
स्नेहेषु मज्जा च तथोपदिश्यते ॥११॥

क्रमेण सर्वप्रश्नानामुत्तरमाह—अथेत्यादि । स्थावरस्नेहयोनिं दर्शयति—तिल इत्यादि । अभिषुक औत्तरापथिकः । चित्रा गोरक्षकर्कटीबीजं लोहितैरण्डो वा । जङ्गमानाह—तथा स्युर्जङ्गमा इत्यादि । आमिषं मांसं, दध्यादिकं तथा मज्जा च स्नेहेषूपदिश्यत् इत्यन्वयः ॥९-११॥

सर्वेषां तैलजातानां तिलतैलं विशिष्यते ।
बलार्थे स्नेहने चाग्र्यमैरण्डं तु विरेचने ॥१२॥
(कटूष्णं तैलमैरण्डं वातश्लेष्महरं गुरु ।
कषायस्वादुतिक्तैश्च योजितं पित्तहन्त्रपि ॥१॥)

सर्वेषामित्यादि । यद्यपि योगात्तिलभवः स्नेहस्तैलशब्देनोच्यते, तथाऽपि रूढया सर्व एव स्थावरस्नेहास्तैलशब्दवाच्या ज्ञेयाः । यदुक्तं **सुश्रुते**—"निष्पत्तेस्तद्गुणत्वाच्च तैलत्वमितरेष्वपि" (सु० सू० ४५.१३०) इति । वस्तुतस्तु गन्धरसविशेषाभिव्यञ्ज्यतैलत्वं जातिः । अत एव घृततैलसंशये गन्धरसविशेषनिश्चयात्तैलत्वनिश्चय इति सार्षपादिष्वपि तैलपदप्रयोगो युक्त एवेति । विशिष्यत इति बलार्थे स्नेहने च अतिशयेनोपयुज्यत इत्यर्थः । ऐरण्डं तु विरेचने अग्र्यमिति सम्बन्धः ॥१२॥

सर्पिस्तैलं वसा मज्जा सर्वस्नेहोत्तमा मताः ।
एषु चैवोत्तमं सर्पिः संस्कारस्यानुवर्तनात् ॥ १३ ॥

सर्वस्नेहोत्तमा इत्यत्र सर्वशब्देन दधिक्षीरादयो गृह्यन्ते; सर्वोत्तमं सर्वेषां स्नेहप्रकर्षात् । संस्कारस्यानुवर्तनादिति—संस्कारो गुणान्तराधानं, तस्यानुवर्तनमनुविधानम् । तैलादयो हि द्रव्यान्तरसंस्कृताः सन्तः स्वगुणं विहायैव संस्कारकद्रव्यगुणान् वहन्ति, सर्पिस्तु स्वगुणान् संस्कारगुणांश्च वहतीत्यर्थः । अत एवोक्तं—"नान्यः स्नेहस्तथा कश्चित् संस्कारमनुवर्तते। यथा सर्पिरतः सर्पिः सर्वस्नेहोत्तमं मतम् ॥" (नि० १.४०) इति । किंवा संस्कारः स्वीयो गुणः शीतत्वादिः, अनुशब्दः सहार्थः विरुद्धवीर्याणामौषधानां संयोगेऽपि सर्पिषः स्वीयो गुणः शीतत्वादिः संस्कारकविरुद्धवीर्यौषधगुणैः सह वर्तते तैलादीनां तु नानुवर्तते । कथमेषां प्रतीतिरिति चेत्, ज्वरे शीताभिप्रायिणि चन्दनाद्यतैलोपदेशात् । अयमभिसन्धिः—तैलं चेदुष्णं कथं दाहज्वरे तद्विधीयते ? ततश्च शीतवीर्यचन्दनादिद्रव्यसंयोगात् सहजमप्युष्णत्वं यथा तैलं त्यजति न तथा घृतं सहजशीतत्वं, ततश्चानयोर्मध्ये विशेषेण तैले निजगुणप्रच्यवो भेषजसंसर्गादस्ति (न) पुनः सर्पिषि । यदि तु घृतेऽपि उष्णवीर्यद्रव्यसंसर्गात् शीतत्वहानिः स्यात् तदा शीतज्वरेऽप्यगुर्वादिसाधितं घृतं विदध्यात्, न चैवम् । अथ यदि सर्वथैव सर्पिषि प्राकृतगुणोपमर्दव्यतिरेकेण तत्तद्भेषजैर्गुणान्तरारोपणं क्रियते तदा वातकफामयसङ्ग्रहग्रहण्यामवातादौ मरिचादिकाञ्जिकषट्पलादिघृतविधानं नार्थवत्स्यात्, संस्कारकमरिचादिद्रव्यैः सर्पिःशैत्यानभिभवेन वातकफवृद्धेः। तस्मादुभयोरपि द्रव्यान्तरसंयोगात् प्राकृतगुणहानिः परमार्थतोऽग्नेर्विशेषेण पुनस्तैल इति स्थितम् ॥ १३ ॥

घृतं पित्तानिलहरं रसशुक्रौजसां हितम् ।
निर्वापणं मृदुकरं स्वरवर्णप्रसादनम् ॥१४॥

मारुतघ्नं न च श्लेष्मवर्धनं बलवर्धनम् ।
त्वच्यमुष्णं स्थिरकरं तैलं योनिविशोधनम् ॥ १५ ॥

विद्धभग्नाहतभ्रष्टयोनिकर्णशिरोरुजि ।
पौरुषोपचये स्नेहे व्यायामे चेष्यते वसा ॥ १६ ॥

बलशुक्ररसश्लेष्ममेदोमज्जविवर्धनः ।
मज्जा विशेषतोऽस्थ्नां च बलकृत् स्नेहने हितः ॥ १७ ॥

घृतगुणानाह—घृतमित्यादि। निर्वापणं दाहप्रशमनम्। तैलगुणमाह—मारुतघ्नमित्यादि। स्थिरकरमिति शरीरदार्ढ्यकरम्; **वाग्भटे**ऽप्युक्तं—"तैलं लाघवदार्ढ्यार्थिक्रूरकोष्ठेषु देहिषु॥" (अ० हृ० सू० १६.९) इति। वसाविषयमाह—विद्धेत्यादि। आहतः शस्त्रादिना, भ्रष्टयोनिः स्थानात् प्रच्युतयोनिः, पौरुषोपचये शुक्रोपचये तथा शरीरस्नेहने च कर्तव्ये इत्यर्थः। व्यायाम इति व्यायामकर्षिते; **सुश्रुते**ऽप्युक्तं—"व्यायामकर्षिताः शुष्कचेतोवक्त्राः महारुजः। महाग्निमारुतप्राया वसायोग्या नराः स्मृताः॥" (सु० चि० ३१.१७) इति। मज्जगुणमाह—(बलेत्यादि)॥ १४-१७॥

सर्पिः शरदि पातव्यं वसा मज्जा च माधवे।
तैलं प्रावृषि नात्युष्णशीते स्नेहं पिबेन्नरः॥ १८॥

इदानीं कालभेदेन स्नेहभेदानाह—सर्पिरित्यादि। माधवे वैशाखे। प्रावृडाषाढश्रावणौ। सामान्येन स्नेहोपयोगे शस्तं कालमाह—नात्युष्णेत्यादि। अत्युष्णे ज्येष्ठे, वैशाखाषाढयोः स्नेहोपदेशात्। अतिशीते हेमन्ते शिशिरे च तथा वर्षाजनितशैत्ये वर्षाकाले। यद्यपि **तन्त्रान्तरे**—"सर्पिः प्रयोज्यं शरदि प्रायस्तैलं घनागमे। हिमागमे चोपयोज्या वसामज्जान इत्यपि।" इत्युक्तं, तथाऽपि तत्र प्रायःशब्दबलाद् वसामज्जसमयं प्रति **चरक**विरोधः परिहरणीय इति। अयं नात्ययिकविकारे सति कालनियमो ज्ञेयः, अग्रे उष्णे शीते च काले स्नेहोपदेशात्॥ १८॥

वातपित्ताधिको रात्रावुष्णे चापि पिबेन्नरः।
श्लेष्माधिको दिवा शीते पिबेच्चामलभास्करे॥ १९॥

इदानीमात्ययिका(तङ्क)गृहीतेनात्युष्णशीतेऽपि यथा स्नेहपानं विधेयं तथा दोषविशेषे च यथा स्नेहपानं तदाह—वातपित्ताधिक इति। वाताधिकः पित्ताधिको वातपित्ताधिकश्च। पित्ताधिक इत्यनेन पित्तबहुलो यः पित्तकफसंसर्गः तस्यापि ग्रहणम्; उक्तं च **वाग्भटे**—"निश्येव पित्ते पवने संसर्गे पित्तवत्यपि।" (अ० हृ० सू० १६.१३) इति। अत्र भूम्नि मतुप्प्रत्ययेन पित्तबहुले संसर्ग इत्यर्थः। श्लेष्माधिकग्रहणमत्यर्थशीतविकारगृहीतपुरुषोपलक्षणार्थं, तेन वातश्लेष्माधिकश्च गृह्यते; **सुश्रुते**ऽप्युक्तं—"वातपित्ताधिको रात्रौ वातश्लेष्माधिको दिवा।" (सु० चि० ३१.२२) इति। श्लेष्माधिके च संसर्गे शीतकाले दिवैव स्नेहपानं श्लेष्माधिकत्वस्य सत्त्वात्, अत एवाधिकत्वस्य ग्रहणमन्यथा श्लेष्माधिक इत्येव

विदध्यात् । समप्रकृतेस्तथा शीतोष्णसाधारणे च शरदादौ अन्नकाल एव उत्सर्गसिद्धश्च स्नेहपानकाल इत्याहुः। वक्ष्यति हि—"पिबेत् संशमनं स्नेहमन्नकाले प्रकांक्षितम् ।" इति । अन्ये तु केवलवाताधिकस्य पित्ताधिकस्य च पिबेत् संशमनं स्नेहमित्युक्त एव स्नेहपानकाल इत्याहुः, तन्न, 'निश्येव पित्ते पवने संसर्गे पित्तवत्यपि' इति **वाग्भट**विरोधात् । अमलभास्कर इति दुर्दिनव्युदासार्थं, अन्ये तु मध्याह्नग्रहणमित्याहुः । एवं च 'वातपित्ताधिको रात्रौ स्नेहं पिबेत्' इति सामान्यवचनात् सर्वेषु ऋतुषु वातपित्ताधिको रात्रावेव स्नेहं पिबेन्न दिवेति तथा उष्णे च रात्रौ पिबेदिति सामान्यवचनात् उष्णे कफप्रकृत्यादिरपि रात्रौ पिबेन्न दिवा, यस्तु श्लेष्माधिकः स शीते दिवस एव पिबेन्न रात्राविति सिद्धम् । **हरिचन्द्र**स्तु उष्णे चापीत्यत्र अपिचशब्दाभ्यां वातकफप्रकृति-पित्तकफप्रकृत्यादीनां ग्रहणमित्यादि बहु व्याख्यातवान् तत्तु गन्थविस्तरभयादमनोहरत्वाच्च न लिखितम् ॥ १९ ॥

अत्युष्णे वा दिवा पीतो वातपित्ताधिकेन वा ।
मूर्च्छां पिपासामुन्मादं कामलां वा समीरयेत् ॥ २० ॥
शीते रात्रौ पिबन् स्नेहं नरः श्लेष्माधिकोऽपि वा ।
आनाहमरुचिं शूलं पाण्डुतां वा समृच्छति ॥ २१ ॥

उक्तकालनियमविपर्यये दोषमाह—अत्युष्णे काले दिवा पीतः स्नेहः श्लैष्मिकस्यापि यथोक्तविकारकरः तेनोष्णकाले श्लेष्माधिकोऽपि रात्रावेव स्नेहं पिबेत् तथा वातपित्ताधिकेन दिवा पीतः स्नेहः शीतकालेऽपि यथोक्तविकारकरः तेन वातपित्ताधिकः शीतेऽपि रात्रावेव स्नेहं पिबेन्न दिवेति । शीते रात्रावित्यादि—अत्र श्लेष्माधिको भूत्वा यदि शीते रात्रौ स्नेहं पिबति तदैव आनाहादयः स्युरिति व्याख्येयं, तेन श्लेष्माधिकेन शीतेऽपि रात्रौ पीतः स्नेहो नानाहादिविकारं जनयतीति ज्ञेयम् ॥ २०-२१ ॥

जलमुष्णं घृते पेयं यूषस्तैलेऽनु शस्यते ।
वसामज्ज्ञोस्तु मण्डः स्यात् सर्वेषूष्णमथाम्बु वा ॥ २२ ॥

अनुपानमाह—जलमित्यादि । अन्विति अनुपाने । अनुपानमात्रा तु—"अनुपानं प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलम् । पलद्वयन्त्वनिलजे पित्तजे तु पलत्रयम् ॥" इत्यादिवचनात्, वृद्धवैद्यव्यवहाराच्चानुसर्तव्या । सर्वेषू-

ष्णमथाम्बु वेति सामान्यवचनं तौवरभल्लातकस्नेहं विना बोध्यं; तदुक्तं–"तौवरारुष्करस्नेहाद् विना वार्यत्र शीतलम् ।" इति ॥ २२ ॥

ओदनश्च विलेपी च रसो मांसं पयो दधि ।
यवागूः सूपशाकौ च यूषः काम्बलिकः खडः ॥ २३ ॥

सक्तवस्तिलपिष्टं च मद्यं लेहास्तथैव च ।
भक्ष्यमभ्यञ्जनं बस्तिस्तथा चोत्तरबस्तयः ॥ २४ ॥

गण्डूषः कर्णतैलं च नस्तःकर्णाक्षितर्पणम् ।
चतुर्विंशतिरित्येताः स्नेहस्य प्रविचारणाः ॥ २५ ॥

कति विचारणा इत्यस्योत्तरमाह—ओदनश्चेत्यादि । विलेपी अल्पद्रवा यवागूः, यवागूस्तु पेया सा च बहुद्रवा अल्पसिक्था च । काम्बलिकः खड इति यथा—"तक्रं[1] कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः । सुपक्वः खडयूषोऽयं यूषः काम्बलिकोऽपरः[2] ॥ दध्यम्ल[3]लवणस्नेहतिलमाषान्वितः शृतः ।" इति । भक्ष्यमिति चर्व्यम् । ओदनादयस्तु स्नेहयुक्ता एव विचारणाशब्दवाच्याः; अभ्यञ्जनादयस्तु यद्यपि शुद्धस्नेहसम्पाद्या तथाऽपि न जठराग्निसम्बन्धे व्याप्रियन्त इति तन्त्रे विचारणाशब्देनोच्यन्ते ॥२३-२५॥

अच्छपेयस्तु यः स्नेहो न तामाहुर्विचारणाम् ।
स्नेहस्य स भिषग्दृष्टः कल्पः प्राथमकल्पिकः ॥२६॥

निषेधमुखेन विचारणास्वरूपमाह–अच्छपेयस्त्वित्यादि । अच्छपेय इति ओदनाद्यसम्बद्धत्वेन पेय इत्यर्थः । विशिष्टप्रतिषेधस्य शेषाद्यनुज्ञानफलकत्वात् ओदनादिसम्बद्धस्नेहपानस्य विचारणाशब्दवाच्यमित्यर्थः । स इति अच्छपेयः । प्राथमकल्पिक इति श्रेष्ठ इत्यर्थः ॥२६॥

रसैश्चोपहितः स्नेहः समासव्यासयोगिभिः ।
षड्भिस्त्रिषष्टिधा संख्यां प्राप्नोत्येकश्च केवलः ॥२७॥

एवमेताश्चतुःषष्टिः स्नेहानां प्रविचारणाः ।
ओकर्तुव्याधिपुरुषान् प्रयोज्याः जानता भवेत् ॥२८॥

---

१. तक्रे[1]
२. यूषोऽयमयं काम्बलिको मतः[1]
३. दध्यम्लो[1]

प्रकारान्तरेण विचारणाभेदमाह—रसैश्चेत्यादि। समासो रसानामन्योन्यमेलकः, व्यासोऽमेलकः; समासव्यासवद्भिः षड्भिः रसैरोदनादिगतैरुपहितो युक्तः सन् स्नेहस्त्रिषष्टिधा संख्यां प्राप्नोति। एकश्च केवल इति अच्छपेयं वर्जयित्वा अभ्यञ्जनादिरूपः। त्रिषष्टी रसभेदाश्च वक्ष्यन्ते। तदेवं स्नेहानां रससंयुक्तानां चतुःषष्टिः प्रविचारणाः भवन्ति। एतदेवाह—एवमेता इत्यादि। चतुःषष्टिरिति स्नेहानामित्यनेन सम्बध्यते, तेन विचारणा इत्येकवचनमुपपन्नं भवति। ओकोऽभ्यासः सात्म्यमित्यर्थः, ओकादीन् जानता प्रयोज्या इत्यन्वयः ॥२७-२८॥

अहोरात्रमहः कृत्स्नमर्धाहं च प्रतीक्षते।
प्रधाना मध्यमा ह्रस्वा स्नेहमात्रा जरां प्रति ॥२९॥

इति तिस्रः समुद्दिष्टा मात्राः स्नेहस्य मानतः।
तासां प्रयोगान् वक्ष्यामि पुरुषं पुरुषं प्रति ॥३०॥

प्रभूतस्नेहनित्या ये क्षुत्पिपासासहा नराः।
पावकश्चोत्तमबलो येषां ये चोत्तमा बले ॥३१॥

गुल्मिनः सर्पदष्टाश्च विसर्पोपहताश्च ये।
उन्मत्ताः कृच्छ्रमूत्राश्च गाढवर्चस एव च ॥३२॥

पिबेयुरुत्तमां मात्रां तस्याः पाने गुणाञ्छृणु।
विकाराञ्छमयत्येषा शीघ्रं सम्यक्प्रयोजिता ॥३३॥

दोषानुकर्षिणी मात्रा सर्वमार्गानुसारिणी।
बल्या पुनर्नवकरी शरीरेन्द्रियचेतसाम् ॥३४॥

अरुष्कस्फोटपिडकाकण्डूपामाभिरर्दिताः।
कुष्ठिनश्च प्रमीढाश्च वातशोणितिकाश्च ये ॥३५॥

नातिबह्वाशिनश्चैव मृदुकोष्ठास्तथैव च।
पिबेयुर्मध्यमां मात्रां मध्यमाश्चापि ये बले ॥३६॥

मात्रैषा मन्दविभ्रंशा न चातिबलहारिणी।
सुखेन च स्नेहयति शोधनार्थे च युज्यते ॥३७॥

ये तु वृद्धाश्च बालाश्च सुकुमाराः सुखोचिताः।
रिक्तकोष्ठत्वमहितं येषां मन्दाग्नयश्च ये ॥३८॥

ज्वरातीसारकासाश्च येषां चिरसमुत्थिताः ।
स्नेहमात्रां पिबेयुस्ते ह्रस्वां ये चावरा बले ॥३९॥
परिहारे सुखा चैषा मात्रा स्नेहनबृंहणी ।
वृष्या बल्या निराबाधा चिरं चाप्यनुवर्तते ॥४०॥

कति मात्राः कथंमाना इत्यस्योत्तरमाह—अहोरात्रमित्यादि । अहोरात्रमित्यष्टप्रहरोपलक्षणं, एवमहः कृत्स्नमिति प्रहरचतुष्टयं दिनार्धमिति च प्रहरद्वयमुपलक्षयति; अत एवोक्तं **वाग्भटे**—"द्वाभ्यां चतुर्भिरष्टाभिर्यामैर्जीर्यन्ति याः क्रमात् ।" (अ० हृ० सू० १६.१७) इत्यादि, तेन प्रहराद्यतीतेऽपि दिने मात्रा पीता यथोक्तप्रहरकालप्राप्त्या दिनान्तरे रात्रौ वा जीर्यमाणा मन्तव्या । अत्र यदाऽहोरात्रपरिणामिनी मात्रा क्रियते, तदा तदहराहारो न कार्यः; अत एव स्नेहपानविषयपुरुषमभिप्रेत्योक्तं—क्षुत्पिपासासहा" इति; **वृद्धसुश्रुतेन** तु आहारनिरूपणीयास्तिस्रो मात्रा अभिहिताः, यथा—"अशनस्य चतुर्भागा स्नेहमात्रा परा स्मृता । तस्यार्धं मध्यमात्रा (स्यात्) तदर्धन्तु कनीयसी ॥" इति । का च केषूपदिश्यत इत्यस्योत्तरमाह—तासामित्यादि । प्रभूतस्नेहनित्या इति प्रभूतस्नेहसात्म्याः । सर्वमार्गानुसारिणीति सर्वमार्गाः कोष्ठसन्धिमर्मशाखाः । पुनर्नवकरीति शरीरादिपुनर्नवत्वकरी निःशेषदोषहरत्वात् । मध्यममात्राविषयमाह—अरुष्केत्यादि । अरुष्का अरुंषिका । मन्दविभ्रंशेति अल्पव्यापत्तिका, एतेन पूर्वोक्तमात्राया महाव्यापत्तिकत्वं सूचयति । शोधनार्थे चेति शोधनाङ्गस्नेहकरणे; एतेनोत्तमा मात्रा संशमन्येव परं, न तु शोधनाङ्गस्नेहे कार्येति दर्शयति । ह्रस्वमात्राविषयमाह—ये त्वित्यादि । परिहारे सुखेत्यल्पपरिहारत्वेन ॥२९-४०॥

वातपित्तप्रकृतयो वातपित्तविकारिणः ।
चक्षुःकामाः क्षताः क्षीणा वृद्धा बालास्तथाऽबलाः ॥४१॥
आयुःप्रकर्षकामाश्च बलवर्णस्वरार्थिनः ।
पुष्टिकामाः प्रजाकामाः सौकुमार्यार्थिनश्च ये ॥४२॥
दीप्त्योजःस्मृतिमेधाग्निबुद्धीन्द्रियबलार्थिनः ।
पिबेयुः सर्पिरार्ताश्च दाहशस्त्रविषाग्निभिः ॥४३॥

कश्च केभ्यो हितः स्नेह इत्यस्योत्तरमाह—वातपित्तेत्यादि । वातपित्तविकारग्रहणेनैव वातपित्तप्रकृतिषु लब्धेषु पुनस्तदभिधानं वातपित्त-

प्रकृतीनां स्तोकश्लेष्मविकारेऽपि घृतपानोपदेशार्थम्; एवं वातव्याधिभिराविष्टा वातप्रकृतयश्च य इत्यत्रापि व्याख्येयम्। बलार्थिन इत्यत्र बलशब्दः स्मृत्यादिभिः सम्बध्यते ॥४१-४३॥

प्रवृद्धश्लेष्ममेदस्काश्चलस्थूलगलोदराः ।
वातव्याधिभिराविष्टा वातप्रकृतयश्च ये ॥४४॥

बलं तनुत्वं लघुतां दृढतां स्थिरगात्रताम् ।
स्निग्धश्लक्ष्णतनुत्वक्तां ये च काङ्क्षन्ति देहिनः ॥४५॥

कृमिकोष्ठाः क्रूरकोष्ठास्तथा नाडीभिरर्दिताः ।
पिबेयुः शीतले काले तैलं तैलोचिताश्च ये ॥४६॥

तैलविषयमाह—प्रवृद्धेत्यादि। शीतले काल इति एतेन तैलस्योष्णत्वेन यथा शीतले प्रयोग एवं सर्पिषोऽपि शीतत्वात् घर्मकाले उपयोगो बोध्यः; अत एव **वाग्भटे**ऽप्युक्तं—"तैलं त्वरायां शीतेऽपि घर्मेऽपि च घृतं निशि।" (अ० हृ० सू० १६.१३) इति। एतच्च शीते उष्णे विधानमात्ययिकविकारापेक्षया ज्ञेयं, तेन 'नात्युष्णशीते स्नेहं पिबेत्' इति वचनेन सहास्य न विरोध अत एव **वाग्भटे**ऽपि त्वरायामित्युक्तमात्ययिकविकारत्वरायामित्यर्थः ॥४४-४६॥

वातातपसहा ये च रूक्षा भाराध्वकर्शिताः ।
संशुष्करेतोरुधिरा निष्पीतकफमेदसः ॥४७॥

अस्थिसन्धिसिरास्नायुमर्मकोष्ठमहारुजः ।
बलवान्मारुतो येषां खानि चावृत्य तिष्ठति ॥४८॥

महच्चाग्निबलं येषां वसासात्म्याश्च ये नराः ।
तेषां स्नेहयितव्यानां वसापानं विधीयते ॥४९॥

वसाविषयमाह—वातातपेत्यादि। संशुष्कनिष्पीतशब्दौ क्षीणार्थौ। महारुज इति अस्थ्यादिभिः सम्बध्यते। खानीति स्रोतांसि ॥४७-४९॥

दीप्ताग्नयः क्लेशसहा घस्मराः स्नेहसेविनः ।
वातार्ताः क्रूरकोष्ठाश्च स्नेह्या मज्जानमाप्नुयुः ॥५०॥
येभ्यो येभ्यो हितो यो यः स्नेहः स परिकीर्तितः ।

मज्जपानविषयमाह—दीप्ताग्नय इत्यादि। घस्मरा इति बहुभोजिनः। आप्नुयुरित्युपयुञ्जीरन्। सामान्यतः स्नेहविषयं संक्षेपेनाह—यो यो येभ्य इत्यादि। हित इति सात्म्यः ॥५०॥—

स्नेहनस्य प्रकर्षौ तु सप्तरात्रत्रिरात्रकौ ॥५१॥

प्रकर्षः स्नेहने च क इत्यस्योत्तरमाह—स्नेहनस्येत्यादि। भूयस्त्वप्रकर्षः साप्तरात्रिकः, अल्पत्वप्रकर्षस्तु त्रैरात्रिक इत्यर्थः, मध्यप्रकर्षस्तु पञ्चाहादिरर्थवशाद्बोध्यः, यदाह **सुश्रुते**—"पिबेत्त्र्यहं चतुरहं पञ्चाहं षडहानि वा[1]। सप्तरात्रात् परं स्नेहः सात्म्यीभावाय कल्पते[2] ॥" (सु० चि० ३१.३६) इति। एतच्च वक्ष्यमाणसद्यःस्नेहप्रयोगातिरिक्तप्रयोगे बोध्यं, किंवा सद्यःस्नेहप्रयोगा अपि त्र्यहेणैव स्नेहयन्ति, स्तुत्यर्थन्तु सद्य इत्युक्तम्। यदुक्तं **दृढबलेन**—"त्र्यहावरं सप्तदिनं परं तु स्निग्धो नरः स्वेदयितव्य इष्टः। नातः परं स्नेहनमादिशन्ति सात्म्यीभवेत् सप्तदिनात् परं तु ॥" (सि० १.६-७) इति ॥५१॥

स्वेद्याः शोधयितव्याश्च रूक्षा वातविकारिणः।
व्यायाममद्यस्त्रीनित्याः स्नेह्याः स्युर्ये च चिन्तकाः ॥५२॥

के स्नेह्या इत्यस्योत्तरमाह—स्वेद्या इत्यादिना ॥५२॥

संशोधनादृते येषां रूक्षणं संप्रवक्ष्यते।
न तेषां स्नेहनं शस्तमुत्सन्नकफमेदसाम् ॥५३॥
अभिष्यण्णाननगुदा नित्यमन्दाग्नयश्च ये।
तृष्णामूर्च्छापरीताश्च गर्भिण्यस्तालुशोषिणः ॥५४॥
अन्नद्विषश्छर्दयन्तो जठरामगरार्दिताः।
दुर्बलातिप्रतान्ताश्च स्नेहग्लाना मदातुराः ॥५५॥
न स्नेह्या वर्तमानेषु न नस्तोबस्तिकर्मसु।
स्नेहपानात् प्रजायन्ते तेषां रोगाः सुदारुणाः ॥५६॥

लङ्घनबृंहणीये येषां रूक्षणं वक्ष्यते, तेषां संशोधनादृते स्नेहनं न शस्तं, यदि तु संशोधनेन ते विरूक्ष्यन्ते तदा शोधनाङ्गः स्नेहः तेषां कर्तव्य एवेति भावः। उत्सन्नकफमेदसामिति प्रवृद्धकफमेदसामित्यर्थः, एतच्च विशेषणमेवं (भूता) एव रूक्षणीया भवन्तीति दर्शनार्थम्। अभिष्यण्णं आमयुक्तम्। गरश्च कृत्रिमविषम्। अतिप्रतान्तोऽतिक्षीणद्रवधातुः। वर्तमानेष्विति क्रियमाणेषु ॥५३–५६॥

———

१. षडहं तथा (सु० चि०)

२. सात्म्यीभवति सेवितः (सु० चि०)

पुरीषं ग्रथितं रूक्षं वायुरप्रगुणो मृदुः ।
पक्ता खरत्वं रौक्ष्यं च गात्रस्यास्निग्धलक्षणम् ॥५७॥

वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम् ।
मार्दवं स्निग्धता चाङ्गे स्निग्धानामुपजायते ॥५८॥

पाण्डुता गौरवं जाड्यं पुरीषस्याविपक्वता ।
तन्द्रीररुचिरुत्क्लेशः स्यादतिस्निग्धलक्षणम् ॥५९॥

अस्निग्धलक्षणमाह—पुरीषमित्यादि । मृदुरिति पक्तृविशेषणम् । स्निग्धलक्षणमाह—वातानुलोम्यमित्यादि । अतिस्निग्धलक्षणमाह—पाण्डुतेत्यादि । जाड्यमिन्द्रियजडता ॥'१७–५९॥

द्रवोष्णमनभिष्यन्दि भोज्यमन्नं प्रमाणतः ।
नातिस्निग्धमसंकीर्णं श्वः स्नेहं पातुमिच्छता ॥६०॥

पिबेत् संशमनं स्नेहमन्नकाले प्रकांक्षितः ।
शुद्धयर्थं पुनराहारे नैशे जीर्णे पिबेन्नरः ॥६१॥

स्नेहपानात्पूर्वं किं हिताहितमित्यस्योत्तरमाह—द्रवोष्णमित्यादि । अनभिष्यन्दि न स्रोतोऽवरोधकं मन्दकादि । असङ्कीर्णमिति न संयोगविरुद्धम् । संशमनस्नेहस्य तथा संशोधनार्थस्नेहस्य च पानकालमाह—पिबेदित्यादि । अन्नकाले द्विप्रहरादौ कदाचिद् बुभुक्षा न भवत्यपि तदर्थं प्रकांक्षित इति विशेषणम् । शुद्धयर्थं तु स्नेहं नैशे दिनान्तरकृते आहारे जीर्णे सति प्रातरेव पिबेदित्यर्थः । अयमभिसन्धिः—नैशे आहारे जीर्णेऽपि प्रातः किञ्चित् कोष्ठोपलेपक(दोष)सम्बन्धः तिष्ठति, तत्र च पीतः स्नेहो दोषस्योत्क्लेशं करोति न संशमनं, अतोऽन्नकाल एव संशमनस्नेहपानं विधेयं, संशोधनार्थस्तु स्नेहो दोषोत्क्लेशकर एवापेक्ष्यते इति दोषशेषावस्थायामेव प्रातः काले तत्पानं युक्तमिति । एतच्चोत्सर्गवचनं, तेन वातपित्ताधिको रात्रावित्युपचारवचनविषयव्यतिरिक्त एवास्य विषयो ज्ञेयः । संशमनलक्षणं यथा—"न शोधयति यद्दोषान् समान्नोदीरयत्यपि । समीकरोति च क्रुद्धान् तत्संशमनमुच्यते ॥" इति ॥६०-६१॥

उष्णोदकोपचारी स्याद्ब्रह्मचारी क्षपाशयः ।
शकृन्मूत्रानिलोद्गारानुदीर्णांश्च न धारयेत् ॥६२॥

व्यायाममुच्चैर्वचनं क्रोधशोकौ हिमातपौ ।
वर्जयेदप्रवातं च सेवेत शयनासनम् ॥६३॥

स्नेहं पीत्वा नरः स्नेहं प्रतिभुञ्जान एव च।
स्नेहमिथ्योपचाराद्धि जायन्ते दारुणा गदाः ॥६४॥

पीते स्नेहे किं हिताहितमित्यस्योत्तरमाह—उष्णोदकोपचारीत्यादि। स्नेहं पीत्वेति छेदः, स्नेहं पीत्वा उष्णोदकोपचारी स्यादित्यादि योज्यम्। ब्रह्मचारी क्षपाशय इत्यनेन मैथुनदिवास्वप्नरात्रिजागरणानां निषेधः। उदीर्णांश्च न धारयेदित्यत्र चकारादनुदीर्णांश्च नोदीरयेदित्यर्थो ज्ञेयः। अप्रवातमिति शयनासनविशेषणम्। किं जीर्णे च हिताहितमित्यस्योत्तरमाह—पुनः स्नेहं प्रतिभुञ्जान इति स्नेहे जीर्णेऽपि स्नेहप्रयोगानुगुणमन्यस्नेहमविरुद्धवीर्यादिगुणयुक्तं भुञ्जानो भवेदित्यर्थः, उष्णोदकोपचारादि (च)। यथोक्तविपर्यये दोषमाह—स्नेहमिथ्योपचारादित्यादि। मिथ्योपचारादिति शीततोयादिसेवनादित्यर्थः ॥६२-६४॥

मृदुकोष्ठस्त्रिरात्रेण स्निह्यत्यच्छोपसेवया।
स्निह्यति क्रूरकोष्ठस्तु सप्तरात्रेण मानवः ॥६५॥
गुडमिक्षुरसं मस्तु क्षीरमुल्लोडितं दधि।
पायसं कृशरां सर्पिः काश्मर्यत्रिफलारसम् ॥६६॥
द्राक्षारसं पीलुरसं जलमुष्णमथापि वा।
मद्यं वा तरुणं पीत्वा मृदुकोष्ठो विरिच्यते ॥६७॥
विरेचयन्ति नैतानि क्रूरकोष्ठं कदाचन।
भवति क्रूरकोष्ठस्य ग्रहण्यत्युल्बणानिला ॥६८॥
उदीर्णपित्ताऽल्पकफा ग्रहणी मन्दमारुता।
मृदुकोष्ठस्य तस्मात् स सुविरेच्यो नरः स्मृतः ॥६९॥

के मृदुक्रूरकोष्ठा इत्यस्योत्तरमाह—मृदुकोष्ठ इत्यादि। योऽच्छस्नेहोपसेवया त्रिरात्रेण स्निह्यति स मृदुकोष्ठः, यश्च सप्तरात्रेण स्निह्यति स क्रूरकोष्ठ इत्यर्थः। यद्यपि मध्यकोष्ठविषयकप्रश्नस्य पूर्वमनुद्दिष्टत्वात् मध्यकोष्ठलक्षणं नोक्तं, तथाऽपि मध्यविधया पञ्चभिर्दिनैर्यः स्निह्यति स मध्यकोष्ठो भवतीति ज्ञेयम्। सप्तरात्रेणैव क्रूरकोष्ठः स्निह्यतीति यदुक्तं तदुचितमात्रया नान्यथा; अत एव **तन्त्रान्तरे**—"त्रिपञ्चसप्तरात्राणि स्नेहपानं विधीयते। मृदुमध्यादिकोष्ठानां (मृदु)मध्यादिभेदतः।" इति। सप्तरात्रादूर्ध्वमपि स्नेहनमुक्तम्। नन्वेवं "नातः परं स्नेहनमादिशन्ति सात्म्यीभवेत् सप्तदिनात् परं तु।" (सि० १.७) इति **दृढबलवचनेन** सह

विरोधः यतः सप्तरात्रात्परेण क्रियमाणः स्नेहः सप्तरात्रप्रयोगेण सात्म्यीभूतत्वात् न स्नेहमधिकं शरीरे करोति; **सुश्रुते**ऽप्युक्तं—"सप्तरात्रात् परं स्नेहः सात्म्यीभावाय कल्पते।" (सु० चि० ३१.३६) इति सत्यं, किन्तु यावत्या स्नेहमात्रया सप्तरात्रोपयुक्तया स्नेहनं न कृतं सैव मात्रा सात्म्यीभूतेति सा सप्ताहात्परेणाप्रयोज्यैव; या पुनरधिकमात्रा सात्म्यतां न गता सा सप्तरात्रादूर्ध्वमपि स्नेहार्थं कर्तव्यैव। **वृद्धवैद्यास्तु** सप्तरात्रेणाथ स्निग्धे पुरुषे सात्म्यतादोषपरिहारार्थं दिनमेकं दिनद्वयं वा विश्रम्य स्नेहनं कार्यमेवेति। अन्ये तु मृदुकोष्ठस्यापि त्र्यहादूर्ध्वं स्नेहनं (न) कार्यं सात्म्यीभावदोषादिति व्याख्यानयन्ति, तन्न, यतः सप्तभिरेव दिनैः सात्म्यीभाव आचार्येणोच्यते। प्रकारान्तरेणापि मृदुकोष्ठादिलक्षणमाह—गुडमित्यादि। उल्लोडितं दधिसरः। कृशरा तिलतण्डुलमाषकृता यवागूः। न विरेचयन्तीत्यत्र हेतुमाह—भवतीत्यादि। ग्रहणी अग्न्यधिष्ठानभूता नाडी, "अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता" (चि० १५.५६) इति। एतेन क्रूरकोष्ठस्य ग्रहणीगतो वायुः गुडादीनां सरत्वं प्रतिबध्नातीति भावः। मृदुकोष्ठस्य सुखविरेच्यत्वे उपपत्तिमाह—उदीर्णपित्ताऽल्पकफेत्यादि। एतेन मृदुकोष्ठस्य प्रतिबन्धकाभावात् सरगुणस्य पित्तस्य च बलवत्वात् सुखं विरेचनं भवतीति भावः ॥६५-६९॥

उदीर्णपित्ता ग्रहणी यस्य चाग्निबलं महत्।
भस्मीभवति तस्याशु स्नेहः पीतोऽग्नितेजसा ॥७०॥

स जग्ध्वा स्नेहमात्रां तामोजः प्रक्षारयन् बली।
स्नेहाग्निरुत्तमां तृष्णां सोपसर्गामुदीरयेत् ॥७१॥

(नालं स्नेहसमृद्धस्य शमायान्नं सुगुर्वपि।)
स चेत् सुशीतं सलिलं नासादयति दह्यते।
यथैवाशीविषः कक्षमध्यगः स्वविषाग्निना ॥७२॥

अजीर्णे यदि तु स्नेहे तृष्णा स्याच्छर्दयेद्भिषक्।
शीतोदकं पुनः पीत्वा भुक्त्वा रूक्षान्नमुल्लिखेत् ॥७३॥

न सर्पिः केवलं पित्ते पेयं सामे विशेषतः।
सर्वं ह्यनुरजेद्देहं हत्वा संज्ञां च मारयेत् ॥७४॥

तन्द्रा सोत्क्लेश आनाहो ज्वरः स्तम्भो विसंज्ञता।
कुष्ठानि कण्डूः पाण्डुत्वं शोफार्शांस्यरुचिस्तृषा ॥७५॥

जठरं ग्रहणीदोषाः स्तैमित्यं वाक्यनिग्रहः ।
शूलमामप्रदोषाश्च जायन्ते स्नेहविभ्रमात् ॥७६॥
तत्राप्युल्लेखनं शस्तं स्वेदः कालप्रतीक्षणम् ।
प्रति प्रति व्याधिबलं बुद्ध्वा स्रंसनमेव च ॥७७॥
तक्रारिष्टप्रयोगाश्च रूक्षपानान्नसेवनम् ।
मूत्राणां त्रिफलायाश्च स्नेहव्यापत्तिभेषजम् ॥७८॥

व्यापदः सिद्धयश्च का इति प्रश्नद्वयस्योत्तरमेकेन च प्रघट्टकेनाह— उदीर्णपित्ता ग्रहणीत्यादि । प्रक्षारयन्निति स्वस्थानात् च्यावयन् । उत्तमां (महतीं), सोपसर्गां सोपद्रवाम् । कक्षः काष्ठसमूहः । अजीर्णे इत्यादि— प्रथमं तं तृष्णाजनकस्नेहं छर्दयेत् वमेत् ततः स्नेहं छर्दयित्वा पुनः शीतोदकं पीत्वा रूक्षान्नं च भुक्त्वा उल्लिखेत् दोषशेषनिरासार्थमिति भावः । घृतस्य शीतवीर्यत्वेन पित्ते तद्विहितं; **सुश्रुते**ऽप्युक्तं—"केवलं पैत्तिके सर्पिः" (सु० चि० ३१.१९) इति । इदानीं सामे पित्ते तन्निषेधमाह—न सर्पिरित्यादि । सर्पिः सामे पित्ते न पेयं, केवलमसंस्कृतं पुनर्विशेषतो न पेयं सामपित्त एव, एतेन तिक्तादिसिद्धघृतं सामे पित्ते तिक्तादिपाचनगुणयोगात् योग्यं कदाचिद्भवत्यपि, असंस्कृतं तु सर्वथा विरुद्धमेवेति भावः । अन्ये तु केवलमसंस्कृतं सर्पिः पित्ते सामान्येन सामे निरामेऽपि वा न पेयं, सामे पित्ते विशेषत इति व्याचक्षते, तन्न, केवलं पैत्तिके सर्पिरिति **सुश्रुत**विरोधात् । कुतो न पेयमित्याह—सर्वं हीत्यादि । अनुरजेदिति पित्तरक्तं[1] कुर्यात् । आमप्रदोषात् विसूचिकादयः । विभ्रमोऽविधिसेवनम् । कालप्रतीक्षणमिति स्नेहजनितदोषक्षयं यावदभोजनम् । तक्रारिष्टप्रयोगाश्चिकित्सिते वक्ष्यन्ते । मूत्राणां त्रिफलायाश्च सेवनमिति सम्बन्धः ॥७०-७८॥

अकाले चाहितश्चैव मात्रया न च योजितः ।
स्नेहो मिथ्योपचाराच्च व्यापद्येतातिसेवितः ॥७९॥

मिथ्योपचारो यथोक्तविध्यननुष्ठानम् । व्यापद्येतेति विकृतिमापद्येत । अतिसेवित इति कालप्रकर्षेण सेवितः । अतिमात्रसेवनस्य च 'मात्रया न च योजित' इत्यनेनैवोक्तत्वात् ॥७९॥

---

१. वर्णं १

स्नेहात् प्रस्कन्दनं जन्तुस्त्रिरात्रोपरतः पिबेत् ।
स्नेहवद्द्रवमुष्णं च त्र्यहं भुक्त्वा रसौदनम् ॥८०॥

संशोधनस्नेहपाने वृत्तिमाह—स्नेहादित्यादि । स्नेहात् स्नेहप्रयोगात् । त्रिरात्रोपरतः त्रिरात्रं परित्यक्तस्नेहपानः सन् प्रस्कन्दनं विरेचनौषधं पिबेत् । स्नेहोपरमत्रिरात्र एव पादशो भोजनं विधेयं, तदाह—स्नेहवदित्यादि ॥८०॥

एकाहोपरतस्तद्वद्भुक्त्वा प्रच्छर्दनं पिबेत् ।

वमनस्नेहे वृत्तिमाह—एकाहं स्नेहप्रयोगादुपरत इत्यर्थः । तद् भुक्त्वेति स्नेहोपरमदिवस एव स्नेहवद्द्रवमुष्णं च रसौदनं भुक्त्वेत्यर्थः ॥–

स्यात्त्वसंशोधनार्थीये वृत्तिः स्नेहे विरिक्तवत् ॥८१॥

संशमनस्नेहे वृत्तिमाह—स्यादित्यादि । असंशोधनार्थीये संशमने । वृत्तिरुपचारो विरिक्तवत्, स च "सम्यक् विरिक्तं चैनम्" (सू० १५. १७) इत्यादिना उपकल्पनीयेऽध्याये वक्ष्यमाणः । यद्यपि तत्र वमनोक्तविधिरेव विरेचनेऽप्यतिदिष्टः, तथाऽपि वमनविधौ धूमविधानात् वमनविधिं परित्यज्य विरेचनविधेरत्रातिदेशो बोध्यः, स्नेहपाने हि मात्राशितीये धूमपानं निषिद्धम् ॥८१॥

स्नेहद्विषः स्नेहनित्या मृदुकोष्ठाश्च ये नराः ।
क्लेशासहा मद्यनित्यास्तेषामिष्टा विचारणा ॥८२॥

लावतैत्तिरमायूरहांसवाराहकौक्कुटाः ।
गव्याजौरभ्रमात्स्याश्च रसाः स्युः स्नेहने हिताः ॥८३॥

यवकोलकुलत्थाश्च स्नेहाः सगुडशर्कराः ।
दाडिमं दधि सव्योषं रससंयोगसंग्रहः ॥८४॥

स्नेहयन्ति तिलाः पूर्वं जग्धाः सस्नेहफाणिताः ।
कृशराश्च बहुस्नेहास्तिलकाम्बलिकास्तथा ॥८५॥

फाणितं शृङ्गवेरं च तैलं च सुरया सह ।
पिबेद्रूक्षो भृतैर्मांसैर्जीर्णेऽश्नीयाच्च भोजनम् ॥८६॥

तैलं सुराया मण्डेन वसां मज्जानमेव वा ।
पिबन् सफाणितं क्षीरं नरः स्निह्यति वातिकः ॥८७॥

धारोष्णं स्नेहसंयुक्तं पीत्वा सशर्करं पयः ।
नरः स्निह्यति पीत्वा वा सरं दध्नः सफाणितम् ॥८८॥
पाञ्चप्रसृतिकी पेया पायसो माषमिश्रकः ।
क्षीरसिद्धो बहुस्नेहः स्नेहयेदचिरान्नरम् ॥८९॥
सर्पिस्तैलवसामज्जतण्डुलप्रसृतैः श्रृता ।
पाञ्चप्रसृतिकी पेया पेया स्नेहनमिच्छता ॥९०॥
(शौकरो वा रसः स्निग्धः सर्पिर्लवणसंयुतः ।
पीतो द्विर्वासरे यत्नात् स्नेहयेदचिरान्नरम् ॥१॥)

विचारणा केषु योज्या इत्यस्योत्तरमाह—स्नेहद्विष इत्यादि। विचारणाविधिमाह—लावेत्यादि। उक्तानां लावादिरसानां संस्कारमाह—यवकोलेत्यादि। रसे स्नेहार्थोक्तरसे उचितः संयोगो येषां ते रससंयोगास्तेषां सङ्ग्रहः। पूर्वमिति भोजनात् पूर्वम्। तिलप्रधानः काम्बलिकस्तिलकाम्बलिकः, एतल्लक्षणं च प्रागेवोक्तम्। श्रृङ्गवेरमिति श्रृङ्गवेररसम्। भृतैरिति भटित्रीकृतैः। सलवणमिति ईषत्सैन्धवम्। पाञ्चप्रसृतिकी वक्ष्यमाणा। माषमिश्रको माषतण्डुलाभ्यां कृतमन्नम्। तामेव पाञ्चप्रसृतिकीमाह—सर्पिरित्यादि। पेयेति पातव्या ॥८२–९०॥

ग्राम्यानूपौदकं मांसं गुडं दधि पयस्तिलान् ।
कुष्ठी शोथी प्रमेही च स्नेहने न प्रयोजयेत् ॥९१॥
स्नेहैर्यथार्हं तान् सिद्धैः स्नेहयेदविकारिभिः ।
पिप्पलीभिर्हरीतक्या सिद्धैस्त्रिफलयाऽपि वा ॥९२॥
द्राक्षामलकयूषाभ्यां दध्ना चाम्लेन साधयेत् ।
व्योषगर्भं भिषक् स्नेहं पीत्वा स्निह्यति तं नरः ॥९३॥
यवकोलकुलत्थानां रसाः क्षारः सुरा दधि ।
क्षीरसर्पिश्च तत् सिद्धं स्नेहनीयं घृतोत्तमम् ॥९४॥

एषु व्याधिषु या विचारणाः न प्रयोज्यास्ता आह—ग्राम्येत्यादि। स्नेहने न प्रयोजयेदिति ग्राम्यादीनि कुष्ठादिरोगे न प्रयोजयेदित्यर्थः। तर्हि कैः स्नेह्या इति स्नेहैरित्यादि। यथास्वमिति यो यः स्नेहो युज्यते सर्पिरादिः। सिद्धैरिति तत्तद्व्याधिहरत्वेन प्रसिद्धैः। द्वितीयं सिद्धैरिति पदं पिप्पल्यादिभिः सम्बध्यते, तेन पिप्पलीभिः तथा हरीतक्या तथा

त्रिफलया च सिद्धैरिति पृथग्योज्यं; पिप्पल्यादिसिद्धाश्च स्नेहाः कुष्ठादिषु यथासंख्यमिति केचित्। द्राक्षेत्यादि—अत्र यूषः क्वाथः, गर्भः कल्कः। अत्र त्रिभिर्द्रवैर्मिलित्वा चातुर्गुण्यं, एकेनापि चातुर्गुण्यं द्वाभ्यामपि चातुर्गुण्यमित्यादिवचनबलात्। यवकोलेत्यादौ षड्द्रव्याण्येव स्नेहसमानि "पञ्च प्रभृति यत्र स्युर्द्रवाः स्नेह(स्य) सम्विधौ। तत्र स्नेहसमान्याहुः" इत्युक्तेः। क्षारो यवक्षारः कल्कः ॥९१-९४॥

तैलमज्जवसासर्पिर्बदरत्रिफलारसैः ।
योनिशुक्रप्रदोषेषु साधयित्वा प्रयोजयेत् ॥९५॥

तैलमज्जेत्यादि—चतुःस्नेहोऽकल्क एव ॥९५॥

गृह्णात्यम्बु यथा वस्त्रं प्रस्रवत्यधिकं यथा ।
यथाग्नि जीर्यति स्नेहस्तथा स्रवति चाधिकः ॥९६॥

यथा वाऽक्लेद्य मृत्पिण्डमासिक्तं त्वरया जलम् ।
स्रवति स्रंसते स्नेहस्तथा त्वरितसेवितः ॥९७॥

इदानीमुपयुक्तः स्नेहः शरीरं (सं,स्नेह्याधिकश्चेद्भवति तदा स्रवति, अन्यथा तु जीर्यत्येवेत्याह—गृह्णातीत्यादि। यथाग्नीति अग्न्यनुरूपम्। ननु स्नेहपानं हि स्निग्धलक्षणावधि कार्यं, तेनैकदिन एव तथा स्नेहपानं क्रियतां यथा शीघ्रमेव स्नेहलक्षणं स्यादित्याह—यथा चेत्यादि। अक्लेद्य[1] ईषत्क्लेदयित्वा, एवं त्वरितसेवितोऽपि स्नेहो धातूनस्नेहयित्वैव संस्रते अधो याति, तथा च सति सम्यक्स्नेहनं न भवतीति भावः ॥९६-९७॥

लवणोपहिताः स्नेहाः स्नेहयन्त्यचिरान्नरम् ।
तद्ध्यभिष्यन्द्यरूक्षं च सूक्ष्ममुष्णं व्यवायि च ॥९८॥

इदानीं लवणयोगेन सर्वेषामेव स्नेहानां शीघ्रं स्नेहकर्तृतामाह—लवणोपहिता इत्यादि। अभिष्यन्दि दोषसंघातविच्छेदनम्। व्यवायीति अखिलदेहव्याप्तिपूर्वकपाकगामि ॥९८॥

स्नेहमग्रे प्रयुञ्जीत ततः स्वेदमनन्तरम् ।
स्नेहस्वेदोपपन्नस्य संशोधनमथेतरत् ॥९९॥

स्वेदार्हाणां स्नेहपूर्वकतामाह—स्नेहमित्यादि ॥९९॥

---

१. आक्लेद्य (च० नि०)

तत्र श्लोकः—

स्नेहाः स्नेहविधिः कृत्स्नव्यापत्सिद्धिः सभेषजा ।
यथाप्रश्नं भगवता व्याहृतं चान्द्रभागिना ॥१००॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
स्नेहाध्यायो नाम त्रयोदशोऽध्यायः ॥१३॥

चान्द्रभागिनेति चन्द्रभागाया अग्निवेशजनयित्र्याः पुत्रश्चान्द्रभागिरग्निवेश इत्यर्थः ॥१००॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
स्नेहाध्यायः समाप्तः ॥१३॥

चतुर्दशोऽध्यायः

अथातः स्वेदाध्यायं व्याख्यास्यामः ॥१॥
इति ह स्माह भगवानात्रेयः ॥२॥

स्नेहमग्रे प्रयुञ्जीत ततः स्वेदमनन्तरमिति समनन्तरोक्तहेतोः स्नेहानन्तरं स्वेदाः प्रवक्ष्यन्त इत्यर्थः ॥१-२॥

अतः स्वेदाः प्रवक्ष्यन्ते यैर्यथावत्प्रयोजितैः ।
स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः ॥३॥
स्नेहपूर्वं प्रयुक्तेन स्वेदेनावजितेऽनिले ।
पुरीषमूत्ररेतांसि न सज्जन्ति कथञ्चन ॥४॥
शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादनैः ।
नमयन्ति यथान्यायं किं पुनर्जीवतो नरान् ॥५॥

वातकफात्मका इति व्यस्तसमस्ततया योज्यं, उदरादयो हि वातकफजा अपि स्वेदेन न शाम्यन्ति, अत उक्तं—स्वेदसाध्या इति, तेनोदरादिव्युदासः। न सज्जन्तीति अनुवृत्तानि न भवन्ति। यथान्यायमिति यथाशास्त्रं, स्नेहस्वेदोपपादनैरित्यन्वयः, शास्त्रोक्तैः स्नेहस्वेदविधिभिरित्यर्थः ॥३-५॥

रोगर्तुव्याधितापेक्षो नात्युष्णोऽतिमृदुर्न च ।
द्रव्यवान् कल्पितो देशे स्वेदः कार्यकरो मतः ॥६॥
व्याधौ शीते शरीरे च महान् स्वेदो महाबले ।
दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो हितः ॥७॥
वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते ।
स्निग्धरूक्षस्तथा स्निग्धो रूक्षश्चाप्युपकल्पितः ॥८॥

तदेव स्वेदविधानमाह—व्याधावित्यादि। व्याधौ महाबले तथा शीते कालकृते शीतेऽपि महाबले तथा शरीरे च महाबले। महानिति मृदुमध्यस्वेदापेक्षया प्रचण्डतापत्वेन कालबाहुल्येन च। एवं दुर्बल इति मध्यम इति च व्याख्येयम्। दोषविशेषापेक्षयाऽपि कल्पनाभेदमाह—वातश्लेष्म-

णीत्यादि। अत्र यथासंख्यमन्वयः। स्निग्धरूक्षद्रव्यकृतत्वेन स्वेदस्य स्निग्धरूक्षता। अत्र केचित् चकारात् पित्तोपसृष्टेऽपि वातश्लेष्मणि वा द्रवस्वेदो बोध्य इत्याहुः, यदाह **सुश्रुतः**—"अन्यतरस्मिन् वा पित्तसंसृष्टे वायौ(?)द्रवस्वेदः" (सु० चि० ३२.१४) इति; **वाग्भटे**ऽप्युक्तं—"उद्रिक्त-लवणैः स्नेहचुक्रतक्रपयःप्लुतैः। केवले पवने, श्लेष्मसंसृष्टे सुरसादिभिः॥ पित्तेन पद्मकाद्यैस्तु" (अ० हृ० सू० १७.३-४) इति। यद्यपि स्वेदस्योष्ण-त्वेन न साक्षात् पित्तहरत्वं तथाऽपि उष्णस्यापि जलस्य सहजशीतत्वेन पित्ताविरोधित्वात् पित्तहरत्वमुच्यते; किंवा वातकफावृतसन्धिगतस्य स्वेदेन वातकफापनयनात् पुनः रोमकूपनिःसरणद्वारा स्वेदेन शमनं विधीयत एव; उक्तं च—"पित्तमन्तर्गतं गूढं स्वेदसेकोपनाहनैः। नयन्ति बहिरुष्णैर्हि तथोष्णं शमयेद्धि तत् ॥" इति ॥६-८॥

आमाशयगते वाते कफे पक्वाशयाश्रिते।
रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तथैव च ॥९॥

दोषाणामामाशयादिदेशविशेषसम्बन्धात् पूर्वोक्तकल्पना व्यभिचर-तीत्याह—आमाशयगतेत्यादि। आमाशयेति कफस्थानोपलक्षणं, तेन कफस्थानापेक्षया पूर्वं रूक्षस्वेदं कृत्वा पश्चाद्वातापेक्षः स्निग्धः कार्यः, यदुक्तं—"स्थानं जयेद्धि पूर्वम्" इति, एवं पक्वाशयगते कफे स्नेहपूर्वो व्याख्येयः। ननु वातो हि रूक्षलघुखरादिगुणवान् आमाशयस्तु गुरुमृदु-स्निग्धादिगुण इति अतो विपरीतगुणत्वात् वातशान्त्यैव भवितव्यं का कथा वातकोपस्येति? नैवं, यदा दोषो बली भवति तदान्याश्रयेऽपि कोपो भवति, यदाह—"ते कालादिबलं लब्ध्वा कुप्यन्त्यन्याश्रयेष्वपि।" इति ॥९॥

वृषणौ हृदयं दृष्टी स्वेदयेन्मृदु नैव वा।
मध्यमं वंक्षणौ शेषमङ्गावयवमिष्टतः ॥१०॥

अस्वेद्यप्रदेशमाह—वृषणावित्यादि। वृषणस्वेदेन प्रत्यासन्नशुक्रवह-स्रोतस उपघातात् क्लीबत्वं स्यात्, हृदयेऽपि ओजःशोषः स्यात्, दृष्टावपि तर्पकश्लेष्मक्षयात्तिमिरमान्ध्यं वा भवेदिति, अत एषु प्रदेशेषु स्वेद-निषेधः। स्वेदैकसाध्ये तु व्याधौ गत्यन्तराभावान्मृदु यथा स्यात्तथा स्वेदयेत्। अत्र स्वेदैकसाध्ये स्वेदः क्रियान्तरसाध्ये तु तन्निषेध इति भिन्नविषयतया विधिनिषेधयोर्न विरोधः। मध्यममित्यपि क्रियाविशेषणं,

मध्यमं साधारणं, वंक्षणस्यापि सामीप्यादिति भावः। शेषमिति वृषणादिव्यतिरिक्तं अङ्गं जङ्घाबाह्वादि, तदवयवं कुक्षिग्रीवादि, इष्टमिति भावे क्तः, इच्छात इत्यर्थः, सा च आतुरस्य वैद्यस्य चेति ॥१०॥

सुशुद्धैर्नक्तकैः पिण्ड्या गोधूमानामथापि वा।
पद्मोत्पलपलाशैर्वा स्वेद्यः संवृत्य चक्षुषी ॥११॥

चक्षुःसन्निहितदेशो यदा विद्यते तदा चक्षुषः स्वेदपरिहारोपायमाह—सुशुद्धैरित्यादि। नक्तकैरिति पटावयवैः ॥११॥

मुक्तावलीभिः शीताभिः शीतलैर्भाजनैरपि।
जलार्द्रैर्जलजैर्हस्तैः स्विद्यतो हृदयं स्पृशेत् ॥१२॥

हृदयरक्षणोपायमाह—मुक्तावलीभिरित्यादि। एतेनास्वेद्यमात्रमुक्तं, तेनोक्तप्रकारेण वृषणरक्षाप्युन्नेया ॥१२॥

शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे।
सञ्जाते मार्दवे स्वेदे स्वेदनाद्विरतिर्मता ॥१३॥

स्वेदसम्यग्योगलक्षणमाह—शीतेत्यादि। स्वेद इति प्रस्वेद एव। अत्र शीतादिव्युपरमस्य स्वेदसम्यग्योगलक्षणत्वात् शीताद्यनुपरमस्य स्वेदासम्यग्योगलक्षणत्वमुक्तं भवति; सुश्रुतेऽप्युक्तं—"स्वेदास्रावो व्याधिहानिर्लघुत्वं शीतार्थित्वं मार्दवं चातुरस्य। सम्यक्स्विन्ने लक्षणं प्राहुरेतन्मिथ्यास्विन्ने व्यत्ययेनैतदेव ॥" (सु० चि० ३२.२३) इति ॥१३॥

पित्तप्रकोपो मूर्च्छा च शरीरसदनं तृषा।
दाहः स्वराङ्गदौर्बल्यमतिस्विन्नस्य लक्षणम् ॥१४॥
उक्तस्तस्याशितीये यो ग्रैष्मिकः सर्वशो विधिः।
सोऽतिस्विन्नस्य कर्तव्यः स्निग्धो मधुरशीतलः ॥१५॥

स्वेदातियोगलक्षणमाह—पिपासे (पित्ते ?)त्यादि। अतिस्विन्नचिकित्सितमतिदेशेनाह—उक्त इत्यादि। मधुरशीतल इति ग्रैष्मिकविधिविशेषणं "मद्यमल्पं न वा पेयम्" (सू० ६.२९) इत्युपदिष्टस्य मद्यपानस्य प्रतिषेधार्थं, मधुरशीतादिविशेषविधानार्थं च ॥१४-१५॥

कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनाम्।
पित्तिनां सातिसाराणां रूक्षाणां मधुमेहिनाम् ॥१६॥

विदग्धभ्रष्टब्रध्नाना विषमद्यविकारिणाम् ।
श्रान्तानां नष्टसंज्ञानां स्थूलानां पित्तमेहिनाम् ॥१७॥
तृष्यतां क्षुधितानां च क्रुद्धानां शोचतामपि ।
कामल्युदरिणां चैव क्षतानामाढ्यरोगिणाम् ॥१८॥
दुर्बलातिविशुष्काणामुपक्षीणौजसां तथा ।
भिषक् तैमिरिकाणां च न स्वेदमवतारयेत् ॥१९॥

अस्वेद्यानाह—कषायेत्यादि । कषायमद्यनित्यानामिति कषायनित्यानां मद्यनित्यानां चेत्यर्थः । कषायस्य विरूक्षकत्वेन कषायनित्याः रूक्षाः कृशाश्च भवन्ति । रूक्षे कृशे च स्वेदादतिरौक्ष्यमतिकार्श्यञ्च स्यादिति स्वेदनिषेधः । मद्यविकारिणः पित्तवृद्ध्या तद्विकारस्य महान् वेगः स्यादिति । अन्ये तु कषायद्रव्यकृतं मद्यं कषायमद्यमित्याहुः, तन्न, **सुश्रुतादौ** सामान्यतः पीतमद्ये च स्वेदनिषेधात्, तदुक्तं—"तृट्छर्द्यार्तो गर्भिणी पीतमद्यो नैते स्वेद्या नोदरी नातिसारी[1] ।" (सु० चि० ३२.२५) इति । अन्ये तु कषायशब्दो मधुरव्यतिरिक्तरसोपलक्षक इत्याहुः । **गर्भिण्यास्तु** स्वेदेन गर्भव्यापत्तिः स्यादिति । रक्तपित्तिनां स्वेदेन रक्तपित्तयोः प्रकोपान्महान् वेगः स्यादिति । पित्तिनामिति पित्तप्रकृतीनां, सातिसारिणामिति अतिसारिणां स्वेदात् पित्तवृद्ध्याऽतिसारवेगो महान् स्यादिति । मधुमेहशब्दोऽत्र मेहमात्रवचनः, मेहे हि क्षीणधातुतया स्वेदाद् तृड्दाहवृद्धिः स्यादिति । विदग्धभ्रष्टब्रध्नानामिति ब्रध्नं गुदं, ब्रध्नेत्यस्य विदग्धभ्रष्टाभ्यां प्रत्येकमन्वयः, विदग्धगुदाश्च क्षाराग्निभ्यामिति, भ्रष्टगुदाः गुदभ्रंशयुक्ताः, **वाग्भटीये**—"भ्रष्टदग्धगुदग्लानिक्रोधशोकभयार्दितान् ।" (अ० हृ० सू० १७.२३) इत्युक्तं, भ्रष्टदग्धगुदयोः पित्तवृद्ध्या सरत्वेन गुदाभिभ्रंशो दाहश्च स्यादिति । मद्यनित्यानामित्युक्त्वापि मद्यविकारिणामिति यदुच्यते तन्मद्यनित्यस्य वातकफ(ज)मदात्ययेऽपि स्वेदनिषेधार्थम् । श्रान्तानामिति संशुष्कद्रवधातूनाम् । नष्टसंज्ञानामिति मूर्च्छितानां, (मूर्च्छितानां) हि स्वेदात् पित्तवृद्ध्या मूर्च्छाधिक्यं स्यात् । संतापान्नष्टसंज्ञानामिति च पाठः । स्थूलानां स्वेदासहत्वात् प्राणोपरोधः स्यात् । पित्तमेहिनामिति विशेषार्थमुक्तम् । कामलायाः पित्तवृद्धत्वेन स्वेदनिषेधः । अत्युष्णलवणक्षाराणामुदरनिदानत्वेन स्वेदाद्वृद्धिः स्यादिति । क्षते स्वेदा-

---

१. यश्च मर्त्योऽतिसारी (सु० चि०)

द्रक्तातिप्रवृत्तिः स्यादिति। आढ्यरोगो वातरक्त, तत्र हि स्वेदाद्रक्तदुष्टिः स्यादिति। विशुष्काणामिति शोषिणां, **वाग्भटेऽपि**—"कुष्ठशोषाढ्यरोगिणः" (अ० हृ० सू० १७.२२) इत्युक्तं; शोषे हि स्वेदाद्रसक्षयः स्यात्। तिमिरेऽपि स्वेदात्तर्पकश्लेष्मक्षयाद्(वात)वृद्धिः स्यादिति। चकारात्कुष्ठविसर्पादीनां ग्रहणम्। एषु च स्वेदाविषयेषु यदि स्वेदैकसाध्यो व्याधिः स्यात् तदा मृदुः स्वेदः कार्य एव; उक्तं हि **सुश्रुते**—"एतेषां स्वेदसाध्या ये व्याधयस्तेषु बुद्धिमान्। मृदून् स्वेदान् प्रयुञ्जीत" (सु० चि० ३२.२६) इति ॥१६-१९॥

प्रतिश्याये च कासे च हिक्काश्वासेष्वलाघवे।
कर्णमन्याशिरःशूले स्वरभेदे गलग्रहे ॥२०॥

अर्दितैकाङ्गसर्वाङ्गपक्षाघाते विनामके।
कोष्ठानाहविबन्धेषु मूत्राघाते विजृम्भके ॥२१॥

पार्श्वपृष्ठकटीकुक्षिसङ्ग्रहे गृध्रसीषु च।
मूत्रकृच्छ्रे महत्त्वे च मुष्कयोरङ्गमर्दके ॥२२॥

पादजानूरुजङ्घार्तिसङ्ग्रहे श्वयथावपि।
खल्लीष्वामेषु शीते च वेपथौ वातकण्टके ॥२३॥

संकोचायामशूलेषु स्तम्भगौरवसुप्तिषु।
सर्वाङ्गेषु विकारेषु स्वेदनं हितमुच्यते ॥२४॥

स्वेद्यानाह—प्रतिश्याय इत्यादि। विनामकः शरीरविनमनकारी वायुः। विजृम्भको बहिरायामो जृम्भाबहुत्वं वा। पादादीनां सङ्ग्रहः स्वकर्माक्षमता। खल्ली पादाद्यवमोटनम्। वातकण्टको गुल्फाश्रितो (वातः), स्तम्भस्य गौरवं बहुत्वं अतिस्तब्धतेत्यर्थः, न तु गौरवमिति पृथग्योजनीयम्[1] 'अलाघव' इति पूर्वमुक्त(त्वात्) ॥२०-२४॥

तिलमाषकुलत्थाम्लघृततैलामिषौदनैः।
पायसैः कृशरैर्मांसैः पिण्डस्वेदं प्रयोजयेत् ॥२५॥

गोखरोष्ट्रवराहाश्वशकृद्भिः सतुषैर्यवैः।
सिकतापांशुपाषाणकरीषायसपूटकैः ॥२६॥

---

१. गौरवमित्यर्थः[2]

श्लैष्मिकान् स्वेदयेत् पूर्वैर्वातिकान् समुपाचरेत् ।
द्रव्याण्येतानि शस्यन्ते यथास्वं प्रस्तरेष्वपि ॥२७॥

वक्ष्यमाणसंकरादिस्वेदानां द्रव्याण्याह—तिलमाषेत्यादि। अम्लेति तिलादिभिः सम्बध्यते, तिलादि(संयुक्तम)म्लमित्यर्थः। घृततैलमिश्रितान्यामिषाणि ओदनानि चेत्यर्थः। (पिण्डस्वेदः) पिण्डरूपः स्वेदः। करीषः शुष्कगोमयः, आयसोऽयोविकारः, स चेह पुटकरणयोग्यो बोध्यः। पूर्वैरिति तिलमाषादिभिः। यथास्वमित्यनेन तिलमाषादयो वाते, गोखरपुरीषादयश्च कफे कार्या इति दर्शयति ॥२५-२७॥

भूगृहेषु च जेन्ताकेषूष्णगर्भगृहेषु च ।
विधूमाङ्गारतप्तेषु स्वभ्यक्तः स्विद्यते सुखम् ॥२८॥

स्वेदादिगृहमाह—भूगृहेष्वित्यादि। भूस्वेदार्थं गृहेषु भूस्वेदगृहेषु, जेन्ताको वक्ष्यमाणः। गर्भगृहेष्विति कुटीस्वेदगृहेषु। स्वभ्यक्त इति सम्यगभ्यक्तः ॥२८॥

ग्राम्यानूपौदकं मांसं पयो बस्तशिरस्तथा ।
वराहमध्यपित्तासृक् स्नेहवत्तिलतण्डुलाः ॥२९॥

इत्येतानि समुत्क्वाथ्य नाडीस्वेदं प्रयोजयेत् ।
देशकालविभागज्ञो युक्त्यपेक्षो भिषक्तमः ॥३०॥

वारणामृतकैरण्डशिग्रुमूलकसर्षपैः ।
वासावंशकरञ्जार्कपत्रैरश्मन्तकस्य च ॥३१॥

शोभाञ्जनकसैरेयमालतीसुरसार्जकैः ।
पत्रैरुत्क्वाथ्य सलिलं नाडीस्वेदं प्रयोजयेत् ॥३२॥

भूतीकपञ्चमूलाभ्यां सुरया दधिमस्तुना ।
मूत्रैरम्लैश्च सस्नेहैर्नाडीस्वेदं प्रयोजयेत् ॥३३॥

नाडीस्वेदद्रव्याण्याह—ग्राम्येत्यादि। बस्तश्छागस्तस्य शिरः। स्नेहवन्त एरण्डबीजादयः तिलाश्च तण्डुलाश्च, अयं च वातापहो नाडीस्वेदः। कफहरनाडीस्वेदमाह—वारणेत्यादि। वारणमिति वरुणपत्रं, अमृतकं गुडूचीपत्रं, एरण्डपत्रं, तथा सर्षपैरित्यत्रापि पत्रैरित्यन्वयः। अश्मन्तकपत्रं मालु(या)पत्रम्। पुनः शोभाञ्जनग्रहणात् रक्तपीतशोभाञ्जनद्वयस्यापि ग्रहणम्। सैरेयो झिण्टी। वातकफापहनाडीस्वेदद्रव्यमाह—भूतीकेत्यादि ॥२९-३३॥

एत एव च निर्यूहाः प्रयोज्या जलकोष्ठके।
स्वेदनार्थं घृतक्षीरतैलकोष्ठांश्च कारयेत् ॥ ३४ ॥

एत एवेति नाडीस्वेदोक्तास्त्रयोऽपि। जलकोष्ठोऽवगाहार्थं कृतं मज्जनपात्रम्। एवं घृतक्षीरतैलकोष्ठाश्च व्याख्याताः ॥ ३४ ॥

गोधूमशकलैश्चूर्णैर्यवानामम्लसंयुतैः।
सस्नेहकिण्वलवणैरुपनाहः प्रशस्यते ॥ ३५ ॥

गन्धैः सुरायाः किण्वेन जीवन्त्या शतपुष्पया।
उमया कुष्ठतैलाभ्यां युक्तया चोपनाहयेत् ॥ ३६ ॥

चर्मभिश्चोपनद्धव्यः सलोमभिरपूतिभिः।
उष्णवीर्यैरलाभे तु कौशेयाविकशाटकैः ॥ ३७ ॥

उपनाहद्रव्याण्याह—गोधूमेत्यादि। शकलैरिति चूर्णैः। किण्वं सुराबीजम्। उपनाहो बहलं लेपं दत्त्वा चर्मादिभिरावृत्य व्याधियुक्तस्याङ्गस्य बन्धनम्; अयं चानग्निस्वेदोऽतिबहलत्वेन शरीरोष्मरोधं कृत्वा स्वेदयति। गन्धैरिति सुगन्धिद्रव्यैरगुर्वादिभिः। उष्णवीर्यैरिति आनूपप्राणिभवानि चर्माणि प्रायेणोष्णवीर्याणि भवन्ति। आविकः शाटकः कम्बलः ॥३५-३७॥

रात्रौ बद्धं दिवा मुञ्चेन्मुञ्चेद्रात्रौ दिवा कृतम्।
विदाहपरिहारार्थं, स्यात् प्रकर्षस्तु शीतले ॥ ३८ ॥

उपनाहस्वेदबन्धनमोक्षविधिं दर्शयति—रात्रावित्यादि। विदाहपरिहारार्थमिति छेदः। दिवा कृतमित्यत्र 'बन्धं' इति शेषः। विदाहो रक्तादिविदाहः। शीतले इत्यत्र 'काले' इति शेषः। प्रकर्षो बन्धनप्रकर्षः, स च उक्ताद्बन्धनकालादधिककालत्वम् ॥ ३८ ॥

सङ्करः प्रस्तरो नाडी परिषेकोऽवगाहनम्।
जेन्ताकोऽश्मघनः कर्षूः कुटी भूः कुम्भिकैव च ॥ ३९ ॥

कूपो होलाक इत्येते स्वेदयन्ति त्रयोदश।
तान् यथावत् प्रवक्ष्यामि सर्वानेवानुपूर्वशः ॥ ४० ॥

लक्षणाभिधानार्थं साग्निस्वेदान् विभजते—सङ्कर इत्यादि। तेषां लक्षणाभिधानं प्रतिजानीते—तान् यथावदित्यादि ॥३९-४०॥

तत्र वस्त्रान्तरितैरवस्त्रान्तरितैर्वा पिण्डैर्यथोक्तैरुपस्वेदनं सङ्करस्वेद इति विद्यात् ॥ ४१ ॥

यथोक्तैरिति ति(लमा)षेत्यादिनोक्तैः तथा गोखरादिग्रन्थोक्तपुटकरूपैश्च पिण्डैः ॥४१॥

शूकशमीधान्यपुलाकानां वेशवारपायसकृशरोत्कारिकादीनां वा प्रस्तरे कौशेयाविकोत्तरप्रच्छदे पञ्चाङ्गुलोरुबूकार्कपत्रप्रच्छदे वा स्वभ्यक्तसर्वगात्रस्य शयानस्योपस्वेदनं प्रस्तरस्वेद इति विद्यात् ॥ ४२ ॥

पुलाकस्तुच्छधान्यम्। उत्कारिका माषादिकृतो व्यञ्जनविशेषः। प्रस्तीर्यत इति प्रस्तरः शयनप्रमाणेन स्वेदवस्तूनां विस्तरणं, तस्मिन् प्रस्तरे, कौशेयाविकोत्तरप्रच्छदे इति कौशेयाविकपिहित इत्यर्थः। पञ्चाङ्गुलो रक्तैरण्डः ॥४२॥

स्वेदनद्रव्याणां पुनर्मूलफलपत्रशुङ्गादीनां मृगशकुनपिशितशिरस्पदादीनामुष्णस्वभावानां वा यथार्हमम्ललवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां बाष्पमनुद्वमन्त्यामुत्क्वथितानां नाड्या शरेषीकावंशदलकरञ्जार्कपत्रान्यतमकृतया गजाग्रहस्तसंस्थानया व्यामदीर्घया व्यामार्धदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्वा विनामितया वातहरसिद्धस्नेहाभ्यक्तगात्रो बाष्पमुपहरेत्; बाष्पो ह्यनृजुगामी विहतचण्डवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाडीस्वेदः ॥ ४३ ॥

नाडीस्वेदमाह—स्वेदनद्रव्याणामित्यादि। स्वेदनद्रव्याणामिति नाडीस्वेदक्वाथार्थं प्रागुक्तानाम्। शिरस्पदं मस्तकम्। बाष्पमनुद्वमन्त्यामिति क्वथनकाल इति शेषः। उत्क्वथितानां बाष्पं स्नेहाक्तगात्रस्य नाड्या उपहरेदित्यन्वयः। शरेषीकेत्यादिना विनामितयेत्यन्तेन नाडीकरणविधिमाह—वंशदलो वंशविदलरचितकटः, 'व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्' (अ. को. २.६.८७) इति। व्यामचतुर्थभागेत्यादि-अत्र यथासंख्यमन्वयः, तेन नाड्या मूले व्यामचतुर्थभागपरिणाहः कार्यः, अग्रभागे तु व्यामाष्टभागपरिणाह इत्यर्थः। परिणाहो वेष्टनेन विस्तारः। स्रोत इति रन्ध्रम्। द्विस्त्रिर्वा विनामितयोरतिबाष्पविघातार्थम्। यथोक्तनाडीकरणे गुणमाह—बाष्पो हीत्यादि ॥४३॥

वातिकोत्तरवातिकानां पुनर्मूलादीनामुत्क्वाथैः सुखोष्णैः कुम्भीर्वर्षुकाः प्रनाडीर्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः ॥४४॥

परिषेकविधिमाह—वातिकोत्तरेत्यादि। वातिकानि वातहराणि, उत्तरवातिकानि उत्तरः प्रधानो (वातो) यत्र ईदृशो यो वातकफसंसर्गः तत्र हितानीत्यर्थः। वर्षुकाः स्वल्पघटाः 'सहस्रधार' इत्यन्ये; प्रनाडीरिति वेणुनलादिनाडी ॥ ४४ ॥

वातहरोत्क्वाथक्षीरतैलघृतपिशितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः ॥४५॥

यथोक्त एवेति—लोकप्रसिद्ध एवेत्यर्थः ॥४५॥

अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत—तत्र पूर्वस्यां दिश्युत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे कृष्णमधुरमृत्तिके सुवर्णमृत्तिके वा परीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्तभूमिभागे सप्ताष्टौ वाऽरत्नीरुपक्रम्योदकात् प्राङ्मुखमुदङ्मुखं वाऽभिमुखतीर्थं कूटागारं कारयेत्, उत्सेधविस्तारतः परमरत्नीः षोडश, समन्तात् सुवृत्तं मृत्कर्मसंपन्नमनेकवातायनम्; अस्य कूटागारस्यान्तः समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेदाकपाटात्, मध्ये चास्य कूटागारस्य चतुष्किष्कुमात्रं पुरुषप्रमाणं मृन्मयं कन्दुकसंस्थानं बहुसूक्ष्मच्छिद्रमङ्गारकोष्ठकस्तम्भं सपिधानं कारयेत्; तं च खादिराणामाश्वकर्णादीनां वा काष्ठानां पूरयित्वा प्रदीपयेत्, स यदा जानीयात् साधु दग्धानि काष्ठानि विगतधूमान्यवतप्तं च केवलमग्निना तदग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति, तत्रैनं पुरुषं वातहराभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत्, प्रवेशयंश्चैनमनुशिष्यात्—सौम्य! प्रविश कल्याणायारोग्याय चेति, प्रविश्य चैनां पिण्डिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः, न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डिकैषा विमोक्तव्याऽऽप्राणोच्छ्वासात्, भ्रश्यमानो ह्यतः पिण्डिकावकाशाद्द्वारमनधिगच्छन् स्वेदमूर्च्छापरीततया सद्यः प्राणाञ्जह्याः, तस्मात् पिण्डिकामेनां न कथंचन मुञ्चेथाः; त्वं यदा जानीयाः—विगताभिष्यन्दमात्मानं सम्यक्प्रस्रुतस्वेदपिच्छं सर्वस्रोतोविमुक्तं लघूभूतमपगतविबन्धस्तम्भसुप्तिवेदनागौरवमिति, ततस्तां पिण्डिकामनुसरन् द्वारं प्रपद्येथाः, निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकमुपस्पृशेथाः, अपगतसन्तापक्लमस्तु मुहूर्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयाः; इति जेन्ताकस्वेदः ॥४६॥

जेन्ताकविधिमाह—अथेत्यादि। पूर्वस्यामुत्तरस्यामिति वास्त्वाद्यपेक्षया बोध्यम्। गुणवतीति सस्यप्ररोहादिसत्त्वेनेत्यर्थः; प्रशस्तत्वं तुषादिरहितत्वेन। परीवापो दीर्घिका। सुष्ठु उप समीपे तीर्थं घट्टं यस्य तस्मिन्। अरत्निर्हस्तः। उदकपृष्ठात् सप्ताष्टौ वा अरत्नीः प्रक्रम्यापसृत्येत्यन्वयः। कूटागारमिति वर्तुलागारम्। समन्ततो भित्तिमिति भित्तेश्चतुःपार्श्वे। आकपाटादिति द्वारपर्यन्तम्। चतुष्किष्कुमात्रमिति किष्कुर्हस्तः, एतद्धि परिणाहेन। पुरुषप्रमाणमित्यूर्ध्वतः। कन्दुकसंस्थानमिति वर्तुलाकृति। अङ्गारार्थं कोष्ठकोऽभ्यन्तरभागो यस्य स एव स्तम्भ इत्यङ्गारकोष्ठकस्तम्भः। खादिराणामिति करणपूरणयोरिति षष्ठी। जानीया इति पाठे प्रविशेरिति च पाठे स इत्यत्र त्वमित्यध्याहार्यम्। केवलमिति समग्रम्। पिच्छा पिच्छिलो भागः। सर्वस्रातोविमुक्तमिति सर्वस्रोतःसु विमुक्तमपगतविबन्धं विशुद्धस्रोतसमित्यर्थः। चक्षुषाः परिपालनार्थमिति उष्णाभितप्तस्य हि सहसा शीत(ज)लप्रवेशेन नेत्रोपघातः स्यादिति। अत्र च जेन्ताके भूमिविशेषपरिग्रहो मङ्गलार्थः, जलसान्निध्यं सम्भाव्यमानाबाधपरिहारार्थं तथा स्विद्यमानस्य जलदर्शनेन दृष्टिपरिपालनार्थं वा ॥४६॥

शयानस्य प्रमाणेन घनामश्ममयीं शिलाम्।
तापयित्वा मारुतघ्नैर्दारुभिः संप्रदीपितैः ॥४७॥

व्यपोज्झ्य सर्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा।
तां शिलामथ कुर्वीत कौशेयाविकसंस्तराम् ॥४८॥

तस्यां स्वभ्यक्तसर्वाङ्गः स्वपन् स्विद्यति ना सुखम्।
कौरवाजिनकौशेयप्रावाराद्यैः सुसंवृतः ॥४९॥
इत्युक्तोऽश्मघनस्वेदः,

अश्मघन(स्वेद)माह—शयानस्येत्यादि। कौरवं कार्पासम्। ॥४७-४९॥

कर्षूस्वेदः प्रवक्ष्यते।
खानयेच्छयनस्याधः कर्षूं स्थानविभागवित् ॥५०॥

दीप्तैरधूमैरङ्गारैस्तां कर्षूं पूरयेत्ततः।
तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम् ॥५१॥

कर्षूरभ्यन्तरविस्तीर्णः स्वल्पमुखो गर्तः ॥५०-५१॥

अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम्।
घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः संप्रलेपयेत् ॥५२॥

कुटीमध्ये भिषक् शय्यां स्वास्तीर्णामुपकल्पयेत् ।
प्रावाराजिनकौशेयकुथकम्बलगोलकैः ॥५३॥

हसन्तिकाभिरङ्गारपूर्णाभिस्तां च सर्वशः ।
परिवार्यान्तरारोहेदभ्यक्तः स्विद्यते सुखम् ॥५४॥

य एवाश्मघनस्वेदविधिर्भूमौ स एव तु ।
प्रशस्तायां निवातायां समायामुपदिश्यते ॥५५॥

कुटीस्वेदविधिमाह—अनत्युत्सेधविस्तारामित्यादि । अलोचनं अच्छिद्राम् । आद्यशब्दादन्येषामुष्णवीर्याणामगुर्वादीनां ग्रहणम् । हसन्तिका अङ्गारधानिकाः ताभिरन्तः परिवार्य तामुपकल्पितशय्यां कुटीमारोहेदित्यन्वयः ॥५२-५५॥

कुम्भीं वातहरक्वाथपूर्णां भूमौ निखानयेत् ।
अर्धभागं त्रिभागं वा शयनं तत्र चोपरि ॥५६॥

स्थापयेदासनं वाऽपि नातिसान्द्रपरिच्छदम् ।
अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसो गुडान् ॥५७॥

पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति ना सुखम् ।
सुसंवृताङ्गः स्वभ्यक्तः स्नेहैरनिलनाशनैः ॥५८॥

अर्धभागं त्रिभागं वा निखानयेदित्यन्वयः । शयनं तत्र चोपरीति कुम्भीकोपरि शयनं खट्वादि तथा कार्यं यथा (कुम्भीका) न भज्यते । आसनमिति स्वल्पखट्वा, तत्स्थ इति यथोक्तशयनासनस्थः ॥५६-५८॥

कूपं शयनविस्तारं द्विगुणं चापि वेधतः ।
देशे निवाते शस्ते च कुर्यादन्तःसुमार्जितम् ॥५९॥

हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरिते ।
स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना सुखम् ॥६०॥

कूपस्वेदमाह—कूपमित्यादि । कूपमिव कूपं गम्भीरगर्त्त(त्वेन) । वेधतोऽधःखननप्रमाणेन विस्तारापेक्षया द्विगुणम् । सुसंस्तीर्ण इति खट्वोपरिस्थितया शय्यया आच्छादिते कूप इत्यर्थः ॥५९-६०॥

धीतीकां तु करीषाणां यथोक्तानां प्रदीपयेत् ।
शयनान्तःप्रमाणेन शय्यामुपरि तत्र च ॥६१॥

सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत् ।
स्ववच्छन्नः स्वपंस्तत्राभ्यक्तः स्विद्यति ना सुखम् ॥६२॥
होलाकस्वेद इत्येष सुखः प्रोक्तो महर्षिणा ।
इति त्रयोदशविधः स्वेदोऽग्निगुणसंश्रयः ॥६३॥

होलाकविधिमाह—धीतीकामित्यादि । धीतीका शुष्कगोमयमृत्तिकादिकृताग्निरूपा । यथोक्तानामिति हस्त्यश्वादिभवानाम् । शयनान्तःप्रमाणेन धीतीकां कृत्वा इत्यध्याहार्य योज्यम् । यथोक्तामिति नातिसान्द्रपरिच्छदाम् । उक्तं साग्निस्वेदमुपसंहरति—इतीत्यादि । अग्निगुणसंश्रय इति साक्षादग्नेर्गुणमुष्णत्वमाश्रित्य स्वेदयतीत्यग्निगुणसंश्रयः ॥६१-६३॥

व्यायाम उष्णसदनं गुरुप्रावरणं क्षुधा ।
बहुपानं भयक्रोधावुपनाहाहवातपाः ॥६४॥
स्वेदयन्ति दशैतानि नरमग्निगुणादृते ।

अनग्निस्वेदानाह—व्यायाम इत्यादि । उष्णसदनमिति निश्छिद्रतया घनभित्तितया च स्वभावादेवोष्णं न पुनरग्नियोगात्, अत एव निवातं गृहमिति **वाग्भटेनोक्तम्** । बहुपानं बहुमद्यपानम् । उपनाहो द्विविधः—साग्निरनग्निश्च, तत्राद्यः सङ्करान्तर्भूत एव, यस्त्वनग्निर्बहलत्वेन शरीरोष्मरोधं कृत्वा स्वेदयति स इह बोध्यः ॥६४॥—

इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च ॥६५॥
एकाङ्गसर्वाङ्गगतः स्निग्धो रूक्षस्तथैव च ।
इत्येतत्त्रिविधं द्वन्द्वं स्वेदमुद्दिश्य कीर्तितम् ॥६६॥

उक्तं स्वेदमुपसंहरति—इत्युक्त इत्यादि । प्रकारान्तरेणापि द्वैविध्यमाह—एकाङ्गेत्यादि । एकाङ्गगताः सङ्करनाड्यादयः, सर्वाङ्गगताः प्रस्तरजेन्ताकादयः । स्निग्धरूक्षस्तु वातश्लेष्मविहितोऽनयोर्न भिद्यत इति उपसंहारे पृथङ्नोक्तः । द्वन्द्वमिति परस्परं विरुद्धं युग्मम् ॥६५-६६॥

स्निग्धः स्वेदैरुपक्रम्यः स्विन्नः पथ्याशनो भवेत् ।
तदहः स्विन्नगात्रस्तु व्यायामं वर्जयेन्नरः ॥६७॥

स्वेदात्पूर्वं स्वेदानन्तरं च यत्कार्यं तदाह—स्निग्ध इत्यादि । **स्निग्धः स्वेदैरुपक्रम्य** इत्यनेन स्वेदात्पूर्वं स्नेहः कार्य इति दर्शयति, एतच्च प्रागुक्तमपि प्रसङ्गादुक्तम् । पथ्याशन इति पथ्यसेवी स्यादित्यर्थः ।

पथ्यं च सुश्रुतोक्तमिहाप्यनुसर्त्तव्यं, यथा—"सम्यक्स्विन्नं समाश्वास्य स्नातमुष्णाम्बुभिः शनैः ॥ स्वभ्यक्तं प्रावृताङ्गं च निवातशरणस्थितम् । भोजयेदनभिष्यन्दि सर्वं चाचारमादिशेत् ॥" (सु० चि० ३२.२८-२९) इति ॥६७॥

तत्र श्लोकाः—

स्वेदो यथा कार्यकरो हितो येभ्यश्च यद्विधः ।
यत्र देशे यथा योग्यो देशो रक्ष्यश्च यो यथा ॥६८॥

स्विन्नातिस्विन्नरूपाणि तथाऽतिस्विन्नभेषजम् ।
अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना ॥६९॥

त्रयोदशविधः स्वेदो विना दशविधोऽग्निना ।
संग्रहेण च षट् स्वेदाः स्वेदाध्याये निदर्शिताः ॥७०॥

स्वेदाधिकारे यद्वाच्यमुक्तमेतन्महर्षिणा ।
शिष्यैस्तु प्रतिपत्तव्यमुपदेष्टा पुनर्वसुः ॥७१॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने स्वेदाध्यायो नाम चतुर्दशोऽध्यायः ॥१४॥

सङ्ग्रहे स्वेदो यथा कार्यकर इति स्नेहपूर्वं प्रयुक्तेनेत्यादिनोक्तस्य सङ्ग्रहः । हितो येभ्यश्च यद्विध इत्यनेन वाते स्निग्ध इत्यादि । यत्र देशे यथा योग्य इत्यनेन आमाशयगते वाते रूक्ष इत्यादि । सुशुद्धैर्नक्तकैरित्यादिना देशरक्षा । षट् स्वेदा इति इत्युक्तो द्विविधः स्वेद इत्यादिना । यद्वाच्यमुक्तमिति स्वेदाध्याये यद्वाच्यं योऽर्थ उक्तः तच्छिष्यैः प्रतिपत्तव्यं यतः पुनर्वसुरुपदेष्टेति योजना ॥६८-७१॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां स्वेदाध्यायः समाप्तः ॥ १४ ॥

पञ्चदशोऽध्याय:

अथात उपकल्पनीयमध्यायं व्याख्यास्याम: ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

"स्नेहस्वेदापपन्नस्य संशोधनमनन्तरम्" इत्युक्तसम्बन्धादेव स्वेदाध्यायानन्तरं शोधनविधेरभिधायकमुपकल्पनीयमाह । उपकल्पना शोधनद्रव्योपकल्पना, तामधिकृत्य कृतोऽध्याय उपकल्पनीय: ॥१॥२॥

इह खलु राजानं राजमात्रमन्यं वा विपुलद्रव्यं वमनं विरेचनं वा पाययितुकामेन भिषजा प्रागेवौषधपानात् संभारा उपकल्पनीया भवन्ति सम्यक्चैव हि गच्छत्यौषधे प्रतिभागार्था:, व्यापन्ने चौषधे व्यापदः परिसंख्याय प्रतीकारार्था:; न हि सन्निकृष्टे काले प्रादुर्भूतायामापदि सत्यपि क्रयाक्रये सुकरमाशु संभरणमौषधानां यथावदिति ॥३॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच--ननु भगवन् ! आदावेव ज्ञानवता तथा प्रतिविधातव्यं यथा प्रतिविहिते सिध्येदेवौषधमेकान्तेन, सम्यक्प्रयोगनिमित्ता हि सर्वकर्मणां सिद्धिरिष्टा, व्यापच्चासम्यक्प्रयोगनिमित्ता; अथ सम्यगसम्यक् च समारब्धं कर्म सिध्यति व्यापद्यते वाऽनियमेन, तुल्यं भवति ज्ञानमज्ञानेनेति ॥४॥

राज्ञ इव मात्रा परिच्छदो यस्य स तथा, विपुलद्रव्यमिति बहुलद्रविणं, परिसंख्यायेति ज्ञात्वा, क्रय: पण्यमाक्रयो मूल्यं, अनियमेनेति कदाचित् सम्यगारब्धं च व्यापद्यते, असम्यगारब्धं च सिध्यतीति (अ)नियम: ॥३-४॥

तमुवाच भगवानात्रेयः—शक्यं तथा प्रतिविधातुमस्माभिरस्मद्विधैर्वाऽप्यग्निवेश ! यथा प्रतिविहिते सिध्येदेवौषधमेकान्तेन, तच्च प्रयोगसौष्ठवमुपदेष्टुं यथावत्; नहि कश्चिदस्ति य एतदेवमुपदिष्टमुपधारयितुमुत्सहेत, उपधार्य वा तथा प्रतिपत्तुं प्रयोक्तुं वा; सूक्ष्माणि हि दोषभेषजदेशकालबलशरीराहारसात्म्यसत्त्वप्रकृतिवयसामवस्थान्तराणि, यान्यनुचिन्त्यमानानि विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्युः किं पुनरल्पबुद्धेः; तस्मादुभयमेतद्यथावदुपदेक्ष्याम:—सम्यक्प्रयोगं चौषधानां, व्यापन्नानां च व्यापत्साधनानि सिद्धिषूत्तरकालम् ॥५॥

तच्च प्रयोगसौष्ठवमिति येन सौष्ठवेनौषधमेकान्तेन सिध्येत् तदित्यर्थः। एतदिति प्रयोगसौष्ठवं, एवमिति यथावत्, उपधारयितुमिति पठितुं, प्रतिपत्तुमित्यर्थतो ग्रहीतुम्। उक्तेऽर्थे हेतुमाह—सूक्ष्माणीत्यादि। सूक्ष्मबुद्धिगम्यानि दोषावस्थान्तराणि क्षयवृद्ध्यादीनि, भेषजस्यावस्था-भेदाश्च रसवीर्यविपाकप्रभावभेदात्, तरुणत्व-वृद्धत्वादिभेदात्, स्वरसादि-कल्पनाभेदाच्च; देशावस्थान्तराण्यानूपत्वादयः, कालावस्थान्तराणि तु ऋत्वादिभेदात्, बलन्तु सहजयुक्तिकृतकालकृतत्वादिभेदाद्बहुविधम्, शरीरन्तु स्थूलत्वकृशत्वादिभेदादनेकविधम्, आहारोऽपि प्रकृतिकरण-संयोगादिभेदात्, सात्म्यं तु देशतः कालतो व्याधितः प्रकृतितः स्वभावतोऽ-भ्यासतश्च भिन्नम्, सत्त्वं मनः तदपि भयोत्साहहर्षादियोगाद्बहुविधम्, प्रकृतिभेदा अपि वाताद्यारब्धत्वेन बहुविधाः, वयोभेदास्तु बाल्ययौवनादि-भेदात् तदवान्तरभेदाश्च नानाविधाः। एतानि च चिकित्साप्रयोगे यथा-ऽपेक्ष्यन्ते तदुदाहरणं शास्त्रेऽनुसरणीयम्, इह तु विस्तरभयान्नोक्तम्। उभयमित्याह—सम्यक्प्रयोगमित्यादि। कुत्र कदोपदेष्टव्यमित्याह—सिद्धिषूत्तरकालमुपदेक्ष्याम इत्यन्वयः। सिद्धिष्विति बहुवचनं तदवयवाना-मध्यायरूपाणामुक्तत्वात् ॥५॥

इदानीं तावत् संभारान् विविधानपि समासेनोपदेक्ष्यामः; तद्यथा— दृढं निवातं प्रवातैकदेशं सुखप्रविचारमनुपत्यकं धूमातपजलरजसामन-भिगमनीयमनिष्टानां च शब्दस्पर्शरसरूपगन्धानां सोदपानोदूखलमुसल-वर्चःस्थानस्नानभूमिमहानसं वास्तुविद्याकुशलः प्रशस्तं गृहमेव तावत् पूर्वमुपकल्पयेत् ॥६॥

इदानीमित्यादौ। द्विविधानपीति पाठे भोगार्थत्वेन व्यापत्साधनत्वेन (च) द्वैविध्यं ज्ञेयम्। अनुपत्यकमिति समीपे महागृहान्तरमभिभावकं यस्य नास्ति तदनुपत्यकम्। उदकं पीयते येन तदुदपानम्। वास्तुविद्याकुशलेन प्रशस्तं कृतमित्यर्थः ॥६॥

ततः शीलशौचाचारानुरागदाक्ष्यप्रादक्षिण्योपपन्नानुपचारकुशलान् सर्वकर्मसु पर्यवदातान् सूपौदनपाचकस्नापकसंवाहकोत्थापकसंवेशकौषध-पेषकांश्च परिचारकान् सर्वकर्मस्वप्रतिकूलान्, तथा गीतवादित्रोल्लापक-श्लोकगाथाख्यायिकेतिहासपुराणकुशलानभिप्रायज्ञाननुमतांश्च देशकाल-विदः पारिषद्यांश्च, तथा लावकपिञ्जलशशहरिणैणकालपुच्छकमृगमातृ-कोरभ्रान्, गां दोग्ध्रीं शीलवतीमनातुरां जीवद्वत्सां सुप्रतिविहिततृण-

शरणपानीयां, पात्र्याचमनीयोदकोष्ठमणिकघटपिठरपर्योगकुम्भीकुम्भकुण्डशरावदर्वीकटोदञ्चनपरिपचनमन्थानचर्मचेलसूत्रकार्पासोर्णादीनि च, शयनासनादीनि चोपन्यस्तभृङ्गारप्रतिग्रहाणि सुप्रयुक्तास्तरणोत्तरप्रच्छदोपधानानि सोपाश्रयाणि संवेशनोपवेशनस्नेहस्वेदाभ्यङ्गप्रदेहपरिषेकानुलेपनवमनविरेचनास्थापनानुवासनशिरोविरेचनमूत्रोच्चारकर्मणामुपचारसुखानि, सुप्रक्षालितोपधानाश्च सुश्लक्ष्णखरमध्यमा दृषदः, शस्त्राणि चोपकरणार्थानि, धूमनेत्रं च, बस्तिनेत्रं चोत्तरबस्तिकं च, कुशहस्तकं च, तुलां च, मानभाण्डं च, घृततैलवसामज्जक्षौद्रफाणितलवणेन्धनोदकमधुसीधुसुरासौवीरकतुषोदकमैरेयमेदकदधिदधिमण्डोदश्विद्धान्याम्लमूत्राणि च, तथा शालिषष्टिकमुद्गमाषयवतिलकुलत्थबदरमृद्वीकाकाश्मर्यपरूषकाभयामलकबिभीतकानि, नानाविधानि च स्नेहस्वेदोपकरणानि द्रव्याणि, तथैवोर्ध्वहरानुलोमिकोभयभाञ्जि, संग्रहणीयदीपनीयपाचनीयोपशमनीयवातहरादिसमाख्यातानि चौषधानि; यच्चान्यदपि किञ्चिद्व्यापदः परिसंख्याय प्रतीकारार्थमुपकरणं विद्यात्, यच्च प्रतिभोगार्थं, तत्तदुपकल्पयेत् ॥७॥

प्रादक्षिण्यमनुकूलकार्यकर्तृत्वम् । उल्लापकं स्तोत्रम् । कपिञ्जलो गौरतित्तिरिः । कालपुच्छमृगमातृके हरिणभेदौ । शरणं गृहम् । आचम्यते येन पात्रेण तदाचमनम् । उदकोष्ठमवगाहार्थमुदकाद्याधारपात्रम् । मणिको गोलकः, पिठरः स्थाली, पर्योगः कटाहः, कुम्भो स्वल्पघटी, शरावः स्वल्पवारः, कटस्तृणादिरचितमासनम्, उदञ्चन पिधानशरावः, परिपचनं तैलपाचनिका । ऊर्णा मेषलोमानि । उप समीपे न्यस्तौ स्थापितौ भृङ्गारप्रतिग्रहौ येषां तानि, उपधानं गण्डूः, अपाश्रयः पादपीठादिः, सुप्रक्षालितोपधाना इत्यत्र उपधानः 'सिलावट' इति ख्यातः, दृषदः पाषाणपट्टकाः । शस्त्राणि च उपकरणार्थानि कुद्दालकर्तरीप्रभृतीनि । कुशहस्तकं संमार्जनी । मानभाण्डमिति घृततैलादिपरिमाणार्थभाण्डम् ॥७॥

ततस्तं पुरुषं यथोक्ताभ्यां स्नेहस्वेदाभ्यां यथार्हमुपपादयेत्, तं चेदस्मिन्नन्तरे मानसः शारीरो वा व्याधिः कश्चित्तीव्रतरः सहसाऽभ्यागच्छेत्तमेव तावदस्योपावर्तयितुं यतेत, ततस्तमुपावर्त्य तावन्तमेवैनं कालं तथाविधेनैव कर्मणोपाचरेत् ॥८॥

ततस्तं पुरुषं स्नेहस्वेदोपपन्नमनुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं शिरःस्नातमनुलिप्तगात्रं स्रग्विणमनुपहतवस्त्रसंवीतं देवता-

ग्निद्विजगुरुवृद्धवैद्यानर्चितवन्तमिष्टे नक्षत्रतिथिकरणमुहूर्ते कारयित्वा ब्राह्मणान् स्वस्तिवाचन प्रयुक्ताभिराशीर्भिरभिमन्त्रितां मधुमधुकसैन्धवफाणितोपहितां मदनफलकषायमात्रां पाययेत् ॥९॥

अस्मिन्नन्तर इति स्नेहस्वेदकरणसमये। उपावर्तयितुमिति निवर्त्तयितुम्। तावन्तं कालमिति यावता कालेन व्याधिप्रशमः कृतः तावन्तम्। इष्टे इति शोधनकर्तृपुरुषनक्षत्राद्यनुगुणे काले यदा भेषजप्रयोगं करोति भेषजप्रयोगार्थं विहित इत्यर्थः ॥८-९॥

मदनफलकषायमात्राप्रमाणं तु खलु सर्वसंशोधनमात्राप्रमाणानि च प्रतिपुरुषमपेक्षितव्यानि भवन्ति; यावद्धि यस्य संशोधनं पीतं वैकारिकदोषहरणायोपपद्यते न चातियोगायोगाय, तावदस्य मात्राप्रमाणं वेदितव्यं भवति ॥१०॥

पीतवन्तं तु खल्वेनं मुहूर्तमनुकांक्षेत, तस्य यदा जानीयात् स्वेदप्रादुर्भावेण दोषं प्रविलयनमापद्यमानं, लोमहर्षेण च स्थानेभ्यः प्रचलितं, कुक्षिसमाध्मापनेन च कुक्षिमनुगतं, हृल्लासास्यस्रवणाभ्यामपि चोर्ध्वमुखीभूतम्, अथास्मै जानुसममसबाधं सुप्रयुक्तास्तरणोत्तरप्रच्छदोपधानं सोपाश्रयमासनमुपवेष्टुं प्रयच्छेत्, प्रतिग्रहांश्चोपचारयेत्, ललाटप्रतिग्रहे पार्श्वोपग्रहणे नाभिप्रपीडने पृष्ठोन्मर्दने चानपत्रपणीयाः सुहृदोऽनुमताः प्रयतेरन् ॥११॥

प्रतिपुरुषमपेक्षितव्यानीति एतेन प्रतिपुरुषमेव शोधनमात्राभेद इत्यर्थः। तदेव मात्राभेदं पुरुषभेदेन दर्शयति—यावद्धीत्यादि। मात्राप्रमाणमिति मात्राव्यवस्था। अनुकांक्षेतेति धारयेत्। असम्बाधमित्यसंकीर्णम्। प्रतिग्रहानिति पतद्ग्रहान् "प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे" इति मेदिनिः। अनपत्रपणीया इति न लज्जाविषयाः ॥१०-११॥

अथैनमनुशिष्यात्—विवृतोष्ठतालुकण्ठो नातिमहता व्यायामेन वेगानुदीर्णानुदीरयन् किञ्चिदवनम्य ग्रीवामूर्ध्वशरीरमुपवेगमप्रवृत्तान् प्रवर्तयन् सुपरिलिखितनखाभ्यामङ्गुलिभ्यामुत्पलकुमुदसौगन्धिकनालैर्वा कण्ठमभिस्पृशन् सुखं प्रवर्तयस्वेति, स तथाविधं कुर्यात्; ततोऽस्य वेगान् प्रतिग्रहगतानवेक्षेतावहितः, वेगविशेषदर्शनाद्धि कुशलो योगायोगातियोगविशेषानुपलभेत, वेगविशेषदर्शी पुनः कृत्यं यथार्हमवबुध्येत लक्षणेन; तस्माद्वेगानवेक्षेतावहितः ॥१२॥

उपवेगमिति वेगसमीपम्; एतेन सर्वथा अप्रवृत्तवेगप्रवर्तनं निषेधयति। वेगदर्शनफलमाह—वेगदर्शनाद्धीत्यादि। उपलभते बुध्यते, एतेन "जघन्यमध्यप्रवरे तु वेगाश्चत्वार इष्टा वमने षडष्टौ।" (सि० १.१३ ; इत्यादिना या वेगसंख्याभेदेन शुद्धिरभिधातव्या सा सूचिता भवति। [कृत्यमिति तत्कालोचितं कर्म ॥१२॥

तत्रामून्ययोगयोगातियोगविशेषज्ञानानि भवन्ति; तद्यथा—अप्रवृत्तिः कुतश्चित्, केवलस्य वाऽप्यौषधस्य विभ्रंशो, विबन्धो वेगानामयोगलक्षणानि भवन्ति; काले प्रवृत्तिरनतिमहती व्यथा, यथाक्रमं दोषहरणं, स्वयं चावस्थानमिति योगलक्षणानि भवन्ति, योगेन तु दोषप्रमाणविशेषेण तीक्ष्णमृदुमध्यविभागो ज्ञेयः; योगाधिक्येन तु फेनिलरक्तचन्द्रिकोपगमनमित्यतियोगलक्षणानि भवन्ति। तत्रातियोगायोगनिमित्तानिमानुपद्रवान् विद्यात्—आध्मानं परिकर्तिका परिस्रावो हृदयोपसरणमङ्गग्रहो जीवादानं विभ्रंशः स्तम्भः क्लमश्चेत्युपद्रवाः ॥१३॥

अयोगयोगातियोगविशेषा ज्ञायन्ते यै लक्षणैस्तानि। अप्रवृत्तिः कुतश्चिदिति सर्वविभक्तिकस्तसिरिति कस्यचिदपि दोषस्य न प्रवृत्तिः सर्वस्यैवाप्रवृत्तिरित्यर्थः, तथा केवलस्य कृत्स्नस्य शोध्यदोषस्याप्रवृत्तिः स्तोकदोषप्रवृत्तिरित्यर्थः, तथा औषधस्य विभ्रंशः प्रातिलोम्येन गमनं; यथा—वमनस्याध ऊर्ध्वं च विरेचनस्य। यथाक्रमं दोषहरणमिति "क्रमात् कफः पित्तमथानिलश्च यस्यैति सम्यग्वमितः स इष्टः।" (सि० १.१५) इत्युक्तक्रमेणेत्यर्थः। यथाक्रममिति वचनं यथोक्तक्रमेण कफाद्यागमनं सम्यग्वमनलक्षणमिति दर्शयति। अयमेव सम्यग्योगो हर्तव्यदोषस्याल्पत्वमध्यत्वोत्कृष्टत्वेन त्रिविधो भवतीत्याह—योगेनेत्यादि। तुशब्दोऽवधारणे, तेन योगेनैव यः प्रमाणविशेषोऽल्पादिस्तेन, न त्वयोगातियोगाभ्यामित्यर्थः। अयं च तीक्ष्णादिविभागः पेयादिक्रमोत्कर्षार्थः, वक्ष्यति च सिद्धौ—पेयां विलेपीमित्यादि (सि० १.११)। चन्द्रकं मयूरपिच्छं, चन्द्रिका तत्तुल्यमित्यर्थः। तत्रातियोगेत्यादि—एषु चाध्मानादिषु दशसु मध्ये कश्चिदयोगजन्यः कश्चिदतियोगजन्यः कश्चिदुभयजन्य इति च वमनविरेचनव्यापत्सिद्धौ स्वयमेव ग्रन्थकारः स्फुटीकरिष्यतीति नेहोच्यते। हृदयोपसरणं हृद्ग्रहः, किंवा हृद्ग्रहोत्पादनार्थं हृदये दोषाणामुपसरणम्; अत एव वक्ष्यति—"कुपिता हृदयं गत्वा दोषाः कुर्वन्ति हृद्ग्रहम्।" इति। जीवादानमिति जीवनहेतुधातुरूपशोणितनिर्गमः, उक्तं हि—"अतियोगाच्च

भैषज्यं जीवं हरति शोणितम्। तज्जीवादानमित्युक्तमादत्ते जीवितं यतः॥" इति। विभ्रंश इति संज्ञाभ्रंशादिरूपस्त्रिविधः, स च सिद्धौ वक्ष्यमाणः। उपद्रवा इत्यनेन शूलादयः शोधनसिद्धौ वक्ष्यमाणा अभिधीयन्ते ॥१३॥

योगेन तु खल्वेनं छर्दितवन्तमभिसमीक्ष्य सुप्रक्षालितपाणिपादास्यं मुहूर्तमाश्वास्य, स्नैहिकवैरेचनिकोपशमनीयानां धूमानामन्यतमं सामर्थ्यतः पाययित्वा, पुनरेवोदकमुपस्पर्शयेत् ॥१४॥

उपस्पृष्टोदकं चैनं निवातमागारमनुप्रवेश्य संवेश्य चानुशिष्यात्—उच्चैर्भाष्यमत्यासनमतिस्थानमतिचङ्क्रमणं क्रोधशोकहिमातपावश्यायातिप्रवातान् यानयानं ग्राम्यधर्ममस्वपनं निशि दिवा स्वप्नं विरुद्धाजीर्णासात्म्याकालप्रमितातिहीनगुरुविषमभोजनवेगसन्धारणोदीरणमिति भावानेतान्मनसाऽप्यसेवमानः सर्वमहो गमयस्वेति। स तथा कुर्यात् ॥१५॥

सामर्थ्यत इति सामर्थ्यं योग्यता यो धूमो यस्मै युज्यते तं पाययित्वेत्यर्थः। अतिस्थानमिति अत्यर्थं दण्डायमानत्वेनावस्थितिः। प्रमितभोजनमेकरसाभ्यासः। अतिहीनमात्रं च भोजनम् ॥१४-१५॥

अथैनं सायाह्ने परे वाऽह्नि सुखोदकपरिषिक्तः पुराणानां लोहितशालितण्डुलानां स्ववक्लिन्नां मण्डपूर्वां सुखोष्णां यवागूं पाययेदग्निबलमभिसमीक्ष्य, एवं द्वितीये तृतीये चान्नकाले, चतुर्थे त्वन्नकाले तथाविधानामेव शालितण्डुलानामुत्स्विन्नां विलेपीमुष्णोदकद्वितीयामस्नेहलवणामल्पस्नेहलवणां वा भोजयेत्, एवं पञ्चमे षष्ठे चान्नकाले, सप्तमे त्वन्नकाले तथाविधानामेव शालीनां द्विप्रसृतं सुस्विन्नमोदनमुष्णोदकानुपानं तनुना तनुस्नेहलवणोपपन्नेन मुद्गयूषेण भोजयेत्, एवमष्टमे नवमे चान्नकाले, दशमे त्वन्नकाले लावकपिञ्जलादीनामन्यतमस्य मांसरसेनौदकलावणिकेन नातिसारवता भोजयेदुष्णोदकानुपानम्; एवमेकादशे द्वादशे चान्नकाले; अत ऊर्ध्वमन्नगुणान् क्रमेणोपभुञ्जानः सप्तरात्रेण प्रकृतिभोजनमागच्छेत् ॥१६॥

अथैनमित्यादौ अपरे वाऽह्नीति असम्यग्विशुद्धौ ज्ञेयम्। मण्डपूर्वामिति मण्डप्रधानाम्। अयं च द्वादशान्नकालनिर्वर्तनीयक्रमः प्रधानशुद्धिशुद्धे ज्ञेयः, तेन मध्यशुद्धे त्वष्टान्नकालिकः, अवरशुद्धे चतुरन्नकालिक इति, वक्ष्यति च—"पेयां विलेपीमकृतं कृतं च यूषं रसं त्रीनुभयं तथैकम्।

क्रमेण सेवेत नरोऽन्नकालात् प्रधानमध्यावरशुद्धिशुद्धः ।" (सि० १.११-१२) इति। औदकलावणिकेनेति उदकलवणाभ्यां संस्कृतेन, औदकलावणिकविधानं **सूदशास्त्रे** यथा-"आर्द्रकैः पाटितैः कृत्तैः सर्पिष्युपहृतार्द्रके। लावकैणमयूराणां मांसमन्यच्च संपचेत् ॥ संगृहीते घृते तस्मिन् कुर्यात्तण्डुलधावनम्। कुर्यात्समन्ततः शुष्कं स्नेहगन्धविवर्जितम् ॥ संस्कृत्य तु ततो मांसं भूयः प्रमथितं पचेत्। ससैन्धवः शृतो भूयो रस औदकलावणः ॥" इति। ससैन्धव इति ईषत्सैन्धव इत्यर्थः। अनतिसारवतेति सारः स्थिरभागः नात्यन्तं सारवतेत्यर्थः। अन्नगुणानिति मधुरादीन् गुरुकठिनादींश्च। एतच्च संसर्जनक्रमादूर्ध्वं प्रकृतिभाजनगमनं तदा कार्यं यदा वमनानन्तरं विरेचनं न कर्तव्यं भवति, तत्करणे तु संसर्जनक्रमादूर्ध्वमेव स्नेहपानं; यद्वक्ष्यति कल्पनासिद्धौ—"संसृष्टभक्तं नवमेऽह्नि सर्पिस्तं पाययेताप्यनुवासयेद्वा।" (सि० १.२०) इति, यतो द्वादशभिरन्नकालैर्वमनदिनसायाह्नात् प्रभृति सप्तरात्रेण पेयाक्रमः समाप्यते परं तु अन्नगुणाभ्यासं कृत्वा स्नेहः क्रियेत (चेत्), तदा नवमेऽह्नि स्नेहपानमुक्तं नोपपद्येतेति ॥१६॥

अथैनं पुनरेव स्नेहस्वेदाभ्यामुपपाद्यानुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं कृतहोमबलिमङ्गलजपप्रायश्चित्तमिष्टे तिथिनक्षत्रकरणमुहूर्ते ब्राह्मणान् स्वस्ति वाचयित्वा त्रिवृत्कल्कमक्षमात्रं यथार्हालोडनप्रतिविनीतं पाययेत् प्रसमीक्ष्य दोषभेषजदेशकालबलशरीराहारसात्म्यसत्त्वप्रकृतिवयसामवस्थान्तराणि विकारांश्च, सम्यक् विरिक्तं चैनं वमनोक्तेन धूमवर्जेन विधिनोपपादयेदाबलवर्णप्रकृतिलाभात्, बलवर्णोपपन्नं चैनमनुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं शिरःस्नातमनुलिप्तगात्रं स्रग्विणमनुपहतवस्त्रसंवीतमनुरूपालङ्कारालङ्कृतं सुहृदां दर्शयित्वा ज्ञातीनां दर्शयेत्, अथैनं कामेष्ववसृजेत् १७॥

भवन्ति चात्र—

अनेन विधिना राजा राजमात्रोऽथवा पुनः।
यस्य वा विपुलं द्रव्यं स संशोधनमर्हति ॥१८॥

अथैनमिति कृतसंसर्जनक्रमम्। प्रतिविनीतमित्यालोडितम्। किं कृत्वा पाययेदित्याह—प्रसमीक्ष्येत्यादि। विकारांश्चेति कुष्ठज्वरादीनां विरेचनसाध्यानाम्। कामेष्ववसृजेदिति यथेष्टमाहारविहारयोर्निर्यन्त्रणं कुर्यादित्यर्थः ॥१७-१८॥

दरिद्रस्त्वापदं प्राप्य प्राप्तकालं विशोधनम् ।
पिबेत् काममसंभृत्य संभारानपि दुर्लभान् ॥१९॥

न हि सर्वमनुष्याणां सन्ति सर्वे परिच्छदाः ।
न च रोगा न बाधन्ते दरिद्रानपि दारुणाः ॥२०॥

यद्यच्छक्यं मनुष्येण कर्तुमौषधमापदि ।
तत्तत् सेव्यं यथाशक्ति वसनान्यशनानि च ॥२१॥

दरिद्रस्य तु यथोक्तसंभारमकृत्वाऽपि संशोधनं कार्यमित्याह—दरिद्रस्त्वित्यादि ॥१९-२१॥

मलापहं रोगहरं बलवर्णप्रसादनम् ।
पीत्वा संशोधनं सम्यगायुषा युज्यते चिरम् ॥२२॥

संशोधनगुणमाह—मलापहमित्यादि । मलानि पुरीषादीनि ॥२२॥

तत्र श्लोकाः—

ईश्वराणां वसुमतां वमनं सविरेचनम् ।
संभारा ये यदर्थं च समानीय प्रयोजयेत् ॥२३॥

यथा प्रयोज्या मात्रा या यदयोगस्य लक्षणम् ।
योगातियोगयोर्यच्च दोषा ये चाप्युपद्रवाः ॥२४॥

यदसेव्यं विशुद्धेन यश्च संसर्जनक्रमः ।
तत् सर्वं कल्पनाध्याये व्याजहार पुनर्वसुः ॥२५॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
उपकल्पनीयो नाम पञ्चदशोऽध्यायः ॥१५॥

अध्यायान्तसङ्ग्रहमाह--ईश्वराणामित्यादि । प्रयोजयेदित्यत्र सम्भारानिति शेषः ॥२३-२५॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायामुपकल्पनीयाध्यायः समाप्तः ॥१५॥

षोडशोऽध्यायः

अथातश्चिकित्साप्राभृतीयमध्यायं व्याख्यास्यामः ॥१॥
इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वाध्यायोक्तवमनविरेचनयोः सम्यग्योगादिलक्षणं समासेनैवोक्तं, तथा तत्प्रवृत्तिविषयोऽप्युक्तः, अतस्तदभिधानार्थं चिकित्साप्राभृतीयोऽभिधीयते। चिकित्सा प्राभृतरूपा यस्य स चिकित्साप्राभृतो वैद्यः, "प्राभृतन्तु प्रदेशनम्" इत्यमरः (२.८.२७) ॥१–२॥

चिकित्साप्राभृतो धीमान् शास्त्रवान् कर्मतत्परः।
नरं विरेचयति यं स योगात् सुखमश्नुते ॥ ३ ॥
यं वैद्यमानी त्वबुधो विरेचयति मानवम्।
सोऽतियोगादयोगाच्च मानवो दुःखमश्नुते ॥ ४ ॥

योगादिति सम्यग्योगात्। सुखमित्यारोग्यम्। विरेचयतीत्यनेन वामयतीत्यपि द्रष्टव्यं, विरेचनशब्दस्य वमनेऽपि प्रवृत्तेः। कथमतियोगायोगगृहीतैरिति वमनविरेचयोर्मिथ्यायोग आचार्येण नोक्तः, अयोगादिति अयोगशब्देनात्र मिथ्यायोगस्यापि ग्रहणं, प्रातिलोम्येन वमनविरेचनयोर्हि प्रवृत्तिर्मिथ्यायोगः, अयोगात् अपेक्षितदोषाः (न) प्रवर्तन्ते। अत एव वक्ष्यति—"अयोगः प्रातिलोम्येन न चाल्पं वा प्रवर्तनम्।" (सि०६.३१.) इति ॥३॥४॥

दौर्बल्यं लाघवं ग्लानिर्व्याधीनामणुता रुचिः।
हृद्वर्णशुद्धिः क्षुत्तृष्णा काले वेगप्रवर्तनम् ॥ ५ ॥
बुद्धीन्द्रियमनःशुद्धिर्मारुतस्यानुलोमता।
सम्यग्विरिक्तलिङ्गानि कायाग्नेश्चानुवर्तनम् ॥ ६ ॥
ष्ठीवनं हृदयाशुद्धिरुत्क्लेशः श्लेष्मपित्तयोः।
आध्मानमरुचिश्छर्दिरदौर्बल्यमलाघवम् ॥ ७ ॥
जङ्घोरुसदनं तन्द्रा स्तैमित्यं पीनसागमः।
लक्षणान्यविरिक्तानां मारुतस्य च निग्रहः ॥ ८ ॥

विट्पित्तकफवातानामागतानां यथाक्रमम् ।
परं स्रवति यद्रक्तं मेदोमांसोदकोपमम् ॥ ९ ॥

निःश्लेष्मपित्तमुदकं शोणितं कृष्णमेव वा ।
तृष्यतो मारुतार्तस्य सोऽतियोगः प्रमुह्यतः ॥१०॥

अदौर्बल्यं स्थौल्यानपचयः । अतियोगलक्षणमाह—विट्पित्तेत्यादि । यथाक्रममागतानां विट्पित्तकफवातानां परमूर्ध्वं यदि रक्तं स्रवति तदाऽतियोग इति योजना ॥५–१०॥

वमनेऽतिकृते लिङ्गान्येतान्येव भवन्ति हि ।
ऊर्ध्वगा वातरोगाश्च वाग्ग्रहश्चाधिको भवेत् ॥११॥

चिकित्साप्राभृतं तस्मादुपेयाच्छरणं नरः ।
युञ्ज्याद् य एनमत्यन्तमायुषा च सुखेन च ॥१२॥

उक्तातियोगलक्षणं वमनेऽप्यतिदिशति—वमन इत्यादि । वमनातियोगे विट्पित्तकफवातानामिति (न) योजनीयं, येन वमनप्रयोगे कफपित्तानिलागमरूपः क्रमो भवेत्, यदुक्तं—"क्रमात् कफः पित्तमथानिलश्च यस्यैति सम्यग्वमितः स इष्टः ।" (सि० १.१५) इति ॥११–१२॥

अविपाकोऽरुचिः स्थौल्यं पाण्डुता गौरवं क्लमः ।
पिडकाकोठकण्डूनां संभवोऽरतिरेव च ॥१३॥

आलस्यश्रमदौर्बल्यं दौर्गन्ध्यमवसादकः ।
श्लेष्मपित्तसमुत्क्लेशो निद्रानाशोऽतिनिद्रता ॥१४॥

तन्द्रा क्लैब्यमबुद्धित्वमशस्तस्वप्नदर्शनम् ।
बलवर्णप्रणाशश्च तृप्यतो बृंहणैरपि ॥१५॥

बहुदोषस्य लिङ्गानि तस्मै संशोधनं हितम् ।
ऊर्ध्वं चैवानुलोमं च यथादोषं यथाबलम् ॥१६॥

एवं विशुद्धकोष्ठस्य कायाग्निरभिवर्धते ।
व्याधयश्चोपशाम्यन्ति प्रकृतिश्चानुवर्तते ॥१७॥

इन्द्रियाणि मनो बुद्धिर्वर्णश्चास्य प्रसीदति ।
बलं पुष्टिरपत्यं च वृषता चास्य जायते ॥१८॥

जरां कृच्छ्रेण लभते चिरं जीवत्यनामयः ।
तस्मात् संशोधनं काले युक्तियुक्तं पिबेन्नरः ॥१९॥

शोधनविषयस्य बहुदोषस्य लक्षणमाह—अविपाक इत्यादि ॥१३-१९॥

दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः ।
जिताः संशोधनैर्ये तु न तेषां पुनरुद्भवः ॥२०॥
दोषाणां च द्रुमाणां च मूलेऽनुपहते सति ।
रोगाणां प्रसवानां च गतानामागतिर्ध्रुवा ॥२१॥

लङ्घनाद्यपेक्षया संशोधनस्य प्राधान्यमाह—दोषा इत्यादि । उक्तमर्थं दृष्टान्तेन द्रढयति—दोषाणामित्यादि ॥२०–२१॥

भेषजक्षपिते पथ्यमाहारैरेव बृंहणम् ।
घृतमांसरसक्षीरहृद्ययूषोपसंहितैः ॥२२॥
अभ्यङ्गोत्सादनैः स्नानैर्निरूहैः सानुवासनैः ।
तथा स लभते शर्म युज्यते चायुषा चिरम् ॥२३॥

शोधनजनितधातुक्षये प्रतिकारमाह—भेषजक्षपिते इत्यादि । आहारैरेवेत्येवकारेण भेषजबृंहणस्य निषेधः, भेषजस्य वीर्यप्रधानस्य तदा दुःसहत्वादिति भावः ॥२२–२३॥

अतियोगानुबद्धानां सर्पिःपानं प्रशस्यते ।
तैलं मधुरकैः सिद्धमथवाऽप्यनुवासनम् ॥२४॥
यस्य त्वयोगस्तं स्निग्धं पुनः संशोधयेन्नरम् ।
मात्राकालबलापेक्षी स्मरन् पूर्वमनुक्रमम् ॥२५॥
स्नेहने स्वेदने शुद्धौ रोगाः संसर्जने च ये ।
जायन्तेऽमार्गविहिते तेषां सिद्धिषु साधनम् ॥२६॥

अतियोगादिचिकित्सामाह—अतियोगानुबद्धानामित्यादि । यस्येत्यादिनाऽयोगचिकित्सामाह—स्मरन् पूर्वमनुक्रममित्यनेन यः पूर्वमयोगे हेतुस्तं परिहरन्निति शिक्षयति । अमार्गविहिते इत्यविधिविहिते । एतच्च स्नेहने इत्यादिषु सर्वत्र योज्यम् । सिद्धिषु साधनमिति सिद्धिस्थाने चिकित्सितं वक्ष्यत इति शेषः ॥२४-२६॥

जायन्ते हेतुवैषम्याद्विषमा देहधातवः ।
हेतुसाम्यात् समास्तेषां स्वभावोपरमः सदा ॥२७॥

संप्रति रोगाणां क्षणिकत्वेन तदुपशमार्थं चिकित्साविधानं निष्फलमिति **सौगत**पक्षेऽपि चिकित्सायाः प्रधानायोजकत्वमभिधातुं तन्मतमुपन्यस्यति—जायन्त इत्यादि। तेषामिति विषमाणां समानां च धातूनाम्। स्वभावाद्विनाशकारणनिरपेक्षत्वादुपरमो विनाशः स्वभावोपरमः। सदा इत्यविलम्बेन, तेनोत्पन्नमात्रा एव विनश्यन्तीत्यर्थः ॥२७॥

प्रवृत्तिहेतुर्भावानां न निरोधेऽस्ति कारणम्।
केचित्तत्रापि मन्यन्ते हेतुं हेतोरवर्तनम् ॥२८॥

सर्वेषामेव भावानामीदृश्येव व्यवस्थेत्याह—प्रवृत्तिहेतुरित्यादि। भावानां प्रवृतौ उत्पत्तावेव हेतुरस्ति, निरोधे विनाशे पुनः कारणं नास्ति; भावा हि प्रदीपार्चिर्वदुत्पत्तौ कारणापेक्षिणो, (न) पुनर्द्वितीयक्षणाविद्यमानतालक्षणे विनाशेऽपि, विनाशस्य ध्रुवभावित्वादिति भावः। तदेवं सर्वेषामेव भावानां स्वाभाविके विनाशेऽपि विषमधातूनामपि विनाशः स्वाभाविक एवेत्यलं चिकित्सयेति भावः। चिकित्सामन्तरेणैव व्याधि-(प्रशमे) मतभेदेन हेत्वन्तरमाह—केचिदित्यादि। तत्रापि विनाशे हेतोरवर्तनं हेतुं मन्यन्त इति योजना उत्पादकहेत्वभाव एव विनाशे हेतुरित्यर्थः। एवमपि हेतुपरम्परायाः क्षणिकत्वेन तत्कार्याणामपि स्वभावादेव नित्यं सन्निहितस्वहेतुविनाशरूपविनाशहेतूनां न विनाशहेतुचिकित्सापेक्षेति भावः॥ ८॥

एवमुक्तार्थमाचार्यमग्निवेशोऽभ्यभाषत ।
स्वभावोपरमे कर्म चिकित्साप्राभृतस्य किम् ॥२९॥

भेषजैर्विषमान् धातून् कान् समीकुरुते भिषक्।
का वा चिकित्सा भगवन्! किमर्थं वा प्रयुज्यते ॥३०॥

एवमुत्थितायां (शङ्कायां) गुरुं पृच्छति—एवमुक्तार्थमित्यादि। किमित्याक्षेपे। स्वभावोपरमे सति चिकित्साप्राभृतस्य वैद्यस्य किमपि साध्यं न पश्यामीत्यर्थः। कान् समीकुरुते इति विषमाणां धातूनामस्थिरत्वेन साम्यं तत्र कर्तुं न पार्यत इत्याशयः। रोगप्रशमस्य स्वभावसिद्धत्वेन चिकित्साऽपि नास्तीत्यर्थः। किमर्थं वा प्रयुज्यत इति यन्निवृत्त्यर्थं चिकित्सा प्रयुज्यते तद्धातुवैषम्यं स्वभावनिवृत्तमिति चिकित्साप्रयोजनं नास्ति ॥२९-३०॥

तच्छिष्यवचनं श्रुत्वा व्याजहार पुनर्वसुः ।
श्रूयतामत्र या सोम्य ! युक्तिर्दृष्टा महर्षिभिः ॥३१॥

न नाशकारणाभावाद्भावानां नाशकारणम् ।
ज्ञायते नित्यगस्येव कालस्यात्ययकारणम् ॥३२॥

शीघ्रगत्वाद्यथा भूतस्तथा भावो विपद्यते ।

तच्छिष्यवचनमिति—अत्रेति विनाशस्याहेतुकत्वे भवदुक्ताक्षेपे च तत्र विनाशस्याहेतुत्वं यत्पूर्वमुक्तं तदेव प्रथमं दृष्टान्तमुपन्यस्योपपादयति—न नाशकारणाभावादित्यादि । भावानां नाशकारणं न ज्ञायते, कुत इत्याह—नाशकारणाभावादिति । नाशकारणस्य शशविषाणादिवदलीकत्वात् न तु पृथिव्यां निखातमूलकीलादिदोषात् । अत्रैव दृष्टान्तमाह—नित्यगस्येवेति । निमेषादिरूपत्वेन नित्यगस्य कालस्य । अयं भावः—नित्यगः कालो यथा विनश्वरत्वेन न हेत्वन्तरं विनाशेऽपेक्षते, तथा सर्व एव भावाः; यद्धि यस्य हेत्वन्तरापेक्षं न तस्य तद्ध्रुवभावि, यथा—पटस्य रागः; हेत्वन्तरापेक्षी चेद्विनाशः स्यात्, न ध्रुवभावी स्यात्, तस्मादयं प्रयोगः—रोगध्वंसोऽहेतुकः, ध्रुवभावित्वात्, जलपरमाणुरूपवत् । सम्प्रत्यहेतुको विनाश उत्पत्त्यनन्तरमेव भवति, ततश्चास्थिरत्वेन संस्काराधानमपि भावेषु न पार्यते कर्तुमित्याह—शीघ्रगत्वादित्यादि । यथा भूत इति यादृश एवोत्पन्नः, तथेति तादृश एव विपद्यते; कुतः ? शीघ्रगत्वादस्थिरत्वात् । एतेन विषमे धातौ साम्यस्वरूपसंस्काराधानरूपा चिकित्सा निरस्ता मन्तव्या ॥२१-३२॥—

निरोधे कारणं तस्य नास्ति नैवान्यथाक्रिया ॥३३॥

इदानीं पूर्वं साधितमहेतुविनाशं तथा शीघ्रगत्वहेतुसाधितसंस्काराभावं चोपसंहरति—निरोधे कारणमित्यादि । तस्येति भावस्य । अन्यथाक्रिया अन्यथाकरणं, संस्काराधानमिति यावत् ॥३३॥

याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म तद्भिषजां स्मृतम् ॥३४॥

कथं शरीरे धातूनां वैषम्यं न भवेदिति ।
समानां चानुबन्धः स्यादित्यर्थं क्रियते क्रिया ॥३५॥

त्यागाद्विषमहेतूनां समानां चोपसेवनात् ।
विषमा नानुबध्नन्ति जायन्ते धातवः समाः ॥३६॥

यद्यपि उक्तक्षणभङ्गवादिमतमेतदप्रमाणिकं तथाऽपि तन्निराकरणमनतिप्रयोजनमित्युपेक्ष्य तुष्यतु दुर्जन इति तन्मतेऽपि चिकित्सितस्य प्रयोजकत्वं समर्थयति—याभिरित्यादि। एतेन यद्यपि विषमा धातवः क्षणिकत्वेनैव विनश्यन्ति तथाऽपि समधातूत्पत्तौ चिकित्सितं **क्षणभङ्गवादिना**ऽप्यभ्युपेयं, यतस्तन्मतेऽपि उत्पत्तौ हेत्वपेक्षा विद्यत एवेति भावः। सा चिकित्सेत्यनेन का वा चिकित्सेत्याक्षेपः परिहृतः। कर्म तद्भिषजां स्मृतमित्यनेन चिकित्साप्राभृतस्य किं कर्मेत्याक्षेपः परिहृतः। इत्यर्थं क्रियते क्रियेत्यनेन 'किमर्थं वा प्रयुज्यते' इत्याक्षेपः परिहृतः। समैस्तु हेतुभिर्यस्मादित्यादिना 'कान् समीकुरुते' इत्याक्षेपः परिहृतः। इदमत्राभिहितम्—यद्यपि धातुवैषम्य क्षणिकत्वेन विनश्वरं, तथाऽपि विनश्यदपि तद्धातुवैषम्यं स्वकार्यं विषममेव धातुमारभते, एवं सोऽप्यपरमिति **क्षणभङ्गवादिना**ऽप्यभ्युपेयं, तथा च धातुवैषम्यसन्ताननिवृत्तिर्न धातुसाम्यजनकं हेतुं विना; यदा च धातुसाम्यहेतुरुपयुक्तो भवति तदा तेन सहितं वैषम्यसन्ततिपतितमपि कारणं सममेव धातुमारभते यथा—मुद्गरप्रहारसहितो घटपरमाणुर्विसदृशं कपालसन्तानमारभते इति; एवं व्यवस्थिते 'कथं शरीरे' इत्यादिग्रन्थो व्याख्येयः। वैषम्यं न भवेदिति नोत्पद्येत इत्यर्थः। समानां चानुबन्धः सन्तत्योत्पादः। विषमा नानुबध्नन्तीति हेत्वभावाद्विषमसन्तानस्योत्पादो न स्यात्। समानां चोपसेवनादिति समहेतूनां सेवनात्। वस्तुतस्तु—विनाशस्याहेतुकत्वमेव नोपपद्यते तथाहि ध्रुवभावित्वेन तावदवश्यम्भावित्वं सवितुरुदयास्तसमयानैकान्तिकत्वात्, तयोर्हेत्वनपेक्षत्वे कालभेदो न स्यात्। नाऽपि तदात्मकत्वं तद्घटध्वंसयोरेकरूपत्वे घटोत्पत्तिक्षणेऽपि तदभावापत्तेः। अथालीकस्य कारणापेक्षित्वे अलीकत्वव्याघात इति अलीकत्वमेव ध्रुवभावित्वमिति चेन्न, घटध्वंसस्यालीकत्वे घटस्य सदाजननत्वापत्तेः। अथ भावत्वमेवं ध्रुवभावित्वं तथा च घटध्वंसोऽहेतुक अभावत्वात् प्रागभाववदिति चेन्न, प्रतियोगिजन्याभावस्य ध्वंसत्वेन धर्मिग्राहकमानाभावादिति दिक्। विस्तरः पुनरात्मतत्त्वविवेकेऽनुसन्धेयः, इह नानुपयोगित्वात् प्रतन्यते ॥३४-३६॥

समैस्तु हेतुभिर्यस्माद्धातून् सञ्जनयेत् समान्।
चिकित्साप्राभृतस्तस्माद्दाता देहसुखायुषाम् ॥३७॥

धर्मस्यार्थस्य कामस्य नृलोकस्योभयस्य च।
दाता संपद्यते वैद्यो दानाद्देहसुखायुषाम् ॥३८॥

तत्र श्लोकाः—

चिकित्साप्राभृतगुणो दोषो यश्चेतराश्रयः ।
योगायोगातियोगानां लक्षणं शुद्धिसंश्रयम् ॥३९॥

बहुदोषस्य लिङ्गानि संशोधनगुणाश्च ये ।
चिकित्सासूत्रमात्रं च सिद्धिव्यापत्तिसंश्रयम् ॥४०॥

या च युक्तिश्चिकित्सायां यं चार्थं कुरुते भिषक् ।
चिकित्साप्राभृतेऽध्याये तत् सर्वमवदन्मुनिः ॥४१॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
चिकित्साप्राभृतीयो नाम षोडशोऽध्यायः ॥१६॥
समाप्तः कल्पनाचतुष्कः ॥४॥

सङ्ग्रहे—इतराश्रय इति कुवैद्याश्रयः, सिद्धिव्यापत्तिसंश्रयमिति तत्र सिद्धिसंश्रयं व्यापत्तिसंश्रयमतियोगानुबद्धानामित्यादिनोक्तम् ॥३९-४१॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
चिकित्साप्राभृतीयः समाप्तः ॥१६॥

॥ समाप्तश्च कल्पनाचतुष्कः ॥

सप्तदशोऽध्यायः

अथातः कियन्तःशिरसीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वं भेषजं तत्कल्पना चोक्ता, संप्रति तद्विषयरोगाभिधानार्थं रोगचतुष्केऽभिधातव्ये निखिलशरीरप्रधानभूतशिरोरोगाभिधायकत्वेन कियन्तःशिरसीयमाह—यद्वक्ष्यति—"प्राणाः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च । यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते ॥" इति ॥१-२॥

कियन्तः शिरसि प्रोक्ता रोगा हृदि च देहिनाम् ।
कति चाप्यनिलादीनां रोगा मानविकल्पजाः ॥३॥

क्षयाः कति समाख्याताः पिडकाः कति चानघ ! ।
गतिः कतिविधा चोक्ता दोषाणां दोषसूदन ! ॥४॥

हुताशवेशस्य वचस्तच्छ्रुत्वा गुरुरब्रवीत् ।
पृष्टवानसि यत् सौम्य ! तन्मे शृणु सविस्तरम् ॥५॥

दृष्टाः पञ्च शिरोरोगाः पञ्चैव हृदयामयाः ।
व्याधीनां द्व्यधिका षष्टिर्दोषमानविकल्पजा ॥६॥

दशाष्टौ च क्षयाः सप्त पिडका माधुमेहिकाः ।
दोषाणां त्रिविधा चोक्ता गतिर्विस्तरतः शृणु ॥७॥

मानविकल्पजा इति मानमत्र दोषाणां क्षयस्थानवृद्धिरूपं, अत एव विवरणे दोषमानविकल्पजा इति वक्ष्यति; तस्य विकल्पो दोषान्तरसम्बन्धासम्बन्धकृतो भेदः । पिडका माधुमेहिका इत्यत्र मधुमेह(शब्दः प्रमेह)मात्रवचनः, उक्तं च **वाग्भटे**—"मधुरं यच्च सर्वेषु प्रायो मध्विव मेहति । सर्वेऽपि मधुमेहाख्या" (अ० हृ० नि० १०.२१) इति । अत एव "विना प्रमेहमप्येता जायन्ते दुष्टमेदसः ।" इत्यत्रैव वक्ष्यति अन्यथा 'विना मधुमेहं' इति कृतं स्यात्; तथा चिकित्सितेऽपि प्रमाणं "प्रमेहिणां याः पिडका मयोक्ता" (चि० ६.५८) इति वक्ष्यति, तथा आसामेव पिडकानां चिकित्सोपदेशाच्च सर्वमेहभवत्वं, मधुमेहभवत्वे हि मधुमेहस्यासाध्यत्वात् तद्भव-

पिडकानां स्वत एवासाध्यत्वमिति चिकित्सोपदेशो व्यर्थः स्यात्, **अत एव सुश्रुते**नापि प्रमेहे सामान्यमुद्दिश्यैवैताः पिडका उक्ता इति ॥३-७॥

संधारणाद्दिवास्वप्नाद्रात्रौ जागरणान्मदात् ।
उच्चैर्भाष्यादवश्यायात् प्राग्वातादतिमैथुनात् ॥८॥

गन्धादसात्म्यादाघ्राताद्रजोधूमहिमातपात् ।
गुर्वम्लहरितादानादति शीताम्बुसेवनात् ॥९॥

शिरोऽभिघाताद्दुष्टामाद्रोदनाद्बाष्पनिग्रहात् ।
मेघागमान्मनस्तापाद्देशकालविपर्ययात् ॥१०॥

वातादयः प्रकुप्यन्ति शिरस्यस्रं च दुष्यति ।
ततः शिरसि जायन्ते रोगा विविधलक्षणाः ॥११॥

शिरोरोगाणां निदानपूर्विकां सम्प्राप्तिमाह—सन्धारणादित्यादि । सन्धारणादित्यत्र वेगानामिति शेषः । हिमादिति शीतवीर्यात् । हरितमार्द्रकादि । शीताम्बुसेवनादिति विशेषार्थे । दुष्टामादित्यत्र उष्णामादिति पाठे उष्णादामाच्चेत्यर्थः । बाष्पं नेत्रजलम् । देशविपर्ययं उपसर्गगृहीतत्वं देशस्य कालकृतञ्च । अस्रं च दुष्यतीत्यनेन सर्वस्मिन्नेव शिरोरोगे रक्तदुष्टिं दर्शयतीत्याहुः ॥८-११॥

प्राणाः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च ।
यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते ॥१२॥

शिरोगतविकाराणां प्रागभिधाने हेतुभूतं शिरसः प्राधान्यमाह—प्राणा इत्यादि । श्रिता इव श्रिताः, शिर उपघातेन तदुपघातात् ॥१२॥

अर्धावभेदको वा स्यात् सर्वं वा रुज्यते शिरः ।
प्रतिश्यामुखनासाक्षिकर्णरोगशिरोभ्रमाः ॥१३॥

अर्दितं शिरसः कम्पो गलमन्याहनुग्रहः ।
विविधाश्चापरे रोगा वातादिक्रिमिसंभवाः ॥१४॥

के ते विविधलक्षणाः पञ्च शिरोरोगा इत्यत आह—अर्धावभेदक इत्यादि ॥१३-१४॥

पृथग्दिष्टास्तु ये पञ्च सङ्ग्रहे परमर्षिभिः ।
शिरोगदांस्ताञ्छृणु मे यथास्वैर्हेतुलक्षणैः ॥१५॥

उच्चैर्भाष्यातिभाष्याभ्यां तीक्ष्णपानात् प्रजागरात् ।
शीतमारुतसंस्पर्शाद्व्यवायाद्वेगनिग्रहात् ॥१६॥

उपवासादभीघाताद्विरेकाद्वमनादति ।
बाष्पशोकभयत्रासाद्भारमार्गातिकर्शनात् ॥१७॥

शिरोगताः सिरा वृद्धो वायुराविश्य कुप्यति ।
ततः शूलं महत्तस्य वातात् समुपजायते ॥१८॥

निस्तुद्येते भृशं शङ्खौ घाटा संभिद्यते तथा ।
सभ्रूमध्यं ललाटं च तपतीवातिवेदनम् ॥१९॥

वध्येते स्वनतः श्रोत्रे निष्कृष्येते इवाक्षिणी ।
घूर्णतीव शिरः सर्वं संधिभ्य इव मुच्यते ॥२०॥

स्फुरत्यति सिराजालं स्तभ्यते च शिरोधरा ।
स्निग्धोष्णमुपशेते च शिरोरोगेऽनिलात्मके ॥२१॥

यद्यप्यरूंषिकादयोऽपि शिरोगता रोगास्तथाऽपि य एवाष्टोदरीये शिरःशूललक्षणाः पञ्च शिरोरोगाः प्रोक्तास्त एवात्र प्रकरणे प्रपञ्चेन वक्तव्या इत्याह—पृथगित्यादि। सङ्ग्रहे इत्यष्टोदरीये। तीक्ष्णपानादिति तीक्ष्णमद्यपानात्। इवशब्दस्य वध्येते इत्यत्राप्यन्वय अतिपीडायुक्तत्वेन वध्येते इवेत्यर्थः। स्वनत इति शब्दं कुरुतः। शिरोधरा ग्रीवा ॥१५-२१॥

कट्वम्ललवणक्षारमद्यक्रोधातपानलैः ।
पित्तं शिरसि संदुष्टं शिरोरोगाय कल्पते ॥२२॥

दह्यते रुज्यते तेन शिरः शीतं सुषूयते ।
दह्येते चक्षुषी तृष्णा भ्रमः स्वेदश्च जायते ॥२३॥

शीतं सुषूयते इति शीतमिच्छति ॥२२-२३॥

आस्यासुखैः स्वप्नसुखैर्गुरुस्निग्धातिभोजनैः ।
श्लेष्मा शिरसि संदुष्टः शिरोरोगाय कल्पते ॥२४॥

शिरो मन्दरुजं तेन सुप्तं स्तिमितभारिकम् ।
भवत्युत्पद्यते तन्द्रा तथाऽऽलस्यमरोचकः ॥२५॥

वाताच्छूलं भ्रमः कम्पः पित्ताद्दाहो मदस्तृषा ।
कफाद्गुरुत्वं तन्द्रा च शिरोरोगे त्रिदोषजे ॥२६॥

स्वप्नसुखमनुचितदिवास्वप्नेन ज्ञेयम्। सुप्तमिति स्पर्शानभिज्ञम्, किंवा सुप्तमिव सुप्तं शिरश्चालनाद्यक्षमत्वेन। स्तिमितभारिकं भाराक्रान्तमिव ॥२४-२६॥

तिलक्षीरगुडाजीर्णपूतिसङ्कीर्णभोजनात् ।
क्लेदोऽसृक्कफमांसानां दोषलस्योपजायते ॥२७॥

ततः शिरसि संक्लेदात् क्रिमयः पापकर्मणः।
जनयन्ति शिरोरोगं जाता बीभत्सलक्षणम् ॥२८॥

व्यधच्छेदरुजाकण्डूशोफदौर्गन्ध्यदुःखितम् ।
क्रिमिरोगातुरं विद्यात् क्रिमीणां दर्शनेन च ॥२९॥

सङ्कीर्णभोजनं विरुद्धाहारः। दोषलस्येति मत्वर्थीयो लच् अतिशायने, तेन बहुदोषस्येत्यर्थः। ततः संक्लेदात् जाताः क्रिमयः शिरोरोगं जनयन्तीत्यन्वयः। बीभत्सलक्षणमिति घ्राणादिस्रोतोभ्यः पूयादिप्रवृत्तेः ॥२७-२९॥

शोकोपवासव्यायामरूक्षशुष्काल्पभोजनैः ।
वायुराविश्य हृदयं जनयत्युत्तमां रुजम् ॥३०॥

वेपथुर्वेष्टनं स्तम्भः प्रमोहः शून्यता द्रवः।
हृदि वातातुरे रूपं जीर्णे चात्यर्थवेदना ॥३१॥

उष्णाम्ललवणक्षारकटुकाजीर्णभोजनैः ।
मद्यक्रोधातपैश्चाशु हृदि पित्तं प्रकुप्यति ॥३२॥

हृद्दाहस्तिक्तता वक्त्रे तिक्ताम्लोद्गिरणं क्लमः।
तृष्णा मूर्च्छा भ्रमः स्वेदः पित्तहृद्रोगलक्षणम् ॥३३॥

अत्यादानं गुरुस्निग्धमचिन्तनमचेष्टनम्।
निद्रासुखं चाभ्यधिकं कफहृद्रोगकारणम् ॥३४॥

हृदयं कफहृद्रोगे सुप्तं स्तिमितभारिकम्।
तन्द्रारुचिपरीतस्य भवत्यश्मावृतं यथा ॥३५॥

हेतुलक्षणसंसर्गादुच्यते सान्निपातिकः।
(हृद्रोगः कष्टदः कष्टसाध्य उक्तो महर्षिभिः।)
त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते। ३६॥

तिलक्षीरगुडादीनि ग्रन्थिस्तस्योपजायते।
मर्मैकदेशे संक्लेदं रसश्चास्योपगच्छति ॥३७॥

संक्लेदात् क्रिमयश्चास्य भवन्त्युपहतात्मनः।
मर्मैकदेशे संजाताः सर्पन्तो भक्षयन्ति च ॥३८॥
तुद्यमानं स हृदयं सूचीभिरिव मन्यते।
छिद्यमानं यथा शस्त्रैर्जातकण्डूं महारुजम् ॥३९॥
हृद्रोगं क्रिमिजं त्वेतैर्लिङ्गैर्बुद्ध्वा सुदारुणम्।
त्वरेत जेतुं तं विद्वान् विकारं शीघ्रकारिणम् ॥४०॥

पञ्च शिरोरोगानभिधाय पञ्च हृद्रोगानाह—शोकोपवासेत्यादि। वेष्टनमुद्वेष्टनमिव। द्रवो[1] दरदरिका। अत्यादानमतिमात्रभोजनम्। त्रिदोषज इत्यादौ ग्रन्थिरिव ग्रन्थिः। मर्मैकदेशे हृदयैकदेशे। उपहतात्मन इत्युपहतान्तःकरणस्य मर्मैकदेशे सञ्जाता[2] इति एकदेशे सञ्जातास्ते क्रिमयो मर्म हृदयं भक्षयन्तीत्यर्थः ॥३०-४०॥

द्व्युल्वणैकोल्वणैः षट् स्युर्हीनमध्याधिकैश्च षट्।
समैश्चैको विकारास्ते सन्निपातास्त्रयोदश ॥४१॥
संसर्गे नव षट् तेभ्य एकवृद्ध्या समैस्त्रयः।
पृथक् त्रयश्च तैर्वृद्धैर्व्याधयः पञ्चविंशतिः ॥४२॥
यथा वृद्धैस्तथा क्षीणैर्दोषैः स्युः पञ्चविंशतिः।
वृद्धिक्षयकृतश्चान्यो विकल्प उपदेक्ष्यते ॥४३॥
वृद्धिरेकस्य समता चैकस्यैकस्य संक्षयः।
द्वन्द्ववृद्धिः क्षयश्चैकस्यैकवृद्धिर्द्वयोः क्षयः ॥४४॥

व्याधीनां द्व्यधिका षष्टिरिति यदुक्तं तद्विवृणोति—द्व्युल्वणेत्यादि। द्व्युल्वणैस्त्रय एकोल्वणैश्च त्रय इति षट् तद्यथा कफो वृद्धो वातपित्ते वृद्धतरे इत्येकः, पित्तं वृद्धं वातकफौ वृद्धतराविति द्वितीयः, वायुर्वृद्धो पित्तकफौ वृद्धतरौ इति त्रयः, (एवमेकोल्वणैस्त्रयः); हीनमध्याधिकैः षडिति वृद्धवृद्धतरवृद्धतमैः-तद्यथा वायुर्वृद्धः पित्तं वृद्धतरं कफो वृद्धतमः, पित्तं वृद्धं कफो वृद्धतरः वायुर्वृद्धतमः, कफो वृद्धः वायुर्वृद्धतरः पित्तं वृद्धतमं, वायुर्वृद्धः कफो वृद्धतरः पित्तं वृद्धतमं, कफो वृद्धो वायुर्वृद्धतरः पित्तं वृद्धतमं, कफो वृद्धः पित्तं वृद्धतरं वायुः वृद्धतमः इति षट्। समैश्चैक इति

———————

१. दरः (च० नि०)
२. ते जाताः (च० नि०)

समवृद्धवातपित्तकफैरेक इति त्रयोदशेत्यर्थः। दोषद्वयमेलके तु नव भेदा भवन्तीत्याह—संसर्गे नवेति। एतदेव विवृणोति—षट् तेभ्य इत्यादि। तेभ्यो वातादिभ्य एकवृद्ध्या षड्भेदा भवन्ति—तद्यथा वायुर्वृद्धः पित्तं वृद्धतरमित्येकः, पित्तं वृद्धं वायुर्वृद्धतर इति द्वितीयः, वायुर्वृद्धः कफो वृद्धतर इति तृतीयः, कफो वृद्धः वायुर्वृद्धतर इति चतुर्थः, पित्तं वृद्धं कफो वृद्धतर इति पञ्चमः, कफो वृद्धः पित्तं वृद्धतरमिति षष्ठः। समैस्त्रय इति समैरेव वृद्धैस्त्रय इत्यर्थः—तद्यथा समवृद्धवातपित्ते इत्येकः, समवृद्धवातकफाविति द्वितीयः, समवृद्धपित्तकफाविति तृतीय इति। एवं मिलित्वा दोषद्वयसंसर्गे नव भेदा इत्यर्थः। असंसृष्टप्रकारास्तु त्रयो भवन्तीत्याह—पृथक् त्रयः स्युस्तैर्वृद्धैरिति पृथगित्येकैकशस्त्रय इत्यर्थः तद्यथा—वृद्धो वायुरित्येकः, वृद्धं पित्तमिति द्वितीयः, वृद्धः कफः इति तृतीय इति। तदेवं सर्वैर्मिलित्वा पञ्चविंशतिर्वृद्धदोषभेदा इत्याह—व्याधयः पञ्चविंशतिरिति। सन्निपाते त्रयोदश संसर्गे नव एकैकशश्च त्रय इति पञ्चविंशतिरित्यर्थः। वृद्धभेदकल्पनाप्रकारेण क्षीणदोषभेदा अपि कल्प्यन्त इत्याह—यथा वृद्धैरित्यादि; तदेवं पञ्चाशद्भेदा इत्यर्थः। इदानीं वृद्धक्षीणमिश्रणेनान्यान् द्वादश भेदानाह— वृद्धिक्षयकृतश्चान्य इत्यादि। यद्यपि समताऽपि वृद्धिक्षयविकल्पे पठनीया तथाऽपि समतायाः स्वातन्त्र्येण विकाराजनकत्वाद्वृद्धिक्षयकृत इत्युक्तम्। विकल्पो भेदः, कोऽसौ विकल्प इत्याह—वृद्धिरेकस्येत्यादि। एकस्य दोषस्य वृद्धिः, अपरस्य समता, अन्यस्य संक्षय इति षड्भेदाः—तद्यथा वृद्धो वायुः समं पित्तं हीनः कफ इत्येकः प्रकारः, पित्तं वृद्धं समो वायुः कफो हीन इति द्वितीयः, कफो वृद्धः समं पित्तं वायुः हीन इति तृतीयः, वायुर्वृद्धः समः कफः हीनं पित्तमिति तुरीयः, (पित्तं वृद्धं समः कफः वायुर्हीन इति पञ्चमः, कफो वृद्धः समो वायुः पित्तं हीनमिति षष्ठः।) द्वन्द्ववृद्धिः क्षयश्चैकस्य इत्यनेन त्रयः, (एकस्य वृद्धिर्द्वयोश्च क्षयः इत्यनेन त्रय इति) षट्—तद्यथा वृद्धे वातपित्ते कफो हीन इत्येकः, वृद्धौ वातकफौ हीनं पित्तमिति द्वितीयः, वृद्धौ पित्तकफौ हीनो वायुरिति तृतीयः, वृद्धो वायुः पित्तकफौ हीनाविति चतुर्थः, पित्तं वृद्धं वातकफौ हीनाविति पञ्चमः, कफो वृद्धः हीने वातपित्ते इति षष्ठः। तदेवं द्विषष्टिर्दोषभेदा इत्यर्थः ॥४१-४४॥

प्रकृतिस्थं यदा पित्तं मारुतः श्लेष्मणः क्षये।
स्थानादादाय गात्रेषु यत्र यत्र विसर्पति ॥४५॥

तदा भेदश्च दाहश्च तत्र तत्रानवस्थितः ।
गात्रदेशे भवत्यस्य श्रमो दौर्बल्यमेव च ॥४६॥
प्रकृतिस्थं कफं वायुः क्षीणे पित्ते यदा बली ।
कर्षेत् कुर्यात्तदा शूलं सशैत्यस्तम्भगौरवम् ॥४७॥
यदाऽनिलं प्रकृतिगं पित्तं कफपरिक्षये ।
संरुणद्धि तदा दाहः शूलं चास्योपजायते ॥४८॥
श्लेष्माणं हि समं पित्तं यदा वातपरिक्षये ।
सन्निरुन्ध्यात्तदा कुर्यात् सतन्द्रागौरवं ज्वरम् ॥४९॥
प्रवृद्धो हि यदा श्लेष्मा पित्ते क्षीणे समीरणम् ।
रुन्ध्यात्तदा प्रकुर्वीत शीतकं गौरवं रुजम् ॥५०॥
समीरणे परिक्षीणे कफः पित्तं समत्वगम् ।
कुर्वीत सन्निरुन्धानो मृद्वग्नित्वं शिरोग्रहम् ॥५१॥
निद्रां तन्द्रां प्रलापं च हृद्रोगं गात्रगौरवम् ।
नखादीनां च पीतत्वं ष्ठीवनं कफपित्तयोः ॥५२॥
हीनवातस्य तु श्लेष्मा पित्तेन सहितश्चरन् ।
करोत्यरोचकापाकौ सदनं गौरवं तथा ॥५३॥
हृल्लासमास्यस्रवणं पाण्डुतां दूयनं मदम् ।
विरेकस्य च वैषम्यं वैषम्यमनलस्य च ॥५४॥
हीनपित्तस्य तु श्लेष्मा मारुतेनोपसंहितः ।
स्तम्भं शैत्यं च तोदं च जनयत्यनवस्थितम् ॥५५॥
गौरवं मृदुतामग्नेर्भक्ताश्रद्धां प्रवेपनम् ।
नखादीनां च शुक्लत्वं गात्रपारुष्यमेव च ॥५६॥
मारुतस्तु कफे हीने पित्तं च कुपितं द्वयम् ।
करोति यानि लिङ्गानि शृणु तानि समासतः ॥५७॥
भ्रममुद्वेष्टनं तोदं दाहं स्फुटनवेपने ।
अङ्गमर्दं परीशोषं दूयनं धूपनं तथा ॥५८॥
वातपित्तक्षये श्लेष्मा स्रोतांस्यपिदधद्भृशम् ।
चेष्टाप्रणाशं मूर्च्छां च वाक्सङ्गं च करोति हि ॥५९॥

वातश्लेष्मक्षये पित्तं देहौजः स्रंसयच्चरेत् ।
ग्लानिमिन्द्रियदौर्बल्यं तृष्णां मूर्च्छां क्रियाक्षयम् ॥६०॥

पित्तश्लेष्मक्षये वायुर्मर्माण्यतिनिपीडयन् ।
प्रणाशयति संज्ञां च वेपयत्यथवा नरम् ॥६१॥

इदानीं वृद्धिरेकस्येत्यादिना ये द्वादश भेदा उद्दिष्टाः तेषामतिदुर्बोधत्वेन ज्ञानार्थं लक्षणमाह—प्रकृतिस्थमित्यादि । प्रकृतिस्थमिति स्वमानस्थम् । यद्यपि प्रकृतिस्थो दोषो दाहादिविकारजननसमर्थो न भवति तथाऽपि विकृतदोषसम्बन्धात्तस्यापि विकारजनकत्वं ज्ञेयम् । किंवा भ्राजकादिभेदेन सर्वदेहस्थिते पित्ते कुपितो वायुरेकस्मात् प्रदेशात् पित्तं गृहीत्वा प्रदेशान्तरं प्रापयति तदा तत्प्रदेशस्थं पित्तभागं तु पित्तसम्बन्धेनाधिकमेवेति प्रकृतस्थस्यापि पित्तस्य पित्तान्तरसम्बन्धेनाधिक्याद्दाहजनकत्वं उपपन्नमेव । यत्र वा "प्रकृतिस्थं यदा वातं पित्तं कफपरिक्षये" इत्यादौ च देशाद्देशान्तरं गतिर्नास्ति दोषस्य तत्रापि मार्गावरणादेव प्रकृतिस्थस्यापि प्रकोपाद्विकारजनकत्वं ज्ञेयम् । एवमन्यत्रापि प्रकृतिस्थस्यापि विकारजनकत्वं व्याख्येयम् । न चैवं प्रकृतिस्थतैवानर्गलेति वाच्यं, यतः शरीरे यावन्मानो दोषस्तत्र न्यूनाधिकभावो नास्त्येवेति शरीरापेक्षया स्वमानस्थत्वं प्रकृतिस्थत्वमिहाभिप्रेतम् । हीनवातस्य तु श्लेष्मेत्यादिकन्तु द्वन्द्ववृद्धिः क्षयस्यैकस्येत्यस्योदाहरणम् । देहौज इति देहसारः ॥४५-६१॥

दोषाः प्रवृद्धाः स्वं लिङ्गं दर्शयन्ति यथाबलम् ।
क्षीणा जहति लिङ्गं स्वं, समाः स्वं कर्म कुर्वते ॥६२॥

ननु दोषाणां वृद्धिक्षयादिकृता भेदा उक्ताः वृद्ध्यादिज्ञानन्तु कथं भविष्यतीत्यतो वृद्धिक्षयसाम्यलक्षणान्याह—दोषाः प्रवृद्धा इत्यादि । स्वं लिङ्गमिति वैकारिकं, तच्च वातस्य रौक्ष्यादि, पित्तस्य दाहादि, कफस्य गौरवादि । यथाबलमिति अतिवृद्धैरतिवृद्धं, मध्यवृद्धैस्तु मध्यवृद्धमित्यादि । स्वं लिङ्गं जहतीति प्राकृतलिङ्गक्षयव्यतिरिक्तं विकारान्तरं ज्वरादि न जनयति, स्वयमेव दुःस्थितत्वात् । स्वं कर्मेति प्राकृतं कर्म । एते च द्विषष्टिर्दोषभेदा आविष्कृततमत्वेनोक्ताः; तेनैषां[1] तरतमादिभेदेन रसरुधिरादिसंसर्गभेदेन चागण्यत्वमेव ज्ञेयं, उक्तं हि—"संसर्गाद्रसरुधिरा-

---

१. तेनैतेषां

दिभिस्तथैषां दोषाणां क्षयसमताविवृद्धिभेदात् । आनन्त्यं तरतमयोगतश्च यातान् जानीयादवहितमानसो यथास्वम् ॥" (अ० हृ० सू० १२.७८ ½) इति । ये त्वत्र वातादीनां परस्परविरुद्धगुणत्वेन दहनतुहिनयोरिवैककार्यारम्भकत्वं नोपपद्यत इति द्वान्द्विकसान्निपातिकविकारारम्भे विप्रतिपद्यन्ते ते पाञ्चभौतिककार्योत्पादेन दृष्टान्तासिद्धा निराकरणीयाः । तस्माददृष्टविशेषकृतोऽयं दोषाणां भूतानां च स्वभावो यद्विरुद्धगुणा अपि परस्परं नोपघ्नन्त एकं कार्यमारभन्त इति । **दृढबलोक्तं** हेत्वन्तरं च त्रिमर्मीये व्याख्यास्यामः ॥६२॥

वातादीनां रसादीनां मलानां सप्त चौजसः ।
क्षयास्तत्रानिलादीनामुक्तं संक्षीणलक्षणम् ॥६३॥

घट्टते सहते शब्दं नोच्चैर्द्रवति शूल्यते ।
हृदयं ताम्यति स्वल्पचेष्टस्यापि रसक्षये ॥६४॥

परुषा स्फुटिता म्लाना त्वग्रूक्षा रक्तसंक्षये ।
मांसक्षये विशेषेण स्फिग्ग्रीवोदरशुष्कता ॥६५॥

सन्धीनां स्फुटनं ग्लानिरक्ष्णोरायास एव च ।
लक्षणं मेदसि क्षीणे तनुत्वं चोदरस्य च ॥६६॥

केशलोमनखश्मश्रुद्विजप्रपतनं श्रमः ।
ज्ञेयमस्थिक्षये लिङ्गं सन्धिशैथिल्यमेव च ॥६७॥

शीर्यन्त इव चास्थीनि दुर्बलानि लघूनि च ।
प्रततं वातरोगीणि क्षीणे मज्जनि देहिनाम् ॥६८॥

दौर्बल्यं मुखशोषश्च पाण्डुत्वं सदनं श्रमः ।
क्लैब्यं शुक्राविसर्गश्च क्षीणशुक्रस्य लक्षणम् ॥६९॥

क्षीणे शकृति चान्त्राणि पीडयन्निव मारुतः ।
रूक्षस्योन्नमयन् कुक्षिं तिर्यगूर्ध्वं च गच्छति ॥७०॥

मूत्रक्षये मूत्रकृच्छ्रं मूत्रवैवर्ण्यमेव च ।
पिपासा बाधते चास्य मुखं च परिशुष्यति ॥७१॥

मलायनानि चान्यानि शून्यानि च लघूनि च ।
विशुष्काणि च लक्ष्यन्ते यथास्वं मलसंक्षये ॥७२॥

इदानीं दश चाष्टौ क्षया इति यदुद्दिष्टं तद्विवृणोति--वातादीना-

मित्यादि। वातादीनां त्रयः क्षयाः, रसादीनां धातूनां सप्त, सप्त मलानामित्यनेन मूत्रपुरोषयोः तथा पञ्चेन्द्रियमलानि चेति सप्त, ओजसस्त्वेक इत्यष्टादश क्षया इति छेदः। तेषां लक्षणानि क्रमेण प्रतिपादयति—तत्रेत्यादि। तत्रेति तेषु क्षयेषु मध्ये उक्तमिति क्षीणा जहति लिङ्गं स्वमित्यनेन। रसादिक्षयलक्षणान्याह—घट्टते इत्यादि। उच्चैःशब्दं न सहत इत्यन्वयः। द्रवतीति हृदयं 'धुग धुग' इति करोति। ताम्यति ग्लायति। विशेषेणेति वचनादन्यगात्रस्यापि शुष्कता भवतीति दर्शयति। मेदसः(क्षय)लक्षणमाह—सन्धीनामित्यादि। केशेत्याद्यस्थिक्षयलक्षणम्। कुक्षिम् उन्नमयन् आध्मापयन्। बाधते चास्येति कर्मणि शेषलक्षणे षष्ठी। मलायनानीत्यनेन मुखनासाचक्षुःकर्णानां तथा त्वगिन्द्रियाधिष्ठानानां च लोमकूपानां ग्रहणम् ॥६३–७२॥

बिभेति दुर्बलोऽभीक्ष्णं ध्यायति व्यथितेन्द्रियः।
दुश्छायो दुर्मना रूक्षः क्षामश्चैवौजसः क्षये ॥७३॥

हृदि तिष्ठति यच्छुद्धं रक्तमीषत्सपीतकम्।
ओजः शरीरे संख्यातं तन्नाशान्ना विनश्यति ॥७४॥

प्रथमं जायते ह्योजः शरीरेऽस्मिञ्छरीरिणाम्।
सर्पिर्वर्णं मधुरसं लाजगन्धि प्रजायते ॥७५॥
(भ्रमरैः फलपुष्पेभ्यो यथा संभ्रियते मधु।
तद्वदोजः स्वकर्मभ्यो गुणैः संभ्रियते नृणाम् ॥१॥)

ओजःक्षयलक्षणमाह—बिभेतीत्यादि। दुर्मना इति उत्साहशून्यः। ओजस्तु द्विविधं--परमपरं च, अत एव तत्परस्यौजसः स्थानमिति वक्ष्यति, यत् सत्येव परे चापरे चौजसि परस्येति विशेषणं सार्थकं भवति। तत्राद्यमष्टबिन्दुकं; उक्तं च **तन्त्रान्तरे**—"प्राणाश्रयस्यौजसोऽष्टौ बिन्दवो हृदयाश्रिताः।" इति। द्वितीयं पुनर(र्धा)ञ्जलिप्रमाणं, यदुक्तं—तावदेव प्रमाणं श्लेष्मणश्चौजस इत्यष्टमो धातुरोज इति। अन्ये तु शुक्रविशेषमोज आहुः, तत्तु न मनोरमम्। तत्रा(र्धा)ञ्जलिप्रमाणौजःक्षयलक्षणं बिभेतीत्यादिनोक्तं, अष्टबिन्दुकस्य पुनः क्षये मृत्युर्भवतीति दर्शयति। तल्लक्षणमाह—हृदीत्यादि। शुद्धमिति शुक्लं, ईषद्रक्तमिति किञ्चिद्रक्तं, सपीतकमिति ईषत्पीतं, संख्यातमिति उक्तम्। एतच्चौजः सर्वधातुसाररूपमिति तदन्तर्गतमेव, अतो नाष्टमधातुत्वप्रसक्तिः, तदुक्तं--"ओजस्तु

तेजो धातूनां शुक्रान्तानां परं स्मृतम् ।" (अ० हृ० सू० ११.३७) इति । अपि च (धातुः) धारणपोषणयोगाद्भवति, ओजस्तु देहधारकं सदपि न धातुपोषकं, तेन नाष्टमो धातुरोज इति । एते च क्षया आविष्कृततमत्वेनोक्ताः, तेनान्येऽप्युदकादिक्षयाः बोध्याः ॥७३–७५॥

व्यायामोऽनशनं चिन्ता रूक्षाल्पप्रमिताशनम् ।
वातातपौ भयं शोको रूक्षपानं प्रजागरः ॥७६॥

कफशोणितशुक्राणां मलानां चातिवर्तनम् ।
कालो भूतोपघातश्च ज्ञातव्याः क्षयहेतवः ॥७७॥

सामान्येन क्षयाणां हेतुमाह—व्यायाम इत्यादि । प्रमिताशनमेकरसाभ्यासः । अतिवर्तनम् अतियोगेन मोक्षणं अतिशायितो मोक्ष इत्यर्थः । कालो वार्धक्यमादानं च । भूतोपघातश्चेति चकारोऽनुक्तसमुच्चयार्थः । तेन वातक्षयहेतवोऽचिन्तनदिवास्वप्नादयोऽपि बोध्याः ॥७६–७७॥

गुरुस्निग्धाम्ललवणान्यतिमात्रं समश्नताम् ।
नवमन्नं च पानं च निद्रामास्यासुखानि च ॥७८॥

त्यक्तव्यायामचिन्तानां संशोधनमकुर्वताम् ।
श्लेष्मा पित्तं च मेदश्च मांसं चातिप्रवर्धते ॥७९॥

तैरावृतगतिर्वायुरोज आदाय गच्छति ।
यदा बस्तिं तदा कृच्छ्रो मधुमेहः प्रवर्तते ॥८०॥

स मारुतस्य पित्तस्य कफस्य च मुहुर्मुहुः ।
दर्शयत्याकृतिं गत्वा क्षयमाप्यायते पुनः ॥८१॥

उपेक्षयाऽस्य जायन्ते पिडकाः सप्त दारुणाः ।
मांसलेष्ववकाशेषु मर्मस्वपि च संधिषु ॥८२॥

शराविका कच्छपिका जालिनी सर्षपी तथा ।
अलजी विनताख्या च विद्रधी चेति सप्तमी ॥८३॥

अन्तोन्नता मध्यनिम्ना श्यावा क्लेदरुगन्विता ।
शराविका स्यात् पिडका शरावाकृतिसंस्थिता ॥८४॥

अवगाढार्तिनिस्तोदा महावास्तुपरिग्रहा ।
श्लक्ष्णा कच्छपपृष्ठाभा पिडका कच्छपी मता ॥८५॥

स्तब्धा सिराजालवती स्निग्धास्रावा महाशया ।
रुजानिस्तोदबहुला सूक्ष्मच्छिद्रा च जालिनी ॥८६॥

पिडका नातिमहती क्षिप्रपाका महारुजा ।
सर्षपी सर्षपाभाभिः पिडकाभिश्चिता भवेत् ॥८७॥

दहति त्वचमुत्थाने तृष्णामोहज्वरप्रदा ।
विसर्पत्यनिशं दुःखाद्दहत्यग्निरिवालजी ॥८८॥

अवगाढरुजाक्लेदा पृष्ठे वाऽप्युदरेऽपि वा ।
महती विनता नीला पिडका विनता मता ॥८९॥

इदानीं क्षयहेत्वभिधानप्रसङ्गेन वक्ष्यमाणपिडकाहेतून् प्रमेहानपि निदानादिक्रमेणाह—गुरुस्निग्धेत्यादि । नवं पानमित्यभिनवं मद्यम् । समश्नतामिति अशिरिहोपभोगार्थः, तेन सेवमानानामित्यर्थः । एवं च निद्रामित्यादिभिरपि अश्नतामित्यस्य सम्बन्धो न विरुध्यते । ओज आदाय गच्छतीति—ओजःशब्दोऽत्र सारवचनः, तेन धातूनादाय गच्छतीत्यर्थः । कृच्छ्र इति कृच्छ्रसाध्यः, मधुमेहशब्दोऽत्र मेहमात्रवचनः । गत्वा क्षयमाप्यायते पुनरिति स मेहः क्षयं गत्वा क्षीणो भूत्वा पुनराप्यायते वर्द्धते इत्यन्वयः । उपेक्षयेत्यचिकित्सया । यद्यपि तन्त्रान्तरे दश पिडका उक्ताः तथाऽपि प्राधान्यात् सप्तैवात्र पिडका उक्ता इति ज्ञेयम् ॥७८-८९॥

विद्रधिं द्विविधामाहुर्बाह्यामाभ्यन्तरीं तथा ।
बाह्या त्वक्स्नायुमांसोत्था कण्डराभा महारुजा ॥९०॥

शीतकान्नविदाह्युष्णरूक्षशुष्कातिभोजनात् ।
विरुद्धाजीर्णसंक्लिष्टविषमासात्म्यभोजनात् ॥९१॥

व्यापन्नबहुमद्यत्वाद्वेगसंधारणाच्छ्रमात् ।
जिह्मव्यायामशयनादतिभाराध्वमैथुनात् ॥९२॥

अन्तःशरीरे मांसासृगाविशन्ति यदा मलाः ।
तदा संजायते ग्रन्थिर्गम्भीरस्थः सुदारुणः ॥९३॥

हृदये क्लोम्नि यकृति प्लीह्नि कुक्षौ च वृक्कयोः ।
नाभ्यां वंक्षणयोर्वाऽपि बस्तौ वा तीव्रवेदनः ॥९४॥

दुष्टरक्तातिमात्रत्वात् स वै शीघ्रं विदह्यते ।
ततः शीघ्रविदाहित्वाद्विद्रधीत्यभिधीयते ॥९५॥

व्यधच्छेदभ्रमानाहशब्दस्फुरणसर्पणैः ।
वातिकीं, पैत्तिकीं तृष्णादाहमोहमदज्वरैः ॥९६॥

जृम्भोत्क्लेशारुचिस्तम्भशीतकैः श्लैष्मिकीं विदुः ।
सर्वासु च महच्छूलं विद्रधीषूपजायते ॥९७॥

शस्त्रास्त्रैर्भिद्यत इव चोल्मुकैरिव दह्यते ।
विद्रधौ व्यम्लतां याता वृश्चिकैरिव दश्यते ॥९८॥

तनु रूक्षारुणं श्यावं फेनिलं वातविद्रधौ ।
तिलमाषकुलत्थोदसन्निभं पित्तविद्रधौ ॥९९॥

श्लैष्मिको स्रवति श्वेतं पिच्छिलं बहलं बहु ।
लक्षणं सर्वमेवैतद्भजते सान्निपातिकौ ॥१००॥

बाह्यविद्रधिलक्षणे कण्डराभेति स्थूलसिरासदृशी। अन्तर्विद्रधेर्गरीयस्त्वेन निदानमप्याह—शीतकेत्यादि। संक्लिष्टं दोषलम्। व्यापन्नम् असम्यक्सन्धानादिना विकृतिमापन्नं तथा[1] बहु च मद्यमुपयुङ्क्ते (यः) स व्यापन्नबहुमद्यः। जिह्मव्यायामशयनादिति असम्यग्व्यायामशयनादित्यर्थः। अन्तःशरीर इति कोष्ठे। ग्रन्थिरिति गुडकाकृतिः। गम्भीरस्थ इति अवगाढमूलः। स इति ग्रन्थिः। व्यधादया वेदनाभेदा अनुभवैकगम्यवैजात्याः। शीतमेव शीतकम्। व्यम्लतां यातेति विदाहं प्राप्ता। स्रावभेदेनापि दोषभेदज्ञानमाह—तनु रूक्षेत्यादि। बहलमिति घनम् ॥९०-१००॥

अथासां विद्रधीनां साध्यासाध्यत्वविशेषज्ञानार्थं स्थानकृतं लिङ्गविशेषमुपदेक्ष्यामः—तत्र प्रधानमर्मजायां विद्रध्यां हृद्घट्टनतमकप्रमोहकासश्वासाः, क्लोमजायां पिपासामुखशोषगलग्रहाः, यकृज्जायां श्वासः, प्लीहजायामुच्छ्वासोपरोधः, कुक्षिजायां कुक्षिपार्श्वान्तरांसशूलं, वृक्कजायां पृष्ठकटिग्रहः, नाभिजायां हिक्का, वंक्षणजायां सक्थिसादः, बस्तिजायां कृच्छ्रपूतिमूत्रवर्चस्त्वं चेति ॥१०१॥

पक्वप्रभिन्नासूर्ध्वजासु मुखात् स्रावः स्रवति, अधोजासु गुदात्, उभयतस्तु नाभिजासु ॥१०२॥

---

१. व्यापन्नं च[1]

आसां हृन्नाभिबस्तिजाः परिपक्वाः सान्निपातिकी च मरणाय; शेषाः पुनः कुशलमाशुप्रतिकारिणं चिकित्सकमासाद्योपशाम्यन्ति। तस्मादचिरोत्थितां विद्रधीं शस्त्रसर्पविद्युदग्नितुल्यां स्नेहविरेचनैराश्वेवोपक्रमेत् सर्वशो गुल्मवच्चेति ॥१०३॥

प्रधानमर्म हृदयं, तमकः श्वासभेदः, क्लोम पिपासास्थानं, आसामित्यादौ सान्निपातिक्याः पृथक्पाठेन तस्या अपक्वाया अप्यसाध्यत्वमुक्तम्। तस्मादित्यादौ शस्त्रादिदृष्टान्तत्रयेण शस्त्रवच्छेदकत्वं, सर्पवत् संज्ञाहारित्वं, विद्युदग्निवदाशुमारकत्वं ज्ञेयम् ॥१०१-१०३॥

भवन्ति चात्र—

विना प्रमेहमप्येता जायन्ते दुष्टमेदसः।
तावच्चैता न लक्ष्यन्ते यावद्वास्तुपरिग्रहः ॥१०४॥

शराविका कच्छपिका जालिनी चेति दुःसहाः।
जायन्ते ता ह्यतिबलाः प्रभूतश्लेष्ममेदसः ॥१०५॥

सर्षपी चालजी चैव विनता विद्रधी च याः।
साध्याः पित्तोल्बणास्तास्तु संभवन्त्यल्पमेदसः ॥१०६॥

मर्मस्वंसे गुदे पाण्योः स्तने सन्धिषु पादयोः।
जायन्ते यस्य पिडिकाः स प्रमेही न जीवति ॥१०७॥

इदानीमुक्तपिडकानां प्रमेहं विनाऽप्युत्पत्तिं दर्शयति—विनेत्यादि। एतेन पिडकानां यन्माधुमेहिकत्वं पूर्वमुक्तं तत् प्रायिकत्वेन ज्ञेयम्। वास्तु स्थानम्। विद्रधी चेति बाह्यविद्रधी ॥१०४-१०७॥

तथाऽन्याः पिडकाः सन्ति रक्तपीतासितारुणाः।
पाण्डुराः पाण्डुवर्णाश्च भस्माभा मेचकप्रभाः ॥१०८॥

मृद्व्यश्च कठिनाश्चान्याः स्थूलाः सूक्ष्मास्तथाऽपराः।
मन्दवेगा महावेगाः स्वल्पशूला महारुजः ॥१०९॥

ता बुद्ध्वा मारुतादीनां यथास्वैर्हेतुलक्षणैः।
ब्रूयादुपचरेच्चाशु प्रागुपद्रवदर्शनात् ॥११०॥

तृट्श्वासमांससंकोथमोहहिक्कामदज्वराः।
वीसर्पमर्मसंरोधाः पिडकानामुपद्रवाः ॥१११॥

पिडकाभिधानप्रसङ्गेनान्यासामपि पिडकानां लक्षणमाह—तथाऽन्या

इत्यादि। पाण्डुरा इति धूसराः, पाण्डुवर्णाः (इति रूक्षपाण्डुवर्णाः), मेचकप्रभा इति स्निग्धकृष्णवर्णाः। उपचरेच्चेति यथायथं मारुतादि-प्रत्यनीकभेषजैरित्यर्थः। प्रागुपद्रवदर्शनादित्यनेन उपद्रवे सति पिडकानाम-साध्यत्वं बोधयति। के ते उपद्रवा इत्याह—तृट्श्वासेत्यादि। सङ्कोथः पूतिभावः ॥१०८-१११॥

क्षयः स्थानं च वृद्धिश्च दोषाणां त्रिविधा गतिः।
ऊर्ध्वं चाधश्च तिर्यक्च विज्ञेया त्रिविधाऽपरा ॥११२॥
त्रिविधा चापरा कोष्ठशाखामर्मास्थिसन्धिषु।
इत्युक्ता विधिभेदेन दोषाणां त्रिविधा गतिः ॥११३

दोषाणां त्रिविधा गतिरिति यदुक्तं तद्विवृणोति—क्षय इत्यादि। स्थानं समत्वेनावस्थितिः। गतिरित्यवस्था, शाखा रक्तादयो धातवस्त्वक् चेति, मर्मास्थिसन्धय इति सन्धित्वेनैकैव गतिः ॥११२-११३॥

चयप्रकोपप्रशमाः पित्तादीनां यथाक्रमम्।
भवन्त्येकैकशः षट्सु कालेष्वभ्रागमादिषु ॥११४॥
गतिः कालकृता चैषा चयाद्या पुनरुच्यते।

कालकृतां गतिमाह—चयप्रकोपेत्यादि। चयाद्या गतिः पुनः कालकृता उच्यत इत्यन्वयः। प्रकोपप्रशमसाहचर्यात् चयशब्देनापि प्रकृष्टश्चयो विवक्षितः, प्रकृष्टः कोपः प्रकोपः; एवं प्रशमोऽपि। एवं वर्षादिषु पित्तादीनां प्रकृष्टश्चयो भवतीति, इतरदोषस्यापि स्तोकमात्रेण च यथासंभवं भवतीति सूच्यते; तेन शरदि अनुबलत्वेन कफप्रकोपो भवतीत्यादि गृहीतं भवति। यथाक्रममिति वर्षाशरद्धेमन्त(वसन्त)ग्रीष्मप्रावृट्क्रमेण। पित्तादीनामिति पित्तकफवातानाम्। एकैकश इत्ययौगपद्येन। तेन यदा एकस्य चयः तदा अन्यस्य प्रकोपः प्रशमो वा, न पुनरेकस्मिन्नेव ऋतौ पित्तादीनामेकतमस्य चयप्रकोपप्रशमा इत्यर्थः। किंवा एकैकश इत्यनेन एकस्मिन्नेव ऋतौ पित्तादित्रयस्य च प्रकोपप्रशमो न भवतीति दर्शयति। एतच्च प्राधान्येनैव ज्ञेयं, तेन प्रावृषि यद्यपि "वर्षास्वग्निबले हीने कुप्यन्ति पवनादयः।" (सू० ६.३४) इति वातादित्रयस्यैव युगपत् प्रकोप उक्तस्तथाऽपि पित्तकफ-योस्तत्राप्रधानः प्रकोप इति न व्यभिचार इत्याहुः ॥११४॥—

गतिश्च द्विविधा दृष्टा प्राकृती वैकृती च या ॥११५॥

पित्तादेवोष्मणः पक्तिर्नराणामुपजायते।
तच्च पित्तं प्रकुपितं विकारान् कुरुते बहून् ॥११६॥

प्राकृतस्तु बलं श्लेष्मा विकृतो मल उच्यते ।
स चैवोजः स्मृतः काये स च पाप्मोपदिश्यते ॥११७॥

सर्वा हि चेष्टा वातेन स प्राणः प्राणिनां स्मृतः ।
तेनैव रोगा जायन्ते तेन चैवोपरुध्यते ॥११८॥

गतिभेदान्तरमाह—गतिश्चेत्यादि । एतदेव गतिद्वयं विवृणोति—पित्तादित्यादि । एतेन पित्तस्य प्रकृतिकर्मकर्तृत्वं प्राकृती गतिः, विकारकर्तृत्वं तु वैकृती गतिरित्यर्थः । एवं प्राकृतश्चेत्यादि वक्ष्यमाणेऽपि व्याख्येयम् । बलमिति बलहेतुत्वेन । मल इति शरीरमलिनीकरणात् । स चैवोज इति स प्राकृतः श्लेष्मा ओज इति ओजोहेतुत्वात्, स च पाप्मेति स विकृतः श्लेष्मा दुःखहेतुत्वात् पाप्मा इत्यर्थः । चेष्टा इति अविकृतगमनाद्याः । उपरुध्यते इति म्रियते ॥११५-११८॥

नित्यं सन्निहितामित्रं समीक्ष्यात्मानमात्मवान् ।
नित्यं युक्तः परिचरेदिच्छन्नायुरनित्वरम् ॥११९॥

आत्मवानिति बुद्धिमान् । युक्त इत्युद्युक्तः । अनित्वरमित्यगत्वरम् । ॥११९॥

तत्र श्लोकौ—

शिरोरोगाः सहृद्रोगा रोगा मानविकल्पजाः ।
क्षयाः सपिडकाश्चोक्ता दोषाणां गतिरेव च ॥१२०॥

कियन्तःशिरसीयेऽस्मिन्नध्याये तत्त्वदर्शिना
ज्ञानार्थं भिषजां चैव प्रजानां च हितैषिणा ॥१२१॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने कियन्तः-शिरसीयो नाम सप्तदशोऽध्यायः ॥१७॥

सङ्ग्रहार्थः स्पष्ट एव ॥१२०-२११॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
कियन्तःशिरसीयः समाप्तः ॥१७॥

अष्टादशोऽध्यायः

अथातस्त्रिशोथीयमध्यायं व्याख्यास्यामः ॥ १ ॥

इति ह स्माह भगवानात्रेयः ॥ २ ॥

पूर्वाध्याये पिडका उक्ताः, ताश्च शोथरूपाः तेन शोथाधिकारात् त्रिशोथीयोऽभिधीयते ॥१-२॥

त्रयः शोथा भवन्ति वातपित्तश्लेष्मनिमित्ताः, ते पुनर्द्विविधा निजागन्तुभेदेन ॥ ३ ॥

तत्रागन्तवश्छेदनभेदनक्षणनभञ्जनपिच्छनोत्पेषणप्रहारवधबन्धनवेष्टन-व्यधनपीडनादिभिर्वा भल्लातकपुष्पफलरसात्मगुप्ताशूककिमिशूकाहित-पत्रलतागुल्मसंस्पर्शनैर्वा स्वेदनपरिसर्पणावमूत्रणैर्वा विषिणां सविष-प्राणिदंष्ट्रादन्तविषाणनखनिपातैर्वा सागरविषवातहिमदहनसंस्पर्शनैर्वा निदानैः समुपजायन्ते ॥ ४ ॥

तत्रेत्यादौ आगन्तवः शोथा इति निदानैः समुपजायन्त इति वक्ष्यमाणेनान्वयः। भेदनमाशयविदारणं, क्षणनमस्थिचूर्णनं, भञ्जनं जर्जरीकरणं, पिच्छनमत्यर्थपीडनं, उत्पेषणं शिलोत्पेषणमिव, वेष्टनमग्रन्थिबन्धनं सर्पादिभिः। शूकवतां क्रिमीणां शूकः। विषिणामिति स्वेदनादिभिरित्यन्वयः ॥३-४॥

ते पुनर्यथास्वं हेतुव्यञ्जनैरादावुपलभ्यन्ते निजव्यञ्जनैकदेशविपरीतैः; बन्धमन्त्रागदप्रलेपप्रतापनिर्वापणादिभिश्चोपक्रमैरुपक्रम्यमाणाः प्रशान्तिमापद्यन्ते ॥ ५ ॥

आगन्तुशोथरूपमाह—ते पुनरित्यादि। यथास्वमिति यस्य यो हेतुश्छेदनभेदनादिस्तज्जन्यैः। निजव्यञ्जनैकदेशविपरीतैरिति—आगन्तुर्व्यथापूर्वो भवति पश्चाद्वातादिलक्षणैरनुबध्यते निजस्तु पूर्वं वातादिलक्षणैः युज्यते पश्चाद्वेदना स्यादित्येकदेशवैपरीत्यम्। आगन्तुशोथौषधं सूचयति—बन्धोऽरिष्टबन्धो व्रणबन्धश्च ॥५॥

निजाः पुनः स्नेहस्वेदवमनविरेचनास्थापनानुवासनशिरोविरेचनानामयथावत्प्रयोगान्मिथ्यासंसर्जनाद्वा छर्द्यलसकविसूचिकाश्वासकासातिसारशोषपाण्डुरोगोदरज्वरप्रदरभगन्दरार्शोविकारातिकर्शनैर्वा कुष्ठकण्डूपिडकादिभिर्वा छर्दिक्षवथूद्गारशुक्रवातमूत्रपुरीषवेगधारणैर्वा कर्मरोगोपवासाध्वकर्शितस्य वा सहसाऽतिगुर्वम्ललवणपिष्टान्नफलशाकरागदधिहरितकमद्यमन्दकविरूढनवशूकशमीधान्यानूपौदकपिशितोपयोगान्मृत्पङ्कलोष्टभक्षणाल्लवणातिभक्षणाद्गर्भसंपीडनादामगर्भप्रपतनात् प्रजातानां च मिथ्योपचाराद्दुर्दोर्णदोषत्वाच्च शोफाः प्रादुर्भवन्ति; इत्युक्तः सामान्यो हेतुः ॥ ६ ॥

निजानां सामान्यतो निदानमाह—निजा इत्यादि। मिथ्यासंसर्जनादिति—मिथ्यात्वं संसर्जनस्य उपकल्पनीयोक्तस्य संसर्जनक्रमस्यायथावद्विधानम्। कर्मेति पञ्चकर्म, पञ्चकर्मादिकर्शितस्य तु सहसाऽननुक्रमेण गुर्वादिसेवनं शोथहेतुः; प्रजातानामित्यचिरप्रसूतानाम् ॥६॥

अयं त्वत्र विशेषः—शीतरूक्षलघुविशदश्रमोपवासातिकर्शनक्षपणादिभिर्वायुः प्रकुपितस्त्वङ्मांसशोणितादीन्यभिभूय शोफं जनयति; स क्षिप्रोत्थानप्रशमो भवति, तथा श्यामारुणवर्णः प्रकृतिवर्णो वा, चलः स्पन्दनः खरपरुषभिन्नत्वग्रोमा छिद्यत इव भिद्यत इव पीड्यत इव सूचीभिरिव तुद्यते पिपीलिकाभिरिव संसृप्यते सर्षपकल्कावलिप्त इव चिमिचिमायते संकुच्यत आयम्यत इवेति वातशोथः (१);

उष्णतीक्ष्णकटुकक्षारलवणाम्लाजीर्णभोजनैरग्न्यातपप्रतापैश्च पित्तं प्रकुपितं त्वङ्मांसशोणितान्यभिभूय शोथं जनयति; स क्षिप्रोत्थानप्रशमो भवति, कृष्णपीतनीलताम्रावभास उष्णो मृदुः कपिलताम्ररोमा उष्यते दूयते धूप्यते ऊष्मायते स्विद्यते क्लिद्यते न च स्पर्शमुष्णं च मृष्यत इति पित्तशोथः (२);

गुरुमधुरशीतस्निग्धैरतिस्वप्नाव्यायामादिभिश्च श्लेष्मा प्रकुपितस्त्वङ्मांसशोणितादीन्यभिभूय शोथं जनयति; स कृच्छ्रोत्थानप्रशमो भवति, पाण्डुश्वेतावभासो गुरुः स्निग्धः श्लक्ष्णः स्थिरः स्त्यानः शुक्लाग्ररोमा स्पर्शोष्णसहश्चेति श्लेष्मशोथः (३);

यथास्वकारणाकृतिसंसर्गाद्द्विदोषजास्त्रयः शोथा भवन्ति; यथास्वकारणाकृतिसन्निपातात् सान्निपातिक एकः; एवं सप्तविधो भेदः ॥७॥

प्रकृतिभिस्ताभिस्ताभिर्भिद्यमानो द्विविधस्त्रिविधश्चतुर्विधः सप्तविधोऽष्टविधश्च शोथ उपलभ्यते, पुनश्चैक एवोत्सेधसामान्यात् ॥ ८ ॥

प्रकृतिवर्ण इति देहानुरूपवर्णः। स्पन्दनः कम्पनः। उष्यते समीपस्थेनेव वह्निना दह्यते। धूप्यते धूममिवोद्गमति। ऊष्मायते बहिः परैरप्युष्णत्वेनोपलभ्यते। न सुषूयते इति स्पर्शं न सहते, उष्णं च न सहत इत्यर्थः। कृच्छ्रोत्थानप्रशम इति चिरोत्थानप्रशमः। प्रकृतिभिरिति कारणैः। उत्सेध उन्नतत्वम् ॥७–८॥

भवन्ति चात्र—

शूयन्ते यस्य गात्राणि स्वपन्तीव रुजन्ति च।
पीडितान्युन्नमन्त्याशु वातशोथं तमादिशेत् ॥ ९ ॥

यश्चाप्यरुणवर्णाभः शोथो नक्तं प्रणश्यति।
स्नेहोष्णमर्दनाभ्यां च प्रणश्येत् स च वातिकः ॥१०॥

यः पिपासाज्वरार्तस्य दूयतेऽथ विदह्यते।
स्विद्यति क्लिद्यते गन्धी स पैत्तः श्वयथुः स्मृतः ॥११॥

यः पीतनेत्रवक्त्रत्वक् पूर्वं मध्यात् प्रशूयते।
तनुत्वक् चातिसारी च पित्तशोथः स उच्यते ॥१२॥

शीतः सक्तगतिर्यस्तु कण्डूमान् पाण्डुरेव च।
निपीडितो नोन्नमति श्वयथुः स कफात्मकः ॥१३॥

यस्य शस्त्रकुशच्छिन्नाच्छोणितं न प्रवर्तते।
कृच्छ्रेण पिच्छा स्रवति स चापि कफसंभवः ॥१४॥

निदानाकृतिसंसर्गाच्छ्वयथुः स्याद्द्विदोषजः।
सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रहेतुजः ॥१५॥

इदानीं प्रायोभाविलक्षणानि त्वाह—शूयन्त इत्यादि। स्वपन्तीव रुजन्तीति च तिङ(शत्र ?)न्तं प्रथमाबहुवचनान्तं, वातेन यस्याङ्गानि स्वापयुक्तानीव भूत्वा तथा रुजायुक्तानि च भूत्वा शूयन्त इत्यादि स्वपन्ति रुजन्ति शोथवन्ति स्युस्तं वातशोथमादिशेदित्यर्थः। स्वपन्तीवेति स्पर्शाज्ञतया वेदनाराहित्याद्वातेन, वायोश्चलत्वेन क्षणाच्च रुक्क्षणाच्च तदभाव इत्यर्थः। यः पीतेत्यादौ मध्यादिति शरीरमध्यात्। सक्तगतिरित्यविसारी, छिन्नादित्यनन्तरमङ्गादिति शेषः, किंवा छिन्नादिति छेदादित्यर्थः ॥९–१५॥

यस्तु पादाभिनिर्वृत्तः शोथः सर्वाङ्गगो भवेत् ।
जन्तोः स च सुकष्टः स्यात् प्रसृतः स्त्रीमुखाच्च यः ॥१६॥

यश्चापि गुह्यप्रभवः स्त्रिया वा पुरुषस्य वा ।
स च कष्टतमो ज्ञेयो यस्य च स्युरुपद्रवाः ॥१७॥

यस्तु पादाभिनिर्वृत्त इत्यादि । यः शोथ जन्तोः पुरुषस्य प्रथमतः पादे भूत्वा सर्वाङ्गं व्याप्नोति स कृच्छ्रसाध्यः, तथा यः शोथः स्त्रीमुखे आदौ भूत्वा पश्चात्सर्वाङ्गप्रसृतो भवति स सुकष्ट इत्यर्थः। अत्र च प्रभाव एव हेतुः, अन्ये तु "अधोभागो गुरुः स्त्रीणामूर्ध्वः पुंसां गुरुस्तथा ।" (सु० सू० ४६) इति वचनादूर्ध्वाङ्गप्रभवत्वं कष्टसाध्यत्वे हेतुमाहुस्तत् पुनरनैकान्तिकत्वादुपेक्षणीयमिति ॥१६-१७॥

छर्दिः श्वासोऽरुचिस्तृष्णा ज्वरोऽतीसार एव च ।
सप्तकोऽयं सदौर्बल्यः शोफोपद्रवसंग्रह ॥१८॥

उक्तानुपद्रवानाह—छर्दिरित्यादि ॥१८॥

यस्य श्लेष्मा प्रकुपितो जिह्वामूलेऽवतिष्ठते ।
आशु संजनयेच्छोथं जायतेऽस्योपजिह्विका ॥१९॥

यस्य श्लेष्मा प्रकुपितः काकले व्यवतिष्ठते ।
आशु संजनयेच्छोफं करोति गलशुण्डिकाम् ॥२०॥

यस्य श्लेष्मा प्रकुपितो गलबाह्येऽवतिष्ठते ।
शनैः संजनयेच्छोफं गलगण्डोऽस्य जायते ॥२१॥

यस्य श्लेष्मा प्रकुपितस्तिष्ठत्यन्तर्गले स्थिरः ।
आशु संजनयेच्छोफं जायतेऽस्य गलग्रहः ॥२२॥

यस्य पित्तं प्रकुपितं सरक्तं त्वचि सर्पति ।
शोफं सरागं जनयेद्विसर्पस्तस्य जायते ॥२३॥

यस्य पित्तं प्रकुपितं त्वचि रक्तेऽवतिष्ठते ।
शोथं सरागं जनयेत् पिडका तस्य जायते ॥२४॥

यस्य प्रकुपितं पित्तं शोणितं प्राप्य शुष्यति ।
तिलका पिप्लवो व्यङ्गा नीलिका तस्य जायते ॥२५॥

यस्य पित्तं प्रकुपितं शङ्खयोरवतिष्ठते ।
श्वयथुः शङ्खको नाम दारुणस्तस्य जायते ॥२६॥

यस्य पित्तं प्रकुपितं कर्णमूलेऽवतिष्ठते ।
ज्वरान्ते दुर्जयोऽन्ताय शोथस्तस्योपजायते ॥२७॥

वातः प्लीहानमुद्धूय कुपितो यस्य तिष्ठति ।
शनैः परितुदन् पार्श्वं प्लीहा तस्याभिवर्धते ॥२८॥

यस्य वायुः प्रकुपितो गुल्मस्थानेऽवतिष्ठते ।
शोफं सशूलं जनयन् गुल्मस्तस्योपजायते ॥२९॥

यस्य वायुः प्रकुपितः शोफशूलकरश्चरन् ।
वङ्क्षणाद्वृषणौ याति वृद्धिस्तस्योपजायते ॥३०॥

यस्य वातः प्रकुपितस्त्वङ्मांसान्तरमाश्रितः ।
शोथं संजनयेत् कुक्षावुदरं तस्य जायते ॥३१॥

यस्य वातः प्रकुपितः कुक्षिमाश्रित्य तिष्ठति ।
नाधो व्रजति नाप्यूर्ध्वमानाहस्तस्य जायते ॥३२॥

रोगाश्चोत्सेधसामान्यादधिमांसार्बुदादयः ।
विशिष्टा नामरूपाभ्यां निर्देश्याः शोथसंग्रहे ॥३३॥

वातपित्तकफा यस्य युगपत् कुपितास्त्रयः ।
जिह्वामूलेऽवतिष्ठन्ते विदहन्तः समुच्छ्रिताः ॥३४॥

जनयन्ति भृशं शोथं वेदनाश्च पृथग्विधाः ।
तं शीघ्रकारिणं रोगं रोहिणीति विनिर्दिशेत् ॥३५॥

त्रिरात्रं परमं तस्य जन्तोर्भवति जीवितम् ।
कुशलेन त्वनुक्रान्तः क्षिप्रं संपद्यते सुखी ॥३६॥

उत्सेधसामान्यात् प्रादेशिकान् शोथानाह—यस्येत्यादि। काकलं तालुमूलम्। गलगण्डलक्षणे शनैरिति वचनेन गलगण्डकारिदोषाणाञ्चिरक्रियत्वं, गलग्रहे त्वाशिवति वचनादाशुकारित्वमिति बोधयति। विसर्पपिडकयोस्तुल्यकारणत्वेऽपि विसर्पे दोषाः सर्पणशीलाः, पिडकायां तु स्थिरा इति भेदः; अत एव पिडकासम्प्राप्तावतिष्ठते इत्युक्तम्। यस्य पित्तमित्यादौ पित्तं प्राप्य शोणितं कर्तृ शुष्यतीत्यन्वयः। पिप्लवो जटुल इति ख्यातः। अन्तायेत्यनुपक्रमादित्यर्थः। गुल्मादयो विस्तरवक्तव्या अपि उत्सेधसामान्याल्लेशत उच्यन्ते। शोथसङ्ग्रह इति उत्सेधरूपतया शोथत्वेन सङ्ग्रहः शोथसङ्ग्रहः। "त्रिरात्रं परमं तस्य जन्तोर्भवति जीवितम्।"

इत्यत्र अनुपक्रमान्मिथ्योपक्रमाद्वेति शेषः। क्षिप्रमनुक्रान्तः शीघ्रं चिकित्सित इत्यर्थः ॥१९-३६॥

सन्ति ह्येवंविधा रोगाः साध्या दारुणसंमताः।
ये हन्युरनुपक्रान्ता मिथ्याचारेण वा पुनः ॥३७॥
साध्याश्चाप्यपरे सन्ति व्याधयो मृदुसंमताः।
यत्नायत्नकृतं येषु कर्म सिध्यत्यसंशयम् ॥३८॥
असाध्याश्चापरे सन्ति व्याधयो याप्यसंज्ञिताः।
सुसाध्वपि कृतं येषु कर्म यात्राकरं भवेत् ॥३९॥
सन्ति चाप्यपरे रोगा येषु कर्म न सिध्यति।
अपि यत्नकृतं बालैर्न तान् विद्वानुपाचरेत् ॥४०॥
साध्याश्चैवाप्यसाध्याश्च व्याधयो द्विविधाः स्मृताः।
मृदुदारुणभेदेन ते भवन्ति चतुर्विधाः ॥४१॥

एतदेव शीघ्रकारित्वं न केवलं रोहिण्यामेव किन्तर्हि अन्येष्वप्यस्तीत्याह—सन्तीत्यादि। एवंविधा इति ज्वरान्तकर्णशोथवलयादयः। दारुणप्रसङ्गेन मृद्वादिभेदानप्याह—साध्याश्चेत्यादि। यात्राकरमिति यापनकरम्। बालैरित्यज्ञैः, असाध्ये हि अज्ञ एव प्रवर्तते। साध्या इत्यादि—साध्यानां मृदुदारुणत्वं सुखसाध्यकृच्छ्रसाध्यत्वेन। असाध्यानान्तु तत्त्वं याप्यप्रत्याख्येयत्वेन कालान्तरप्राणहरसद्यःप्राणहरत्वेन च ज्ञेयम् ॥३७-४१॥

त एवापरिसंख्येया भिद्यमाना भवन्ति हि।
रुजावर्णसमुत्थानस्थानसंस्थाननामभिः ॥४२॥
व्यवस्थाकरणं तेषां यथास्थूलेषु संग्रहः।
तथा प्रकृतिसामान्यं विकारेषूपदिश्यते ॥४३॥

नन्वेवमपरिसंख्येयत्वे कथं व्यवस्था भविष्यतीत्याह—व्यवस्थेत्यादि। व्यवस्थाकरणं चिकित्साव्यवहारार्थं संख्याकथनम्। यथास्थूलेष्विति ये ये स्थूला उदरमूत्रकृच्छ्रादयः तेषु, सङ्ग्रहेऽष्टोदरीये रोगसङ्ग्रहे इत्यर्थः। अस्थूलेषु तु विकारेषु अष्टोदरीये संज्ञयाऽनुक्तेषु कथं व्यवस्थाकरणमित्याह—तथेत्यादि। प्रकृतिसामान्यं समानकारणता; तेन साक्षादनुक्तेषु व्याधिषु वातजोऽयं कफजोऽयं रसजोऽयं रक्तजोऽयमित्यादिव्यवस्था व्यवहारार्थं कार्येति भावः ॥४२-४३॥

विकारनामाकुशलो न जिह्रीयात् कदाचन।
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ॥४४॥

स एव कुपितो दोषः समुत्थानविशेषतः।
स्थानान्तरगतश्चैव जनयत्यामयान् बहून् ॥४५॥

तस्माद्विकारप्रकृतीरधिष्ठानान्तराणि च।
समुत्थानविशेषांश्च बुद्ध्वा कर्म समाचरेत् ॥४६॥

यो ह्येतत्त्रितयं ज्ञात्वा कर्माण्यारभते भिषक्।
ज्ञानपूर्वं यथान्यायं स कर्मसु न मुह्यति ॥४७॥

एतावता ज्वरादिवन्नाममात्राज्ञानेऽपि वातादिजन्यत्वज्ञानेनैव चिकित्साव्यवहारः सेत्स्यतीत्याह—विकारनामाकुशल इत्यादि। कथं सर्वेषां नाम नोच्यत इत्याह—स एवेत्यादि। बहूनित्यसंख्येयान्, एतेनासंख्येयत्वान्नोच्यत इति भावः। स्थानान्तरगतश्चेति चकारादेकस्थानगतस्यापि बहुविकारजनकत्वं समुच्चिनोति। वक्ष्यति च—"करोति गलमाश्रितः। कण्ठोद्ध्वंसं च कासं च स्वरभेदमरोचकम् ॥" (चि० ८.१६) इति। तर्हि कथं चिकित्सा कार्येत्याह—तस्मादितीत्यादि। विकारप्रकृतीरिति वातादीन्, अधिष्ठानान्तराण्याशयविशेषान्, समुत्थानविशेषानिति रूक्षादीन्, एतत्त्रिविधमिति विकारप्रकृत्यादि। ज्ञानपूर्वमिति चिकित्साज्ञानपूर्वम्। यथान्यायमिति यथाशास्त्रम्, अयं भावः—चिकित्सायां तावद्रोगाणां वातारब्धत्वादिज्ञानमेव प्रयोजकं, नामज्ञानन्तु व्यवहारमात्रप्रयोजनमिति नामज्ञानं विनाऽपि चिकित्सा निर्वहतीति ॥४४-४७॥

नित्याः प्राणभृतां देहे वातपित्तकफास्त्रयः।
विकृताः प्रकृतिस्था वा तान् बुभुत्सेत पण्डितः ॥४८॥

इदानीम् उक्तरीत्या वातादिज्ञानस्य चिकित्सौपयिकत्वात् तेषां प्रकृतिविकृतिज्ञानार्थमाह—नित्या इत्यादि। नित्या इति नित्यसम्बद्धाः ॥४८॥

उत्साहोच्छ्वासनिःश्वासचेष्टा धातुगतिः समा।
समो मोक्षो गतिमतां वायोः कर्माविकारजम् ॥४९॥

दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवम्।
प्रभा प्रसादो मेधा च पित्तकर्माविकारजम् ॥५०॥

स्नेहो बन्धः स्थिरत्वं च गौरवं वृषता बलम्।
क्षमा धृतिरलोभश्च कफकर्माविकारजम् ॥५१॥

के कैर्लक्षणैर्बुभुत्सेतेत्याह—उत्साहेत्यादि। धातुगतिरिति रसादीनां पोष्यं धातुं प्रति गमनम्। समेत्यविकृता। गतिमतामिति बहिर्निःसरतो पुरीषादीनाम्। प्रसाद इति मनसः। बन्धः सन्धिबन्धः। स्थिरत्वमशैथिल्यम्। गौरवं प्राकृतं शरीरगौरवम्। क्षमा सहिष्णुता। धृतिर्मनसोऽचाञ्चल्यम् ॥४९-५१॥

वाते पित्ते कफे चैव क्षीणे लक्षणमुच्यते।
कर्मणः प्राकृताद्धानिर्वृद्धिर्वाऽपि विरोधिनाम् ५२॥

कर्मणः प्राकृतादिति वातादिप्राकृतकर्मत्वेनोक्तादुत्साहादेर्हानिरपचयः। वृद्धिर्वाऽपि विरोधिनामिति उक्तप्राकृतलक्षणविरोधिनां कर्मणां वृद्धिः; यथा वातक्षये उत्साहविरोधिनो विषादस्य वृद्धिः, पित्तक्षयेऽदर्शनापक्त्यादीनां, श्लेष्मक्षये रौक्ष्यादीनां वृद्धिः। यद्यपि प्राकृतकर्महानौ सत्यां नावश्यं विरोधिकर्मवृद्धिरिति वृद्धिर्वाऽपि विरोधिनामिति वचनमनुपादेयं तथाऽपि शाब्दी ह्याकांक्षा शब्देनैव पूर्यत इत्यतः लब्धस्याप्यर्थस्योपादानं स्पष्टार्थमिति न दोषः। किंवा, उत्साहाद्यभावेनाभावमुखेन ज्ञानार्थं कर्मणः प्राकृताद्धानिरित्युक्तं, विषादादिवृद्ध्या तु विधिमुखेन ज्ञानार्थं वृद्धिर्वाऽपि विरोधिनामित्युक्तम्। अन्ये तु व्याचक्षते—वृद्धिर्वाऽपि विरोधिनामित्यनेन विरोधिदोषाणां वृद्धिः यथा पित्तवृद्ध्या श्लेष्मक्षयो ज्ञायत इत्यादि, तन्न, न ह्येकस्य दोषस्य वृद्धावन्यस्यावश्यमपायः तथा सति पित्तवृद्धौ सत्यां सर्वदा श्लेष्मक्षयः स्यात्। न च दोषाः परस्परमुपघातकाः विरुद्धैरपि न त्वेतैरित्यादि (नोक्तम्) ॥५२॥

दोषप्रकृतिवैशेष्यं नियतं वृद्धिलक्षणम्।
दोषाणां प्रकृतिर्हानिर्वृद्धिश्चैवं परीक्ष्यते ॥५३॥

(प्रकृतिः स्वभावः), तस्य वैशेष्यमाधिक्यम्। नियतमिति निश्चितमित्यर्थः ॥५३॥

तत्र श्लोकाः—

संख्यां निमित्तं रूपाणि शोथानां साध्यतां न च।
तेषां तेषां विकाराणां शोथांस्तांस्तांश्च पूर्वजान् ॥५४॥

विधिभेदं विकाराणां त्रिविधं बोध्यसंग्रहम्।
प्राकृतं कर्म दोषाणां लक्षणं हानिवृद्धिषु ॥५५॥

वीतमोहरजोदोषलोभमानमदस्पृहः ।
व्याख्यातवांस्त्रिशोथीये रोगाध्याये पुनर्वसुः ॥५६॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने
त्रिशोथीयो नामाष्टादशोऽध्यायः ॥१८॥

सङ्ग्रहे—साध्यतां भेषजविशेषसाध्यत्वं उपशय(म्) इत्यर्थः; तच्च "स्नेहौष्ण्यमर्दनाभ्यां (यः) प्रणश्येत् स तु वातिक" इत्युक्तं ज्ञेयम् । न चेति न च साध्यतामित्यन्वयः असाध्यतेत्यर्थः, तच्च "यश्च पादाभिनिर्वृत्त" इत्याद्युक्तं ज्ञेयम् । तेषां तेषां (इति उपजिह्विकादीनाम्), शोथान् पूर्वजानित्यभिदधान उपजिह्विकादिषु पूर्वं शोथो भवति पश्चादु)-पजिह्विकादिरोगव्यक्तिरिति बोधयति । विधिभेदमिति साध्यतादि-प्रकारभेदं; बोध्यो विकारप्रकृत्यादिः, तस्य सङ्ग्रहं त्रिविधं त्रिविधत्वेन सङ्ग्रहमित्यर्थः, स च तस्माद्विकारप्रकृतीरित्यादिनोक्तः ॥ ५४–५६ ॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां त्रिशोथीयः
समाप्तः ॥ १८ ॥

ऊनविंशोऽध्यायः

अथातोऽष्टोदरीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वाध्याये 'व्यवस्थाकरणन्तेषां यथास्थूलेषु सङ्ग्रह' इत्युक्तम्, अतो यथास्थूलं रोगसङ्ग्रहार्थमष्टोदरीयोऽभिधीयते ॥१-२॥

इह खल्वष्टावुदराणि, अष्टौ मूत्राघाताः, अष्टौ क्षीरदोषाः, अष्टौ रेतोदोषाः; सप्त कुष्ठानि, सप्त पिडकाः, सप्त वीसर्पाः; षडतीसाराः, षडुदावर्ताः; पञ्च गुल्माः, पञ्च प्लीहदोषाः, पञ्च कासाः, पञ्च श्वासाः, पञ्च हिक्काः, पञ्च तृष्णाः, पञ्च छर्दयः, पञ्च भक्तस्यानशनस्थानानि, पञ्च शिरोरोगाः, पञ्च हृद्रोगाः, पञ्च पाण्डुरोगाः, पञ्चोन्मादाः; चत्वारोऽपस्माराः, चत्वारोऽक्षिरोगाः, चत्वारः कर्णरोगाः, चत्वारः प्रतिश्यायाः, चत्वारो मुखरोगाः, चत्वारो ग्रहणीदोषाः, चत्वारो मदाः, चत्वारो मूर्च्छायाः, चत्वारः शोषाः, चत्वारि क्लैब्यानि; त्रयः शोफाः, त्रीणि किलासानि, त्रिविधं लोहितपित्तं; द्वौ ज्वरौ, द्वौ व्रणौ, द्वावायामौ, द्वे गृध्रस्यौ, द्वे कामले, द्विविधमामं, द्विविधं वातरक्तं, द्विविधान्यर्शांसि; एक ऊरुस्तम्भः, एकः संन्यासः, एको महागदः; विंशतिः क्रिमिजातयः, विंशतिः प्रमेहाः, विंशतिर्योनिव्यापदः; इत्यष्टचत्वारिंशद्रोगाधिकरणान्यस्मिन् संग्रहे समुद्दिष्टानि ॥३॥

अत्रोदराभिधानमादौ कृतं पूर्वाध्यायोक्तशोथसामान्यात् तथा अष्टसंख्यायाः मङ्गलत्वाच्चाष्टकसङ्ग्रहस्यैवादावभिधानमित्यपि ज्ञेयम् । अधिकरणानीति वर्गाः, समुद्दिष्टानीति उद्देशमात्रेणोक्तानि ॥३॥

एतानि यथोद्देशमभिनिर्दिश्यन्तेः—

अष्टावुदराणीति वातपित्तकफसन्निपातप्लीहबद्धच्छिद्रदकोदराणि, अष्टौ मूत्राघाता इति वातपित्तकफसन्निपाताश्मरीशर्कराशुक्रशोणितजाः, अष्टौ क्षीरदोषा इति वैवर्ण्यं वैगन्ध्यं वैरस्यं पैच्छिल्यं फेनसङ्घातो रौक्ष्यं गौरवमतिस्नेहश्च, अष्टौ रेतोदोषा इति तनु शुष्कं फेनिलमश्वेतं पूत्यतिपिच्छिलमन्यधातूपहितमवसादि च (१);

सप्त कुष्ठानीति कपालोदुम्बरमण्डलर्ष्यजिह्वपुण्डरीकसिध्मकाकणानि, सप्त पिडका इति शराविका कच्छपिका जालिनी सर्षप्यलजी विनता विद्रधी च, सप्त वीसर्पा इति वातपित्तकफाग्निकर्दमकग्रन्थिसन्निपाताख्याः (२);

षडतीसारा इति वातपित्तकफसन्निपातभयशोकजाः, षडुदावर्ता इति वातमूत्रपुरीषशुक्रच्छर्दिक्षवथुजाः (३);

पञ्च गुल्मा इति वातपित्तकफसन्निपातशोणितजाः, पञ्च प्लीहदोषा इति गुल्मैर्व्याख्याताः, पञ्च कासा इति वातपित्तकफक्षतक्षयजाः, पञ्च श्वासा इति महोर्ध्वच्छिन्नतमकक्षुद्राः, पञ्च हिक्का इति महती गम्भीरा व्यपेता क्षुद्राऽन्नजा च, पञ्च तृष्णा इति वातपित्तामक्षयोपसर्गात्मिकाः, पञ्च छर्दय इति द्विष्टार्थसंयोगजा वातपित्तकफसन्निपातोद्रेकोत्थाश्च, पञ्च भक्तस्यानशनस्थानानीति वातपित्तकफसन्निपातद्वेषाः, पञ्च शिरोरोगा इति पूर्वोद्देशमभिसमस्य वातपित्तकफसन्निपातक्रिमिजाः, पञ्च हृद्रोगा इति शिरोरोगैर्व्याख्याताः, पञ्च पाण्डुरोगा इति वातपित्तकफसन्निपातमृद्भक्षणजाः, पञ्चोन्मादा इति वातपित्तकफसन्निपातागन्तुनिमित्ताः (४);

चत्वारोऽपस्मारा इति वातपित्तकफसन्निपातनिमित्ताः, चत्वारोऽक्षिरोगाश्चत्वारः कर्णरोगाश्चत्वारः प्रतिश्यायाश्चत्वारो मुखरोगाश्चत्वारो ग्रहणीदोषाश्चत्वारो मदाश्चत्वारो मूर्च्छाया इत्यपस्मारैर्व्याख्याताः, चत्वारः शोषा इति साहससन्धारणक्षयविषमाशनजाः, चत्वारि क्लैब्यानीति बीजोपघाताद्ध्वजभङ्गाज्जरायाः शुक्रक्षयाच्च (५);

त्रयः शोथा इति वातपित्तश्लेष्मनिमित्ताः, त्रीणि किलासानीति रक्तताम्रशुक्लानि, त्रिविधं लोहितपित्तमिति ऊर्ध्वभागमधोभागमुभयभागं च (६);

द्वौ ज्वराविति उष्णाभिप्रायः शीतसमुत्थश्च शीताभिप्रायश्चोष्णसमुत्थः, द्वौ व्रणाविति निजश्चागन्तुजश्च, द्वावायामाविति बाह्यश्चाभ्यन्तरश्च, द्वे गृध्रस्याविति वाताद्वातकफाच्च, द्वे कामले इति कोष्ठाश्रया शाखाश्रया च, द्विविधमाममिति अलसको विसूचिका च,

द्विविधं वातरक्तमिति गम्भीरमुत्तानं च, द्विविधान्यर्शांसीति शुष्काण्यार्द्राणि च (७);

एक ऊरुस्तम्भ इत्यामत्रिदोषसमुत्थः, एकः संन्यास इति त्रिदोषात्मको मनःशरीराधिष्ठानः, एको महागद इति अतत्त्वाभिनिवेशः (८);

विंशतिः क्रिमिजातय इति यूका पिपीलिकाश्चेति द्विविधा बहिर्मलजाः, केशादा लोमादा लोमद्वीपाः सौरसा औदुम्बरा जन्तुमातरश्चेति षट् शोणितजाः, अन्त्रादा उदरावेष्टा हृदयादाश्चुरवो दर्भपुष्पाः सौगन्धिका महागुदाश्चेति सप्त कफजाः, ककेरुका मकेरुका लेलिहाः सशूलकाः सौसुरादाश्चेति पञ्च पुरीषजाः; विंशतिः प्रमेहा इत्युदकमेहश्चेक्षुबालिकारसमेहश्च सान्द्रमेहश्च सान्द्रप्रसादमेहश्च शुक्लमेहश्च शुक्रमेहश्च शीतमेहश्च शनैर्मेहश्च सिकतामेहश्च लालामेहश्चेति दश श्लेष्मनिमित्ताः, क्षारमेहश्च कालमेहश्च नीलमेहश्च लोहितमेहश्च मञ्जिष्ठामेहश्च हरिद्रामेहश्चेति षट् पित्तनिमित्ताः, वसामेहश्च मज्जमेहश्च हस्तिमेहश्च मधुमेहश्चेति चत्वारो वातनिमित्ताः, इति विंशतिः प्रमेहाः; विंशतिर्योनिव्यापद इति वातिकी पैत्तिकी श्लैष्मिकी सान्निपातिकी चेति चतस्रो दोषजाः, दोषदूष्यसंसर्गप्रकृतिनिर्देशैरवशिष्टाः षोडश निर्दिश्यन्ते, तद्यथा—रक्तयोनिश्चारजस्का चाचरणा चातिचरणा च प्राक्चरणा चोपप्लुता च परिप्लुता चोदावर्तिनी च कर्णिनी च पुत्रघ्नी चान्तर्मुखी च सूचीमुखी च शुष्का च वामिनी च षण्ढयोनिश्च महायोनिश्चेति विंशतिर्योनिव्यापदो भवन्ति (९);

केवलश्चायमुद्देशो यथोद्देशमभिनिर्दिष्टो भवति ॥४॥

(अभि)निर्दिश्यन्त इति विव्रियन्ते । अवसादि चेति जले क्षिप्तं यदवसीदति निमज्जति तदवसादीत्युच्यते; किंवा—"वेगसन्धारणाच्छुक्रं वायुनाभिहतं पथि । कृच्छ्रेण याति ग्रथितमवसादीति तत्स्मृतम् ॥" इत्युक्तलक्षणम् । पिच्छिलमिति अत्यर्थपिच्छिलं, अतिपिच्छिलमिति वा पाठः, अत एव शुक्रदोषविवरणे—"श्लेष्मणा बद्धमार्गं तु (तद्)भवत्यतिपिच्छिलम् ।" इति । अत एव अतिपिच्छिलमिति पाठान्तरमपि साधु । सप्त कुष्ठानीति महाकुष्ठानीत्यर्थः, क्षुद्रकुष्ठानामेकादशानामप्रधानत्वेनास्मिन् सङ्ग्रहेऽनभिधानमिति तात्पर्यम् । अत्र यथोत्तरं न्यूनसंख्याभिधानं युक्तिवैचित्र्यार्थम् । षडुदावर्ता इति—यद्यपि सुश्रुते त्रयोदशोदावर्ता उक्ता तथाऽप्यत्रा-

विष्कृततमत्वेन मूत्रपुरीषवातशुक्रवमिक्षवथुविघातजा एव षडुदावर्ता उक्ताः, उद्गारादिरोधजानां वातरोधज एवान्तर्भावात्। गुल्मैर्व्याख्याता इति वातपित्तकफसन्निपातरक्तजा इत्यर्थः। पूर्वोद्देशमभिसमस्येति कियन्तःशिरसीये विस्तरोक्तान् संक्षिप्य। पञ्च तृष्णा इति सम्भोजनस्नेहादिजनितानामपि वातादिजास्वेवान्तर्भावात्। अनशनस्थानानीति अनशनं भोजनप्रतिबन्धः, तस्य च कार्याणि लक्ष्यन्त इत्याहुः। चत्वारो मदा इति अत्र मदा एव मदात्ययरूपतां यान्तीति कृत्वा मदात्ययाः पृथङ्नोक्ताः। उष्णाभिप्राय इत्युष्णेच्छः। अथ यद्यपि उष्णाभिप्रायता शीतसमुत्थत्वेनैव (लब्धा) यतो दोषविपरीतमेवेच्छति ज्वरी—उक्तं हि—"कुर्वन्तो हि रुचिं दोषा विपरीतसमानयोः। वृद्धाः क्षीणाश्च भूयिष्ठं लक्षयन्त्यबुधस्त्विना॥" इति तथाऽपीहोष्णाभिप्रायताविशेषणं पैत्तिकस्यापि ज्वरस्य शीतर्तुसमुत्थत्वेऽपि शीतसमुत्थत्वनिरासार्थम्। एवं शीताभिप्रायेऽपि व्याख्येयम्। द्विविधमाममिति—यत्तु त्रिविधकुक्षीये आमविषसंज्ञामामस्य वक्ष्यति तदलसकरूपेणैवानुसरणीयं तत्रैवान्तर्भावादिति भावः। अतत्त्वाभिनिवेशो मिथ्याज्ञानं, स च सर्वसंसारिदुः(खहेतुः)। संसर्गो दोषदूष्यसंसर्गः, प्रकृतिर्दोषाद्यतिरिक्तं (कारणं), तत्र दोषदूष्यसंसर्गेण रक्तयोन्यादयः, प्रकृतिनिर्देशेन प्राक्चरणादयो योनिव्यापच्चिकित्सितं वीक्ष्य व्याकर्तव्याः। यद्यपीहोक्तानां प्रकारान्तरेणापि संख्या सम्भवति यथाऽष्टौ ज्वराः, द्वावुन्मादौ निजागन्तुभेदेनेत्यादि तथाऽपि प्रधानविवक्षया एत एव भेदाः गृहीताः; प्राधान्यं च स्वाधिकारे रोगाणामनुसरणीयम्। उपसंहरति—केवल इति समग्र इत्यर्थः। यथोद्देशमित्युद्देशक्रमेण अभिनिर्दिष्ट इति विवृतः॥४॥

सर्व एव निजा विकारा नान्यत्र वातपित्तकफेभ्यो निर्वर्तन्ते, यथा-हि—शकुनिः सर्वं दिवसमपि परिपतन् स्वां छायां नातिवर्तते, तथा स्वधातुवैषम्यनिमित्ताः सर्वे विकारा वातपित्तकफान्नातिवर्तन्ते। वातपित्तश्लेष्मणां पुनः स्थानसंस्थानप्रकृतिविशेषानभिसमीक्ष्य तदात्मकानपि च सर्वविकारांस्तानेवोपदिशन्ति बुद्धिमन्तः॥५॥

इदानीमुक्तानुक्तविकारेषु दोषाणामव्यभिचारिकारणत्वं दर्शयति—सर्व एवेत्यादि। सर्वं इत्युक्ता वक्ष्यमाणास्तथा साक्षादनुक्ताश्चेत्यर्थः। यद्यप्यागन्तुष्वपि दोषसम्बन्धो न व्यभिचरति तथाऽप्यागन्तौ रोगे दोषापेक्षया न चिकित्सेत्यागन्तुव्युदासार्थं निजा इत्युक्तम्। उक्तेऽर्थे दृष्टान्तमाह—

यथा हीत्यादि। आगन्तवोऽपि धातुवैषम्यनिमित्ताः, अतस्तद्व्युदासार्थं स्वशब्दोपादानं, स्वशब्दोऽत्र निजवाचकः, निजा ये धातुवैषम्ये निमित्ता इत्यर्थः। ननु यदि वातादिजन्या एव सर्वविकाराः तत् कथमुदरादिषु प्लीहत्वादिव्यपदेश इत्यत आह—वातपित्तश्लेष्मणान्त्वित्यादि। स्थानं रसादयो बस्त्यादयश्च, संस्थानमाकृतिः स्वरूपमिति यावत्, प्रकृतिः कारणं, एवं विशेषानभिसमीक्ष्य तांस्तानुपदिशन्ति अष्टावुदराणीत्येवमाद्युपदिशन्ति। तदात्मकानपीति वातादिजानपीत्यर्थः। तत्र स्थानविशेषादुपदेशो यथा हृद्रोग इत्यादिः, संस्थानविशेषादुपदेशो यथा गुल्मशराविकेत्यादिः, प्रकृतिविशेषाद्यथा प्लीहोदरमित्यादि ॥५॥

भवतश्चात्र—

स्वधातुवैषम्यनिमित्तजा ये विकारसंघा बहवः शरीरे।
न ते पृथक् पित्तकफानिलेभ्य आगन्तवस्त्वेव ततो विशिष्टाः ॥६॥

इदानीं निजविकारेषु दोषाणां समवायिकारणत्वेनाभेदं दर्शयन्नागन्तुषु तद्व्यतिरेकमाह—स्वधातुवैषम्येत्यादि। स्वशब्देनात्र शरीरं विवक्षितं, तेन शरीरधातुवैषम्यं गृह्यते मानसन्तु व्यवच्छिद्यते। धातवश्च न स्वरूपेण रोगकारणमिति वैषम्यपदं कृतम्। धातुपदेनात्र सामान्यतो रसादीनां वातादीनां च ग्रहणं बोध्यम्। आगन्तवोऽप्यभिघातजज्वरादयो धातुवैषम्यजा भवन्ति अतस्तद्व्युदासार्थं निमित्तपदम्। आगन्तुषु धातुवैषम्यं विद्यमानमपि कारणत्वेन न व्यपदिश्यते चिकित्साविशेषाप्रयोजकत्वेन लक्षणाजनकत्वेन चाप्रधानत्वात्, किन्त्वागन्तुरेव विषभूतादिस्तत्र चिकित्साविशेषप्रयोजक इति स एव कारणत्वेन व्यपदिश्यते; निजे धातुवैषम्यमेव चिकित्साविशेषप्रयोजकमिति तदेव निमित्तम्। न ते पृथक् पित्तकफानिलेभ्य इति धातुवैषम्यनिमित्तजा विकाराः पित्तकफानिलेभ्यो न भिन्नाः नार्थान्तराणि उपादानोपादेयभावादिति भावः। ययोर्हि अर्थान्तरत्वं न तयोरुपादानोपादेयभाव यथा घटपटयोः। उपादानोपादेयभावश्च दोषरोगयोर्वर्तते अतो नार्थान्तरत्वं यथा ऊर्णापटयोः। एतेन यथा तन्तव एव तेन संस्थानविशेषेण परिणताः पटः, न तन्तुभ्योऽर्थान्तरं पटः; तथा दोषा एव तेन तेनावस्थाविशेषेण परिणता व्याधयो न दोषोभ्योऽर्थान्तरं व्याधिरित्यर्थः। अपराण्यपि कार्यकारणभेदसाधनानि प्रमाणानि सांख्येऽनुसन्धेयानि इह तु विस्तरभयान्नोच्यते। ततो विशिष्टा इति निजविकारसङ्घेभ्यो विलक्षणाः पित्तकफानिलव्यतिरिक्ता इत्यर्थः,

यद्यप्यागन्तुस्वपि दोषाणां समवायिकारणत्वेन पित्तकफानिलव्यतिरेको नास्त्येव तथाऽपि तत्र दोषाणामप्रधानत्वेन सदपि कारणत्वं न व्यपदिश्यते इति पित्तकफानिलव्यतिरेक इत्यर्थः ॥६॥

आगन्तुरन्वेति निजं विकारं निजस्तथाऽऽगन्तुमपि प्रवृद्धः ।
तत्रानुबन्धं प्रकृतिं च सम्यग् ज्ञात्वा ततः कर्म समारभेत ॥७॥

सम्प्रति भिन्नयोर्निजागन्त्वोः सम्बन्धमाह—आगन्तुरित्यादि । प्रथममुत्पन्नं निजं विकारमागन्तुर्भूतादिजन्यो विकारोऽन्वेति अनुगतो भवति यथा दोषज एव ज्वरे उन्मादे (वा) पश्चाद्भूताभिषङ्गोऽपि भवति । निजस्तथागन्तुमपि प्रवृद्ध इति तथा प्रथममुत्पन्नमागन्तुं विकारमभिघातजं ज्वरं भूतजं चोन्मादं पश्चाद्धेतुमासाद्य निजोऽपि तत्र दोषलक्षणलक्षितो भवति । प्रवृद्ध इति वचनेनागन्त्ववस्थायामपि निजदोषो वृद्धोऽस्त्येव परं प्रकर्षेण न भवति स्वलक्षणाकर्तृत्वेनेति दर्शयति । अपिशब्देन निजस्य निजेन आगन्तोरप्यागन्तुनाऽनुबन्धः सूच्यते । एतादृशे च निजागन्त्वोरनुबन्धे यत् कार्यं तदाह—तत्रानुबन्धमित्यादि । अनुबन्धमिति पश्चात्कालजातं, प्रकृतिमिति मूलभूतं, सम्यग्ज्ञात्वा इति बलाबलं निरूप्य, किंवाऽनुबन्धमप्रधानं प्रकृतिमित्यनुबन्ध्यं प्रधानमित्यर्थः । यद्वक्ष्यति—"स्वतन्त्रो व्यक्तलिङ्गः स्वचिकित्साप्रशमश्चानुबन्ध्योऽतो विपरीतस्त्वनुबन्ध" इति ॥७॥

तत्र श्लोकौ—
विंशकाश्चैककाश्चैव त्रिकाश्चोक्तास्त्रयस्त्रयः ।
द्विकाश्चाष्टौ, चतुष्काश्च दश, द्वादश पञ्चकाः ॥८॥
चत्वारश्चाष्टका वर्गाः, षट्कौ द्वौ, सप्तकास्त्रयः ।
अष्टोदरीये रोगाणां रोगाध्याये प्रकाशिताः ॥९॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थानेऽष्टोदरीयो नामोनविंशोऽध्यायः ॥१९॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायामष्टोदरीयः समाप्तः ॥१९॥

विंशोऽध्यायः

अथातो महारोगाध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

रोगचतुष्के पारिशेष्यान्महारोगाध्यायोऽभिधीयते। महांश्चासौ रोगाध्यायश्चेति स तथा। महत्त्वं चास्याध्यायस्य पूर्वाध्यायापेक्षया बहुप्रपञ्चत्वेन न तु महतामसाधारणानां रोगाणामभिधायकोऽध्यायो महारोगाध्यायश्चेति वक्ष्यमाणग्रन्थविरोधात् ॥१-२॥

चत्वारो रोगा भवन्ति—आगन्तुवातपित्तश्लेष्मनिमित्ताः; तेषां चतुर्णामपि रोगाणां रोगत्वमेकविधं भवति, रुक्सामान्यात्; द्विविधा पुनः प्रकृतिरेषाम्, आगन्तुनिजविभागात्; द्विविधं चैषामधिष्ठानं, मनःशरीरविशेषात्; विकाराः पुनरपरिसंख्येयाः, प्रकृत्यधिष्ठानलिङ्गायतनविकल्पविशेषापरिसंख्येयत्वात् ॥३॥

विशेषलक्षणाद्यभिधानार्थं रोगान् विभजते—चत्वार इत्यादि। त्रिशोथीये उक्तस्याप्यागन्तोः पुनरभिधानं विशेषलक्षणाद्यभिधानार्थम्। तत्र सामान्यज्ञानान्तरीयत्वाद्विशेषज्ञानस्य प्रथमं व्याधीनां सामान्यलक्षणमाह—तेषामित्यादि। रुक्सामान्यादिति रुजाकर्तृत्वसामान्यात्। प्रकृतिरिति कारणानुरूपः स्वभावः। आगन्तुग्रहणेन मानसोऽपि कामादिर्गृह्यते। द्विविधं चैषामधिष्ठानमिति—एषामागन्तूनां निजानां च, आगन्तूनामपि मनः शरीरं चाधिष्ठानम्, एवं निजानामपि मनः शरीरं चाधिष्ठानमित्यर्थः। प्रकारान्तरेण रोगाणामपरिसंख्येयतामप्याह—विकाराः पुनरित्यादि। पुनःशब्दः पूर्वोक्तभेदापेक्षया। प्रकृतिः प्रत्यासन्नं कारणं वातादि, अधिष्ठानं दूष्यं, लिङ्गानि लक्षणानि, आयतनानि बाह्यहेतवो दुष्टाहाराचाराः, विकल्पविशेषाणामिति भेदविशेषाणाम्। एषां पुनरसंख्येयत्वं तत्तदवान्तरभेदप्रभेदानामसंख्येयत्वात् ॥३॥

मुखानि तु खल्वागन्तोर्नखदशनपतनाभिचाराभिशापाभिषङ्गाभिघातव्यधबन्धनवेष्टनपीडनरज्जुदहनशस्त्राशनिभूतोपसर्गादीनि, निजस्य तु मुखं वातपित्तश्लेष्मणां वैषम्यम् ॥४॥

मुखानीत्यादौ मुखानि कारणानि ॥४॥

द्वयोस्तु खल्वागन्तुनिजयोः प्रेरणमसात्म्येन्द्रियार्थसंयोगः, प्रज्ञापराधः, परिणामश्चेति ॥५॥

सर्वेऽपि तु खल्वेतेऽभिप्रवृद्धाश्चत्वारो रोगाः परस्परमनुबध्नन्ति, न चान्योन्येन सह सन्देहमापद्यन्ते ॥६॥

एते चागन्तवो दोषजाश्च परस्परं संसृज्यन्त इत्याह—सर्वेऽपीत्यादि। अनुबध्नन्तीत्यनुगच्छन्तीत्यर्थः। ननु यद्येषां[1] परस्परसंसर्गस्तदा संसृष्टयोः क्षीरनीरयोरिव भेदेन ज्ञानं न स्यात्तथा च तद्विशेषज्ञाननिबन्धनश्चिकित्साविशेषोऽपि न सम्भवतीत्यत आह—न चेति। सन्देहमापद्यन्त इति परस्परं मिश्रीभूता अपि न सन्देहविषयतामापद्यन्ते; प्रतिस्वं भिन्नैर्लक्षणैर्भेदेन ज्ञायमानत्वादिति भावः ॥५-६॥

आगन्तुर्हि व्यथापूर्वं समुत्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति; निजे तु वातपित्तश्लेष्माणः पूर्वं वैषम्यमापद्यन्ते जघन्यं व्यथामभिनिर्वर्तयन्ति ॥७॥

अत एवागन्तुनिजयोर्भेदकं लक्षणमाह—आगन्तुर्हीत्यादि। आगन्तुरुत्पन्नः सन् व्यथापूर्वमिति पीडां प्रथमं कृत्वा, पश्चाद्दोषाणां वैषम्यमिति विषमदोषलक्षणमुक्तं वैषम्यमापादयति, स्वलक्षणकारकं तु वैषम्यं आगन्तुरोगेष्वादितो विद्यमानमप्यकिञ्चित्करमिति भावः ॥७॥

तेषां त्रयाणामपि दोषाणां शरीरे स्थानविभाग उपदेक्ष्यते; तद्यथा—बस्तिः पुरीषाधानं कटिः सक्थिनी पादावस्थीनि पक्वाशयश्च वातस्थानानि, तत्रापि पक्वाशयो विशेषेण वातस्थानं; स्वेदो रसो लसीका रुधिरमामाशयश्च पित्तस्थानानि, तत्राप्यामाशयो विशेषेण पित्तस्थानम्; उरः शिरो ग्रीवा पर्वाण्यामाशयो मेदश्च श्लेष्मस्थानानि, तत्राप्युरो विशेषेण श्लेष्मस्थानम् ॥८॥

इदानीम् आगन्तुनिजयोर्भेदेन ज्ञानार्थं लक्षणमभिधाय निजविकारहेतुत्वेनोक्तानामपि वातादीनां भेदेन ज्ञानार्थं स्थानविशेषानाह—तेषामित्यादि। यद्यपि प्राणादिभेदभिन्नस्य वायोः पृथगेव स्थानानि वक्ष्यति; यथा—"स्थानं प्राणस्य शीर्षोरःकण्ठजिह्वास्यनासिकाः।" (चि० २८.६) इत्यादि तथाऽपीदं वैशेषिकं स्थानं (ज्ञेयं), यतोऽत्र प्रायो वातादिविकारा

---

१. यदा येषां[1]

भवन्ति, भूताश्च दुर्जयाः, अत्र च विजिते सर्ववातविकारावजय इति। पुरीषाधानं पक्वाशयः, पित्तस्थानमामाशय इति ॥८॥

सर्वशरीरचरास्तु वातपित्तश्लेष्माणः सर्वस्मिञ्छरीरे कुपिताकुपिताः शुभाशुभानि कुर्वन्ति—प्रकृतिभूताः शुभान्युपचयबलवर्णप्रसादादीनि, अशुभानि पुनर्विकृतिमापन्ना विकारसंज्ञकानि ॥९॥

तत्र विकाराः सामान्यजा नानात्मजाश्च। तत्र सामान्यजाः पूर्वमष्टोदरीये व्याख्याताः, नानात्मजांस्त्विहाध्यायेऽनुव्याख्यास्यामः। तद्यथा—अशीतिर्वातविकाराः, चत्वारिंशत् पित्तविकाराः; विंशतिः श्लेष्मविकाराः ॥१०॥

तत्रादौ वातविकाराननुव्याख्यास्यामः। तद्यथा—नखभेदश्च, विपादिका च, पादशूलं च, पादभ्रंशश्च, पादसुप्तता च, वातखुड्डता च, गुल्फग्रहश्च, पिण्डिकोद्वेष्टनं च, गृध्रसी च, जानुभेदश्च, जानुविश्लेषश्च, ऊरुस्तम्भश्च, ऊरुसादश्च, पाङ्गुल्यं च, गुदभ्रंशश्च, गुदार्तिश्च, वृषणोत्क्षेपश्च, शेफस्तम्भश्च, वङ्क्षणानाहश्च, श्रोणिभेदश्च, विड्भेदश्च, उदावर्तश्च, खञ्जत्वं च, कुब्जत्वं च, वामनत्वं च, त्रिकग्रहश्च; पृष्ठग्रहश्च, पार्श्वावमर्दश्च, उदरावेष्टश्च, हृन्मोहश्च, हृद्द्रवश्च, वक्षउद्धर्षश्च, वक्षउपरोधश्च, वक्षस्तोदश्च, बाहुशोषश्च, ग्रीवास्तम्भश्च, मन्यास्तम्भश्च, कण्ठोद्ध्वंसश्च, हनुभेदश्च, ओष्ठभेदश्च, अक्षिभेदश्च, दन्तभेदश्च, दन्तशैथिल्यं च, मूकत्वं च, वाक्सङ्गश्च, कषायास्यता च, मुखशोषश्च, अगन्धज्ञता च, घ्राणनाशश्च, कर्णशूलं च, अशब्दश्रवणं च, उच्चैःश्रुतिश्च, बाधिर्यं च, वर्त्मस्तम्भश्च, वर्त्मसङ्कोचश्च, तिमिरं च, अक्षिशूलं च, अक्षिव्युदासश्च, भ्रूव्युदासश्च, शङ्खभेदश्च, ललाटभेदश्च, शिरोरुक् च, केशभूमिस्फुटनं च, अर्दितं च, एकाङ्गरोगश्च, सर्वाङ्गरोगश्च, पक्षवधश्च, आक्षेपकश्च, दण्डकश्च, तमश्च, भ्रमश्च; वेपथुश्च, जृम्भा च, हिक्का च, विषादश्च, अतिप्रलापश्च, रौक्ष्यं च, पारुष्यं च, श्यावारुणावभासता च, अस्वप्नश्च, अनवस्थितचित्तत्वं च; इत्यशीतिर्वातविकारा वातविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याताः ॥११॥

(सामान्यजा इति) ये वातादिभिः प्रत्येकं मिलितैश्च जन्यन्ते, नानात्मजा इति ये वातादिभिर्दोषान्तरासम्पृक्तैर्जन्यन्ते। विपादिका पाणिपाद-

स्फुटनं, पादभ्रंश इति पादस्यारोपविषयदेशादन्यत्र पतनं, पादसुप्तिः पादयोर्निष्क्रियत्वं स्पर्शाज्ञता वा, वातखुड्डुता तालका' इति प्रसिद्धा, अन्ये तु खिराइ इति प्रसिद्धेत्याहुः; गृध्रसीशब्देन गृध्रसीशूलं गृह्यते, एवं (ऊरुस्तम्भेन) ऊरुस्तम्भनमात्रं वातजन्यत्वेन गृह्यते, वृषणोत्क्षेप इति वृषणयोः स्वस्थानादूर्ध्वगमनं; विड्भेदः पुरीषातिसरणं, वातजातिसारेऽपि पुरीषातिसरणं स्पष्टमेव 'वायुनाऽधः प्रणुन्नः' (मा० नि० ३.४) इति वचनात्; उदरस्यावेष्टनमिव वेदना उदरावेष्टः, हृद्द्रवो हृदये धुगधुगिति वेदना, मूकत्वमवचनता, अगन्ध(ज्ञ)तेत्यत्र नञीषदर्थे, घ्राणनाशस्तु सर्वथा घ्राणेन्द्रियोपघातः, कर्णशूलमिति अत्रापि शूलमात्रं वातजं, एवमक्षिशूलमित्यत्र वक्ष्यमाणेऽपि ज्ञेयम्। अशब्दश्रवणमिति शब्दाभावेऽपि शब्दश्रवणं, उच्चैःश्रुतिरिति तारस्वरमात्रश्रवणं, अल्पशब्दस्य तु सर्वथैवाश्रवणं; तिमिरन्तु वातजमेव, दोषान्तरसम्बन्धस्त्वत्रानुबन्धरूपः। एकाङ्गरोगः सर्वाङ्गरोगश्चेति—ज्वरादिषु उष्णत्वशीतत्वादीनां कदाचिदेकाङ्गव्यापकत्वमेकाङ्गरोगः, तेषामेव कदाचित् सर्वाङ्गव्यापकत्वं सर्वाङ्गरोगः; अन्यदोषसम्बन्धेऽपि व्याप्त्यव्याप्ती वातकृते एव, "वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत्।" इति वचनात्। भ्रमः स्मृतिसम्मोहः, विषादोऽनुत्साहः, ग्लानिः कार्श्यम्। अत्र कस्यचिदङ्गस्य पादादेः शूलादयोऽभिहिताः न हस्तादीनां, तत्र ये अभिहिताः ते प्रायोभावित्वेन प्रधानभूता अनुक्तास्तु वातविकाराणामपरिसंख्येयत्वेन ग्राह्याः ॥९-११॥

सर्वेष्वपि खल्वेतेषु वातविकारेषूक्तेष्वन्येषु चानुक्तेषु वायोरिदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं, यदुपलभ्य तदवयवं वा विमुक्तसन्देहा वातविकारमेवाध्यवस्यन्ति कुशलाः; तद्यथा—रौक्ष्यं शैत्यं लाघवं वैशद्यं गतिरमूर्तत्वमनवस्थितत्वं चेति वायोरात्मरूपाणि; एवंविधत्वाच्च वायोः कर्मणः स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः; तद्यथा—स्रंसभ्रंसव्यासङ्गभेदसादहर्षतर्षकम्पवर्तचालतोदव्यथाचेष्टादीनि, तथा खरपरुषविशदशुषिरारुणवर्णकषायविरसमुखत्वशोषशूलसुप्तिसङ्कोचनस्तम्भनखञ्जतादीनि च वायोः कर्माणि; तैरन्वितं वातविकारमेवाध्यवस्येत् ॥१२॥

इदानीमनुक्तवातविकार(ज्ञाना)र्थं वायोः सहजसिद्धं स्वरूपं तथा

---

१. चालुक[1]

विकृतवायुजन्यकर्मणः स्वरूपं निर्देष्टुं भूमिकां रचयति—सर्वेष्वित्यादि । इदमिति तद्यथेत्यादिना वक्ष्यमाणं, आत्मरूपमिति स्वरूपं, अपरिणामीति सहजसिद्धं नान्योपाधिकृतमित्यर्थः । कर्मणश्चेत्यनन्तरमपि इदमिति सम्बध्यते, विकृतवायोः कर्मण इदं, स्वलक्षणमिति स्वरूपं, अत्रापि अपरिणामीति सम्बध्यते पित्तकफसम्बन्धनिरपेक्षमित्यर्थः । यदुपलभ्य तदवयवं वेति—यद्वायोः स्वरूपं, यच्च वायोः कर्मस्वलक्षणं; तदवयवमिति वायोः स्वरूपस्य, लक्षणस्य कर्मणश्चैकदेशम्वा उपलभ्य ज्ञात्वा वातविकारत्वेन निश्चिन्वन्तीत्यर्थः । अथ किं तद्वायोः कर्म वायुलक्षणं च यदुपलभ्य वातविकारनिर्णयः कार्य इत्यतस्तद्दर्शयति—तद्यथेति । अमूर्तत्वमसंहतावयवत्वमदृश्यत्वम्वा । कथमेतानि वायो आत्मरूपाणीत्यत्र हेतुमाह—एवंविधत्वादिति रौक्ष्यादियुक्तत्वादित्यर्थः । कर्मणश्च स्वलक्षणमिति स्रंसत्वादि । ननु वायो(रदृश्यत्वेन तत्र रौक्ष्यादयो गुणास्तथा वक्ष्यमाणस्रंसादीनि च कर्माणि प्रत्यक्षेण नोपलभ्यन्ते, तत् कथमेतानि वायोरात्मरूपाणि ?) इत्यत आह—तं तं शरीरावयवमाविशत इति । एतेन यद्यपि वायोरेते गुणास्तथा एतानि च कर्माणि प्रत्यक्षेण नोपलभ्यन्ते तथाऽपि यं यं शरीरावयवमाविशति विकृतो वायुः तत्र तत्र रौक्ष्यादिकं स्रंसादिकं च दृष्ट्वा वायोरपि तद्गुणकर्मयोगित्वमवधार्यते, तत्तदवयवगतरौक्ष्यादीनां विकृतवायुसम्बन्धान्वयव्यतिरेकाधिष्ठानादिति भावः । स्रंसः किञ्चित्स्वस्थानाच्चलनं, भ्रंसो दूरगतिः, व्यासो विस्तारः, व्यासङ्ग इत्यपि पाठः, हर्षो वायोरनवस्थिततत्वेन प्रभावात् (वा) क्रियते । वर्तो वर्तुलीकरणं, चालः स्पन्दः ॥१२॥

तं मधुराम्ललवणस्निग्धोष्णैरुपक्रमैरुपक्रमेत, स्नेहस्वेदास्थापनानुवासननस्तःकर्मभोजनाभ्यङ्गोत्सादनपरिषेकादिभिर्वातहरैर्मात्रां कालं च प्रमाणीकृत्य; तत्रास्थापनानुवासनं तु खलु सर्वत्रोपक्रमेभ्यो वाते प्रधानतमं मन्यन्ते भिषजः, तद्ध्यादित एव पक्वाशयमनुप्रविश्य केवलं वैकारिकं वातमूलं छिनत्ति; तत्रावजितेऽपि वाते शरीरान्तर्गता वातविकाराः प्रशान्तिमापद्यन्ते, यथा वनस्पतेर्मूले छिन्ने स्कन्धशाखाप्ररोहकुसुमफलपलाशादीनां नियतो विनाशस्तद्वत् ॥१३॥

वातविकारप्रसङ्गात् तच्चिकित्सामिहैव सूत्रयति—तं मधुराम्ललवणेत्यादि । आदित एवेति तत्कालमेवेत्यर्थः । केवलं समग्रं, वैकारिकमिति विकारकरं, तत्रेति पक्वाशये ॥१३॥

पित्तविकारांश्चत्वारिंशतमत ऊर्ध्वमनुव्याख्यास्यामः—ओषश्च, प्लोषश्च, दाहश्च, दवथुश्च, धूमकश्च, अम्लकश्च, विदाहश्च, अन्तर्दाहश्च, अङ्गदाहश्च[1], ऊष्माधिक्यं च, अतिस्वेदश्च (अङ्गस्वेदश्च), अङ्गगन्धश्च, अङ्गावदरणं च, शोणितक्लेदश्च, मांसक्लेदश्च, त्वग्दाहश्च, (मांसदाहश्च), त्वगवदरणं च, चर्मावदरणं च, रक्तकोठश्च, रक्तविस्फोटश्च, रक्तपित्तं च, रक्तमण्डलानि च, हरितत्वं च, हारिद्रत्वं च, नीलिका च, कक्षा(क्ष्या) च, कामला च, तिक्तास्यता च, लोहितगन्धास्यता च, पूतिमुखता च, तृष्णाधिक्यं च, अतृप्तिश्च, आस्यविपाकश्च, गलपाकश्च, अक्षिपाकश्च, गुदपाकश्च, मेढ्रपाकश्च, जीवादानं च, तमःप्रवेशश्च, हरितहारिद्रनेत्रमूत्रवर्चस्त्वं च; इति चत्वारिंशत्पित्तविकाराः पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याताः ॥१४॥

सर्वेष्वपि खल्वेतेषु पित्तविकारेषूक्तेष्वन्येषु चानुक्तेषु पित्तस्येदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं, यदुपलभ्य तदवयवं वा विमुक्तसन्देहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः; तद्यथा—औष्ण्यं तैक्ष्ण्यं द्रवत्वमनतिस्नेहो वर्णश्च शुक्लारुणवर्जो गन्धश्च विस्रो रसौ च कटुकाम्लौ सरत्वं च पित्तस्यात्मरूपाणि; एवंविधत्वाच्च पित्तस्य कर्मणः स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः; तद्यथा—दाहौष्ण्यपाकस्वेदक्लेदकोथकण्डूस्रावरागा यथास्वं च गन्धवर्णरसाभिनिर्वर्तनं पित्तस्य कर्माणि; तैरन्वितं पित्तविकारमेवाध्यवस्येत् ॥१५॥

तं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत स्नेहविरेकप्रदेहपरिषेकाभ्यङ्गादिभिः पित्तहरैर्मात्रां कालं च प्रमाणीकृत्य; विरेचनं तु सर्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः; तद्ध्यादित एवामाशयमनुप्रविश्य केवलं वैकारिकं पित्तमूलमपकर्षति, तत्रावजिते पित्तेऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्तिमापद्यन्ते, यथाऽग्नौ व्यपोढे केवलमग्निगृहं शीतीभवति तद्वत् ॥१६॥

पित्तविकारेषु ओष इति पार्श्वस्थितेनेव वह्निना पीडा। प्लोषः किञ्चिद्दहनमिव। दाहः सर्वाङ्गदहनमिव। दवथुः धकधकिकेति लोके ख्याता। धूमकः धूमोद्गमनमिव। अम्लको अम्लोद्गारः। विदाहो विदग्धताऽन्नादेः। अन्तर्दाह इत्यत्र बहिः शीताङ्गस्येति भावः। अङ्गदाह इति

१. अंसदाहश्च (च० नि०)

हस्तपादाद्यन्यतमावयवदाहः। ऊष्माधिक्यमिति अन्यदोषकृतेऽपि ज्वरादौ ऊष्माधिक्यं पित्तकृतमेव। त्वग्दाह इति अग्निदग्धेव त्वग्भवति। त्वगवदरणमिति वाह्यत्वङ्मात्रदरणम्, चर्मावदरणमिति षण्णामपि त्वचामवदरणम्। रक्तपित्तं दोषान्तरासम्भूतं रक्तपित्तं पैत्तिकमेव ज्ञेयम्। एवं वक्ष्यमाणं तृष्णायां (तृष्णाधिक्यं ?) च तृष्णामात्रम्। कक्षा इति कक्षदेशगतमांसदारणाः स्फोटाः सुश्रुतक्षुद्ररोगोक्ताः। जोवादानमिति जीवनहेतुधातुस्वरूपशोणितनिर्गमः। गन्धश्च विस्र इत्यामगन्ध इत्यर्थः। अत्रापि तं तं शरीरावयवमाविशत इत्यनेन तेषु तेषु शरीरावयवेषु विकृतपित्तसम्बन्धेन औष्ण्यादिकं दृष्ट्वा पित्तस्यौष्ण्यादिकं स्वलक्षणमिति निर्णेतव्यमिति सूचयति। एवं वक्ष्यमाणेऽपि व्याख्येयम्। कोथः पूतित्वं, यथास्वं गन्धवर्णरसाभिनिर्वर्त्तनमिति यथोक्तविस्रगन्धाद्यभिनिर्वर्तनमित्यर्थः। अग्निमद्गृहम् अग्निगृहम् ॥१४-१६॥

श्लेष्मविकारांश्च विंशतिमत ऊर्ध्वं व्याख्यास्यामः; तद्यथा—तृप्तिश्च, तन्द्रा च, निद्राधिक्यं च, स्तैमित्यं च, गुरुगात्रता च, आलस्यं च, मुखमाधुर्यं च, मुखस्रावश्च, श्लेष्मोद्गिरणं च, मलस्याधिक्यं च, बलासकश्च, अपक्तिश्च, हृदयोपलेपश्च, कण्ठोपलेपश्च, धमनीप्रतिचयश्च, गलगण्डश्च, अतिस्थौल्यं च, शीताग्निता च, उदर्दश्च, श्वेतावभासता च, श्वेतमूत्रनेत्रवर्चस्त्वं च; इति विंशतिः श्लेष्मविकाराः श्लेष्मविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवन्ति ॥१७॥

सर्वेष्वपि खल्वेतेषु श्लेष्मविकारेषूक्तेष्वन्येषु चानुक्तेषु श्लेष्मण इदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं यदुपलभ्य तदवयवं वा विमुक्तसन्देहाः श्लेष्मविकारमेवाध्यवस्यन्ति कुशलाः; तद्यथा—स्नेहशैत्यशौक्ल्यगौरवमाधुर्यस्थैर्यपैच्छिल्यमात्स्न्र्यानि श्लेष्मण आत्मरूपाणि; एवंविधत्वाच्च श्लेष्मणः कर्मणः स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः; तद्यथा—श्वैत्यशैत्यकण्डूस्थैर्यगौरवस्नेहसुप्तिक्लेदोपदेहबन्धमाधुर्यचिरकारित्वानि श्लेष्मणः कर्माणि; तैरन्वितं श्लेष्मविकारमेवाध्यवस्येत् ॥१८॥

तं कटुकतिक्तकषायतीक्ष्णोष्णरूक्षैरुपक्रमैरुपक्रमेत स्वेदवमनशिरोविरेचनव्यायामादिभिः श्लेष्महरैर्मात्रां कालं च प्रमाणीकृत्य; वमनं तु सर्वोपक्रमेभ्यः श्लेष्मणि प्रधानतमं मन्यन्ते भिषजः, तद्ध्यादित एवामाशयमनुप्रविश्योरोगतं केवलं वैकारिकं श्लेष्ममूलमूर्ध्वमुत्क्षिपति, तत्रावजिते

श्लेष्मण्यपि शरीरान्तर्गताः श्लेष्मविकाराः प्रशान्तिमापद्यन्ते, यथा भिन्ने केदारसेतौ शालियवषष्टिकादीन्यनभिष्यन्द्यमानान्यम्भसा प्रशोषमापद्यन्ते तद्वदिति ॥१९॥

श्लेष्मविकारे तृप्तिरिति अन्नपानाकांक्षानिवृत्तिः। बलासको बलक्षयः, अन्ये तु श्लैष्मिको वातबलासकाख्यो ज्वरो बलासक इत्याचक्षते। धमनीप्रतिचयो धमन्युपलेपः। शीताग्नितेति शीत इव शीतो मन्द इत्यर्थः तेन मन्दाग्नितेत्यर्थः। मात्स्न्यं मसृणता। श्लेष्मकर्मसु सुप्तिर्निष्क्रियत्वम्। अत्रामाशायमनुप्रविश्येति वचनेन श्लेष्मस्थानेषु उरस इव आमाशयस्यापि प्राधान्यमावेदयति ॥१७-१९॥

भवन्ति चात्र—

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्।
ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् ॥२०॥

यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक्।
अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया ॥२१॥

यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः।
देशकालप्रमाणज्ञस्तस्य सिद्धिरसंशयम् ॥२२॥

इदानीं रोगे ज्ञातेऽपि येन क्रमेण चिकित्सा कर्तव्या तं क्रमं दर्शयति—रोगमादावित्यादि। परिक्षेतेत्यस्य औषधमित्यनेनापि सम्बन्धः। ज्ञानपूर्वमिति कर्मदर्शनजनितज्ञानपूर्वं, कर्मेति चिकित्सितं; एतेन रोगपरीक्षानन्तरमिदमौषधं यौगिकं भवति न वेत्यौषधपरीक्षा, तदनन्तरं वृद्धवैद्यक्रियमाणकर्मदर्शनं, (ततः) चिकित्सिताचरणमिति क्रमो दर्शितः ॥२०-२२॥

तत्र श्लोकाः—

संग्रहः प्रकृतिर्देशो विकारमुखमीरणम्।
असन्देहोऽनुबन्धश्च रोगाणां संप्रकाशितः ॥२३॥

दोषस्थानानि रोगाणां गणा नानात्मजाश्च ये।
रूपं पृथक् च दोषाणां कर्म चापरिणामि यत् ॥२४॥

पृथक्त्वेन च दोषाणां निर्दिष्टाः समुपक्रमाः।
सम्यङ्महति रोगाणामध्याये तत्त्वदर्शिना ॥२५॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने महारोगाध्यायो नाम विंशोऽध्यायः ॥२०॥

समाप्तो रोगचतुष्कः ॥५॥

अध्यायार्थसङ्ग्रहे सङ्ग्रह इति चत्वारो रोगा इत्यादिसंक्षेपोक्तिः। प्रकृतिरिति द्विधा पुनः प्रकृतिरेषामित्यादि, देश इति द्विविधं चैषामधिष्ठानमित्यादि, विकाराश्च मुखं च विकारमुखं, तत्र विकाराः पुनरित्यादिना विकाराः, मुखानि त्वित्यादिना मुखं, द्वयोस्त्वित्यादिना ईरणं, असन्देहो 'न चान्योन्य' इत्यादिना, अनुबन्ध इति वातादिविकारनिश्चयः स च सर्वेष्वपि वातविकारेष्वित्यादिना, नानात्मजा इति दोषान्तरासम्पृक्तदोषजन्या उक्ताः ॥२३-२५॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां महारोगाध्यायः समाप्तः ॥२०॥

॥ समाप्तश्च रोगचतुष्कः ॥

एकविंशोऽध्यायः

अथातोऽष्टौनिन्दितीयमध्यायं व्याख्यास्यामः ॥१॥
इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वाध्याये रोगभेषजयोजना उक्ता अतस्तद्वर्णनार्थं योजनाचतुष्केऽभिधातव्ये योजनायाः शरीरापेक्षत्वेन शरीरभेदप्रतिपादकमष्टौनिन्दितीयमाह ॥१-२॥

इह खलु शरीरमधिकृत्याष्टौ पुरुषा निन्दिता भवन्ति; तद्यथा—अतिदीर्घश्च, अतिह्रस्वश्च, अतिलोमा च, अलोमा च, अतिकृष्णश्च, अतिगौरश्च, अतिस्थूलश्च, अतिकृशश्चेति ॥३॥

इह खल्वित्यादि। शरीरमधिकृत्येत्यनेन मनोऽधिकृत्य ये निन्दिता अधार्मिकादयस्तानिहानुपयुक्तान्निराकरोति। यद्यप्यतिदीर्घादिषट्काभिधानं न चिकित्सोपयोगि तथाऽपि निन्दितप्रस्तावादिहोच्यते। एषां च निन्दितत्वे वैरूप्यमेव हेतुः। प्रत्येकं चकारकरणमेषां परस्परसाङ्कर्येऽतिशयितनिन्दितत्वं बोधयति, तेनातिदीर्घोऽतिह्रस्वो वा पुरुषो यद्यतिलोमादिर्भवति तदा विशेषान्निन्दितो भवतीत्यर्थः ॥३॥

तत्रातिस्थूलकृशयोर्भूय एवापरे निन्दितविशेषा भवन्ति। अतिस्थूलस्य तावदायुषो ह्रासो जवोपरोधः कृच्छ्रव्यवायता दौर्बल्यं दौर्गन्ध्यं स्वेदाबाधः क्षुदतिमात्रं पिपासातियोगश्चेति भवन्त्यष्टौ दोषाः। तदतिस्थौल्यमतिसंपूरणाद्गुरुमधुरशीतस्निग्धोपयोगादव्यायामादव्यवायाद्दिवास्वप्नाद्धर्षनित्यत्वादचिन्तनाद्बीजस्वभावाच्चोपजायते। तस्य ह्यतिमात्रमेदस्विनो मेद एवोपचीयते न तथेतरे धातवः, तस्मादस्यायुषो ह्रासः; शैथिल्यात् सौकुमार्याद्गुरुत्वाच्च मेदसो जवोपरोधः, शुक्राबहुत्वान्मेदसाऽऽवृतमार्गत्वाच्च कृच्छ्रव्यवायता, दौर्बल्यमसमत्वाद्धातूनां, दौर्गन्ध्यं मेदोदोषान्मेदसः स्वभावात् स्वेदनत्वाच्च, मेदसः श्लेष्मसंसर्गाद्विष्यन्दित्वाद्बहुत्वाद्गुरुत्वाद्व्यायामासहत्वाच्च स्वेदाबाधः, तीक्ष्णाग्नित्वात् प्रभूतकोष्ठवायुत्वाच्च क्षुदतिमात्रं पिपासातियोगश्चेति ॥४॥

तत्रातिस्थूलकृशयोश्चिकित्सोपयुक्तं विशेषं वक्तुमाह—तत्रेत्यादि। भूय एवेति अतिदीर्घादितुल्यलोकविगानादप्यधिकाः। निन्दिताश्च ते विशेषाश्चेति निन्दितविशेषाः। अतिस्थौल्यहेतुमाह—तदतिस्थौल्यमित्यादि। अतिसम्पूरणमतिभोजनं, बीजस्वभावादिति स्थूलपितृमातृजन्यत्वात्। इदानीमतिस्थूलस्यायुषो ह्रास इत्यादि यदुक्तं तत्र हेतुमुपन्यस्योपपादयति—तस्येत्यादि। मेदस्विन इति हेतुगर्भविशेषणं; तेन यस्मादतिस्थूलशरीरे मेद एव देहव्यापकत्वेन लब्धवृत्ति, अतस्तदेव प्रायो वर्धते नत्वन्ये रसादयस्तदभिभूतत्वादित्यर्थः। अन्यत्राप्युक्तं—"मेदसावृतमार्गत्वात् पुष्यन्त्यन्ये न धातवः।" इति। तस्मादिति विषमधातुत्वात्। मेदोदोषादिति—दुष्टं हि मेदो दुर्गन्धं भवति। स्वभावादिति--स्वभावादपि मेद आमगन्धित्वेन दुर्गन्धम्। स्वेदनत्वाच्चेति–सति स्वेदे दुर्गन्धताऽनुभवसिद्धैवेत्यर्थः। स्वेदाबाधेऽप्युपपत्तिमाह—श्लेष्मसंसर्गादित्यादि ॥४॥

भवन्ति चात्र—

मेदसाऽऽवृतमार्गत्वाद्वायुः कोष्ठे विशेषतः।
चरन् संधुक्षयत्यग्निमाहारं शोषयत्यपि ॥५॥

तस्मात् स शीघ्रं जरयत्याहारं चातिकाङ्क्षति।
विकारांश्चाश्नुते घोरान् कांश्चित्कालव्यतिक्रमात् ॥६॥

एतावुपद्रवकरौ विशेषादग्निमारुतौ।
एतौ हि दहतः स्थूलं वनदावो वनं यथा ॥७॥

मेदस्यतीव संवृद्धे सहसैवानिलादयः।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितम् ॥८॥

मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥९॥

इति मेदस्विनो दोषा हेतवो रूपमेव च।
निर्दिष्टं,

मेदस्विनस्तीक्ष्णाग्नित्वे वायुवृद्धौ च उपपत्तिं दर्शयति—मेदसेत्यादि। आवृतमार्गत्वादिति—मेदोरुद्धमार्गत्वात् कुम्भकारपवनपङ्कलेपन्यायेनानतिवृद्धो वायुरग्निं दीपयति, न तु अग्निवैषम्यं जनयति, अतिवृद्धस्यैव वायोरग्निवैषम्यजनकत्वात्। स इति मेदस्वी। विकारान् वातविकाराणामन्यतमान्। कालव्यतिक्रमादिति भोजनकालव्यतिक्रमात्। विकारान्

दारुणानिति प्रमेहपिडकाज्वरभगन्दरविद्रधिवातरोगाणामन्यतमान्। अतिस्थूललक्षणमाह—मेदोमांसेत्यादि। अयथोपचयोत्साह इति शरीरोपचयानुरूपबलरहित इत्यर्थः। उपसंहरति—इतीत्यादि। निर्दिष्टमिति छेदः ॥५-९॥—

वक्ष्यते वाच्यमतिकार्श्यं त्वतः परम् ॥१०॥

सेवा रूक्षान्नपानानां लङ्घनं प्रमिताशनम्।
क्रियातियोगः शोकश्च वेगनिद्राविनिग्रहः ॥११॥

रूक्षस्योद्वर्तनं स्नानस्याभ्यासः प्रकृतिर्जरा।
विकारानुशयः क्रोधः कुर्वन्त्यतिकृशं नरम् ॥१२॥

व्यायाममतिसौहित्यं क्षुत्पिपासामयौषधम्।
कृशो न सहते तद्वदतिशीतोष्णमैथुनम् ॥१३॥

प्लीहा कासः क्षयः श्वासो गुल्मोऽर्शांस्युदराणि च।
कृशं प्रायोऽभिधावन्ति रोगाश्च ग्रहणीगताः ॥१४॥

शुष्कस्फिगुदरग्रीवो धमनीजालसन्ततः।
त्वगस्थिशेषोऽतिकृशः स्थूलपर्वा नरो मतः ॥१५॥

वाच्यमिति हेत्वादिस्वरूपमभिधेयम्, अन्ये तु वाच्यमिति निन्दितमित्याहुः। तत्रातिकार्श्यहेतुमाह—सेवेत्यादि। प्रमिताशनमल्पाहारः। क्रियातियोगो वमनाद्यतियोगः। प्रकृतिरिति वातदुष्टदेहजनकं (बीजम्)। अनुशयोऽनुबन्धः। कृशे ये दोषास्तानाह—व्यायाममित्यादि। अतिकृशलक्षणमाह—शुष्केत्यादि ॥१०-१५॥

सततं व्याधितावेतावतिस्थूलकृशौ नरौ।
सततं चोपचर्यौ हि कर्शनैर्बृंहणैरपि ॥१६॥

स्थौल्यकार्श्ये वरं कार्श्यं समोपकरणौ हि तौ।
यद्युभौ व्याधिरागच्छेत् स्थूलमेवातिपीडयेत् ॥१७॥

कर्शनैः स्थूल उपचर्यो बृंहणै(श्च कृशः। वरमिति) स्थौल्यकार्श्ययोर्मध्ये कार्श्यं वरं मनागिष्टमित्यर्थः। अत्र हेतुमाह—हि यस्मात्तौ स्थूलकृशौ यदि व्याधिरायाति तदा स्थूलमेवाति पीडयेत्, स्थूलस्य दुरुपक्रमत्वात्। यतः स्थूलस्य सन्तर्पणमतिस्थौल्यकरं, अपतर्पणं चायं प्रवृद्धाग्निः सोढुमक्षम इति; दुर्बले तु सन्तर्पणं योग्यमेवेति भावः। समोपकरणाविति—

सममुपकरणं चिकित्साविधानं ययोस्तौ, तथा चिकित्स्यत्वेन तुल्यावपीत्यर्थः; किंवा समं समशरीरजनकमुपकरणमौषधं ययोरित्यर्थः ॥१६-१७॥

सममांसप्रमाणस्तु समसंहननो नरः ।
दृढेन्द्रियो विकाराणां न बलेनाभिभूयते ॥१८॥

क्षुत्पिपासातपसहः शीतव्यायामसंसहः ।
समपक्ता समजरः सममांसचयो मतः ॥१९॥

किं तत्समशरीरलक्षणमित्याह—सममांसेत्यादि । मांसशब्देनेह उपचयो विवक्षितः, तेन समुचितमुपचयप्रमाणं यस्य तथा । समसंहनन इति समशरीरः नातिदीर्घो नातिह्रस्व इत्यर्थः । अपरानपि सममांसप्रमाणस्य पुंसो गुणानाह—क्षुत्पिपासेत्यादि । सममांसचयेन च इदंगुणो भवतीत्यन्वयः ॥१८-१९॥

गुरु चातर्पणं चेष्टं स्थूलानां कर्शनं प्रति ।
कृशानां बृंहणार्थं च लघु संतर्पणं च यत् ॥२०॥

इदानीं स्थूलकृशयोर्भेषजयोजनामाह—गुरु चेत्यादि । गुरु चातर्पणमिति यथा मधु, एतद्धि गुरुत्वाद्वृद्धमग्निं यापयति, अपतर्पणत्वाच्च मेदो हन्ति । यत्तु वृष्यप्रयोगेषु मधुयोगो दृश्यते तन्मधुनो योगवाहित्वादिति । चकाराल्लघु चातर्पणं यत् प्रशातिकादि तदपि स्थूलानां देयं केवलं तत्र संस्कारादिना यु(क्त्या) गुरुत्वं विधेयमिति भावः । लघु सन्तर्पणमिति रक्तशाल्यादि अत्रापि चकाराद्गुरु सन्तर्पणं यवान्नादि तदपि कृशानां कर्तव्यं केवलं संस्कारेण गुरुत्वं प्रतिकर्तव्यमिति भावः । अन्ये तु गुरु चेत्यत्र चकारात् जागरणव्यायामचिन्तादेर्ग्रहणं तथा लघु चेति चकारादचिन्तननिद्रादेर्ग्रहणमाहुः ॥२०॥

वातघ्नान्यन्नपानानि श्लेष्ममेदोहराणि च ।
रूक्षोष्णा बस्तयस्तीक्ष्णा रूक्षाण्युद्वर्तनानि च ॥२१॥

गुडूचीभद्रमुस्तानां प्रयोगस्त्रैफलस्तथा ।
तक्रारिष्टप्रयोगश्च प्रयोगो माक्षिकस्य च ॥२२॥

विडङ्गं नागरं क्षारः काललोहरजो मधु ।
यवामलकचूर्णं च प्रयोगः श्रेष्ठ उच्यते ॥२३॥

बिल्वादिपञ्चमूलस्य प्रयोगः क्षौद्रसंयुतः ।
शिलाजतुप्रयोगश्च साग्निमन्थरसः परः ॥२४॥

प्रशातिका प्रियङ्गुश्च श्यामाका यवका यवाः ।
जूर्णाह्वाः कोद्रवा मुद्गाः कुलत्थाश्चक्रमुद्गकाः ॥२५॥

आढकीनां च बीजानि पटोलामलकैः सह ।
भोजनार्थं प्रयोज्यानि पानं चानु मधूदकम् ॥२६॥

अरिष्टांश्चानुपानार्थे मेदोमांसकफापहान् ।
अतिस्थौल्यविनाशाय संविभज्य प्रयोजयेत् ॥२७॥

प्रजागरं व्यवायं च व्यायामं चिन्तनानि च ।
स्थौल्यमिच्छन् परित्यक्तुं क्रमेणाभिप्रवर्धयेत् ॥२८॥

विडङ्गमित्यादि। क्षारो यवक्षारः, काललोहो वज्रादिलौहः, तस्य रजो मारणपुटादिनिःसृतम् । मारणपुटादिविधानं च नागार्जुनादितन्त्रेऽनुसर्त्तव्यम् । मधु पुनरत्रावलेहोचितं देयमित्याहुः । शिलाजतुप्रयोगश्चेति—अग्निमन्थरसोऽग्निमन्थक्वाथः, शिलाजतु पुनरत्र प्रक्षेप्यम् । प्रशातिका ओडी धान्यम् । यवकाः स्वल्पयवाः । जूर्णस्तृणधान्यविशेषो दक्षिणापथे जोन(ल)क इति प्रसिद्ध इत्यरुणः । चक्रमुद्गः ऋषिमुद्ग इति प्रसिद्धः । आढकी तुवरी । संविभज्येति मात्रादिविभागं कृत्वा ॥२१-२८॥

स्वप्नो हर्षः सुखा शय्या मनसो निर्वृतिः शमः ।
चिन्ताव्यवायव्यायामविरामः प्रियदर्शनम् ॥२९॥

नवान्नानि नवं मद्यं ग्राम्यानूपौदका रसाः ।
संस्कृतानि च मांसानि दधि सर्पिः पयांसि च ॥३०॥

इक्षवः शालयो माषा गोधूमा गुडवैकृतम् ।
बस्तयः स्निग्धमधुरास्तैलाभ्यङ्गश्च सर्वदा ॥३१॥

स्निग्धमुद्वर्तनं स्नानं गन्धमाल्यनिषेवणम् ।
शुक्लं वासो यथाकालं दोषाणामवसेचनम् ॥३२॥

रसायनानां वृष्याणां योगानामुपसेवनम् ।
हत्वाऽतिकार्श्यमाधत्ते नृणामुपचयं परम् ॥३३॥

अचिन्तनाच्च कार्याणां ध्रुवं संतर्पणेन च ।
स्वप्नप्रसङ्गाच्च नरो वराह इव पुष्यति ॥३४॥

कार्श्यचिकित्सामाह—स्वप्न इत्यादि । शमः शान्तिः । प्रकृष्टबृंहणकारणमाह—अचिन्तनाच्चेत्यादि । यद्यपि चिन्ताविरतिः पूर्वमुक्ता तथाऽपि

प्रकर्षेण बृंहणकारणमचिन्तनमित्येतदर्थं पुनरभिधानं ज्ञेयम्। स्वप्नप्रसङ्गादिति निद्रायाः सततसेवनात् ॥२९-३४॥

यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः।
विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः ॥३५॥

इदानीं प्रसङ्गागतस्य स्वप्नस्योत्पत्तिप्रकारमाह—यदा त्वित्यादि। क्लान्त इति निष्क्रिये इन्द्रियान्तरसञ्चाररहिते, कर्मशब्देन विषयग्रहणरूपं कर्मोच्यते तेनाविषयग्राहकानीन्द्रियाणीत्यर्थः। क्लमान्विता इति स्वस्वविषयग्रहणानुकूलव्यापाररहिताः, विषयेभ्य इति रूपादिभ्यः ॥३५॥

निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम्।
वृषता क्लीबता ज्ञानमज्ञानं जीवितं न च ॥३६॥

अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता।
सुखायुषी पराकुर्यात् कालरात्रिरिवापरा ॥३७॥

सैव युक्ता पुनर्युङ्क्ते निद्रा देहं सुखायुषा।
पुरुषं योगिनं सिद्धया सत्या बुद्धिरिवागता ॥३८॥

इदानीं विधिसेवितनिद्रायाः गुणमविधिसेवितायाश्च दोषमाह—निद्रायत्तमित्यादि। अत्र विधिसेवितनिद्रायाः सुखादि फलम्, अविधिसेवितायाश्च दुःखादीत्यर्थः। जीवितं न चेति–जीवितं निद्रायत्तं, तथा च न (जीवितं) जीविताभावः सोऽपि निद्रायत्त इत्यन्वयः। कथमेकस्या एव निद्रायाः सुखदुःखादिविरुद्धकार्यद्वयमित्यतो विशेषमाह—अकाल इत्यादि। अकाल इत्यनुचितकाले दिनादौ, एतेन निद्राया मिथ्यायोगोऽप्युक्तः। कालरात्रिः कालोषा। युक्तेति सम्यग्योगयुक्ता। सत्या बुद्धिः शुद्धज्ञानम् ॥३६-३८॥

गीताध्ययनमद्यस्त्रीकर्मभाराध्वकर्शिताः।
अजीर्णिनः क्षताः क्षीणा वृद्धा बालास्तथाऽबलाः ॥३९॥

तृष्णातीसारशूलार्ताः श्वासिनो हिक्किनः कृशाः।
पतिताभिहतोन्मत्ताः क्लान्ता यानप्रजागरैः ॥४०॥

क्रोधशोकभयक्लान्ता दिवास्वप्नोचिताश्च ये।
सर्व एते दिवास्वप्नं सेवेरन् सार्वकालिकम् ॥४१॥

धातुसाम्यं तथा ह्येषां बलं चाप्युपजायते।
श्लेष्मा पुष्णाति चाङ्गानि स्थैर्यं भवति चायुषः ॥४२॥

ग्रीष्मे त्वादानरूक्षाणां वर्धमाने च मारुते।
रात्रीणां चातिसंक्षेपाद्दिवास्वप्नः प्रशस्यते ॥४३॥

सम्प्रति दिनेऽपि यैः निद्रा सेव्या तानाह—गीतेत्यादि। अत्र रात्रौ जागरितानां दिवास्वप्नो रात्रिजागरणकालार्द्धेन कार्यः, अयं च दिवास्वप्नोऽभुक्तवतामेव, यदुक्तं[1]—"भुक्त्वा स्वप्नं न सेवेत स्वस्थोऽप्यसुखितो भवेत्।" इति ग्रीष्मे दिवास्वप्नविधानस्योपपत्तिमाह—ग्रीष्मे त्वेत्यादि ॥३९-४३॥

ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नात् प्रकुप्यतः।
श्लेष्मपित्ते दिवास्वप्नस्तस्मात्तेषु न शस्यते ॥४४॥

मेदस्विनः स्नेहनित्याः श्लेष्मलाः श्लेष्मरोगिणः।
दूषीविषार्ताश्च दिवा न शयीरन् कदाचन ॥४५॥

हलीमकः शिरःशूलं स्तैमित्यं गुरुगात्रता।
अङ्गमर्दोऽग्निनाशश्च प्रलेपो हृदयस्य च ॥४६॥

शोफारोचकहृल्लासपीनसार्धावभेदकाः।
कोठारुःपिडकाः कण्डूस्तन्द्रा कासो गलामयाः ॥४७॥

स्मृतिबुद्धिप्रमोहश्च संरोधः स्रोतसां ज्वरः।
इन्द्रियाणामसामर्थ्यं विषवेगप्रवर्त(र्ध)नम् ॥४८॥

भवेन्नृणां दिवास्वप्नस्याहितस्य निषेवणात्।
तस्माद्धिताहितं स्वप्नं बुद्ध्वा स्वप्यात् सुखं बुधः ॥४९॥

कदाचनेति ग्रीष्मेऽपि दिवा न शयीरन्नित्यर्थः। पुण्यं यथा भवति तथा स्वप्यादित्यर्थः, तच्चाहितस्वप्नपरित्यागेन हितस्वप्नसेवया भवतीत्यर्थः ॥४४-४९॥

रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा।
अरूक्षमनभिष्यन्दि त्वासीनप्रचलायितम् ॥५०॥

इदानीं निद्राप्रसङ्गत्वेन तद्विरुद्धजागरणस्यापि गुणमाह—रात्रावित्यादि। अत्र रूक्षत्व स्निग्धत्वं च तत्कार्यकर्तृत्वादुपचर्यते। स्वप्नप्रसङ्गेन स्वप्नसदृशस्यासीनप्रचलायितस्यापि गुणमाह—अरूक्षमित्यादि। अनभिष्यन्दि अस्निग्धम् आसीनप्रचलायितमिति उपविष्टस्य घूर्णनमित्यर्थः, **'घूर्णितं प्रचलायितम्' इत्यमरः** (अ० ३.१.३२) ॥५०॥

---

१. यदुक्तं हारीते[1]

देहवृत्तौ यथाऽऽहारस्तथा स्वप्नः सुखो मतः।
स्वप्नाहारसमुत्थे च स्थौल्यकार्श्ये विशेषतः ॥५१॥

विहारे स्वप्नस्य प्राधान्यं दर्शयितुमाहारतुल्यतामाह—देहवृत्ताविल्यादि। सुख इति सुखहेतुः ॥५१॥

अभ्यङ्गोत्सादनं स्नानं ग्राम्यानूपौदका रसाः।
शाल्यन्नं सदधि क्षीरं स्नेहो मद्यं मनःसुखम् ॥५२॥

मनसोऽनुगुणा गन्धाः शब्दाः संवाहनानि च।
चक्षुषोस्तर्पणं लेपः शिरसो वदनस्य च ॥५३॥

स्वास्तीर्णं शयनं वेश्म सुखं कालस्तथोचितः।
आनयन्त्यचिरान्निद्रां प्रनष्टा या निमित्ततः ॥५४॥

स्वप्नजनकान् हेतूनाह—अभ्यङ्गेत्यादि। कालस्तथोचित इति निद्रानुगुणकालः, यस्मिन् काले निद्राऽभ्यस्यते पुरुषेण। प्रनष्टा या निमित्तत इति एतद्वचनमरिष्टजनितनिद्राप्रतिषेधार्थं, अरिष्टं ह्यनिमित्तमुच्यते ॥५२-५४॥

कायस्य शिरसश्चैव विरेकश्छर्दनं भयम्।
चिन्ता क्रोधस्तथा धूमो व्यायामो रक्तमोक्षणम् ॥५५॥

उपवासोऽसुखा शय्या सत्त्वौदार्यं तमोजयः।
निद्राप्रसङ्गमहितं वारयन्ति समुत्थितम्।५६।

एत एव च विज्ञेया निद्रानाशस्य हेतवः।
कार्यं कालो विकारश्च प्रकृतिर्वायुरेव च ॥५७।

अहितनिद्रानिवारणार्थं निद्रानाशहेतूनाह—कायस्येत्यादि। सत्त्वौदार्यं सत्त्वगुणभूयिष्ठता, तमोगुणस्य जयो योगाभ्यासादिना भवति। निद्रानाशस्येति हितनिद्रानाशस्याप्येत एव स्वस्थेनातिप्रसङ्गेन क्रियमाणा हेतवो भवन्तीत्यर्थः। अपरानपि निद्रानाशहेतूनाह—कार्यमित्यादि। कार्यमिति कार्यासक्तो न निद्रां याति। काल इति वार्द्धक्यं, विकारः शूलादिः, प्रकृतिः स्वभावः, स्वभावादेव केचिदनिद्रा भवन्ति। वायुरिति प्रवृद्धो वायुः, विकारग्रहणेन लब्धस्यापि प्रवृद्धवायोः पुनरुपादानं विशेषेण वायोर्निद्रापहारक(त्व)प्रतिपादनार्थम् ॥५५-५७॥

तमोभवा श्लेष्मसमुद्भवा च मनःशरीरश्रमसंभवा च।
आगन्तुकी व्याध्यनुवर्तिनी च रात्रिस्वभावप्रभवा च निद्रा॥५८॥

निद्राविशेषानाह—तमोभवेत्यादि। तमोभवा तमोगुणोद्रेकेण या भवति। मनःशरीरश्रमसंभवा चेति मनःशरीरयोः श्रमेण या भवति। यद्यपि श्रमे वायोः प्रकोपः तथाऽपि श्रमे सति इन्द्रियमनसां स्वस्वविषयेभ्य उपरमो भवतीति निद्राहेतुत्वं श्रमस्य ज्ञेयम्, दृश्यते च श्रान्तानां निद्रा भवतीति। आगन्तुकी रिष्टभूता। व्याध्यनुवर्तिनी सन्निपातज्वरादि-कार्या। रात्रिस्वभावात् प्रभवतीति रात्रिस्वभावप्रभवा। दिवा प्रभवन्ती तु निद्रा तमःप्रभृतिभ्यस्त्रिभ्य एव[1] स्यात् ॥५८॥

रात्रिस्वभावप्रभवा मता या तां भूतधात्रीं प्रवदन्ति तज्ज्ञाः।
तमोभवामाहुरघस्य मूलं शेषाः पुनर्व्याधिषु निर्दिशन्ति ॥५९॥

उक्तासु निद्रासु प्रशस्तां निन्द्यां चाह—रात्रिस्वभावेत्यादि। भूतानि प्राणिनो दधाति पुष्णातीति भूतधात्री, रात्रिनिद्रया हि भूतानां स्वास्थ्यं भवतीति। अघस्य मूलमिति तमोगृहीतो हि धर्मशास्त्रनिषिद्धकालेऽपि निद्रातीत्यधर्महेतुता। व्याधिष्विति शरीरव्याधिषु यद्यपि तमोभवापि व्याधिरेव तथाऽपि सा मानसदोषजन्येति न तस्याः शारीरव्याधिष्वन्तर्भाव इत्यर्थः ॥५९॥

तत्र श्लोकाः—
निन्दिताः पुरुषास्तेषां यौ विशेषेण निन्दितौ।
निन्दिते कारणं दोषास्तयोर्निन्दितभेषजम् ॥६०॥
येभ्यो यदा हिता निद्रा येभ्यश्चाप्यहिता यदा।
अतिनिद्रायानिद्राय भेषजं यद्भवा च सा ॥६१॥
या या यथाप्रभावा च निद्रा तत् सर्वमत्रिजः।
अष्टौनिन्दितसंख्याते व्याजहार पुनर्वसुः ॥६२॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थानेऽष्टौनिन्दितीयो नामैकविंशतितमोऽध्यायः ॥२१॥

सङ्ग्रहे—निन्दिते कारणमिति निन्दितेऽतिस्थौल्येऽतिकार्श्ये च यत् कारणं यो हेतुः स च तदिदमतिस्थौल्यमतिसम्पूरणादित्यादिना तथा सेवा

---

१. तमःप्रभृतिभ्य एव[1]

रूक्षान्नपानानामित्यादिनोक्तं, दोषास्तयोः स्थूलकृशयोर्दोषाः ते च अतिस्थूलस्य तावदित्यादिना तथा व्यायाममतिसौहित्यमित्यादिना चोक्ताः। निन्दिते भेषजमिति स्थौल्यकार्श्ययोः भेषजमित्यर्थः। अतिनिद्रा-यानिद्रायेत्यनिद्राय तथा अतिनिद्राय च यद्भेषजं तच्च अभ्यङ्गोत्सादन-मित्यादिना तथा कायस्य शिरसश्चैवेत्यादिनोक्तम्। यद्भवा च सेति तमोभवेत्यादिना, यथाप्रभावेति भूतधात्रीत्यादिप्रभावा ॥६०-६२॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायामष्टौ-निन्दितीयः समाप्तः ॥२१॥

द्वाविंशोऽध्यायः

अथातो लङ्घनबृंहणीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वाध्याये 'सततं चोपचर्यौ हि कर्शनैर्बृंहणैरपि'[१] इत्युक्तम्, अतस्तदभिधायकं लङ्घनबृंहणीयमाह—अथात इत्यादि ॥१--२॥

तपःस्वाध्यायनिरतानात्रेयः शिष्यसत्तमान् ।
षडग्निवेशप्रमुखानुक्तवान् परिचोदयन् ॥३॥

लङ्घनं बृंहणं काले रूक्षणं स्नेहनं तथा ।
स्वेदनं स्तम्भनं चैव जानीते यः स वै भिषक् ॥४॥

तमुक्तवन्तमात्रेयमग्निवेश उवाच ह ॥५॥

भगवँल्लङ्घनं किंस्विल्लङ्घनीयाश्च कीदृशाः ।
बृंहणं बृंहणीयाश्च रूक्षणीयाश्च रूक्षणम् ॥६॥

के स्नेहाः स्नेहनीयाश्च स्वेदाः स्वेद्याश्च के मताः ।
स्तम्भनं स्तम्भनीयाश्च वक्तुमर्हसि तद्गुरो ! ॥७॥

लङ्घनप्रभृतीनां च षण्णामेषां समासतः ।
कृताकृतातिकृतानां लक्षणं वक्तुमर्हसि ॥८॥

परिचोदयन्निति ज्ञानार्थं प्रेरयन् । लङ्घनमित्यादि—**यद्यपि रूक्षणादीन्यपि** लङ्घनबृंहणयोरेवान्तर्भवन्ति, यदुक्तं—"स्नेहनं **रूक्षणं कर्म स्वेदनं** स्तम्भनं च यत् । भूतानां तदपि द्वैध्याद्द्वितयं नातिवर्तते ।" (**अ०** हृ० सू० १४. ३-४) इति; तथाऽप्यशेषविशेषज्ञानार्थं **तेषामपीह भेदेनोपादानं** मन्तव्यम् । अत्र परस्परविरोधिद्वन्द्वकथनप्रसङ्गानुरोधात् **स्नेहादिविषयकः** प्रश्नो बोध्यः । कृतेत्यादौ कृतं सम्यक्कृतम् ॥३-८॥

तदग्निवेशस्य वचो निशम्य गुरुरब्रवीत् ।
यत् किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् ॥९॥

---

१. तर्पणैर्बृंहणैः[2]

२. तच्च द्वैविध्याद्[2]

बृहत्त्वं यच्छरीरस्य जनयेत्तच्च बृंहणम् ।
रौक्ष्यं खरत्वं वैशद्यं यत् कुर्यात्तद्धि रूक्षणम् ॥१०॥

स्नेहनं स्नेहविष्यन्दमार्दवक्लेदकारकम् ।
स्तम्भगौरवशीतघ्नं स्वेदनं स्वेदकारकम् ॥११॥

स्तम्भनं स्तम्भयति यद्गतिमन्तं चलं ध्रुवम् ।
लघूष्णतीक्ष्णविशदं रूक्षं सूक्ष्मं खरं सरम् ॥१२॥

कठिनं चैव यद्द्रव्यं प्रायस्तल्लङ्घनं स्मृतम् ।
गुरु शीतं मृदु स्निग्धं बहलं स्थूलपिच्छिलम् ॥१३॥

प्रायो मन्दं स्थिरं श्लक्ष्णं द्रव्यं बृंहणमुच्यते ।
रूक्षं लघु खरं तीक्ष्णमुष्णं स्थिरमपिच्छिलम् ॥१४॥

प्रायशः कठिनं चैव यद्द्रव्यं तद्धि रूक्षणम् ।
द्रवं सूक्ष्मं सरं स्निग्धं पिच्छिलं गुरु शीतलम् ।
प्रायो मन्दं मृदु च यद्द्रव्यं तत्स्नेहनं मतम् ॥१५॥

उष्णं तीक्ष्णं सरं स्निग्धं रूक्षं सूक्ष्मं द्रवं स्थिरम् ।
द्रव्यं गुरु च यत् प्रायस्तद्धि स्वेदनमुच्यते ॥१७॥

शीतं मन्दं मृदु श्लक्ष्णं रूक्षं सूक्ष्मं द्रवं स्थिरम् ।
यद्द्रव्यं लघु चोद्दिष्टं प्रायस्तत् स्तम्भनं स्मृतम् ॥१७॥

रौक्ष्यमित्यादौ रौक्ष्यमेव प्रधानं, खरत्ववैशद्ये तु तदनुगते। विष्यन्दो विलयनम् । चलमिति किञ्चिद्गतिमत् । गतिमन्त इति प्रव्यक्तगतिमन्तः । एतच्चातिसारशोणितस्रुतिविषदाहवेदनादिषु बोध्यं न तु केवलवाते, गतिमन्तं प्रति स्तम्भकस्य वर्द्धकत्वात् । लक्षणमुक्त्वा उदाहरणमाह— लघूष्णेत्यादि । गुर्वित्यादौ बहलं घनम्, मन्दमिति चिरकारि, स्थूलं संहतावयवं लड्डुकपिष्टादि, स्थिरमिति सरविपरीतम्, श्लक्ष्णमिति खरविपरीतम् । रूक्षमित्यादौ रूक्षगुणस्य प्रागुपादानाद्रूक्षगुणप्रधानमेव रूक्षणं ज्ञेयं, लङ्घनं द्रव्यं तु लघुगुणप्रधानमत एव तत्र लघुगुणस्य प्राङ्निर्देशः । एतेन (लङ्घन)विरूक्षणद्रव्ययोस्तुल्यगुणत्वात् कथं भेद इति चोद्यमपास्तम् । उष्णमित्यादौ स्निग्धं रूक्षमिति स्निग्धं वा रूक्षं वा । एवं सरस्थिरावपि विकल्पेन ज्ञेयौ ॥९-१७॥

चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥१८॥

लङ्घनं दशधा विभजते—चतुःप्रकारेत्यादि। चतुःप्रकारा संशुद्धिरित्यनुवासनं वर्जयित्वा, तस्य बृंहणत्वात्। पिपासेति पिपासाप्रतिपालनं, तच्च तदैव भवति यदि जलं न पीयते, जलपानेन पिपासाव्यपगमात्। मारुतस्यापि रौक्ष्यादिगुणयोगाल्लङ्घनत्वं ज्ञेयम्। पचन्तमग्निं प्रतिपक्षक्षपणेन बलदानेन च यत् पाचयति तत् पाचनं; तच्च वाय्वग्निगुणभूयिष्ठं द्रव्यम् ॥१८॥

प्रभूतश्लेष्मपित्तास्रमलाः संसृष्टमारुताः।
बृहच्छरीरा बलिनो लङ्घनीया विशुद्धिभिः ॥१९॥
येषां मध्यबला रोगाः कफपित्तसमुत्थिताः।
वम्यतीसारहृद्रोगविसूच्यलसकज्वराः ॥२०॥
विबन्धगौरवोद्गारहृल्लासारोचकादयः।
पाचनैस्तान् भिषक् प्राज्ञः प्रायेणादावुपाचरेत् ॥२१॥
एत एव यथोद्दिष्टा येषामल्पबला गदाः।
पिपासानिग्रहैस्तेषामुपवासैश्च ताञ्जयेत् ॥२२॥
रोगाञ्जयेन्मध्यबलान् व्यायामातपमारुतैः।
बलिनां किं पुनर्येषां रोगाणामवरं बलम् ॥२३॥
त्वग्दोषिणां प्रमीढानां स्निग्धाभिष्यन्दिबृंहिणाम्।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ॥२४॥

दशविधलङ्घनस्य भिन्नं भिन्नं विषयमाह—प्रभूतेत्यादि। आदाविति वचनं अन्ते च्छर्द्यादीनां निरामाणां संशमनीयत्वख्यापनार्थः। रोगानिति लङ्घनसाध्यान्। बलिनामिति पदं बलवतामेव व्यायामादिसेवाविधानार्थम्। किं पुनर्येषामिति—एतेनाल्पबला गदाः सुतरामेव व्यायामादिसाध्या इत्यर्थः। लङ्घनं शस्तमिति दशविधमपीत्यर्थः। एतेन त्वग्दोषिप्रमेहिषु तथा शिशिरे सर्वेषामेव दशविधमपि लङ्घनं शस्तम्। शिशिर इति शीतकाले, तेन हेमन्तस्यापि ग्रहणम् ॥१९-२४॥

अदिग्धविद्धमक्लिष्टं वयःस्थं सात्म्यचारिणाम्।
मृगमत्स्यविहङ्गानां मांसं बृंहणमुच्यते ॥२५॥
क्षीणाः क्षताः कृशा वृद्धा दुर्बला नित्यमध्वगाः।
स्त्रीमद्यनित्या ग्रीष्मे च बृंहणीया नराः स्मृताः ॥२६॥

शोषार्शोग्रहणीदोषैर्व्याधिभिः कर्शिताश्च ये ।
तेषां क्रव्यादमांसानां बृंहणा लघवो रसाः ॥२७॥

स्नानमुत्सादनं स्वप्नो मधुराः स्नेहबस्तयः ।
शर्कराक्षीरसर्पींषि सर्वेषां विद्धि बृंहणम् ॥२८॥

अदिग्धविद्धमिति विषाक्तशस्त्रेणाविद्धम् । यो देशो यस्य सात्म्यः तत्र ये चरन्ति ते सात्म्यचारिणः । लघव इति संस्कारेण; किंवा क्रव्यादानां मध्ये ये लघवः श्येनादयस्तन्मांसरसा इत्यर्थः ॥२५-२८॥

कटुतिक्तकषायाणां सेवनं स्त्रीष्वसंयमः ।
खलिपिण्याकतक्राणां मध्वादीनां च रूक्षणम् ॥२९॥

अभिष्यण्णा महादोषा मर्मस्था व्याधयश्च ये ।
ऊरुस्तम्भप्रभृतयो रूक्षणीया निदर्शिताः ॥३०॥

स्नेहाः स्नेहयितव्याश्च स्वेदाः स्वेद्याश्च ये नराः ।
स्नेहाध्याये मयोक्तास्ते स्वेदाख्ये च सविस्तरम् ॥३१॥

मध्वादीनां च सेवनमिति सम्बन्धः । खलिः सर्षपखलिः; पिण्याकस्तिलखलिः; किंवा पिण्याकशाकम् । प्रभृतिग्रहणादाढ्यवातप्रमेहादीनां ग्रहणम् ॥२९-३१॥

द्रवं तन्वसरं यावच्छीतोकरणमौषधम् ।
स्वादु तिक्तं कषायं च स्तम्भनं सर्वमेव तत् ॥३२॥

पित्तक्षाराग्निदग्धा ये वम्यतीसारपीडिताः ।
विषस्वेदातियोगार्ताः स्तम्भनीया निदर्शिताः ॥३३॥

स्तम्भनद्रव्ये तनु अबहलम् । असरं स्थिरमित्यर्थः ॥३२-३३॥

वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते ॥३४॥

स्वेदे जाते रुचौ चैव क्षुत्पिपासासहोदये ।
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि ॥३५॥

पर्वभेदोऽङ्गमर्दश्च कासः शोषो मुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः ॥३६॥

मनसः संभ्रमोऽभीक्ष्णमूर्ध्ववातस्तमो हृदि ।
देहाग्निबलनाशश्च लङ्घनेऽतिकृते भवेत् ॥३७॥

क्षुत्पिपासयोरसहः पीडाकरत्वेनोदयः, न तु क्षुत्पिपासयोर्युगपदुदय इति, (यथा) **सुश्रुते**—"क्षुत्पिपासाऽसहं[1] लघुम्" (सु० उ० ३९.१०४) इत्युक्तत्वात् इति **चक्रः**। किन्तु "क्षुत्तृट्सहोदयः शुद्धहृदयोद्गारकण्ठता। व्याधिमार्दवमुत्साहस्तन्द्रानाशश्च लङ्घिते ॥" (अ० हृ० सू० १४.१७-१८) इति **वाग्भटवचनाद्** युगपदुदय इत्यर्थोऽपि प्रमाण(सिद्ध) एवेति। अन्तरात्मनीति मनसि। अतिलङ्घितलक्षणे मनसः सम्भ्रमो भ्रान्तिरेव। ऊर्ध्वे काये (वातः) ऊर्ध्ववातः[2] न पुनरुद्गारविशेषः, तस्य अवरोधककफजनकत्वात्; प्रकृते त्वतिलङ्घनेन कफसंक्षयादिति ॥३४–३७॥

बलं पुष्ट्युपलम्भश्च कार्श्यदोषविवर्जनम्।
लक्षणं बृंहिते स्थौल्यमति चात्यर्थबृंहिते ॥३८॥
कृतातिकृतलिङ्गं यल्लङ्घिते तद्धि रूक्षिते।

कार्श्यदोषविवर्जनमिति कार्श्ये ये दोषाः शीतोष्णासहत्वादयः, तेषां वर्जनम् ॥३८॥—

स्तम्भितः स्याद्बले लब्धे यथोक्तैश्चामयैर्जितैः ॥३९॥

श्यावता स्तब्धगात्रत्वमुद्वेगो हनुसंग्रहः।
हृद्वर्चोनिग्रहश्च स्यादतिस्तम्भितलक्षणम् ॥४०॥

बले लब्धे इत्यनन्तरं पुरुषेणेति शेषः। यथोक्तैरिति "पित्तक्षाराग्निदग्धा ये" इत्यादिनाऽभिहितैः। उद्वेग इत्यूर्ध्वागतवेगः; किंवा भैषज्यानामभिलाषः ॥३९–४०॥

लक्षणं चाकृतानां स्यात् षण्णामेषां समासतः।
तदौषधानां धातूनामशमो वृद्धिरेव च ॥४१॥
इति षट् सर्वरोगाणां प्रोक्ताः सम्यगुपक्रमाः।
साध्यानां साधने सिद्धा मात्राकालानुरोधिनः ॥४२॥

तदौषधानामिति लङ्घनादिसाध्यानाम्। वृद्धिरेव चेति यतो लङ्घनाद्ययोगेन दोषाणामुत्क्लेशमात्रं क्रियते अतो व्याधिवृद्धिरित्यर्थः। धातूनामिति दोषाणाम्। उपसंहरति—इतीत्यादि ॥४१–४२॥

———

१. सृष्टमारुतविण्मूत्रं क्षुत्पिपासासहं[2]

२. हिक्काश्वासकर्णस्वनजृम्भादिः[3]

भवति चात्र—

दोषाणां बहुसंसर्गात् सङ्कीर्यन्ते ह्युपक्रमाः ।
षट्त्वं तु नातिवर्तन्ते त्रित्वं वातादयो यथा ॥४३॥

उक्तलङ्घनाद्युपक्रमाणां संसृष्टदोषापेक्षया संसर्गबहुत्वेऽपि न षट्त्वातिक्रम इत्याह—दोषाणामित्यादि। दोषाणां यस्मात् संसर्गा बहवः तस्मात्तत्साधनार्थं उपक्रमा अपि सङ्कीर्यन्ते मिश्रतां यान्ति। यथा—क्वचिल्लङ्घनस्वेदने, क्वचिद्बृंहणस्वेदने एवमादि। षट्त्वं तु नातिवर्तन्त इति संसृष्टा अपि लङ्घनादिस्वरूपं न जहति; न लङ्घनादयः परस्परं युक्ताः मधुसर्पिःसंयोगवत् प्रकृतिगुणानपेक्षिकार्यान्तरमारभन्त इति भावः। अत्रैव दृष्टान्तमाह—त्रित्वमित्यादि। अयं च दृष्टान्तः संसर्गिसंख्याया अपरित्यागमात्र एव ॥४३॥

तत्र श्लोकः—

इत्यस्मिँल्लङ्घनाध्याये व्याख्याताः षडुपक्रमाः ।
यथाप्रश्नं भगवता चिकित्सा यैः प्रवर्तते ॥४४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने लङ्घनबृंहणीयो नाम द्वाविंशोऽध्यायः ॥२२॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां लङ्घनबृंहणीयः समाप्तः ॥२२॥

त्रयोविंशोऽध्यायः

अथातः सन्तर्पणीयमध्यायं व्याख्यास्यामः ॥ १ ॥
इति ह स्माह भगवानात्रेयः ॥ २ ॥

पूर्वं ये ह्युपक्रमा उक्ताः ते सन्तर्पणापतर्पणभेदेन द्विविधाः, यदुक्तं, "उपक्रम्यस्य हि द्वित्वाद्द्विधैवोपक्रमो मतः। एकः सन्तर्पणस्तत्र द्वितीयश्चापतर्पणः॥" (अ० हृ० सू० १४ १) इति। अतस्तेषां द्विविधविषये प्रवृत्तिं दर्शयितुं सन्तर्पणीयोऽभिधीयते—अथात इत्यादि ॥१-२॥

सन्तर्पयति यः स्निग्धैर्मधुरैर्गुरुपिच्छिलैः।
नवान्नैर्नवमद्यैश्च मांसैश्चानूपवारिजैः ॥ ३ ॥
गोरसैर्गौडिकैश्चान्नैः पैष्टिकैश्चातिमात्रशः।
चेष्टाद्वेषी दिवास्वप्नशय्यासनसुखे रतः ॥ ४ ॥
रोगास्तस्योपजायन्ते सन्तर्पणनिमित्तजाः।
प्रमेहपिडकाकोठकण्डूपाण्ड्वामयज्वराः ॥ ५ ॥
कुष्ठान्यामप्रदोषाश्च मूत्रकृच्छ्रमरोचकः।
तन्द्रा क्लैब्यमतिस्थौल्यमालस्यं गुरुगात्रता ॥ ६ ॥
इन्द्रियस्रोतसां लेपो बुद्धेर्मोहः प्रमीलकः।
शोफाश्चैवंविधाश्चान्ये शीघ्रमप्रतिकुर्वतः ॥ ७ ॥

सन्तर्पयति सन्तर्पणमाचरति। स्निग्धैरित्यादिवचनमस्निग्धादीनां सक्त्वादीनां तृप्तिमात्रकारकत्वेन सन्तर्पणशब्दवाच्यानां निषेधार्थम्। शय्यासनसुखे रत इत्यनेनैव चेष्टाद्वेषित्वे लब्धे पुनस्तद्वचनं शय्यासन-स्थितस्यापि गीताङ्गचालनादिचेष्टानिषेधार्थम्। के ते सन्तर्पणनिमित्तजा रोगा इत्याह—प्रमेहेत्यादि। आमप्रदोषा विसूचिकादयः। प्रमीलकः सततं प्रध्यानम् ॥३-७॥

शस्तमुल्लेखनं तत्र विरेको रक्तमोक्षणम्।
व्यायामश्चोपवासश्च धूमाश्च स्वेदनानि च ॥ ८ ॥

सक्षौद्रश्चाभयाप्राशः प्रायो रूक्षान्नसेवनम् ।
चूर्णप्रदेहा ये चोक्ताः कण्डूकोठविनाशनाः ॥ ९ ॥

त्रिफलारग्वधं पाठां सप्तपर्णं सवत्सकम् ।
मुस्तं समदनं निम्बं जलेनोत्क्वथितं पिबेत् ॥१०॥

तेन मेहादयो यान्ति नाशमभ्यस्यतो ध्रुवम् ।
मात्राकालप्रयुक्तेन सन्तर्पणसमुत्थिताः ॥११॥

मुस्तमारग्वधः पाठा त्रिफला देवदारु च ।
श्वदंष्ट्रा खदिरो निम्बो हरिद्रे त्वक्च वत्सकात् ॥१२॥

रसमेषां यथादोषं प्रातः प्रातः पिबन्नरः ।
सन्तर्पणकृतैः सर्वैर्व्याधिभिः संप्रमुच्यते ॥१३॥

एभिश्चोद्वर्तनोद्धर्षस्नानयोगोपयोजितैः ।
त्वग्दोषाः प्रशमं यान्ति तथा स्नेहोपसंहितैः ॥१४॥

कुष्ठं गोमेदको हिङ्गु क्रौञ्चास्थि त्र्यूषणं वचा ।
वृषकैले श्वदंष्ट्रा च खराह्वा चाश्मभेदकः ॥१५॥

तक्रेण दधिमण्डेन बदराम्लरसेन वा ।
मूत्रकृच्छ्रं प्रमेहं च पीतमेतद्व्यपोहति ॥१६॥

तक्राभयाप्रयोगैश्च त्रिफलायास्तथैव च ।
अरिष्टानां प्रयोगैश्च यान्ति मेहादयः शमम् ॥१७॥

त्र्यूषणं त्रिफला क्षौद्रं क्रिमिघ्नमजमोदकः ।
मन्थोऽयं सक्तवस्तैलं हितो लोहोदकाप्लुतः ॥१८॥

व्योषं विडङ्गं शिग्रूणि त्रिफलां कटुरोहिणीम् ।
बृहत्यौ द्वे हरिद्रे द्वे पाठामतिविषां स्थिराम् ॥१९॥

हिङ्गु केबुकमूलानि यवानीधान्यचित्रकान् ।
सौवर्चलमजाजीं च हपुषां चेति चूर्णयेत् ॥२०॥

चूर्णतैलघृतक्षौद्रभागाः स्युर्मानतः समाः ।
सक्तूनां षोडशगुणो भागः सन्तर्पणं पिबेत् ॥२१॥

प्रयोगादस्य शाम्यन्ति रोगाः सन्तर्पणोत्थिताः ।
प्रमेहा मूढवाताश्च कुष्ठान्यर्शांसि कामलाः ॥२२॥

प्लीहा पाण्ड्वामयः शोफो मूत्रकृच्छ्रमरोचकः।
हृद्रोगो राजयक्ष्मा च कासः श्वासो गलग्रहः ॥२३॥

क्रिमयो ग्रहणीदोषाः श्वैत्र्यं स्थौल्यमतीव च।
नराणां दीप्यते चाग्निः स्मृतिर्बुद्धिश्च वर्धते ॥२४॥

व्यायामनित्यो जीर्णाशी यवगोधूमभोजनः।
सन्तर्पणकृतैर्दोषैः स्थौल्यं मुक्त्वा विमुच्यते ॥२५॥

उक्तं सन्तर्पणोत्थानामपतर्पणमौषधम्।

सक्षौद्रश्चाभयाप्राश इति क्षौद्रेण सह हरीतकीभक्षणम्। ये चोक्ता इत्यारग्वधीये। अभ्यस्यत इत्यत्र त्रिफलादीनीति शेषः। यथादोषमिति दोषबलमपेक्ष्य। उद्वर्तनमभ्यङ्गपूर्वकम्, उद्धर्षस्त्वनभ्यङ्गपूर्वकः। स्नेहोपसंहितैरिति स्नेहसाधनोपयुक्तैः। गोमेदको मणिविशेषः। क्रौञ्चः कोंच इति ख्यातः पक्षी। खराश्वा अजमोदा। अरिष्टानि सन्धानविशेषाः। लोहोदकं षडङ्गविधिना कृतोऽगुरुक्वाथः। इह प्रयोगे वक्ष्यमाणव्योषाद्युक्तप्रमाणवच्चूर्णादिमानं ज्ञेयं साहचर्यात्। व्योषमित्यादि। अत्र तैलघृतक्षौद्राणां प्रत्येकं मिलितचूर्णसमत्वं, समुदितचूर्णमपेक्ष्यैव सक्तूनां षोडशगुणो भागः। सन्तर्पणमिति जलालोडितसक्तुस्वरूपतया, तेन सन्तर्पणसंज्ञस्याप्यपतर्पणता ज्ञेया। श्वैत्र्यं श्वित्रित्वं, श्वैत्यमिति पाठे श्वेतावभासता ॥८-२५॥—

वक्ष्यन्ते सौषधाश्चोर्ध्वमपतर्पणजा गदाः ॥२६॥

देहाग्निबलवर्णौजःशुक्रमांसपरिक्षयः।
ज्वरः कासानुबन्धश्च पार्श्वशूलमरोचकः ॥२७॥

श्रोत्रदौर्बल्यमुन्मादः प्रलापो हृदयव्यथा।
विण्मूत्रसंग्रहः शूलं जङ्घोरुत्रिकसंश्रयम् ॥२८॥

पर्वास्थिसन्धिभेदश्च ये चान्ये वातजा गदाः।
ऊर्ध्ववातादयः सर्वे जायन्ते तेऽपतर्पणात् ॥२९॥

तेषां सन्तर्पणं तज्ज्ञैः पुनराख्यातमौषधम्।
यत्तदात्वे समर्थं स्यादभ्यासे वा तदिष्यते ॥३०॥

ऊर्ध्ववातादय इति श्वासादयः, किंवा "अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन च। करोति नित्यमुद्गारमूद्ध्र्ववातः स उच्यते ॥" इति। सन्त-

र्पणस्य द्वैविध्यभावमाह—यत्तदात्व इत्यादि। तदात्वे इति सद्यः, समर्थमिति अपतर्पणजव्याधिनिराकरणसमर्थम्, तेन सद्यःसन्तर्पणमेकम्, अभ्यासवशात् सन्तर्पणमपरमित्यर्थः ॥२९-३०॥

सद्यःक्षीणो हि सद्यो वै तर्पणेनोपचीयते।
नर्ते सन्तर्पणाभ्यासाच्चिरक्षीणस्तु पुष्यति ॥३१॥

देहाग्निदोषभैषज्यमात्राकालानुवर्तिना।
कार्यमत्वरमाणेन भेषजं चिरदुर्बले ॥३२॥

हिता मांसरसास्तस्मै पयांसि च घृतानि च।
स्नानानि बस्तयोऽभ्यङ्गास्तर्पणास्तर्पणाश्च ये ॥३३॥

ज्वरकासप्रसक्तानां कृशानां मूत्रकृच्छ्रिणाम्।
तृष्यतामूर्ध्ववातानां वक्ष्यन्ते तर्पणा हिताः ॥३४॥

शर्करापिप्पलीतैलघृतक्षौद्रैः समांशकैः।
सक्तुद्विगुणितो वृष्यस्तेषां मन्थः प्रशस्यते ॥३५॥

सक्तवो मदिरा क्षौद्रं शर्करा चेति तर्पणम्।
पिबेन्मारुतविण्मूत्रकफपित्तानुलोमनम् ॥३६॥

फाणितं सक्तवः सर्पिर्दधिमण्डोऽम्लकाञ्जिकम्।
तर्पणं मूत्रकृच्छ्रघ्नमुदावर्तहरं पिबेत् ॥३७॥

मन्थः खर्जूरमृद्वीकावृक्षाम्लाम्लीकदाडिमैः।
परूषकैः सामलकैर्युक्तो मद्यविकारनुत् ॥३८॥

एतयोरेव विषयभेदमाह—सद्यःक्षीण इत्यादि। अत्वरमाणेनेति वचनेन चिरदुर्बले त्वरया क्रियमाणं तर्पणमग्निवधादिदोषं करोतीति सूचयति। तर्पणा इति जलालोडिताः सक्तवो मन्थरूपाः, तद्विशेषणं तर्पणा इति सन्तर्पणरूपा इत्यर्थः। तेनापतर्पकव्योषादिसक्तुप्रयोगादीनां निवारणाय सन्तर्पणकारकान् मन्थानाह—शर्करेत्यादि। वक्ष्यमाणमन्थेष्वपि शर्करादिमन्थवन्मानं बोध्यम्। मन्थ इत्यादौ मन्थोऽत्र जलालोडिता सक्तवः ॥३१-३८॥

स्वादुरम्लो जलकृतः सस्नेहो रूक्ष एव वा।
सद्यःसन्तर्पणो मन्थः स्थैर्यवर्णबलप्रदः ॥३९॥

सद्यस्तर्पणमाह—स्वादुरित्यादि। अम्ल इति दाडिमादियोगात्। अत्र रूक्षसक्तुकृतस्यापि मन्थस्य द्रवत्वशैत्यदेहानुसारित्वैः सद्यःसन्तर्पकत्वं ज्ञेयम् ॥३९॥

तत्र श्लोकः—

सन्तर्पणोत्था ये रोगा रोगा ये चापतर्पणात्।
सन्तर्पणीये तेऽध्याये सौषधाः परिकीर्तिताः ॥४०॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने सन्तर्पणीयो नाम त्रयोविंशोऽध्यायः ॥२३॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां सन्तर्पणीयः समाप्तः ॥२३॥

चतुर्विंशोऽध्यायः

अथातो विधिशोणितीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

पूर्वोक्तानामुपक्रमानां वातादिविकारविषयवदशीतिविकारे विषयताऽप्यस्तीति तदनन्तरं विधिशोणितीयोऽभिधीयते। यद्यपि शोणितविकारा अपि वातादिजन्या एव, तथाऽपि धातुषु वातादि(वद्)[1]बहुविकारकर्तृत्वेन प्राधान्यसूचनार्थं शोणितविकाराणां पृथगध्यायेनाभिधानं ज्ञेयम्। इयमर्थपरा संज्ञा; किंवा विधिना शोणितमितिशब्दमधिकृत्य कृतोऽध्यायो विधिशोणितीयः, 'वर्णागम' इत्यादिना 'ना' शब्दलोपः ॥१-२॥

विधिना शोणितं जातं शुद्धं भवति देहिनाम्।
देशकालौकसात्म्यानां विधिर्यः संप्रकाशितः ॥३॥

विधिनेत्यादि। सम्यगाहारविधिना समुत्पन्नं शोणितं शुद्धं भवति, अतोऽन्यथाऽशुद्धं भवतीति संक्षेपतः शुद्धावशुद्धौ च कारणमुक्तम्। केन विधिनेत्याह—देशेत्यादि। सात्म्यशब्दस्य देशादिभिः प्रत्येकमन्वयः। संप्रकाशित इति तस्याशितीये ॥३॥

तद्विशुद्धं हि रुधिरं बलवर्णसुखायुषा।
युनक्ति प्राणिनं प्राणः शोणितं ह्यनुवर्तते ॥४॥

विशुद्धं शोणितं किं करोतीत्याह—तद्विशुद्धमित्यादि। प्राणः शोणितं ह्यनुवर्तत इति शोणितान्वयव्यतिरेकमनुविधत्ते, शोणितस्य प्राणायतनत्वात्, यद्वक्ष्यति—"दशैवायतनान्याहुः प्राणाः येषु प्रतिष्ठिताः। शङ्खौ मर्मत्रयं कण्ठो रक्तं शुक्रौजसी गुदम्" (सू० २९.३) इति ॥४॥

प्रदुष्टबहुतीक्ष्णोष्णैर्मद्यैरन्यैश्च तद्विधैः।
तथाऽतिलवणक्षारैरम्लैः कटुभिरेव च ॥ ५ ॥

कुलत्थमाषनिष्पावतिलतैलनिषेवणैः।
पिण्डालुमूलकादीनां हरितानां च सर्वशः ॥ ६ ॥

---

१. च० नि० पुस्तके नास्ति [1]

जलजानूपबैलानां प्रसहानां च सेवनात् ।
दध्यम्लमस्तुशुक्तानां सुरासौवीरकस्य च ॥ ७॥

विरुद्धानामुपक्लिन्नपूतीनां भक्षणेन च ।
भुक्त्वा दिवा प्रस्वपतां द्रवस्निग्धगुरूणि च ॥ ८॥

अत्यादानं तथा क्रोधं भजतां चातपानलौ ।
छर्दिवेगप्रतीघातात् काले चानवसेचनात् ॥ ९॥

श्रमाभिघातसंतापैरजीर्णाध्यशनैस्तथा ।
शरत्कालस्वभावाच्च शोणितं संप्रदुष्यति ॥१०॥

शुद्धिहेतुमभिधाय दुष्टिहेतुमाह—प्रदुष्टेत्यादि । अन्यैश्च तद्विधैरिति प्रदुष्टपानकादिभिः; अन्नैरित्यपि पाठः । निष्पावः शिम्बी । हरितान्यार्द्रकादीनि । अत्यादानं तृप्तिमतिक्रम्य भोजनम् । काले चेति शरदि । अजीर्णेऽध्यशनमजीर्णाध्यशनम् ॥५–१०॥

ततः शोणितजा रोगाः प्रजायन्ते पृथग्विधाः ।
मुखपाकोऽक्षिरागश्च पूतिघ्राणास्यगन्धिते ॥११॥

गुल्मोपकुशवीसर्परक्तपित्तप्रमीलकाः ।
विद्रधी रक्तमेहश्च प्रदरो वातशोणितम् ॥१२॥

वैवर्ण्यमग्निसादश्च पिपासा गुरुगात्रता ।
संतापश्चातिदौर्बल्यमरुचिः शिरसश्च रुक् ॥१३॥

विदाहश्चान्नपानस्य तिक्ताम्लोद्गिरणं क्लमः ।
क्रोधप्रचुरता बुद्धेः संमोहो लवणास्यता ॥१४॥

स्वेदः शरीरदौर्गन्ध्यं मदः कम्पः स्वरक्षयः ।
तन्द्रानिद्रातियोगश्च तमसश्चातिदर्शनम् ॥१५॥

कण्ड्वरुःकोठपिडकाकुष्ठचर्मदलादयः ।
विकाराः सर्व एवैते विज्ञेयाः शोणिताश्रयाः ॥१६॥

शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः ।
सम्यक् साध्या न सिध्यन्ति रक्तजांस्तान् विभावयेत् ॥१७॥

उपकुशलक्षणं सुश्रुते; यथा—"वेष्टेषु दाहो भवति तेषु दन्ताश्चलन्ति

च। यस्मिंस्तूपकुशो नाम पित्तरक्तकृतो गदः (सु० नि० १६.२१-२३)[१] इति। चर्मदलस्य कुष्ठविशेषत्वेऽपि तदभिधानं विशेषार्थः। अनुक्तशोणितरोगसङ्ग्रहार्थमाह—शीतेत्यादि । आद्यग्रहणात्तीक्ष्णमृद्वादीनां ग्रहणम्। सम्यगुपक्रान्ता इत्यन्वयः। शीतोष्णस्निग्धरूक्षाद्यैरिति वातादिजयार्थमात्रोपयुक्तैः न तु शोणितदुष्टिप्रत्यनीककृतैरित्यर्थः। तेन या शीतादिक्रिया शोणितदुष्टिप्रत्यनीका इति तया शोणितविकारोपशमो भवत्येव ॥११-१७॥

कुर्याच्छोणितरोगेषु रक्तपित्तहरीं क्रियाम्।
विरेकमुपवासं च स्रावणं शोणितस्य च ॥१८॥

बलदोषप्रमाणाद्वा विशुद्ध्या रुधिरस्य वा।
रुधिरं स्रावयेज्जन्तोराशयं प्रसमीक्ष्य वा ॥१९॥

उक्तशोणितस्रावप्रमाणमाह—बलदोषेत्यादि। ल्यब्लोपे पञ्चमी, तेन बलदोषप्रमाणं वीक्ष्येत्यर्थः। आविशुद्ध्या रुधिरस्य चेति रुधिरविशुद्धिपर्यन्तम्। विशुद्ध्या रुधिरस्य वेत्यपि पाठः। आशयमिति दुष्टशोणितस्थानं; यथा—"स्वल्पे कुष्ठे प्रच्छनं महति च सिराव्यधनम्।" इति ॥१९॥

अरुणाभं भवेद्वाताद्विशदं फेनिलं तनु।
पित्तात् पीतासितं रक्तं स्त्यायत्यौष्ण्याच्चिरेण च ॥२०॥

ईषत्पाण्डु कफाद्दुष्टं पिच्छिलं तन्तुमद्घनम्।
संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥२१॥

वातादिभेदेन तल्लक्षणमाह—अरुणाभमित्यादि। स्त्यायति घनीभवति ॥२०-२१॥

तपनीयेन्द्रगोपाभं पद्मालक्तकसन्निभम्।
गुञ्जाफलसवर्णं च विशुद्धं विद्धि शोणितम् ॥२२॥

विशुद्धरक्तलिङ्गमाह—तपनीयेत्यादि। तपनीयं शुद्धसुवर्णम्, इन्द्रगोपः कीटविशेषः ॥२२॥

---

१. वेष्टेषु दाहः पाकश्च तेभ्यो दन्ताश्चलन्ति च।
आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः॥
आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते।
यस्मिन्नुपकुशः स स्यात् पित्तरक्तकृतो गदः॥ (सु० नि०)

नात्युष्णशीतं लघु दीपनीयं रक्तेऽपनीते हितमन्नपानम् ।
तदा शरीरं ह्यनवस्थितासृगग्निर्विशेषेण च रक्षितव्यः ॥२३॥

रक्तस्रावानन्तरं यद्विहितं तदाह—नात्युष्णेत्यादि । कुत इत्याह—तदेत्यादि । अनवस्थितासृगिति प्रचलरक्तं, प्रचलस्यासृजो हि अत्युष्णमन्नमत्यर्थं रक्तस्य प्रचलतां करोति तेन नात्युष्णं, तथाऽतिशीतमग्निमान्द्यजनकं, तेन च नातिशीतं तथा लघु दीपनीयं च हितमित्यर्थः ॥२३॥

प्रसन्नवर्णेन्द्रियमिन्द्रियार्थानिच्छन्तमव्याहतपक्तृवेगम् ।
सुखान्वितं तु(पु)ष्टिबलोपपन्नं विशुद्धरक्तं पुरुषं वदन्ति ॥२४॥

इदानीं शोणितादर्शनेऽपि विशुद्धरक्तज्ञानार्थं लक्षणमाह—प्रसन्नेत्यादि । वेगः पुरीषादीनाम् ॥२४॥

यदा तु रक्तवाहीनि रससंज्ञावहानि च ।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः ॥२५॥

मलिनाहारशीलस्य रजोमोहावृतात्मनः ।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा ॥२६॥

मदमूर्च्छायसंन्यासास्तेषां विद्याद्विचक्षणः ।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु ॥२७॥

दुर्बलं चेतसः स्थानं यदा वायुः प्रपद्यते ।
मनो विक्षोभयञ्जन्तोः संज्ञां संमोहयेत्तदा ॥२८॥

पित्तमेवं कफश्चैवं मनो विक्षोभयन्नृणाम् ।
संज्ञां नयत्याकुलतां विशेषश्चात्र वक्ष्यते ॥२९॥

इदानीं रक्तवाहिधमनीदुष्टिजन्यान् व्याधीन् सूचयन्नाह—यदा त्वित्यादि । संज्ञावहानीति मनोवहानि, अन्ये तु रससंज्ञावहानीत्याहुः—रससंज्ञं धातुमावहन्तीति रससंज्ञवहानि[1], किन्तु "रसासृक्चेतनावाहिस्रोतोरोधसमुद्भवाः । मदमूर्च्छायसन्यासा यथोत्तरबलोत्तराः ॥" (अ० सं० नि० ६.२४) इति तन्त्रान्तरे मनोवहधमनीदुष्टिरुक्ता, सा चास्मिन् व्याख्याने नोपपद्यते, इति पूर्वव्याख्यैव युक्ता । यथोत्तरं हेतुलिङ्गोपशान्तिषु बलाधिक्यमिति मदादित्रये मोहरूपं लिङ्गं साधारणं, तस्य यथोत्तरमाधिक्यमित्यर्थः । दुर्बलं चेतसः स्थानमिति चेतःस्थानस्य दौर्बल्यं (दुर्बल) सत्त्वेनैव ॥२५-२९॥

---

१. अन्ये तु रससंज्ञं धातुमावहन्तीति रससंज्ञावहानीत्याहुः[a]

सक्तानल्पद्रुताभाषं चलस्खलितचेष्टितम् ।
विद्याद्वातमदाविष्टं रूक्षश्यावारुणाकृतिम् ॥३०॥

सक्रोधपरुषाभाषं संप्रहारकलिप्रियम् ।
विद्यात् पित्तमदाविष्टं रक्तपीतासिताकृतिम् ॥३१॥

स्वल्पासंबद्धवचनं तन्द्रालस्यसमन्वितम् ।
विद्यात् कफमदाविष्टं पाण्डुं प्रध्यानतत्परम् ॥३२॥

सर्वाण्येतानि रूपाणि सन्निपातकृते मदे ।

सक्तानल्पद्रुताभाषमिति—सक्तं (अ)विच्छिन्नवर्णं[1], अनल्पं बहु, द्रुतं शीघ्रं भाषते स तथा। एवं परुषाभासमित्यपि व्याख्येयम् ॥३०-३२॥—

जायते शाम्यति क्षिप्रं मदो मद्यमदाकृतिः ॥३३॥

मदस्वरूपमाह—जायत इत्यादि ॥३३॥

यश्च मद्यकृतः प्रोक्तो विषजो रौधिरश्च यः ।
सर्व एते मदा नर्ते वातपित्तकफत्रयात् ॥३४॥

मदप्रसङ्गेन मद्यविषजयोरपि मदयोश्चातुर्विध्यमाह—यश्चेत्यादि। वातपित्तकफत्रयादिति प्रत्येकं त्रयादिति मिलितात्, एतेन चातुर्विध्यम् ॥३४॥

नीलं वा यदि वा कृष्णमाकाशमथवाऽरुणम् ।
पश्यंस्तमः प्रविशति शीघ्रं च प्रतिबुध्यते ॥३५॥

वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य च ।
कार्श्यं श्यावारुणा च्छाया मूर्च्छाये वातसंभवे ॥३६॥

रक्तं हरितवर्णं वा वियत् पीतमथापि वा ।
पश्यंस्तमः प्रविशति सस्वेदः प्रतिबुध्यते ॥३७॥

सपिपासः ससंतापो रक्तपीताकुलेक्षणः ।
संभिन्नवर्चाः पीताभो मूर्च्छाये पित्तसंभवे ॥३८॥

मेघसङ्काशमाकाशमावृतं वा तमोघनैः ।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ॥३९॥

गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्मणा ।
सप्रसेकः सहृल्लासो मूर्च्छाये कफसंभवे ॥४०॥

---

१. विच्छिन्नवर्णं[2]

सर्वाकृतिः सन्निपातादपस्मार इवागतः ।
स जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः ॥४१॥

मूर्च्छायस्यापि वातादिभेदेन लक्षणमाह—नीलमित्यादि । तमः प्रविशति मूर्च्छतीत्यर्थः, शीघ्रं च प्रतिबुध्यत इति वायोः शीघ्रकारित्वात् । रक्तपित्ताकुलेक्षण इति क्वचित्पाठः ॥३५-४१॥

दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम् ।
स्वयमेवोपशाम्यन्ति संन्यासो नौषधैर्विना ॥४२॥

वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः ।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनसंश्रिताः ॥४३॥
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः ।
प्राणैर्वियुज्यते शीघ्रं मुक्त्वा सद्यःफलाः क्रियाः ॥४४॥

दुर्गेऽम्भसि यथा मज्जद्भाजनं त्वरया बुधः ।
गृह्णीयात्तलमप्राप्तं तथा संन्यासपीडितम् ॥४५॥
अञ्जनान्यवपीडाश्च धूमाः प्रधमनानि च ।
सूचीभिस्तोदनं शस्तं दाहः पीडा नखान्तरे ॥४६॥

लुञ्चनं केशलोम्नां च दन्तैर्दशनमेव च ।
आत्मगुप्तावघर्षश्च हितं तस्यावबोधने ॥४७॥
संमूर्च्छितानि तीक्ष्णानि मद्यानि विविधानि च ।
प्रभूतकटुयुक्तानि तस्यास्ये गालयेन्मुहुः ॥४८॥
मातुलुङ्गरसं तद्वन्महौषधसमायुतम् ।
तद्वत्सौवर्चलं दद्याद्युक्तं मद्याम्लकाञ्जिकैः ॥४९॥
हिङ्गूषणसमायुक्तं यावत् संज्ञाप्रबोधनम् ।
प्रबुद्धसंज्ञमन्नैश्च लघुभिस्तमुपाचरेत् ॥५०॥

विस्मापनैः स्मारणैश्च प्रियश्रुतिभिरेव च ।
पटुभिर्गीतवादित्रशब्दैश्चित्रैश्च दर्शनैः ॥५१॥
स्रंसनोल्लेखनैर्धूमैरञ्जनैः कवलग्रहैः ।
शोणितस्यावसेकैश्च व्यायामोद्घर्षणैस्तथा ॥५२॥
प्रबुद्धसंज्ञं मतिमाननुबन्धमुपक्रमेत् ।
तस्य संरक्षितव्यं हि मनः प्रलयहेतुतः ॥५३॥

तयोर्भेदकं लक्षणमाह—दोषेष्वित्यादि । कृतवेगेष्विति वेगं कृत्वा क्षीणबलेषु, वेगो हि दोषाणां बलक्षयाय भवति; यदुक्तं विषमज्वरे—

"कृत्वा वेगं गतबला" (चि० ३.७०) इति। संन्यासस्य सम्प्राप्तिकथनपूर्वकं लक्षणमाह—वाग्देहेत्यादि। अतिबला इत्यनेन मूर्च्छाद्यारम्भकेभ्य एषामतिबलत्वं बोधयति। संन्यस्यन्ति मोहयन्ति। प्राणायतनमिह हृदयम्। मुक्त्वा सद्यःफलां क्रियामिति वक्ष्यमाणतीक्ष्णाञ्जनसूचीव्यधादिकाम्। शस्त्रैरित्यपि तोदनमित्यनेन सम्बध्यते। सम्मूर्च्छितानीति मिलितानि, किंवा परिणतानि। गालयेदिति क्षिपेत्। अनुबद्धं सततम्। ऽलयहेतुत इति मोहहेतुतः, स च (हेतुः) भयशोकादिः ॥४२--५३॥

स्नेहस्वेदोपपन्नानां यथादोषं यथाबलम्।
पञ्च कर्माणि कुर्वीत मूर्च्छायेषु मदेषु च ॥५४॥

अष्टाविंशत्यौषधस्य तथा तिक्तस्य सर्पिषः।
प्रयोगः शस्यते तद्वन्महतः षट्पलस्य वा ॥५५॥

त्रिफलायाः प्रयोगो वा सघृतक्षौद्रशर्करः।
शिलाजतुप्रयोगो वा प्रयोगः पयसोऽपि वा ॥५६॥

पिप्पलीनां प्रयोगो वा पयसा चित्रकस्य वा।
रसायनानां कौम्भस्य सर्पिषो वा प्रशस्यते ॥५७॥

रक्तावसेकाच्छास्त्राणां सतां सत्त्ववतामपि।
सेवनान्मदमूर्च्छायाः प्रशाम्यन्ति शरीरिणाम् ॥५८॥

अष्टाविंशत्यौषधस्येति पानीयकल्याणस्य। तिक्तस्य महतः तथा तिक्तस्य षट्पलस्येति सम्बन्धः; तिक्तषट्पलमहातिक्तघृते कुष्ठचिकित्सिते वाच्ये। कौम्भं दशाब्दिकं सर्पिः ॥५४--५८॥

तत्र श्लोकौ—

विशुद्धं चाविशुद्धं च शोणितं तस्य हेतवः।
रक्तप्रदोषजा रोगास्तेषु रोगेषु चौषधम् ॥५९॥
मदमूर्च्छायसंन्यासहेतुलक्षणभेषजम्।
विधिशोणितकेऽध्याये सर्वमेतत् प्रकाशितम् ॥६०॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने विधिशोणितीयो नाम चतुर्विंशोऽध्यायः ॥२४॥

समाप्तो योजनाचतुष्कः ॥ ६ ॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां
विधिशोणितीयः समाप्तः ॥२४॥

॥ समाप्तश्च योजनाचतुष्कः ॥

पञ्चविंशोऽध्यायः

अथातो यज्जःपुरुषीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

पारिशेष्यादन्नपानचतुष्के वक्तव्ये संक्षेपेणान्नपानगुणाभिधायकं यज्जःपुरुषीयमाह—यद्यपि यज्जःपुरुषशब्दोऽध्यायादौ नास्ति तथाऽपि प्रश्नादौ विद्यत एवेति तेन यज्जःपुरुष इति प्रश्नं प्राधान्येनाधिकृत्य कृतोऽध्याया यज्जःपुरुषीयः ॥१-२॥

पुरा प्रत्यक्षधर्माणं भगवन्तं पुनर्वसुम् ।
महर्षय उपासीनाः प्रादुश्चक्रुरिमां कथाम्[१] ॥३॥

आत्मेन्द्रियमनोर्थानां योऽयं पुरुषसंज्ञकः ।
राशिरस्यामयानां च प्रागुत्पत्तिविनिश्चये ॥४॥

प्रत्यक्षधर्मत्वं तपःप्रभावात् । इमामिति वक्ष्यमाणाम् । राशिर्मेलकः, अस्य राशेरामयानां च उत्पत्तिविनिश्चयविषयां कथां प्रादुश्चक्रुरित्यन्वयः ॥३-४॥

तदन्तरं काशिपतिर्वामको वाक्यमर्थवित् ।
व्याजहारर्षिसमितिमुपसृत्याभिवाद्य च ॥५॥

किन्नु भोः पुरुषो यज्जस्तज्जास्तस्यामयाः स्मृताः ।
न वेत्युक्ते नरेन्द्रेण प्रोवाचर्षीन् पुनर्वसुः ॥६॥

तामेव परस्परप्रश्नरूपां कथां दर्शयति—तदन्तरमित्यादि । अन्तरशब्दोऽवसरवचनः, तस्मिन्नवसरे इत्यर्थः । वामक इति वामकनामा काशिराजः । यस्माज्जातो यज्जः; तत एव पुरुषजनककारणाज्जाताः तज्जाः । न वेति अन्यतः पुरुषो जायते अन्यतश्च तस्य रोगा इत्यर्थः । नरेन्द्रेणेति काशिराजेन ॥५-६॥

सर्व एवामितज्ञानविज्ञानच्छिन्नसंशयाः ।
भवन्तोऽर्हन्ति नश्छेत्तुं काशिराजे च संशयम्[२] ॥७॥

---

१. समेतानां महर्षीणां प्रादुरासीदियं कथा—(च० नि०)

२. भवन्तश्छेत्तुमर्हन्ति काशिराजस्य संशयम्—(च० नि०)

भवन्त इत्यादि। नोऽस्माकं काशिराजे अस्मत्स्वपक्षे इत्यर्थः। एतेन स्वपक्षे काशिराजे व्यामोहवचनं न वाच्यमिति शिक्षयति। 'भवन्तश्छेतुमर्हन्ति काशिराजस्य संशयम्'' इति पाठस्तु सुगमः ॥७॥

पारीक्षिस्तत्परीक्ष्याग्रे मौद्गल्यो वाक्यमब्रवीत्।
आत्मजः पुरुषो रोगाश्चात्मजाः कारणं हि सः ॥८॥
स चिनोत्युपभुङ्क्ते च कर्म कर्मफलानि च।
न ह्यृते चेतनाधातोः प्रवृत्तिः सुखदुःखयोः ॥९॥

परीक्ष्येति विचार्य, यद्वा भावपक्षे परीक्षा उक्तरूपप्रश्नस्य उपपत्त्यनुपपत्तिभ्यां विचारः तस्याग्रे प्रथममित्यर्थः। यत एवात्मनः पुरुषो जायते तत एव रोगा इत्यर्थः। कारणत्वे हेतुमाह—स चिनोतीत्यादि। चिनोति कर्म तथा कर्मफलानि च शरीरारोग्यविकारादीनि भुङ्क्ते इति योजना। कर्मसहायस्यात्मनः शरीरविकारादिकर्त्तृत्वात् कारणत्वमिति भावः। व्यतिरेकेणापि कारणतां दर्शयति—न ह्यृत इत्यादि। चेतनाधातुरात्मा। सुखदुःखयोरित्यारोग्यरोगयोः ॥८-९॥

शरलोमा तु नेत्याह न ह्यात्माऽऽत्मानमात्मना।
योजयेद्व्याधिभिर्दुःखैर्दुःखद्वेषी कदाचन ॥१०॥
रजस्तमोभ्यां तु मनः परीतं सत्त्वसंज्ञकम्।
शरीरस्य समुत्पत्तौ विकाराणां च कारणम् ॥११॥
वार्योविदस्तु नेत्याह न ह्येकं कारणं मनः।
नर्ते शरीराच्छारीररोगा न मनसः स्थितिः ॥१२॥
रसजानि तु भूतानि व्याधयश्च पृथग्विधाः।
आपो हि रसवत्यस्ताः स्मृता निर्वृत्तिहेतवः ॥१३॥

न ह्येकं कारणं मन इति व्याधिमात्रं प्रति इति शेषः। व्याधिमात्रं प्रति मनसः कारणत्वं कथं नास्तीत्याह—नर्ते इत्यादि। मानसरोगेष्वेव मनसः कारणत्वं, शारीरा वातादिजन्या व्याधयः पुनः शरीरादृते न तिष्ठन्तीति शरीरस्यैव कारणत्वं, न तु मनस इति भावः। शरीरोत्पत्तावपि मनसः कारणत्वं नास्तीत्याह—न मनसः स्थितिरिति। अत्रापि शरीरादृते इति योज्यं, शरीरमन्तरेण रजस्तमःसम्बद्धस्य मनसः स्थितिरेव नास्ति, मनसि रजस्तमःसम्बन्धस्य शरीराधीनत्वात्; तथा रजस्तमःसम्बन्धे सति शरीरोत्पत्तिः, शरीरसम्बद्धे च मनसि रजस्तमःसम्बन्ध इति

परस्पराश्रयप्रसङ्गात् शरीरोत्पत्तिं प्रति रजस्तमःपरीतस्य मनसः कारणत्वं नास्तीति भावः। रसजानीत्यादि। भूतानीत्यादि पृथिव्यादीनि; एतेन तेषां रसजत्वेन तन्मेलकस्य पुरुषस्यापि रसजत्वमिति भावः। निर्वृत्ति-हेतव इति व्याधिपुरुषयोरिति शेषः। एतेन रसावान्तरव्यापारा आपः पुरुषव्याधिनिर्वृत्तिहेतव इत्यर्थः ॥१०–१३॥

हिरण्याक्षस्तु नेत्याह न ह्यात्मा रसजः स्मृतः।
नातीन्द्रियं मनः सन्ति रोगाः शब्दादिजास्तथा ॥१४॥

षड्धातुजस्तु पुरुषो रोगाः षड्धातुजास्तथा।
राशिः षड्धातुजो ह्येष सांख्यैराद्यैः प्रकीर्तितः ॥१५॥

हिरण्याक्ष इत्यादौ मन इति छेदः। अतीन्द्रियमिति हेतुगर्भविशेषणम्, अतीन्द्रियं सूक्ष्मं निरवयवमिति यावत्, यस्मादतीन्द्रिय आत्मा मनोऽप्यतीन्द्रियं तस्मान्न रसजम्; अन्ये तु रसजैन्द्रियकत्वेन रसाज्जायमानयोरात्ममनसोरप्यैन्द्रियकत्वं स्यात् कारणगुणानुविधानादिति बाधमाहुः। व्याधीनामपि रसजत्वं निराकरोति—सन्ति रोगाः शब्दादिजास्तथेति। अहितशब्दरूपादिजन्ये व्याधौ न रसः कारणमित्यर्थः। षड्धातुज इत्यादिना सर्वप्राणिषु षड्धातुसमुदायस्य विद्यमानत्वेन नरगवाश्वादिषु पञ्चभूतान्यात्मेति षड् धातवः। राशिरिति षड्धातुसमुदायः ॥१४-१५॥

तथा ब्रुवाणं कुशिकमाह तन्नेति कौशिकः।
कस्मान्मातापितृभ्यां हि विना षड्धातुजो भवेत् ॥१६॥

पुरुषः पुरुषाद्गौर्गोरश्वादश्वः प्रजायते।
पित्र्या मेहादयश्चोक्ता रोगास्तावत्र कारणम् ॥१७॥

कुशिक इति हिरण्याक्षस्य नामान्तरम्। कस्मादित्याक्षेपे। मातापित्रनपेक्षत्वे सर्वप्राणिषु षड्धातुसमुदायस्य विद्यमानत्वेन नरगवाश्वादिभेदो न स्यादिति भावः। सर्वव्याधीनामपि षड्धातुजन्यत्वं नास्तीत्याह—पित्र्या इत्यादि। पितृतोऽपत्ये भवन्तीति पित्र्याः। आदिशब्देन कुष्ठादीनां ग्रहणम्। स्वपक्षं दर्शयति—तावत्र कारणमिति; तौ मातापितरौ ॥१६-१७॥

भद्रकाप्यस्तु नेत्याह न ह्यन्धोऽन्धात् प्रजायते।
मातापित्रोरपि च ते प्रागुत्पत्तिर्न युज्यते ॥१८॥

कर्मजस्तु मतो जन्तुः कर्मजास्तस्य चामयाः।
न ह्यृते कर्मणो जन्म रोगाणां पुरुषस्य वा ॥१९॥

(तद्)दूषयति—भद्रकाप्य इत्यादि। पुरुषस्य मातापितृकारणत्वेऽन्धेन जनितोऽन्धः स्यादित्यर्थः। हेत्वन्तरमाह—मातापित्रोरित्यादि। ते तव मातापितृकारणतावादिनो मते, प्रागिति सर्गादौ मातापित्रोरप्युत्पत्तिर्न स्यात्; आदिभूतयोर्मातापित्रोरभावादिति भावः ॥१८–१९॥

भरद्वाजस्तु नेत्याह कर्ता पूर्वं हि कर्मणः।
दृष्टं न चाकृतं कर्म यस्य स्यात् पुरुषः फलम्॥२०॥

भावहेतुः स्वभावस्तु व्याधीनां पुरुषस्य च।
खरद्रवचलोष्णत्वं तेजोऽन्तानां यथैव हि॥२१॥

भरद्वाज इति। कर्म च कर्तृजन्यं न तु कर्मजन्यः कर्ता पुरुषः कर्मणो नियतपूर्ववर्तित्वाभावादिति। एतदेवाह—कर्ता पूर्वं हि कर्मण इति। अथ अकृतमेवादौ पुरुषजनकं कर्म भविष्यतीत्याह—दृष्टमित्यादि। भावहेतुरित्युत्पत्तिहेतुः। अत्रैव दृष्टान्तमाह—खरेत्यादितेजोऽन्तानामिति—भूजलानिलतेजसां क्रमात् खरद्रवचलोष्णत्वं यथा स्वभावसिद्धं, तथा व्याधिपुरुषयोरुत्पत्तिरपि स्वभावसिद्धेत्यर्थः[1] ॥२०–२१॥

काङ्कायनस्तु नेत्याह न ह्यारम्भफलं भवेत्।
भवेत् स्वभावाद्भावानामसिद्धिः सिद्धिरेव वा॥२२॥

स्रष्टा त्वमितसङ्कल्पो ब्रह्मापत्यं प्रजापतिः।
चेतनाचेतनस्यास्य जगतः सुखदुःखयोः॥२३॥

तन्नेति भिक्षुरात्रेयो न ह्यपत्यं प्रजापतिः।
प्रजाहितैषी सततं दुःखैर्युञ्ज्यादसाधुवत्॥२४॥

कालजस्त्वेव पुरुषः कालजास्तस्य चामयाः।
जगत् कालवशं सर्वं कालः सर्वत्र कारणम्॥२५॥

भवेदित्यादौ। यदीत्यध्याहार्यं, तेनायमर्थः—यदि स्वभावादेव भावानां विकारशरीरादीनां सिद्धिरसिद्धिर्वा भवेत् तदा आरम्भानां यागकृषिदानाध्ययनादिकर्मणां फलं प्रयोजनं न भवेत्, स्वर्गादिफलस्यापि स्वभावादेव जायमानत्वेन यागादीनां निष्प्रयोजनत्वादिति। स्रष्टेत्यादि—जगतः तथा सुखदुःखयोश्च स्रष्टा प्रजापतिश्चतुरानन इति योजना। स च ब्रह्मणो नारायणस्य अपत्यमंशावतारः। अमितसंकल्प इत्यमितज्ञानः।

---

१. व्याधिपुरुषयोरपि स्वभावसिद्धतेत्यर्थः[2]

(तद्)दूषयति—तन्नेत्यादि। पुरुषं हि प्रजापतिरपत्यं दुःखैर्न युञ्ज्यात्। असाधुर्द्रोहकारी तद्वत् ॥२२-२५॥

तथर्षीणां विवदतामुवाचेदं पुनर्वसुः।
मैवं वोचत तत्त्वं हि दुष्प्रापं पक्षसंश्रयात् ॥२६॥

वादान् सप्रतिवादान् हि वदन्तो निश्चितानिव।
पक्षान्तं नैव गच्छन्ति तिलपीडकवद्गतौ ॥२७॥

मुक्त्वैवं वादसङ्घट्टमध्यात्ममनुचिन्त्यताम्।
नाविधूते तमःस्कन्धे ज्ञेये ज्ञानं प्रवर्तते ॥२८॥

येषामेव हि भावानां संपत् सञ्जनयेन्नरम्।
तेषामेव विपद्व्याधीन् विविधान्समुदीरयेत् ॥२९॥

वादान्तरप्रतिक्षेपको वादः प्रतिवादः। पक्षसंश्रयादिति परमार्थतोऽनिश्चितानपि स्वपक्षाग्रहितया निश्चितानीव वदतः। पक्षान्तं पूर्वपक्षावसानम्। तिलपीडकवद्गताविति तिलपीडार्थयन्त्रोपरि स्थितो मनुष्यस्तिलपीडकः, स यथा चक्रवद् भ्रमणेन गम्यदेशाप्राप्त्या गतौ गमनेऽन्तमवसानं नासादयति पुनः पुनस्तत्रैव भ्रमणात् तथा पक्षसंश्रयत्वाद्वादिनोऽपीत्यर्थः। सङ्घट्टः परस्परपीडको मेलकः। अध्यात्ममिति तत्त्वम्। स्कन्धः समूहः। सिद्धान्तमाह—एषामित्यादि। एषामिति यज्जातीयानां, ते च महाभूतादयः, तेन महाभूतत्वेनैव वातादीनां ग्रहणम्। सम्पदिति प्रशस्तगुणता। नरमिति संयोगिपुरुषम्। विपदिति वैगुण्यम्। समुदीरयेदिति योजयेत्। एषां च ऋषिवादानां कथनं पूर्वपक्षसिद्धान्तश्रवणेन शिष्यव्युत्पादनार्थम् ॥२६-२९॥

अथात्रेयस्य भगवतो वचनमनुनिशम्य पुनरेव वामकः काशिपतिरुवाच भगवन्तमात्रेयं—भगवन्! संपन्निमित्तजस्य पुरुषस्य विपन्निमित्तजानां च रोगाणां किमभिवृद्धिकारणमिति ॥३०॥

तमुवाच भगवानात्रेयः—हिताहारोपयोग एक एव पुरुषवृद्धिकरो भवति, अहिताहारोपयोगः पुनर्व्याधिनिमित्तमिति ॥३१॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच—कथमिह भगवन्! हिताहितानामाहारजातानां लक्षणमनपवादमभिजानीमहे; हितसमाख्यातानामाहारजातानामहितसमाख्यातानां च मात्राकालक्रियाभूमिदेहदोषपुरुषावस्थान्तरेषु विपरीतकारित्वमुपलभामह इति ॥३२॥

एक एवेति अवधारणार्थेनैवकारेणाहारस्य प्राधान्यं सूच्यते न पुनरन्यः प्रतिषिध्यते, स्वप्नाद्याचारस्यापि कारणत्वादिति। व्याधिनिमित्तस्य च तेषामेव विपद्व्याधीन् विविधान् समुदीरयेदित्यनेनैवोक्तत्वाच्च। अनपवादमित्यव्यभिचारि। हिताहिताहारयोर्दुर्बोधतामाह—हितसमाख्यातानामित्यादि। विपरीतकारित्वमिति मात्रादिवशात् पथ्यस्यापथ्यत्वमपथ्यस्यापि पथ्यत्वं भवति। तत्र पथ्या रक्तशाल्यादयोऽतिमात्रा हीनमात्रा वा मात्रादोषादपथ्या भवन्ति। तथा कालवशात्त एव रक्तशालयो लघुत्वाद्बलवदग्नीनां हेमन्ते न हिताः। कालशब्देनेह नित्यग एव कालो गृह्यते, आवस्थिकस्य च पुरुषावस्थाशब्देनैव गृहीतत्वात्। क्रिया संस्कारः, तेन रक्तशालिरसम्यक्स्विन्नत्वादिसंस्कारदोषादहितो भवति, तथा स एव आनूपभूमिजत्वादपथ्यो भवति, तथा देहापेक्षया स एव रक्तशालिर्मेदस्विनो लघुतया न हितो भवति। तदुक्तं—"गुरु चातर्पणं चेष्टं स्थूलानां कर्शनं प्रति।" (सू० २१.२०) इति। तथा स एव दोषे वायौ लघुतया न हितः, दोषशब्देन व्याधेरपि ग्रहणम्। तथा पुरुषस्य बाल्यावस्थायां श्लेष्मप्रधानायां तिक्तादि पथ्यं, तदेव वार्द्धक्ये न पथ्यम्। अवस्थान्तरशब्दश्च मात्रादिभिः प्रत्येकं सम्बध्यते। एवमहितस्यापि मात्रादिपरिग्रहेण हितत्वमुन्नेयम्। अपथ्यानां माषाणामल्पमात्राणां हितत्वं तथा त एव माषा गुरुत्वाद्बलवदग्नीनां हेमन्ते पथ्या इत्यादि ॥३०-३२॥

तमुवाच भगवानात्रेयः—यदाहारजातमग्निवेश! समांश्चैव शरीरधातून् प्रकृतौ स्थापयति विषमांश्च समीकरोतीत्येतद्धितं विद्धि, विपरीतं त्वहितमिति; इत्येतद्धिताहितलक्षणमनपवादं भवति ॥३३॥

एवंवादिनं च भगवन्तमात्रेयमग्निवेश उवाच—भगवन्! न त्वेतदेवमुपदिष्टं भूयिष्ठकल्पाः सर्वभिषजो विज्ञास्यन्ति ॥३४॥

एवमपि मनुष्यबुद्धेरनवध्यवसायः स्यादित्यत आह—न त्वेतदेवमित्यादि। एतदिति हिताहितं, एवमिति लक्षणमात्रेण। भूयिष्ठकल्पा इति नानाप्रकाराः। विज्ञास्यन्ति न त्विति सम्बन्धः ॥३३-३४॥

तमुवाच भगवानात्रेयः—येषां हि विदितमाहारतत्त्वमग्निवेश! गुणतो द्रव्यतः कर्मतः सर्वावयवशश्च मात्रादयो भावाः, त एतदेवमुपदिष्टं विज्ञातुमुत्सहन्ते। यथा तु खल्वेतदुपदिष्टं भूयिष्ठकल्पाः सर्वभिषजो विज्ञास्यन्ति, तथैतदुपदेक्ष्यामो मात्रादीन् भावाननुदाहरन्तः; तेषां हि

बहुविधविकल्पा भवन्ति। आहारविधिविशेषांस्तु खलु लक्षणतश्चावयवतश्चानुव्याख्यास्यामः ॥३५॥

ननु यदि न ज्ञास्यन्ति तर्हि कथं लक्षणमुद्दिष्टमित्याशंक्य यादृशैर्ज्ञातव्यं तानाह—येषां हीत्यादि। द्रव्यत इति कारणतः यथा—इदमाप्यमिदमाग्नेयमित्यादि। सर्वावयवशश्च इति रसवीर्यविपाकप्रभावैः। यथेत्यादौ एतदिति हिताहितम्। भूयिष्ठकल्पा इति नानाप्रकारा उत्तमाधममध्यमाः। मात्रादीन् भावाननुदाहरन्त इति गुरुलघ्वादि[1]गुणवदपरिगणयन्तः, अत्र हेतुमाह—तेषामित्यादि। तेषामिति मात्रादीनाम्। लक्षणत इति लक्ष्यत इति लक्षणमाहारत्वं स्थावरजङ्गमात्मकत्वादि च। अवयवत इत्येकदेशतः, एकदेशाश्च लोहितशाल्यादयः ॥३५॥

तद्यथा—आहारत्वमाहारस्यैकविधमर्थाभेदात्; स पुनर्द्वियोनिः स्थावरजङ्गमात्मकत्वात्; द्विविधप्रभावः हिताहितोदर्कविशेषात्; चतुर्विधोपयोगः पानाशनभक्ष्यलेह्योपयोगात्; षडास्वादः रसभेदतः षड्विधत्वात्; विंशतिगुणः गुरुलघुशीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिलश्लक्ष्णखरसूक्ष्मस्थूलसान्द्रद्रवानुगमात्; अपरिसंख्येयविकल्पः द्रव्यसंयोगकरणबाहुल्यात् ॥३६॥

इदानीं तद्यथेत्यादिना करणबाहुल्यादित्यन्तेनाहारविधिविशेषान् लक्षणतो निरूपयति। अर्थाभेदादिति अभ्यवह्रियमाणार्थाभेदात्। उदर्कं उत्तरकालीनं फलम्। भक्ष्यमिति चर्व्यम्। अनुगमादिति आहारानुगतत्वात्। आत्रेयभद्रकाप्यीये (सू० २६) वक्ष्यमाणाः परत्वादयः पुनर्नात्रोपकारका इति नेहोच्यन्ते। ये तु संयोगकरणे आहारविधौ भूर्युपयोगिनी, ते बहुविधत्वेनापरिसंख्येयविकल्पहेतुत्वेनैव निवेशिते। परिमाणन्तु मात्रा, सा चानुदाहरणीयत्वेन प्रतिज्ञाता 'मात्रादीन् भावाननुदाहरन्तः' इति वचनेन। अतः सुष्ठूक्तं विंशतिगुण इति। द्रव्यसंयोगकरणबाहुल्यादिति द्रव्यं शूकधान्यादि, संयोग आहारद्रव्याणां मेलकः, करणं संस्कारः ॥३६॥

तस्य खलु ये ये विकारावयवा भूयिष्ठमुपयुज्यन्ते, भूयिष्ठकल्पानां च मनुष्याणां प्रकृत्यैव हिततमाश्चाहिततमाश्च, तांस्तान् यथावदुपदेक्ष्यामः ॥३७॥

आहारविधिविशेषान् लक्षणतो निरूप्य अवयवतो निरूपयितुं प्रति-

———————

१. लघुत्वादि[2]

जानीते—तस्य खल्वित्यादि। विकारावयवा इति विकारैकदेशाः। भूयिष्ठकल्पानामिति प्रायेणानेकेषामित्यन्वयः। प्रकृत्येति स्वभावेन, न तु संस्कारसंयोगादिना ॥३७॥

तद्यथा—लोहितशालयः शूकधान्यानां पथ्यतमत्वे श्रेष्ठतमा भवन्ति, मुद्गाः शमीधान्यानाम्, आन्तरिक्षमुदकानां, सैन्धवं लवणानां, जीवन्तीशाकं शाकानाम्, ऐणेयं मृगमांसानां, लावः पक्षिणां, गोधा बिलेशयानां, रोहितो मत्स्यानां, गव्यं सर्पिः सर्पिषां, गोक्षीरं क्षीराणां, तिलतैलं स्थावरजातानां स्नेहानां, वराहवसा आनूपमृगवसानां, चुलुकीवसा मत्स्यवसानां, पाकहंसवसा जलचरविहङ्गवसानां, कुक्कुटवसा विष्किरशकुनिवसानां, अजमेदः शाखादमेदसां, शृङ्गवेरं कन्दानां, मृद्वीका फलानां, शर्करेक्षुविकाराणाम्, इति प्रकृत्यैव हिततमानामाहारविकाराणां प्राधान्यतो द्रव्याणि व्याख्यातानि भवन्ति ॥३८॥

शूकधान्यानामिति निर्धारणे षष्ठी। एवं वक्ष्यमाणेष्वपि ज्ञेयम्। तमप्ग्रहणं स्वार्थिकं, यथा—"युधिष्ठिरः श्रेष्ठतमः कुरूणाम्" इति। चुलुकी शुशु इति ख्यातो जलजन्तुः। पाकहंसः श्वेतहंसः ॥३८॥

अहिततमानप्युपदेक्ष्यामः—यवकाः शूकधान्यानामपथ्यतमत्वेन प्रकृष्टतमा भवन्ति, माषाः शमीधान्यानां, वर्षानादेयमुदकानाम्, ऊषरं लवणानां, सर्षपशाकं शाकानां, गोमांसं मृगमांसानां, काणकपोतः पक्षिणां, भेको बिलेशयानां, चिलिचिमो मत्स्यानाम्, आविकं सर्पिः सर्पिषाम्, अविक्षीरं क्षीराणां, कुसुम्भस्नेहः स्थावरस्नेहानां, महिषवसा आनूपमृगवसानां, कुम्भीरवसा मत्स्यवसानां, काकमद्गुवसा जलचरविहङ्गवसानां, चटकवसा विष्किरशकुनिवसानां, हस्तिमेदः शाखादमेदसां, लकुचं फलानाम्, आलुकं कन्दानां, फाणितमिक्षुविकाराणाम्, इति प्रकृत्यैवाहिततमानामाहारविकाराणां प्रकृष्टतमानि द्रव्याणि व्याख्यातानि भवन्ति; (इति) हिताहितावयवो व्याख्यात आहारविकाराणाम् ॥३९॥

अहिततमानुपदेक्ष्याम इति (अहितेषु) प्रकृष्टतमानिति शेषः। वर्षासु नादेयं वर्षानादेयम्। ऊषरदेशभवमूषरम्। काणकपोत इत्यत्र काणशब्दोऽल्पवचनः। चिलचिमो रोहिताकारो मत्स्यः नन्दिनिरिति प्रसिद्धः। काकमद्गुः पानीयकाकः। चटकः प्रसिद्धः। लकुचम् उलुआफलम्। हिताहितावयव इत्यादि—अत्र व्याख्यातो भवतीति शेषः ॥३९॥

अतो भूयः कर्मौषधानां च प्राधान्यतः सानुबन्धानि द्रव्याण्यनुव्याख्यास्यामः। तद्यथा—अन्नं वृत्तिकराणां श्रेष्ठम्, उदकमाश्वासकराणां (सुरा श्रमहराणां), क्षीरं जीवनीयानां, मांसं बृंहणीयानां, रसस्तर्पणीयानां, लवणमन्नद्रव्यरुचिकराणाम्, अम्लं हृद्यानां, कुक्कुटो बल्यानां, नक्ररेतो वृष्याणां, मधु श्लेष्मपित्तप्रशमनानां, सर्पिर्वातपित्तप्रशमनानां, तैलं वातश्लेष्मप्रशमनानां, वमनं श्लेष्महराणां, विरेचनं पित्तहराणां, बस्तिर्वातहराणां, स्वेदो मार्दवकराणां, व्यायामः स्थैर्यकराणां, क्षारः पुंस्त्वोपघातिनां, (तिन्दुकमनन्नद्रव्यरुचिकराणाम्,) आमं कपित्थमकण्ठ्यानाम्, आविकं सर्पिरहृद्यानाम्, अजाक्षीरं शोषघ्नस्तन्यसात्म्यरक्तसांग्राहिकरक्तपित्तप्रशमनानाम्, अविक्षीरं श्लेष्मपित्तजननानां, महिषीक्षीरं स्वप्नजननानां, मन्दकं दध्यभिष्यन्दकराणां, गवेधुकान्नं कर्शनीयानाम्, उद्दालकान्नं विरूक्षणीयानाम्, इक्षुर्मूत्रजननानां, यवाः पुरीषजननानां, जाम्बवं वातजननानां, शष्कुल्यः श्लेष्मपित्तजननानां, कुलत्था अम्लपित्तजननानां, माषाः श्लेष्मपित्तजननानां, मदनफलं वमनास्थापनानुवासनोपयोगिनां, त्रिवृत् सुखविरेचनानां, चतुरङ्गुलो मृदुविरेचनानां, स्नुक्पयस्तीक्ष्णविरेचनानां, प्रत्यक्पुष्पा शिरोविरेचनानां, विडङ्गं क्रिमिघ्नानां, शिरीषो विषघ्नानां, खदिरः कुष्ठघ्नानां, रास्ना वातहराणाम्, आमलकं वयःस्थापनानां, हरीतकी पथ्यानाम्, एरण्डमूलं वृष्यवातहराणां, पिप्पलीमूलं दीपनीयपाचनीयानाहप्रशमनानां, चित्रकमूलं दीपनीयपाचनीयगुदशोथार्शःशूलहराणां, पुष्करमूलं हिक्काश्वासकासपार्श्वशूलहराणां, मुस्तं साङ्ग्राहिकदीपनीयपाचनीयानाम्, उदीच्यं निर्वापणदीपनीयपाचनीयच्छर्द्यतीसारहराणां, कट्वङ्गं सांग्राहिकपाचनीयदीपनीयानाम्, अनन्ता सांग्राहिकरक्तपित्तप्रशमनानाम्, अमृता सांग्राहिकवातहरदीपनीयश्लेष्मशोणितविबन्धप्रशमनानां, बिल्वं सांग्राहिकदीपनीयवातकफप्रशमनानाम्, अतिविषा दीपनीयपाचनीयसांग्राहिकसर्वदोषहराणाम्, उत्पलकुमुदपद्मकिञ्जल्कः सांग्राहिकरक्तपित्तप्रशमनानां, दुरालभा पित्तश्लेष्मप्रशमनानां, गन्धप्रियङ्गुः शोणितपित्तातियोगप्रशमनानां, कुटजत्वक् श्लेष्मपित्तरक्तसांग्राहिकोपशोषणानां, काश्मर्यफलं रक्तसांग्राहिकरक्तपित्तप्रशमनानां, पृश्निपर्णी सांग्राहिकवातहरदीपनीयवृष्याणां, विदारिगन्धा वृष्यसर्वदोषहराणां, बला सांग्राहिकबल्यवातहराणां, गोक्षुरको मूत्रकृच्छ्रानिलहराणां, हिङ्गुनिर्यासश्छेदनीयदीपनीयानुलोमिकवातकफ-

प्रशमनानाम्, अम्लवेतसो भेदनीयदीपनीयानुलोमिकवातश्लेष्महराणां, यावशूकः स्रंसनीयपाचनीयार्शोघ्नानां, तक्राभ्यासो ग्रहणीदोषशोफार्शोघृतव्यापत्प्रशमनानां, क्रव्यान्मांसरसाभ्यासो ग्रहणीदोषशोषार्शोघ्नानां, क्षीरघृताभ्यासो रसायनानां, समघृतसक्तुप्राशाभ्यासो वृष्योदावर्तहराणां, तैलगण्डूषाभ्यासो दन्तबलरुचिकराणां, चन्दनं दुर्गन्धहरदाहनिर्वापणप्रलेपनानां, रास्नागुरुणी शीतापनयनप्रलेपनानां, लामज्जकोशीरं दाहत्वग्दोषस्वेदापनयनप्रलेपनानां, कुष्ठं वातहराभ्यङ्गोपनाहोपयोगिनां, मधुकं चक्षुष्यवृष्यकेश्यकण्ठ्यवर्ण्यविरजनीयरोपणीयानां, वायुः प्राणसंज्ञाप्रदानहेतूनाम्, अग्निरामस्तम्भशीतशूलोद्वेपनप्रशमनानां, जलं स्तम्भनीयानां, मृद्भृष्टलोष्टनिर्वापितमुदकं तृष्णाच्छर्द्यतियोगप्रशमनानाम्, अतिमात्राशनमामप्रदोषहेतूनां, यथाग्न्यभ्यवहारोऽग्निसन्धुक्षणानां, यथासात्म्यं चेष्टाभ्यवहारौ सेव्यानां, कालभोजनमारोग्यकराणां, तृप्तिराहारगुणानां, वेगसन्धारणमनारोग्यकराणां, मद्यं सौमनस्यजननानां, मद्याक्षेपो धीधृतिस्मृतिहराणां, गुरुभोजनं दुर्विपाककराणाम्, एकाशनभोजनं सुखपरिणामकराणां, स्त्रीष्वतिप्रसङ्गः शोषकराणां, शुक्रवेगनिग्रहः षाण्ढ्यकराणां, पराघातनमन्नाश्रद्धाजननानाम्, अनशनमायुषो ह्रासकराणां, प्रमिताशनं कर्शनीयानाम्, अजीर्णाध्यशनं ग्रहणीदूषणानां, विषमाशनमग्निवैषम्यकराणां, विरुद्धवीर्याशनं निन्दितव्याधिकराणां; प्रशमः पथ्यानां, आयासः सर्वापथ्यानां, मिथ्यायोगो व्याधिकराणां, रजस्वलाभिगमनमलक्ष्मीमुखानां, ब्रह्मचर्यमायुष्याणां, परदाराभिगमनमनायुष्याणां, सङ्कल्पो वृष्याणां, दौर्मनस्यमवृष्याणम्, अयथाबलमारम्भः प्राणोपरोधिनां, विषादो रोगवर्धनानां, स्नानं श्रमहराणां, हर्षः प्रीणनानां, शोकः शोषणानां, निवृत्तिः पुष्टिकराणां, पुष्टिः स्वप्नकराणाम्, अतिस्वप्नस्तन्द्राकराणां, सर्वरसाभ्यासो बलकराणाम्, एकरसाभ्यासो दौर्बल्यकराणां, गर्भशल्यमाहार्याणम्, अजीर्णमुद्धार्याणां, बालो मृदुभेषजीयानां, वृद्धो याप्यानां, गर्भिणी तीक्ष्णौषधव्यवायव्यायामवर्जनीयानां, सौमनस्यं गर्भधारणानां, सन्निपातो दुश्चिकित्स्यानाम्, आमो विषमचिकित्स्यानां, ज्वरो रोगाणां, कुष्ठं दीर्घरोगाणां, राजयक्ष्मा रोगसमूहानां, प्रमेहोऽनुषङ्गिणां, जलौकसोऽनुशस्त्राणां, बस्तिस्तन्त्राणां, हिमवानौषधिभूमीनां, सोम ओषधीनां, मरुभूमिरारोग्यदेशानाम्, अनूपोऽहितदेशानाम्, निर्देशकारित्वमातुरगुणानां, भिषक् चिकित्सा-

ङ्गानां, नास्तिको वर्ज्यानां, लौल्यं क्लेशकराणाम्, अनिर्देशकारित्वमरिष्टानां, अनिर्वेदो वार्तलक्षणानां, वैद्यसमूहो निःसंशयकराणां, योगो वैद्यगुणानां, विज्ञानमौषधीनां, शास्त्रसहितस्तर्कः साधनानां, संप्रतिपत्तिः कालज्ञानप्रयोजनानाम्, अव्यवसायः कालातिपत्तिहेतूनां, दृष्टकर्मता निःसंशयकराणाम्, असमर्थता भयकराणां, तद्विद्यसंभाषा बुद्धिवर्धनानाम्, आचार्यः शास्त्राधिगमहेतूनाम्, आयुर्वेदोऽमृतानां, सद्वचनमनुष्ठेयानाम्, असद्ग्रहणं सर्वाहितानां, सर्वसन्न्यासः सुखानामिति ॥४०॥

औषधानां चेति चकारेणाहारविकाराणामप्यनुकर्षणं, तेनाहारविकाराणां हिताहितैकदेशं व्याख्याय अत ऊर्ध्वं भूयः पुनराहारविकाराणां कर्म तथा औषधानां च कर्म तथा सानुबन्धानि द्रव्याणि अनुव्याख्यास्याम इत्यन्वयः। आहारविकाराणां कर्म यथा—'अन्नं वृत्तिकराणाम्' इत्यादि। औषधानां कर्म यथा—'त्रिवृत्सुखविरेचनानाम्' इत्यादि। प्राधान्यत इत्यनेन न सर्वेषामाहारविकाराणामौषधानां च कर्माभिधातव्यं, किन्तु प्रधानानामिति दर्शयति। सानुबन्धानीति सप्रयोजनानि, यथा—अजीर्णमुद्धार्याणामित्यादि; अजीर्णोद्धारादिकथनं हि चिकित्सोपयोगि व्यक्तमेव। द्रव्याणीति महाभूतानि, यथा—जलं स्तम्भनानां, वायुः प्राणसंज्ञाप्रदानहेतूनाम् इत्यादि। सानुबन्धानि द्रव्याणीत्युपलक्षणं तेनाद्रव्यमपि सानुबन्धमुच्यते, यथा—शास्त्रसहितस्तर्कः साधनानामिति। वृत्तिकराणामिति वृत्तिर्जीवनं (तत्कराणाम्)। हृद्यानामिति रुच्यानाम्। मधु श्लेष्मपित्तप्रशमनानामिति एतच्च द्रवद्रव्येषु, दुरालभा पुनरौषधद्रव्येष्विति ज्ञेयं, एतेन मधुनः (दुरालभायाश्च) पित्तश्लेष्मप्रशमनश्रेष्ठत्वं न विरोधि। एवं वक्ष्यमाणेष्वप्येवंजातीयेषु व्याख्येयं, यथा—अविक्षीरं पित्तश्लेष्मोपचयकरणं पेयेषु, माषाः पुनर्भोज्येषु, शष्कुल्यः पुनर्भक्ष्येष्वित्यादि। उद्दालको वनकोद्रवः। गुदशोथोऽर्शः। कट्वङ्गः श्योनाकः। गन्धप्रियङ्गुः प्रियङ्गुरेव। विदारिगन्धा शालपर्णी। क्रव्यादः श्येनादयः। समघृतेत्यत्र समशब्दः सहार्थः। लामज्जकं सगन्धं वीरणमूलं, उशीरमिति निर्गन्धम्। उद्वेपनं कम्पः। उदकमाश्वासकरस्तम्भनानामिति वक्तव्ये, यत् पृथक् 'उदकमाश्वासकराणां' तथा 'जलं स्तम्भनानां' इति करोति, तेन कर्मद्वयेऽपि जलस्यानन्यसाधारणतां दर्शयति; मिलित्वा गुणपाठे हि उभयकर्तृष्वेव प्राधान्यं स्यात्। एवमन्यत्राप्यनेककर्मकर्तृत्वे यस्य प्राधान्य-

मुक्तं पिप्पलीमूलादौ, तत्र तथाभूतानेककर्मकर्तृष्वेव प्राधान्यं ज्ञेयं, न तु पृथक्कर्मणि। एकाशनभोजनमेककालभोजनम्। शोषद्वाराणामिति शोषकारणानाम्। पराघातनं वधस्थानं, निहतप्राणिदर्शनेन हि विघृणया नान्ने श्रद्धा भवति। प्रमिताशनं स्तोकभोजनम्। विषमाशनमतीतकालभोजनम्। निन्दितव्याधिः कुष्ठादिः। अलक्ष्मीमुखानामिति अलक्ष्मीकारणानाम्। मिथ्यायोगोऽनुचितोयोगोऽयोगातियोगमिथ्यायोग इत्यर्थः। सङ्कल्पः स्त्रीसङ्गसङ्कल्पः। अनुषङ्गः पुनःपुनर्भवनम्। तन्त्राणामिति कर्मणाम्। सोम ओषधिविशेषः पञ्चदशपर्वा। वार्तलक्षणानामित्यसारलक्षणानाम्। विज्ञानं तत्त्वज्ञानमौषधादिज्ञानं वा। साधनानामिति ज्ञानसाधनानाम्। कालानतिक्रमेण कार्यकरणं सम्प्रतिपत्तिः, अव्यवसायोऽनुद्योगः, अध्यवसाय इति पाठे अध्यवसायः कर्तव्यतामात्रेण ज्ञानम्। अमृतानामिति जीवितप्रदानहेतूनाम्। सर्वसन्न्यास इति सर्वविषयत्यागः स चात्यन्तिकसुखस्य मोक्षस्य हेतुः ॥४०॥

भवन्ति चात्र—

अग्र्याणां शतमुद्दिष्टं यद्द्विपञ्चाशदुत्तरम्।
अलमेतद्विकाराणां विघातायोपदिश्यते ॥४१॥

अन्नं वृत्तिकराणामित्यारम्भ्य यदुक्तं तस्य संख्याकथनपूर्वकं विकारप्रशमकतामाह—अग्र्याणामित्यादि। अग्र्याणामिति बलवत्कर्मणाम्[1]। अलमिति समर्थम्। अत्र ज्वरादीनामतिपीडाकरत्वादि ज्ञात्वा भिषगातुरश्च प्रशमेऽवहितो भवति, (इति) ज्वरादिज्ञानमपि विकाराणां विघाताय समर्थं भवति ॥४१॥

समानकारिणो येऽर्थास्तेषां श्रेष्ठस्य लक्षणम्।
ज्यायस्त्वं कार्यकर्तृत्वे वरत्वं चाप्युदाहृतम् ॥४२॥

वातपित्तकफानां च यद्यत् प्रशमने हितम्।
प्राधान्यतश्च निर्दिष्टं यद्व्याधिहरमुत्तमम् ॥४३॥

एतन्निशम्य निपुणं चिकित्सां संप्रयोजयेत्।
एवं कुर्वन् सदा वैद्यो धर्मकामौ समश्नुते ॥४४॥

अग्र्याधिकारे यदुक्तं तत्सङ्गृह्णाति—समानेत्यादि। समानकारिणस्तुल्यकर्माण येऽर्थाः शाल्यादयः तेषां मध्ये यः श्रेष्ठो रक्तशाल्यादिः तस्य

———

१. कर्मकारिणाम्[2]

लक्षणमुपदर्शनं कृतमिति शेषः, यथा—रक्तशालयः शूकधान्यानां मध्ये पथ्यतमत्वेन श्रेष्ठा तथा यवका अपथ्यतमत्वेन श्रेष्ठा इत्यादि। तथा कार्यकर्तृत्वे हितरूपकार्यकर्तृत्वे सति ज्यायस्त्वमुत्कृष्टत्वमुदाहृतं, यथा—'अन्नं वृत्तिकराणाम्' इत्यादि। तथा कार्यकर्तृत्वे अहितरूपकार्यकर्तृत्वे सत्यवरत्वमधमत्वं च, यथा—'शुक्रवेगनिग्रहः षाण्ढ्यकराणाम्' इत्यादि। वातपित्तेत्यादिप्रशमनरूपे कार्ये वातपित्तकफेभ्यो यद्यद्धितं तदप्युदाहृतं, यथा—'बस्तिर्वातहराणाम्' इत्यादि। यद्व्याधिहरमुत्तममिति—'खदिरः कुष्ठहराणाम्' इत्यादि ॥४२-४४॥

पथ्यं पथोऽनपेतं यद्यच्चोक्तं मनसः प्रियम्।
यच्चाप्रियमपथ्यं च नियतं तन्न लक्षयेत् ॥४५॥

मात्राकालक्रियाभूमिदेहदोषगुणान्तरम् ।
प्राप्य तत्तद्धि दृश्यन्ते ते ते भावास्तथा तथा ॥४६॥

तस्मात् स्वभावो निर्दिष्टस्तथा मात्रादिराश्रयः।
तदपेक्ष्योभयं कर्म प्रयोज्यं सिद्धिमिच्छता ॥४७॥

स्रोतोरूपत्वेन मार्गसाधर्म्यात् शरीरमेव पन्थास्तस्मादनपेतं शरीरस्यानपकारकं यत्तत् पथ्यमित्यन्वयः। एवमपि मानसदोषनिवर्तकस्य धैर्यज्ञानादेस्तथा मनोऽनुकूलस्य चाभीष्टलाभादेः पथ्यस्य सङ्ग्रहो न स्यादित्यत उक्तं—यच्चापि मनसः प्रियमिति। एतेन, 'मनःशरीरानुपघाति पथ्यम्' एतत् विपरीतमपथ्यमिति सिद्धम्। ननु एतच्च लक्षणमनुगतं तथा ज्वरादिहरतिक्तभेषजस्य मनसोऽप्रियत्वेनासङ्ग्रहः स्यादिति। अत्र केचिल्लक्षणद्वयमेव तदिति वदन्ति। **अस्मत्पितृचरणास्तु** व्याचक्षते—आयुर्वेदबोधितो मार्गः[1] पन्थाः, तस्मादनपेतमायुर्वेदाविरुद्धं यदाहाराचारादि तदेव पथ्यमिति, तेन (न) कश्चिद्दोषः। तदेतल्लक्षणमुक्त्वा समासेन लक्ष्यमप्याह—यच्चोक्तं मनसः (प्रियमिति)—प्रियमित्यनुकूलं, तद्दोषनिवर्तकमिति यावत्। चकारो मनस इत्यनन्तरं द्रष्टव्यः, तेन शारीरदोषनिवर्तकं यदाहारादि तदपि पथ्योदाहरणतया ज्ञातव्यमित्यर्थः। तदेतदाहाराचाराणां पथ्यत्वमेवेदं सर्वदा इत्येवंरूपं किं विद्यते ? नास्ति, अतस्तत्र लक्ष्यते। कुतो नास्तीत्याह—मात्रेत्यादि। गुणान्तरमिति मात्रादि गुणान्तरं प्राप्य ते ते भावा हितास्तथा प्रियाश्चाहाराचारास्तथा दृश्यन्ते हितोक्ता अपि अहिताश्च, अहितोक्ता अपि हिताश्च दृश्यन्त इत्यर्थः।

१. आयुर्वेदोदितमार्गः[2]

एवं प्रियमपि मधुरादि अप्रियं, तिक्ताद्यप्रियमपि प्रियं दृश्यत इत्यर्थः। तदुदाहरणं यथा—पथ्यं तावद्घृतं, तदतिमात्रमपथ्यं, काले च वसन्तेऽपथ्यं तथा संस्कारेण च विरुद्धद्रव्यसंस्कृतमपथ्यं, भूमौ चानूपायामपथ्यम्, एवं देह इति स्थूले, एवं दोषे (च कफे)ऽपथ्यम्। तदाऽपथ्यमपि विषं मात्रादिना हितं, यथा—'उदरे विषस्य तिलं दद्यात्' इति। तस्मादित्यादि—यस्मादेवमेकान्तेन पथ्यत्वमपथ्यत्वं चानिश्चितं तस्मात्प्रायेण यः पथ्यस्वभावो रक्तशाल्यादिस्तथाऽपथ्यस्वभावश्च यवकादिः स निर्दिष्टः तथा यमाश्रित्य भावानां पथ्यत्वं (अपथ्यत्वं) च भवति स मात्राकालादिराश्रयश्च निर्दिष्ट इत्यर्थः। उभयमिति स्वभावं मात्रादिकं च ॥४५-४७॥

तदात्रेयस्य भगवतो वचनमनुनिशम्य पुनरपि भगवन्तमात्रेयमग्निवेश उवाच—यथोद्देशमभिनिर्दिष्टः केवलोऽयमर्थो भगवता श्रुतश्चास्माभिः। आसवद्रव्याणामिदानीमनपवादं लक्षणमनतिसंक्षेपेणोपदिश्यमानं शुश्रूषामह इति ॥४८॥

तमुवाच भगवानात्रेयः—धान्यफलमूलसारपुष्पकाण्डपत्रत्वचो भवन्त्यासवयोनयोऽग्निवेश! संग्रहेणाष्टौ शर्करानवमीकाः। तास्वेव द्रव्यसंयोगकरणतोऽपरिसंख्येयासु यथापथ्यतमानामासवानां चतुरशीतिं निबोध। तद्यथा—सुरासौवीरतुषोदकमैरेयमेदकधान्याम्लाः षड् धान्यासवा भवन्ति, मृद्वीकाखर्जूरकाश्मर्यधन्वनराजादनतृणशून्यपरूषकाभयामलकमृगलिण्डिकाजम्बवकपित्थकुवलबदरकर्कन्धुपीलुप्रियालपनसन्यग्रोधाश्वत्थप्लक्षकपीतनोदुम्बराजमोदश्रृङ्गाटकशङ्खिनीफलासवाः षड्विंशतिर्भवन्ति, विदारिगन्धाश्वगन्धाकृष्णगन्धाशतावरीश्यामात्रिवृद्दन्तीद्रवन्तीबिल्वोरुबूकचित्रकमूलैरेकादश मूलासवा भवन्ति, शालप्रियकाश्वकर्णचन्दनस्यन्दनखदिरकदरसप्तपर्णार्जुनासनारिमेदतिन्दुककिणिहीशमीशुक्तिशिंशपाशिरीषवञ्जुलधन्वनमधूकैः सारासवा विंशतिर्भवन्ति, पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्रमधूकप्रियङ्गुधातकीपुष्पैर्दश पुष्पासवा भवन्ति, इक्षुकाण्डेक्षिवक्षुवालिकापुण्ड्रकचतुर्थाः काण्डासवा भवन्ति, पटोलताडकपत्रासवौ द्वौ भवतः, तिल्वकलोध्रैलवालुकक्रमुकचतुर्थास्त्वगासवा भवन्ति, शर्करासव एक एवेति। एवमेषामासवानां चतुरशीतिः परस्परेणासंसृष्टानामासवद्रव्याणामुपनिर्दिष्टा भवति। एषामासवानामासुतत्वादासवसंज्ञा। द्रव्यसंयोगविभागविस्तरस्त्वेषां बहुविधकल्पः संस्कारश्च। यथास्वं संयोगसंस्कारसंस्कृता ह्यासवाः स्वं कर्म कुर्वन्ति। संयोगसंस्कारदेशकालमात्रादयश्च भावास्तेषां तेषामासवानां ते ते

समुपदिश्यन्ते तत्तत्कार्यमभिसमीक्ष्येति ॥४९॥

इदानीमग्र्याधिकारादासवमध्येऽग्र्यास्तानाह—अथेत्यादि। केवल इति सम्पूर्णः। अत्र धान्यासवादीनामवान्तरभेदोऽस्तीति सूचनार्थं धान्यादि-योनीनाम् एकत्रैव पाठः। शर्करासवस्य तु अवान्तरभेदो नास्तीति शर्करायाः पृथक् पाठः, अत एव शर्करासवस्त्वेक एवेति वक्ष्यति। कारणत इति संस्कारतः। सौवीरं निस्तुषयवकृतं, मैरेयं सुराकृता सुरा, मेदको भक्तकिण्वकृता सुरा, जगलो ख्यातः। तृणशून्यं केतकी, मृगलिण्डिका बिभीतकं, कुवलादयस्त्रयो बदरभेदाः। कदरः श्वेतखदिरः, अश्वकर्णः शाल-भेदः, अरिमेदो विट्खदिरः, शुक्तिर्बदरी। पद्मादयः सप्त तद्भेदाः। इक्षुग्रह-णेनैव पुण्ड्रकेऽपि लब्धे तत् (पुन)र्ग्रहणं तस्य प्राधान्यख्यापनार्थम्। तिल्वकः शाबर लोध्रः, लोध्रस्तु पट्टिकालोध्रः। क्रमुकं पूगफलम्। आसुत-त्वादिति सन्धानरूपत्वात्। द्रव्यसंयोगविभागविस्तरस्त्विति[1] द्रव्याणामा-वापोद्वापप्रपञ्चः तथा संस्कारश्च बहुविधविकल्प इति योजना। संयोग-संस्कारकरणप्रयोजनमाह—यथास्वमित्यादि। यथास्वमिति यद्यत्र युज्यते; देशो धान्यराश्यादिः, कालः पक्षमासादिः, मात्रा सन्धानद्रव्यपरिमाणम्। आदिशब्दाद् द्रव्यस्वभावेतिकर्तव्यताग्रहणम्। तत्तत्कार्यमिति तत्तद्दोष-व्याधिप्रशमनरूपं कार्यम् ॥४८-४९॥

भवति चात्र—

मनःशरीराग्निबलप्रदानामस्वप्नशोकारुचिनाशनानाम्।
संहर्षणानां प्रवरासवानामशीतिरुक्ता चतुरुत्तरैषा ॥५०॥

मनःशरीरेत्यादिना आसवगुणकथनम् ॥५०॥

तत्र श्लोकः—

शरीररोगप्रकृतौ मतानि तत्त्वेन चाहारविनिश्चयं च।
उवाच यज्जःपुरुषादिकेऽस्मिन् मुनिस्तथाऽग्र्याणि वरासवांश्च ॥५१॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने यज्जःपुरुषीयो नाम पञ्चविंशोऽध्यायः ॥२५॥

शरीररोगप्रकृतौ मतानीति शरीररोगकारणे ये मुनीनां मतभेदा-स्तान् ॥५१॥

॥ इति श्रीशिवदाससेनकृतायां चरकतत्त्वप्रदीपिकायां यज्जःपुरुषीयः समाप्तः ॥ २५ ॥

---

१. द्रव्यसंयोगविभागस्तु[२]

षड्विंशोऽध्यायः

अथात आत्रेयभद्रकाप्यीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

इदानीं पूर्वाध्यायोक्तस्याहारस्य रसवीर्यविपाकज्ञानार्थं रसवीर्यविपाकाभिधायकमात्रेयभद्रकाप्यीयमाह—अथेत्यादि ॥१-२॥

आत्रेयो भद्रकाप्यश्च शाकुन्तेयस्तथैव च।
पूर्णाक्षश्चैव मौद्गल्यो हिरण्याक्षश्च कौशिकः ॥३॥

यः कुमारशिरा नाम भरद्वाजः स चानघः।
श्रीमान् वार्योविदश्चैव राजा मतिमतां वरः ॥४॥

निमिश्च राजा वैदेहो बडिशश्च महामतिः।
काङ्कायनश्च बाह्लीको बाह्लीकभिषजां वरः ॥५॥

एते श्रुतवयोवृद्धा जितात्मानो महर्षयः।
वने चैत्ररथे रम्ये समीयुर्विजिहीर्षवः ॥६॥

तेषां तत्रोपविष्टानामियमर्थवती कथा।
बभूवार्थविदां सम्यग्रसाहारविनिश्चये ॥७॥

रसाहारविनिश्चय इति रसविनिश्चयपूर्वक आहारविनिश्चयो रसाहारविनिश्चयः ॥३-७॥

एक एव रस इत्युवाच भद्रकाप्यः, यं पञ्चानामिन्द्रियार्थानामन्यतमं जिह्वावैषयिकं भावमाचक्षते कुशलाः, स पुनरुदकादनन्य इति। द्वौ रसाविति शाकुन्तेयो ब्राह्मणः, छेदनीय उपशमनीयश्चेति। त्रयो रसा इति पूर्णाक्षो मौद्गल्यः, छेदनीयोपशमनीयसाधारणा इति। चत्वारो रसा इति हिरण्याक्षः कौशिकः, स्वादुर्हितश्च स्वादुरहितश्चास्वादुर्हितश्चास्वादुरहितश्चेति। पञ्च रसा इति कुमारशिरा भरद्वाजः, भौमौदकाग्नेयवायव्यान्तरिक्षाः। षड्रसा इति वार्योविदो राजर्षिः, गुरुलघुशीतोष्णस्निग्धरूक्षाः। सप्त रसा इति निमिर्वैदेहः, मधुराम्ललवणकटुतिक्तकषायक्षाराः। अष्टौ रसा इति बडिशो धामार्गवः, मधुराम्ललवणकटुतिक्तकषायक्षाराव्यक्ताः। अपरिसंख्येया

रसा इति काङ्कायनो बाह्लीकभिषक्, आश्रयगुणकर्मसंस्वादविशेषाणामपरिसंख्येयत्वात् ॥८॥

तत्र, "पाको नास्ति विना वीर्याद्वीर्यं नास्ति विना रसात् ।" (सु० सू० ४०.१५) इति वीर्यविपाकयो रसाधीनत्वात् प्रथमं रसविनिश्चयप्रकरणमारभते—एक एवेत्यादि। इन्द्रियार्थानामिति निर्धारणे षष्ठी। अन्यतममित्येकतमम्। जिह्वावैषयिकमिति जिह्वाग्राह्यजातीयं, एतेन इन्द्रियरसस्यापि ग्रहणम्। भावमिति रसाभावव्यवच्छेदाय। स पुनरुदकादनन्य इति गुणगुणिनोरभेदात्। छेदनीय इति कर्शनीयः। उपशमनीय इति बृंहणः। साधारण इति आग्नेयसौम्यांशसम्बन्धाल्लङ्घनबृंहणयोः कर्ता यथा तैलं; यदुक्तं **वाग्भटे**—"कृशानां बृंहणायालं स्थूलानां कर्शनाय च।" (अ० हृ० सू० ५.५६) इति। स्वादुरित्यभीष्टो रसः। आश्रयो द्रव्यं, संस्वादो रसानामवान्तरभेदः ॥८॥

षडेव रसा इत्युवाच भगवानात्रेयः पुनर्वसुः, मधुराम्ललवणकटुतिक्तकषायाः। तेषां षण्णां रसानां योनिरुदकं, छेदनोपशमने द्वे कर्मणी, तयोर्मिश्रीभावात् साधारणत्वं, स्वाद्वस्वादुता भक्तिः, हिताहितौ प्रभावौ, पञ्चमहाभूतविकारास्त्वाश्रयाः प्रकृतिविकृतिविचारदेशकालवशाः, तेष्वाश्रयेषु द्रव्यसंज्ञकेषु गुणा गुरुलघुशीतोष्णस्निग्धरूक्षाद्याः; क्षरणात् क्षारः, नासौ रसः, द्रव्यं तदनेकरससमुत्पन्नमनेकरसं कटुकलवणभूयिष्ठमनेकेन्द्रियार्थसमन्वितं करणाभिनिर्वृत्तम्; अव्यक्तीभावस्तु खलु रसानां प्रकृतौ भवत्यनुरसेऽनुरससमन्विते वा द्रव्ये; अपरिसंख्येयत्वं पुनस्तेषामाश्रयादीनां भावानां विशेषापरिसंख्येयत्वान्न युक्तम्, एकैकोऽपि ह्येषामाश्रयादीनां भावानां विशेषानाश्रयते विशेषापरिसंख्येयत्वात्, न च तस्मादन्यत्वमुपपद्यते; परस्परसंसृष्टभूयिष्ठत्वान्न चैषामभिनिर्वृत्तेर्गुणप्रकृतीनामपरिसंख्येयत्वं भवति; तस्मान्न संसृष्टानां रसानां कर्मोपदिशन्ति बुद्धिमन्तः। तच्चैव कारणमपेक्षमाणाः षण्णां रसानां परस्परेणासंसृष्टानां लक्षणपृथक्त्वमुपदेक्ष्यामः ॥९॥

एक एव रस इत्यादि यदुक्तं तन्निराकरोति—तेषामित्यादि। षण्णां रसानामित्यनेन रसस्यैकत्वावधारणं प्रत्युक्तं, रसभेदस्य प्रत्यक्षसिद्धत्वादिति भावः। योनिराधारकारणम्, एतेन 'स पुनरुदकादनन्यः' इति प्रत्याख्यातं कार्यकारणयोरभेदस्य दुरुपपन्नत्वादिति भावः। छेदनोपशमने कर्मणी, तयोर्मिश्रीभावाच्च साधारणत्वमित्यनेन द्वितीयतृतीयपक्षौ निराकृतौ। भक्तिरिच्छेत्यर्थः, तेन यो यमिच्छति स तस्य स्वादुरितरः

पुनरस्वादुरिति पुरुषापेक्षौ धर्मौ, न रसभेदकारिणावित्यर्थः। पञ्चमहाभूतेत्यादौ 'तु' शब्दोऽवधारणे; तेनाश्रया एव, न रसा इत्यर्थः। वार्योविदमतं निराकरोति—प्रकृतीत्यादि। गुरुलघ्वादयो हि प्रकृत्यादिवशा गुणा न तु रसा इत्यर्थः। तत्र प्रकृतिवशा यथा—मुद्गाः कषाया मधुराश्च सन्तः प्रकृत्या लघवः; एतद्धि लाघवं स्वाभाविकमेव, न तु रसवशं, तथा सति कषायमधुरत्वाद्गुरुत्वं स्यात्, वक्ष्यति च—"स्वादुर्गुरुत्वादधिकः कषायाल्लवणोऽवरः।" (सू० २६.५५) इति; विकृतिवशं यथा—व्रीहेर्लाजानां लघुत्वं तथा सक्तुसिद्धपिण्डिकानां गुरुत्वम्; विचारणा विचारो द्रव्यान्तरसंयोग इत्यर्थः, तद्वशं यथा—उष्णवीर्यस्यापि तैलस्य चन्दनोशीरादिशीतवीर्यद्रव्यसंस्काराच्छैत्यं तथा शीतवीर्यस्यापि घृतस्य तत्तद्द्रव्यसंयोगादुष्णता, तथा मांसरससिद्धस्य रक्तशालेर्गुरुत्वमित्यादि। (भूमि)-देशवशं यथा—आनूपोद्भवानि गुरूणि, जाङ्गलोद्भवानि लघूनि; शरीरदेशवशं यथा—"सक्थिमांसाद्गुरुतरं स्कन्धक्रोडशिरस्पदाम्।" (सू० २७.३३४ (पा०) इत्यादि, बालमांसं मृद्वित्यादि। सप्तमं रसं दूषयति—क्षरणादित्यादि। क्षरणादित्यधोगमनक्रियायोगात् क्षारो द्रव्यं, न रसः तस्य निष्क्रियत्वादिति भावः। (क्षारस्य) द्रव्यत्वे हेत्वन्तरमाह—तदनेकेत्यादि। तत् क्षारद्रव्यमनेकरसेभ्यो मुष्ककापामार्गादिभ्य उत्पन्नत्वादनेकरसं, कारणगुणानुविधायित्वात् कार्यस्येति भावः। अनेकरसत्वमेवाह—कटुलवणभूयिष्ठमिति। हेत्वन्तरमाह—अनेकेन्द्रियार्थसमन्वितमिति। क्षारो हि स्पर्शेन गन्धेन चान्वितः, तेन द्रव्यं, न रसः तस्य (स्पर्श)गन्धरहितत्वादित्यर्थः। हेत्वन्तरमाह—करणाभिनिर्वृत्तमिति; करणेन भस्मस्रावादिना निर्वृत्तं, (न) रसः पुनरनेन प्रकारेण क्रियत इति भावः। अष्टमं रसं निराकरोति—अव्यक्तीभाव इत्यादि। अभूततद्भावे च्विप्रत्ययेणैव बोध्यते मधुरादीनां रसानामव्यक्तत्वं तदाह—प्रकृतावित्यादि। प्रकृतौ रसकारणे जले तथाऽनुरसे प्रधानं रसमनुगते रसे यथा वेणुयवे कषायोऽनुरसः सोऽव्यक्तः। अनुरससमन्वित इति सर्वानुरसयुक्ते, यथा—विषे; वचनं हि—"उष्णमनिर्देश्यरसम्" (चि० २३.२४) इति। किंवा, 'अणुरससमन्विते' इति पाठः, अणुशब्दोऽल्पवचनः, तेनाणुरसेन एकेन मरिचेन शर्करापले युक्तं कटुत्वमव्यक्तं स्यादिति। अपरिसंख्येयपक्षं दूषयति—अपरिसंख्येयत्वमित्यादि। आदिशब्देन (आश्रय गुणकर्मसंस्वादानां ग्रहणम्, आश्रयगुणकर्मसंस्वादानां ये विशेषा भेदास्तेषामपरिसंख्येयत्वात् तेषां रसानामपरिसंख्येयत्वं यदुच्यते तन्न युक्तं,

अत्र हेतुमाह—एकैकोऽपीत्यादि। एषामाश्रयगुणकर्मसंस्वादानां विशेषानेकैकोऽपि मधुरादिराश्रयते, न च तस्मादाश्रयादिभेदादन्यत्वमाश्रितस्य मधुरादेर्भवति। एतेन आश्रयादय एव परं भिन्नाः, मधुरादिस्त्वेक एवेत्यर्थः। तथाहि—यद्यपि शालिमुद्गघृतक्षीरादयो मधुरस्याश्रया भिन्नाः, तथाऽपि तत्र मधुरत्वजात्याक्रान्त एक एव रसो भवति, बलाकाक्षीरादिषु शुक्लवर्णवत्। एवं गुणानां गुरुपिच्छिलादीनामन्यत्वेऽपि तथा कर्मणां रसादिवर्धनबलवर्णकरणादीनां भिन्नत्वेऽपि तथा मधुरस्यावन्तरास्वादभेदेऽपि न मधुररसान्यत्वं मधुरत्वजात्यनतिक्रमादिति भावः। ननूक्तरीत्या मा भूदसंख्येयत्वं रसानां, परस्परसंयोगात्तु तद्भविष्यतीत्यत आह—परस्परसंसृष्टेत्यादि। संसृष्टमिति भावे क्तः, गुणप्रकृतीनामिति परस्परसंसर्गहेतुत्वात् मधुरादिगुणा एव प्रकृतयः, तासां मधुरादिषड्गुणस्वरूपाणामित्यर्थः। तथा च परस्परसंसर्गभूयिष्ठत्वादेषां रसानामभिनिर्वृत्तेः प्रकृतिभूतानां मधुरादिगुणानामसंख्येयत्वं न चेति योजना। तेन रसानां रसान्तरसंसर्गे रसावान्तरभेदसंसर्गे वा तत्संसर्गाणामेवापरिसंख्येयत्वं, न पुनः प्रकृतिभूतमधुरादिषड्रसानां षट्त्वातिक्रमः, यथा दोषाणां परस्परसंसर्गभूयस्त्वेऽपि त्रित्वानतिक्रम इत्यर्थः। यतश्च संसृष्टानां रसानां मधुरादिषड्रसप्रकृतिकत्वान्न रसान्तरत्वम्, अत एव संसृष्टरसानां पृथक्कर्म शास्त्रान्तरेऽपि नोक्तमित्याह—तस्मान्न संसृष्टानामित्यादि। कर्म लाघवगौरवादिकं, न केवलमन्यशास्त्रकारैः संसृष्टानां रसानां कर्म पृथक् नोपदिष्टं किन्तु वयमपि नोपदेक्ष्याम इत्याह—तच्चैवेत्यादि। रसानां परस्परसंसर्गेऽपि प्रकृतिभूतषड्रसेभ्योऽनधिकगुणकर्मत्वं, लक्षणेन पृथक्त्वं लक्षणपृथक्त्वं, उपदेक्ष्याम इति मधुरो रस इत्यादिना ग्रन्थेनेत्यर्थः। उपदेक्ष्याम इत्यनन्तरं न तु संसृष्टानामिति शेषः ॥९॥

अग्रे तु तावद्द्रव्यभेदमभिप्रेत्य किञ्चिदभिधास्यामः। सर्वं द्रव्यं पाञ्चभौतिकमस्मिन्नर्थे; तच्चेतनावदचेतनं च, तस्य गुणाः शब्दादयो गुर्वादयश्च द्रवान्ताः, कर्म पञ्चविधमुक्तं वमनादि ॥१०॥

तत्र रसानां द्रव्याश्रयत्वेन प्रथमं द्रव्याभिधानं प्रतिजानीते—अग्रे त्वित्यादि। अभिप्रेत्येति प्रतिपादनीयतया संगृह्य। किञ्चिदित्यायुर्वेदसिद्धान्तो(दितं)[1], न तु शास्त्रान्तरस्येत्यर्थः, नैयायिकादिभिः पाञ्च-

---

१. अस्मिन्नर्थ इत्यस्मिन् प्रकरणे, तेन पाञ्चभौतिकत्वं यद् द्रव्याणां तदायुर्वेदसिद्धान्तः (न्तानुसारं ?)[a]

भौतित्वानभ्युपगमात्। द्रवान्ता इत्यनेन पूर्वोक्तान् विंशतिगुणानाह। अत्र च परत्वादीनामनभिधानं तेषां चिकित्सायामप्राधान्यसूचनार्थम्। उक्तमित्यपामार्गतण्डुलीये। एतच्च प्राधान्यादुक्तं, तेन बृंहणाद्यपि बोध्यम् ॥१०॥

तत्र द्रव्याणि गुरुखरकठिनमन्दस्थिरविशदसान्द्रस्थूलगन्धगुणबहुलानि पार्थिवानि, तान्युपचयसङ्घातगौरवस्थैर्यकराणि; द्रवस्निग्धशीतमन्दमृदुपिच्छिलरसगुणबहुलान्याप्यानि, तान्युपक्लेदस्नेहबन्धविष्यन्दमार्दवप्रह्लादकराणि; उष्णतीक्ष्णसूक्ष्मलघुरूक्षविशदरूपगुणबहुलान्याग्नेयानि, तानि दाहपाकप्रभाप्रकाशवर्णकराणि; लघुशीतरूक्षखरविशदसूक्ष्मस्पर्शगुणबहुलानि वायव्यानि, तानि रौक्ष्यग्लानिविचारवैशद्यलाघवकराणि; मृदुलघुसूक्ष्मश्लक्ष्णशब्दगुणबहुलान्याकाशात्मकानि, तानि मार्दवशौषिर्यलाघवकराणि ॥११॥

पार्थिवादिस्वरूपमाह—तत्रेत्यादि। बहुलशब्दो गन्धेनैव सम्बध्यते यतो गन्धगुणबहुला पृथिव्येव भवति, अन्यत्रापि गन्धगुणसम्बन्धः पृथिवीसम्बन्धादेवेति; अत एव द्रव्यान्तरलक्षणेऽपि वैशेषिकगुणोऽन्त एव पठ्यते। पार्थिवानीति पृथिवीभूतबहुलानीत्यर्थः। एवमाप्यानीत्याद्यपि बोध्यम्। सङ्घातः काठिन्यं, स्थैर्यमविचलत्वं, बन्धः परस्परसङ्घटनं, सूक्ष्मं सूक्ष्मस्रोतोऽनुसारि। विचारो गतिः। शौषिर्यं बहुछिद्रता ॥११॥

अनेनोपदेशेन नानौषधिभूतं जगति किंचिद्द्रव्यमुपलभ्यते तां तां युक्तिमर्थं च तं तमभिप्रेत्य ॥१२॥

अनेनेति प्रतिनियतगुणद्रव्योपदेशेन, तेन पार्थिवादि द्रव्यं यद्गुणं तद्गुणे देहे सम्पाद्ये तद्भेषजं भवतीत्यर्थः। तच्च पार्थिवादि द्रव्यं न सर्वथा सर्वस्मिन् व्याधौ भेषजमित्याह—तां तामित्यादि। युक्तिमिति उपायम्, अर्थमिति प्रयोजनम्, अभिप्रेत्य अधिकृत्य; तेन केनचिदुपायेन क्वचित् प्रयोजने किञ्चिद्द्रव्यमौषधं स्यात् न सर्वत्रेत्यर्थः। एतेन वैरोधिकानां तथा विषमन्दकादीनां सर्वदा अपथ्यस्वभावानामपि संयोगसंस्कारदेशकालाद्यपेक्षया भेषजत्वमपि क्वचिद्भवतीति सुष्ठूक्तं नानौषधं द्रव्यमिति ॥१२॥

न तु केवलं गुणप्रभावादेव द्रव्याणि कार्मुकाणि भवन्ति; द्रव्याणि

हि द्रव्यप्रभावाद्गुणप्रभावाद्द्रव्यगुणप्रभावाच्च तस्मिंस्तस्मिन् काले तत्तदधिकरणमासाद्य तां तां च युक्तिमर्थं च तं तमभिप्रेत्य यत् कुर्वन्ति तत् कर्म; येन कुर्वन्ति तद्वीर्यं; यत्र कुर्वन्ति तदधिकरणं; यदा कुर्वन्ति स कालः; यथा कुर्वन्ति स उपायः; यत् साधयन्ति तत् फलम् ॥१३॥

उक्तं पार्थिवादिद्रव्याणां न केवलं गुरुखरादिगुणयोगादेव भेषजत्वं किन्त्वन्यथापीत्याह—न तु केवलमित्यादि। द्रव्यप्रभावाद्यथा—दन्त्या विरेचकत्वं, मणीनां विषादिहरत्वमिति। गुणप्रभावाद्यथा—ज्वरे तिक्तको रसः, शीतेऽग्निरित्यादि। द्रव्यगुणप्रभावाद्यथा—"मण्डलैर्जातरूपस्य तस्या एव पयः शृतम्।" (चि० २.पा.३.११) इत्यादि; अत्र मण्डलगुणयुक्तस्यैव जातरूपस्य कार्मुकत्वम्। कथं पुनः कुर्वन्तीत्याह—तस्मिन्नित्यादि। कुर्वन्तीति क्रियापेक्षया क्त्वाप्रत्ययः। तां तां युक्तिमासाद्येति तां योजनां प्राप्य यत् कुर्वन्ति तत् कर्मेत्यत्र यत्साधयन्ति तत्फलमित्यत्र कर्मफलयोरयं भेदः—शिरोविरेचनद्रव्याणां शिरोविरेचनरूपं कार्यं कर्म, फलं पुनस्तेषां शिरोगौरवाद्युपशमरूपमुद्देश्यं यत् ॥१३॥

भेदश्चैषां त्रिषष्टिविधविकल्पो द्रव्यदेशकालप्रभावाद्भवति, तमुपदेक्ष्यामः ॥१४॥

द्रव्यभेदमभिधाय रसभेदानाह—भेदश्चैषामित्यादि। प्रभावशब्दो द्रव्यादिभिः प्रत्येकं सम्बध्यते; तत्र द्रव्यप्रभावाद्यथा—पृथिवीजलबाहुल्यान्मधुर इत्यादि, देशप्रभावाद्यथा—हिमवति द्राक्षादाडिमादीनि मधुराणि भवन्ति अन्यत्राम्लानि; कालप्रभावाद्यथा—बालाम्रं कषायमित्यादि, तथा हेमन्ते ओषध्यो मधुरा इत्यादि। एतच्चोपलक्षणं तेनाग्नियोगा[1]दयोऽपि रसभेदहेतवो ज्ञेयाः ॥१४॥

स्वादुरम्लादिभिर्योगं शेषैरम्लादयः पृथक्।
यान्ति पञ्चदशैतानि द्रव्याणि द्विरसानि तु ॥१५॥

स्वादुरित्यादि। स्वादोरम्लादियोगात् पञ्च, तद्यथा—मधुराम्लं १, मधुरलवणं २, मधुरतिक्तं ३, मधुरकटु ४, मधुरकषायम् ५। शेषैरादित्वेनोपर्युक्तादन्यैरम्लादयः पृथग्योगं यान्ति, तेनापरे दश; तथाहि—अम्लस्य प्रत्येकं लवणादिचतुष्कयोगाच्चत्वारः—अम्ललवणं १, अम्लतिक्तं २,

१. संयोगा[2]

अम्लकटु ३, अम्लकषायम् ४; लवणस्य कट्वादियोगात्त्रयः—लवणकटु १, लवणतिक्तं २, लवणकषायम् ३; कटुकस्य तिक्तकषाययोगात् (द्वौ) भेदौ—कटुतिक्तं १, कटुकषायम् २; तिक्तस्य कषाययोगादेकः—तिक्तकषायम् १; एवं द्विरसानि द्रव्याणि पञ्चदश भवन्ति १५॥१५॥

पृथगम्लादियुक्तस्य योगः शेषैः पृथग्भवेत् ।
मधुरस्य तथाऽम्लस्य लवणस्य कटोस्तथा ॥१६॥

त्रिरसानि यथासंख्यं द्रव्याण्युक्तानि विंशतिः ।

इदानीं त्रिरसद्रव्याणां विंशतिभेदानाह—पृथगम्लेत्यादि । (यदा) मधुरस्य अम्लादिरसचतुष्टयेन पृथगित्येकैकशो युक्तस्य लवणादिभिर्योगो भवेत्, तत्र मधुरस्याम्लयुक्तस्य शेषैर्लवणादिभिर्योगाच्चत्वारो भेदाः—मधुराम्ललवणं १, मधुराम्लतिक्तं २, मधुराम्लकटु ३, मधुराम्लकषायम् ४; तथा मधुरस्य लवणयुक्तस्य शेषैः कटुतिक्तकषायैर्योगात्त्रयः—मधुरलवणकटु १, मधुरलवणतिक्तं २, मधुराम्लकषायम् ३; तथा मधुरस्य कटुयुक्तस्य तिक्तकषाययोगाद् द्वौ – मधुरकटुतिक्तं १, मधुरकटुकषायम् २; एवं मधुरस्य तिक्तयुक्तस्य कषाययोगादेकः-–मधुरतिक्तकषायम् १; एवमम्लस्य लवणयुक्तस्य प्रत्येकं कटुतिक्तकषाययोगात्त्रयः—अम्ललवणकटु १, अम्ललवणतिक्तं २, अम्ललवणकषायम् ३; तथा तस्यैव अम्लस्य कटुयुक्तस्य तिक्तकषाययोगाद् द्वौ—अम्लकटुतिक्तं १, अम्लकटुकषायम् २; तथैवाम्लस्य तिक्तयुक्तस्य कषाययोगादेकः—अम्लतिक्तकषायम् १; एवं लवणस्य कटुयुक्तस्य तिक्तकषाययोगाद् द्वौ—लवणकटुतिक्तं १, लवणकटुकषायम् २; तथा लवणस्य तिक्तयुक्तस्य कषाययोगादेकः—लवणतिक्तकषायम् १; कटोश्च तिक्तयुक्तस्य कषाययोगादेकः—कटुतिक्तकषायम् १; एवमिति मिलित्वा त्रिरसानि (द्रव्याणि) विंशतिर्भवन्ति २०-१६॥—

वक्ष्यन्ते तु चतुष्केण द्रव्याणि दश पञ्च च ॥१७॥

स्वाद्वम्लौ सहितौ योगं लवणाद्यैः पृथग्गतौ ।
योगं शेषैः पृथग्यातश्चतुष्करससंख्यया ॥१८॥

सहितौ स्वादुलवणौ तद्वत् कट्वादिभिः पृथक् ।
युक्तौ शेषैः पृथग्योगं यातः स्वादूषणौ तथा ॥१९॥

कट्वाद्यैरम्ललवणौ संयुक्तौ सहितौ पृथक् ।
यातः शेषैः पृथग्योगं शेषैरम्लकटू तथा ॥२०॥

युज्येते तु कषायेण सतिक्तौ लवणोषणौ।

चतुष्कसंयोगेन पञ्चदश भेदानाह—वक्ष्यन्त इत्यादि। सहिताविति मिलितौ स्वाद्वम्लौ लवणाद्यैश्चतुर्भिः पृथगेकैकशो योगं गतौ शेषैः कटुतिक्तकषायैः पृथग्योगं चतुष्करससंख्यया यातो गच्छतः; तेन षड् भेदाः— मधुराम्ललवणकटु १, मधुराम्ललवणतिक्तं २, मधुराम्ललवणकषायं ३, मधुराम्लकटुतिक्तं ४, मधुराम्लकटुकषायं ५, मधुराम्लतिक्तकषायम् ६। अम्लपरित्यागेनापरांश्चतुरो भेदानाह—सहितावित्यादि। मिलितौ स्वादुलवणौ कट्वादिभिः कटुतिक्तकषायैः पृथग्युक्तैः, शेषैरिति यथाक्रमं तिक्तकषायकटुभिः पृथग्योगं यातो गच्छतः; तेन त्रयो भेदाः—स्वादुलवणकटुतिक्तं १, स्वादुलवणतिक्तकषायं २, स्वादुलवणकषायकटु ३। अत्राद्यापेक्षया शेषाणां बहुत्वाद्बहुवचनमुपपन्नम्। लवणपरित्यागात् पुनश्चतुर्थो भेद इत्याह—स्वादूष्णौ तथेति; स्वादूषणावपि शेषाभ्यां तिक्तकषायाभ्यां योगं यातः—स्वादुकटुतिक्तकषायम् १। एवं चतुष्के मधुरयोगेन दश भेदाः। इदानीं चतुष्के मधुरपरित्यागेन पञ्च भेदानाह—कट्वाद्यैरित्यादि। अम्ललवणौ कट्वाद्यैः कटुतिक्तकषायैः पृथग्युक्तौ यथाक्रमं शेषैः तिक्तकषायकटुभिः पृथग्योगं यातो गच्छतः, तेन त्रयो भेदाः—अम्ललवणकटुतिक्तं १, अम्ललवणतिक्तकषायं २, अम्ललवणकषायकटु ३। लवणपरित्यागाच्चतुर्थं भेदमाह—शेषैरम्ल(कटू) तथेति; अम्लकटू शेषैरिति शेषाभ्यां तिक्तकषायाभ्यां योगं याता गच्छतः; अत्र शेषैरिति जातौ बहुवचनम्; अम्लकटुतिक्तकषायम् १। मधुराम्लपरित्यागात्तु पञ्चमो भेद इत्याह—युज्येते त्वित्यादि। लवणकटुतिक्तकषायम् १। तदेवं चतुष्के पूर्वं दशभिर्मिलित्वा पञ्चदश भेदा उक्ताः ॥१७-२०॥—

षट् तु पञ्चरसान्याहुरेकैकस्यापवर्जनात् ॥२१॥
षट् चैवैकरसानि स्युरेकं षड्रसमेव तु।

पञ्चके षड्भेदानाह—षडित्यादि। अपवर्जनादिति त्यागात्; यथा—मधुरत्यागात् अम्ललवणकटुतिक्तकषायम् १, एवमम्लत्यागात् मधुरलवणकटुतिक्तकषायाम्२, लवणत्यागात् मधुराम्लकटुतिक्तकषायम् ३, एवं कटुत्यागात् ४, तिक्तत्यागात् ५, कषायत्यागात् ६। अवशिष्टान् सप्त भेदानाह—षट् चैवेत्यदि। असंयुक्ताः ६, संयुक्ताः १ ॥२१॥—

इति त्रिषष्टिर्द्रव्याणां निर्दिष्टा रससंख्यया ॥२२॥

त्रिषष्टिः स्यात्त्वसंख्येया रसानुरसकल्पनात् ।
रसास्तरतमाभ्यस्ताः[1] संख्यामतिपतन्ति हि ॥२३॥

उपसंहरतीत्यादि । रससंसर्गप्रकारान्तरेणासंख्यतामाह—त्रिषष्टिरित्यादि । अनुरसोऽग्रे वक्ष्यमाणः । रसानुरसत्वेनैव कथमसंख्येयता भवतीत्यत्र हेतुमाह—रसा इत्यादि । तरतमाभ्यस्ता इति तरतमादिभेदभिन्नाः ॥२२-२३॥

संयोगाः सप्तपञ्चाशत् कल्पना तु त्रिषष्टिधा ।
रसानां तत्र योग्यत्वात् कल्पिता रसचिन्तकैः ॥२४॥

एवं रसभेदानामसंख्येयत्वात् सर्वेषामभिधानमशक्यमिति चिकित्साव्यवहारार्थं त्रिषष्टिविधैव कल्पना आचार्यैः कल्पितेत्याह—संयोगा इत्यादि । अत्र योग्यत्वादिति चिकित्सोपयुक्तत्वात् ॥२४॥

क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित् ।
दोषौषधादीन् सञ्चिन्त्य भिषजा सिद्धिमिच्छता ॥२५॥

द्रव्याणि द्विरसादीनि संयुक्तांश्च रसान् बुधाः ।
रसानेकैकशो वाऽपि कल्पयन्ति गदान् प्रति ॥२६॥

तमेव चिकित्साप्रयोगमाह—क्वचिदित्यादि । आदिशब्दाद्देशकालादीनां ग्रहणम् । उक्तेऽर्थे आचार्यान्तरसम्मतिमाह—द्रव्याणीत्यादि । कल्पयन्तीति आचार्या इति शेषः । द्विरसादीनिति उत्पत्तिसिद्धद्विरसादीनि; तत्र द्विरसं यथा—कषायमधुरो मुद्गः इत्यादि; त्रिरसं यथा—मधुराम्लकषायं भव्यम्; चतूरसं यथा—"स्निग्धोष्णो मधुरस्तिक्तः कषायः कटुकस्तिलः ।" (सू० २७.३०) इति; पञ्चरसो यथा—शिवा, "पञ्चरसामुष्णामलवणां शिवाम् ।" (चि० १. पा० १.२९) इति; अव्यक्तषड्रसं विषं; **हारीते** तु एणमांसं व्यक्तषड्रसमुक्तम् । संयुक्तांश्च रसानिति तु एकैकरसद्रव्याणां संयोजनेन ज्ञेयम् ॥२५-२६॥

यः स्याद्रसविकल्पज्ञः स्याच्च दोषविकल्पवित् ।
न स मुह्येद्विकाराणां हेतुलिङ्गोपशान्तिषु ॥२.॥

उक्तरसभेदज्ञानफलमाह—यः स्यादित्यादि । उपशान्तिश्चिकित्सा । न स मुह्येदिति—यतो रसभेद(वद्)द्रव्यं विकाराणां हेतुर्भेषजं च भवतीति,

———

१. रसास्तरमाभ्यां तां—(च० नि०)

तथा दोषभेदं ज्ञात्वा तस्य समानं हेतुं प्रत्येति, दोषप्रत्यनीकं च रसं च द्रव्यं भेषजमिति सुष्ठूक्तं—"न स मुह्येद्विकाराणां हेतुलिङ्गोपशान्तिषु।"इति ॥२७॥

व्यक्तः शुष्कस्य चादौ च रसो द्रव्यस्य लक्ष्यते।
विपर्ययेणानुरसो रसो नास्ति हि सप्तमः ॥२८॥

पूर्वोक्तरसानुरसलक्षणमाह—व्यक्त इत्यादि। शुष्कस्य चेति चकारादार्द्रस्य च, आदौ चेति चकारादन्ते च; तेन शुष्कस्यार्द्रस्य वा तथा आदौ प्रथमजिह्वासम्बन्धे, अन्ते आस्वादान्ते यो व्यक्तत्वेन लभ्यते स रसः, यस्तूक्तावस्थाचतुष्टयेऽपि व्यक्तो नोपलभ्यते, किंतर्हि छायामात्रेण कार्यदर्शनेन वाऽनुमीयते सोऽनुरस इत्यर्थः। रसो नास्ति हि सप्तम इति—सप्तमो रसो नास्तीत्यर्थः। अयं चार्थः पूर्वं प्रतिषिद्धोऽप्यनुगुणहेतुप्राप्त्या पुनर्निषिध्यते यतो मधुरादय एव व्यक्तत्वाव्यक्तत्वाभ्यां रसानुरसरूपाः, अतोऽव्यक्तो नाम सप्तमो रसो नास्तीत्यर्थः ॥२८॥

परापरत्वे युक्तिश्च संख्या संयोग एव च।
विभागश्च पृथक्त्वं च परिमाणमथापि च ॥२९॥

संस्कारोऽभ्यास इत्येते गुणा ज्ञेयाः परादयः।
सिद्ध्युपायाश्चिकित्साया लक्षणैस्तान् प्रचक्ष्महे ॥३०॥

देशकालवयोमानपाकवीर्यरसादिषु।
परापरत्वे, युक्तिश्च योजना या तु युज्यते ॥३१॥

संख्या स्याद्गणितं, योगः सह संयोग उच्यते।
द्रव्याणां द्वन्द्वसर्वैककर्मजोऽनित्य एव च ॥३२॥

विभागस्तु विभक्तिः स्याद्वियोगो भागशो ग्रहः।
पृथक्त्वं स्यादसंयोगो वैलक्षण्यमनेकता ॥३३॥

परिमाणं पुनर्मानं, संस्कारः करणं मतम्।
भावाभ्यसनमभ्यासः शीलनं सततक्रिया ॥३४॥

इति स्वलक्षणैरुक्ता गुणाः सर्वे परादयः।
चिकित्सा यैरविदितैर्न यथावत् प्रवर्तते ॥३५॥

इदानीं पूर्वोक्तगुर्वादिगुणातिरिक्तान् परत्वादीन् गुणानाह—परेत्यादि। यथाक्रमं परत्वादीन् विवृणोति—तत्र देशेत्यादिना परापरत्वे इत्यन्तेन परत्वापरत्वविवरणं, परत्वं प्रधानत्वं, अपरत्वमप्रधानत्वम्। एतौ च

गुणौ देशादिषु ज्ञेयौ, तत्र देशो मरुः परः, आनूपस्त्वपरः, एवं कालो विसर्गः परः, आदानन्त्वपर इत्यादि। आदिग्रहणात् प्रकृत्यादीनां ग्रहणम्। किंवा परत्वापरत्वे वैशेषिकोक्ते ज्ञेये; तत्र देशापेक्षया सन्निकृष्टदेशसम्बन्धिनम-पेक्ष्य विप्रकृष्टदेशसम्बन्धिनि परत्वं, सन्निकृष्टदेशसम्बन्धिनि चापरत्वं भवति; एवं सन्निकृष्टविप्रकृष्टकालापेक्षया च स्थविरे परत्वं (यूनि चाप-रत्वं) ज्ञेयम्। वयःप्रभृतिषु परत्वापरत्वं यथासम्भवं कालदेशकृतमेवो-पचारात् ज्ञेयम्। युक्तिश्चेति—या भेषजकल्पना व्याधौ उपयुक्ता भवति सा युक्तिरित्यर्थः। एषा च युक्तिः संयोगपरिमाणसंस्कारान्तर्गताप्युपयुक्त-त्वेन प्राधान्यख्यापनार्थं पृथगुच्यते। संख्यां लक्षयति—संख्या स्याद्गणित-मिति—गणितमेकत्वद्वित्वादि। संयोगमाह—योग इत्यादि। द्रव्याणां योगः सम्बन्ध इत्युक्ते अवयवावयविसम्बन्धस्यापि संयोगः स्यादत आह—सहेति। साहित्यरूपो योगः स च पृथक्सिद्धयोरेव भवतीति भावः। ननु विभुनोरपि संयोगः कथं न स्यादित्यत आह—द्वन्द्वसर्वैककर्मज इति। द्वन्द्वकर्मजो यथा—युध्यमानयोर्मेषयोः, सर्वकर्मजो यथा—भाण्डे प्रक्षिप्यमाणानां माषाणां बहुमाषजः, एकतरकर्मजो यथा—वृक्षवायसयोः; एतच्चोपलक्षणं, तेन संयोगजोऽपि बोध्यः यथा—अङ्गुलीतरुसंयोगात् हस्ततरुसंयोगः, एतेन विभुद्रव्ययोरुक्तकारणाभावादेव संयोगो नास्तीति भावः। ननु अनित्य एव कारणापेक्षा, विभुनोस्तु संयोगो नित्य एव भविष्यतीत्यत आह—अनित्य एव चेति। एवेत्यवधारणे। नित्यः संयोगो न सम्भवत्येव, अप्राप्तिपूर्वि-कायाः प्राप्तेः संयोगत्वात्; नित्यत्वे च तद्विरोधादिति। विभागलक्षण-माह—विभागस्त्वित्यादि। विभक्तिः विभक्तप्रतीतिहेतुर्विभाग इत्यर्थः। ननु विभाग एव न प्रमाणं, संयोगाभावस्यैव विभक्तिप्रतीतिहेतुत्वादित्यत आह—वियोगो भागशो ग्रह इति। 'तु' शब्दो वियोग इत्यनन्तरं द्रष्टव्यः[1] पुनः संयुक्तयोर्बदरामलकयोः संयोगदशायामपि विभक्तिप्रत्ययप्रसङ्गादिति दिक्। पृथक्त्वं लक्षयति—पृथक्त्वं स्यादित्यादि। इदमस्मात् पृथगन्यदर्था-न्तरमित्यादिव्यवहारो यतो भवति तत् पृथक्त्वं स्यात्। न चान्योन्याभाव एव पृथक्त्वं इदमस्मात् पृथगन्यदित्यादिप्रतीतेरन्योन्याभावावलम्बनत्वा-

---

१. —, तेन वियोग एव विभागशो विभक्तत्वेन प्रतीतिहेतुः, न च तत्र विभागव्यवहारः। न च द्रव्ययोर्वर्त्तमानः संयोगात्यन्ताभावो विभक्ति-प्रतीतिहेतुरिति वाच्यम्, अवयवावयविनोरपि प्रसङ्गात्; नापि संयोग-ध्वंसो वियोगः एकसंयोगानन्तरं[2]

दिति वाच्यं, पृथगादिशब्दानां पर्यायत्वेऽपि नान्योन्याभावार्थत्वं तत्र पञ्चमीप्रयोगानुपपत्तेः, इदमस्मात् पृथगिदमिदं न भवतीति प्रतीत्या भावाभावविषयत्वेन भिन्नविषयत्वादित्यन्यत्र विस्तरः। तस्य पर्यायमाह—असंयोगो वैलक्षण्यमनेकतेति। अन्ये तु व्याख्यानयन्ति—तच्च पृथक्त्वं त्रिविधमित्याह—तत्र यत् सर्वथा असंयुज्यमानयोर्मेरुहिमाचलयोः पृथक्त्वं तदसंयोग इत्यनेनोक्तं; तथा संयुज्यमानानामपि महिषवराहादीनां यत् पृथक्त्वं तदाह वैलक्षण्यमिति—विशिष्टलक्षणयुक्तत्वलक्षितं विजातीयानां पृथक्त्वमित्यर्थः। तथैकजातीयानामप्यविलक्षणानां माषाणां पृथक्त्वं भवतीत्याह—अनेकतेति। एकजातीयेषु हि संयुक्तेषु न वैलक्षण्यं नाप्यसंयोगः, अथ चानेकता पृथक्त्वरूपा भवतीति भावः। परिमाणादिगुणत्रयलक्षणमाह—परिमाणमित्यादि। मानं प्रस्थाढकादि, करणं गुणान्तराधानम्। भावस्य षष्टिकादेर्व्यायामादेश्चाभ्यसनमभ्यासः। तत्पर्यायमाह—शीलनं सततक्रियेति। अयं च संयोगसंस्कारविशेषरूपोऽपि विशेषेण चिकित्सोपयुक्तत्वात् पृथगुच्यते। उपसंहरति—इतीत्यादि ॥२९-३५॥

गुणा गुणाश्रया नोक्तास्तस्माद्रसगुणान् भिषक्।
विद्याद्द्रव्यगुणान् कर्तुरभिप्रायाः पृथग्विधाः ॥३६॥

ननु रसानां परस्परसंयोगो गुण उक्तः, तथा तेषामेव स्निग्धत्वादिगुणा वाच्याः, तन्नोपपद्यते, गुणानां निर्गुणत्वादित्यत आह—गुणा इत्यादि। गुणा गुणाश्रया नोक्ता इति सगुणत्वे द्रव्यत्वप्रसङ्गादिति भावः। तस्माद्रसनिर्दिष्टान् (गुणान् द्रव्य)गुणानेव विद्यात् एकार्थसमवायेनोपचारादिति भावः। उपचारस्य किं फलमित्यत आह—कर्तुरभिप्रायाः पृथग्विधा इति। कर्तुरिति तन्त्रकर्तुः, पृथग्विधा इत्यनन्तरमुन्नेया इति शेषः। अयमभिप्रायः—मधुरादिरसनिर्देशेनैव स्निग्धादिगुणा अपि प्रायो मधुरादिसहचारिणो निर्दिष्टा भवन्तीति न मधुरत्वं निर्दिश्य स्निग्धत्वादिप्रतिपादनं पुनः पृथक् क्रियत इति, यत्र च निर्दिश्यते तत्रातिशयार्थं स्पष्टार्थं चेति ज्ञेयम् ॥३६॥

अतश्च प्रकृतं बुद्ध्वा देशकालान्तराणि च।
तन्त्रकर्तुरभिप्रायानुपायांश्चार्थमादिशेत् ॥३७॥

एवं प्रकरणादिकं च बुद्ध्वा शब्दानां तात्पर्यमूहनीयमित्यत आह—अतश्चेत्यादि। प्रकृतमिति प्रकरणं, प्रकरणादीन् बुद्ध्वा, अर्थमिति शब्दानान्तात्पर्यमादिशेदित्यन्वयः। तत्र प्रकरणं बुद्ध्वा यथा—"क्षाराः क्षीरं

फलं पुष्पम् ।" (सू० १.७३) इत्यत्र औद्भिदगणस्य प्रकृतत्वात् क्षीरमिति स्नुह्यादिक्षीरमेव क्षीरशब्देनादिशेत् । देशान्तरं बुद्ध्वा यथा—शिरसि शोधनेऽभिधीयमाने क्रिमिव्याध्यावित्यनेन शिरोगतक्रिमिव्याधिरेवाभिधीयते इति । कालान्तरं बुद्ध्वा यथा—वमनकाले प्रतिग्रहांश्चोपहारयेदिति प्रतिग्रहशब्देन पात्रमेवोच्यते, न तु ग्रहणं प्रतिग्रहः । तन्त्रकर्तुरभिप्रायान् बुद्ध्वेति—तच्च व्याहृतमेव । उपायानिति शास्त्रोपायान् तन्त्रयुक्तिरूपान् । ताश्च तन्त्रयुक्तयो वक्ष्यन्ते ॥३७॥

षड्विभक्तीः प्रवक्ष्यामि रसानामत उत्तरम् ।
षट् पञ्चभूतप्रभवाः संख्याताश्च यथा रसाः ॥३८।

रसानामुत्पत्तिकारणनिरूपणपूर्वकं षट्त्वमुपपादयति—षड्विभक्तीरित्यादि । षड्विभक्तीरिति मधुरादिषड्विभागान् । षट्पञ्चभूतप्रभवा इति पञ्चभूतप्रभवाः सन्तो यथा षट् संख्याताः भवन्ति तथा वक्ष्यामीत्यन्वयः ॥३८॥

सौम्याः खल्वापोऽन्तरिक्षभवाः प्रकृतिशीता लघ्व्यश्चाव्यक्तरसाश्च, तास्त्वन्तरिक्षाद्भ्रश्यमाना भ्रष्टाश्च पञ्चमहाभूतगुणसमन्विता जङ्गमस्थावराणां भूतानां मूर्तीरभिप्रीणयन्ति, तासु मूर्तिषु षडभिमूर्च्छन्ति रसाः ॥३९॥

रसानामादिकारणमेव तावदाह—सौम्या इत्यादि । सौम्या इति सोमदेवताकाः । भ्रश्यमाना इत्यनेन भूमिसम्बन्धव्यतिरेकेणाप्यन्तरीक्षेरितैः पृथिव्यादिपरमाण्वादिभिः सम्बन्धात् षड्रसोत्पत्तिर्भवतीति सूचयति । मूर्तीरिति व्यक्तीः । अभिप्रीणयन्तीति तर्पयन्ति । अभिमूर्च्छन्ति रसा इति व्यक्ततां यान्ति ॥३९॥

तेषां षण्णां रसानां सोमगुणातिरेकान्मधुरो रसः, पृथिव्यग्निभूयिष्ठत्वादम्लः, सलिलाग्निभूयिष्ठत्वाल्लवणः, वाय्वग्निभूयिष्ठत्वात् कटुकः, वाय्वाकाशातिरिक्तत्वात्तिक्तः, पवनपृथिवीव्यतिरेकात् कषाय इति । एवमेषां रसानां षट्त्वमुपपन्नं न्यूनातिरेकविशेषान्महाभूतानां भूतानामिव स्थावरजङ्गमानां नानावर्णाकृतिविशेषाः; षड्तुकत्वाच्च कालस्योपपन्नो महाभूतानां न्यूनातिरेकविशेषः ॥४०॥

ननु कारणानां भूतानां पञ्चविधत्वेन कार्यस्यापि रसस्य पञ्चविधत्वमेव युक्तमित्यभिप्रेत्य षट्त्वमुपपादयति—सोमगुणातिरेकादित्यादि । सोमो

जलदेवता, तेन जलगुणातिरेकादित्यर्थः; किंवा सोमशब्देन पृथिवीजलयोरेव ग्रहणम्, उभयोरेव सौम्यत्वात्; अत एव सुश्रुतेऽपि 'पृथिव्यम्बुगुण[1]-बाहुल्यान्मधुर', इत्युक्तम्। तथा तत्रैव 'पृथिव्यग्निगुणबाहुल्याल्लवणः, तोयाग्निगुणबाहुल्यादम्ल' इति यदुक्तं (तदपि) न विरुध्यते, भूमिजलयोः सौम्यत्वेनैकरूपतया कार्यविरोधाभावात्। अतिरेकशब्देन सर्वेष्वेव रसेषु सर्वभूतसान्निध्यमस्ति क्वचित् कस्यचिद्भूतगुणस्यातिरेकाद्रसविशेषो भवतीति दर्शयति। ननु यदि पृथिव्यग्निभूयिष्ठत्वादम्लः तर्हि पार्थिवस्यापि लोष्ठस्याग्नितप्तस्य पृथिव्यग्निगुणबाहुल्यादम्लता कथं न स्यात्, नैष दोषः, न हि भूतसंसर्गमात्रादेव रसविशेषो निष्पद्यते किं तर्हि विशिष्टां परिणतिमपेक्ष्य तद्यथा अग्नितप्तस्यापि जलस्य तोयाग्निगुणबाहुल्येऽपि लवणता लवणत्वसाधनविशिष्टविदाहो (न) सम्भवति। अत एव उष्णशीताभ्यामग्निसलिलाभ्यां कृतस्य लवणस्यानुष्णशीतत्वमेव युक्तं तत्कथं लवणमुष्णमित्यप्यपास्तम्, यतो भूतानामेवायं स्वभावो यत्केनचित्संयोगविशेषेण मिलितानि कञ्चिदेव गुणमारभन्ते न सर्वं यथा सैन्धवे वह्निना नोष्णत्वमारभ्यते। अयं च भूतानां सन्निवेशविशेषोऽदृष्ट(प्र)भावकृत एव कार्यदर्शनादुन्नीयते। न च यथा पृथिव्यग्निगुणभूयिष्ठत्वादम्लः एवं तोयवाय्वाधिक्याद्भूम्याकाशाधिक्याद्वा रसान्तरोत्पत्तिः कुतो न स्यादिति वाच्यं, भावस्वभावस्यापर्यनुयोज्यत्वात्। यतः पृथिव्यादिभूतानामेवायं स्वभावो यत् केनचिदेव भूताधिक्येन व्यवस्थिता रसविशेषोत्पादकाः न पुनर्यत्किञ्चिद्भूताधिक्येनेति। अत एव तोयाग्न्योः परस्परविरोधात् कथमेककार्यारम्भकत्वमित्यपास्तम्। उक्तयुक्तेरेव रसभेदं दृष्टान्तेन साधयन्नाह—एवमित्यादि। स्थावरजङ्गमभूतानां नानावर्णेत्यादिविशेषा यथा महाभूतानां न्यूनातिरेकविशेषात् तथा रसानामपीत्यर्थः। भूतानां न्यूनातिरेकविशेषहेतुमाह—षड्तुकत्वादित्यादि। कश्चन ऋतुः कञ्चन भूतविशेषं वर्धयतीति—यथा हेमन्ते सोमगुणातिरेको भवति, शिशिरे वाय्वाकाशातिरेक इत्यादि। एवं तस्याशितीयोक्तरसोत्पादक्रमेण वसन्तादावपि भूतोत्कर्षो ज्ञेयः। षड्तुकत्वाच्चेति चकारात् अहोरात्रकृतोऽदृष्टकृतश्च भूतोत्कर्षो ज्ञेयः। तेन हेमन्तादावपि रसान्तरोत्पादः क्वचिद्वस्तुन्युपपन्नो भवतीति। यद्यपि ऋतुभेदेऽपि भूतोत्कर्षविशेष एव कारणं, यदुक्तं—"तावेतावर्कवायू" (सू० ६.५) इत्यादि, तथाऽपि भूतविशेषत्वोः

———————

१. भूम्यम्बु (सु० नि०)

कार्यकारणभावो बीजाङ्कुरन्यायेन समर्थनीय इति ॥४०॥

तत्राग्निमारुतात्मका रसाः प्रायेणोर्ध्वभाजः, लाघवादुत्प्लवनत्वाच्च वायोरूर्ध्वज्वलनत्वाच्च वह्नेः; सलिलपृथिव्यात्मकास्तु प्रायेणाधोभाजः, पृथिव्या गुरुत्वान्निम्नगत्वाच्चोदकस्यः; व्यामिश्रात्मकाः पुनरुभयतोभाजः ॥४१॥

भूतविशेषकृतं रसानां धर्मान्तरमाह—तत्राग्नीत्यादि। रसा इति रसवन्ति द्रव्याणि। प्लवनत्वादिति तिर्यगूर्ध्वगतिमत्वात् ॥४१॥

तेषां षण्णां रसानामेकैकस्य यथाद्रव्यं गुणकर्माण्यनुव्याख्यास्यामः ॥४२॥

यथाद्रव्यमिति यस्य रसस्य यद्द्रव्यं समवायिकारणं तदनतिक्रमेण, तेन रसानां गुणकर्माणि रसाधारद्रव्ये इति दर्शयति ॥४२॥

तत्र, मधुरो रसः शरीरसात्म्याद्रसरुधिरमांसमेदोऽस्थिमज्जौजःशुक्राभिवर्धन आयुष्यः षडिन्द्रियप्रसादनो बलवर्णकरः पित्तविषमारुतघ्नस्तृष्णादाहप्रशमनस्त्वच्यः केश्यः कण्ठ्यो बल्यः प्रीणनो जीवनस्तर्पणो बृंहणः स्थैर्यकरः क्षीणक्षतसन्धानकरो घ्राणमुखकण्ठौष्ठजिह्वाप्रह्लादनो दाहमूर्च्छाप्रशमनः षट्पदपिपीलिकानामिष्टतमः स्निग्धः शीतो गुरुश्च। स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानः स्थौल्यं मार्दवमालस्यमतिस्वप्नं गौरवमनन्नाभिलाषमग्नेर्दौर्बल्यमास्यकण्ठयोर्मांसाभिवृद्धि श्वासकासप्रतिश्यायालसकशीतज्वरानाहास्यमाधुर्यवमथुसंज्ञास्वरप्रणाशगलगण्डगण्डमालाश्लीपदगलशोफबस्तिधमनीगलोपलेपाक्ष्यामयाभिष्यन्दानित्येवंप्रभृतीन् कफजान् विकारानुपजनयति (१);

तत्र रसेष्वायुष्यत्वादिगुणयोगेन मधुरास्वादहिततमत्वात् प्रथमं तमेवाह—तत्रेत्यादि। जीवनोऽभिघातादिमूर्च्छितस्य जीवनः। आयुष्यस्त्वायुःप्रकर्षकारित्वेन। क्षीणस्य सन्धानकरो धातुपोषकत्वेन, क्षतस्य उरःक्षतस्य तु सन्धानं सङ्घटनम्। रसनेन्द्रियव्यतिरेकेणापि मधुररसज्ञानार्थं षट्पदपिपीलिकानामिष्टतम इत्युक्तम्। यद्यपि अभिष्यन्दोऽप्यक्ष्यामय एव तथाऽपि विशेषार्थं तदुपादानम् ॥(१)॥

अम्लो रसो भक्तं रोचयति, अग्निं दीपयति, देहं बृंहयति ऊर्जयति, मनो बोधयति, इन्द्रियाणि दृढीकरोति, बलं वर्धयति, वातमनुलोमयति, हृदयं तर्पयति, आस्यमास्रावयति, भुक्तमपकर्षयति क्लेदयति जरयति,

प्रीणयति, लघुरुष्णः स्निग्धश्च । स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानो दन्तान् हर्षयति, तर्षयति, संमीलयत्यक्षिणी, संवेजयति लोमानि, कफं विलापयति, पित्तमभिवर्धयति, रक्तं दूषयति, मांसं विदहति, कायं शिथिलीकरोति, क्षीणक्षतकृशदुर्बलानां श्वयथुमापादयति, अपि च क्षताभिहतदष्टदग्धभग्नशूनप्रच्युतावमूत्रितपरिसर्पितमर्दितच्छिन्नभिन्न-विश्लिष्टोद्विद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात्, परिदहति कण्ठमुरो हृदयं च (२);

अपकर्षयतीत्यधो नयति । क्लेदयति जरयति चेत्यत्रापि भक्तमिति सम्बध्यते । अवमूत्रितं मूत्रविषैर्जन्तुभिः, परिसर्पितं तु स्पर्शविशेषैः ॥(२)॥

लवणो रसः पाचनः क्लेदनो दीपनश्च्यावनश्छेदनो भेदनस्तीक्ष्णः सरो विकास्यवस्रंस्य[1]वकाशकरो वातहरः स्तम्भबन्धसङ्घातविधमनः सर्वरसप्रत्यनीकभूतः, आस्यमास्रावयति, कफं विष्यन्दयति, मार्गान् विशोधयति, सर्वशरीरावयवान् मृदूकरोति, रोचयत्याहारम्, आहार-योगी, नात्यर्थं गुरुः स्निग्ध उष्णश्च । स एवंगुणोऽप्येक एवात्यर्थमुप-युज्यमानः पित्तं कोपयति, रक्तं वर्धयति, तर्षयति, मोहयति[2], मूर्च्छयति, तापयति, दारयति, कुष्णाति मांसानि, प्रगालयति कुष्ठानि, विषं वर्धयति, शोफान् स्फोटयति, दन्तांश्च्यावयति, पुंस्त्वमुपहन्ति, इन्द्रि-याण्युपरुणद्धि, वलिपलितखालित्यमापादयति, अपि च लोहितपित्ताम्ल-पित्तवीसर्पवातरक्तविचर्चिकेन्द्रलुप्तप्रभृतीन् विकारानुपजनयति (३);

विकासी छेदनः । अवस्रंसी विष्यन्दनशीलः । सर्वप्रत्यनीकभूत इति अतिमात्रलवणसम्बन्धे रसान्तरस्यानुपलम्भादिति भावः । आहारयोगीति अन्नव्यञ्जनरूपमाहारे सर्वदोपयुज्यते । मोहयति वैचित्यं करोति । मूर्च्छ-यतीति संज्ञानाशं कुरुते ॥(३)॥

कटुको रसो वक्त्रं शोधयति, अग्निं दीपयति, भुक्तं शोषयति, घ्राणमास्रावयति, चक्षुर्विरेचयति, स्फुटीकरोतीन्द्रियाणि, अलसकश्वयथू-पचयोदर्दाभिष्यन्दस्नेहस्वेदक्लेदमलानुपहन्ति, रोचयत्यशनं, कण्डूर्वि-नाशयति, व्रणानवसादयति, क्रिमीन् हिनस्ति, मांसं विलिखति, शोणितसङ्घातं भिनत्ति, बन्धांश्छिनत्ति, मार्गान विवृणोति, श्लेष्माणं

१. अधः स्रंसी— (च० नि०)

२. च० नि० पुस्तके नास्ति

शमयति, लघुरुष्णो रूक्षश्च। स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानो विपाकप्रभावात् पुंस्त्वमुपहन्ति, रसवीर्यप्रभावान्मोहयति, ग्लपयति, सादयति, कर्शयति, मूर्च्छयति, नमयति, तमयति, भ्रमयति, कण्ठं परिदहति, शरीरतापमुपजनयति, बलं क्षिणोति, तृष्णां जनयति; अपि च वाय्वग्निगुणबाहुल्याद्भ्रमदवथुकम्पतोदभेदैश्चरणभुजपार्श्वपृष्ठप्रभृतिषु मारुतजान् विकारानुपजनयति (४);

तिक्तो रसः स्वयमरोचिष्णुररोचकघ्नो विषघ्नः क्रिमिघ्नो मूर्च्छादाहकण्डूकुष्ठतृष्णाप्रशमनस्त्वङ्मांसयोः स्थिरीकरणो ज्वरघ्नो दीपनः पाचनः स्तन्यशोधनो लेखनः क्लेदमेदोवसामज्जलसीकापूयस्वेदमूत्रपुरीषपित्तश्लेष्मोपशोषणो रूक्षः शीतो लघुश्च। स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानो रौक्ष्यात्खरविशदस्वभावाच्च रसरुधिरमांसमेदोस्थिमज्जशुक्राण्युच्छोषयति, स्रोतसां खरत्वमुपपादयति, बलमादत्ते, कर्शयति, ग्लपयति, मोहयति, भ्रमयति, वदनमुपशोषयति, अपरांश्च वातविकारानुपजनयति (५);

विपाकप्रभावादिति विपाकशक्तितः, विपाकश्च कटुकानां कटुरेव; रसस्य वीर्यस्य च प्रभावात्सामर्थ्यात्, अयं च प्लवनादिषु हेतुः ॥(४–५)॥

कषायो रसः संशमनः संग्राही सन्धानकरः पीडनो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेदस्योपयोक्ता रूक्षः शीतोऽलघुश्च। स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमान आस्यं शोषयति, हृदयं पीडयति, उदरमाध्मापयति, वाचं निगृह्णाति, स्रोतांस्यवबध्नाति, श्यावत्वमापादयति, पुंस्त्वमुपहन्ति, विष्टभ्य जरां गच्छति, वातमूत्रपुरीषरेतांस्यवगृह्णाति, कर्शयति, ग्लपयति, तर्षयति, स्तम्भयति, खरविशदरूक्षत्वात् पक्षवधग्रहापतानकार्दितप्रभृतींश्च वातविकारानुपजनयति ॥४३॥

कषाय इत्यादौ पीडनो व्रणस्य। शरीरक्लेदस्योपयोक्ता आचूषकः। शीतोऽलघुश्चेति अकारप्रश्लेषादलघुः, उक्तं च **वाग्भटे**—"कषायः पित्तकफहा गुरुर्बस्तिविशोधनः।" (अ० हृ० सू० १०.२०) इति। यत्तु **सुश्रुते**—"कषायो रसो"...."लाघवाद्(वातगतं) लघुत्वं वर्धयति[१]" (सु० सू० ४२.७ (१)) इत्युक्तं, तत्तस्य लघुपाकतयेति न विरोधः ॥(४३)॥

---

१. वर्धयति "'लाघवाल्लाघवं (सु० नि०)

इत्येवमेते षड्रसाः पृथक्त्वेनैकत्वेन वा मात्रशः सम्यगुपयुज्यमाना उपकाराय भवन्त्यध्यात्मलोकस्य, अपकारकराः पुनरतोऽन्यथा भवन्त्युपयुज्यमानाः; तान् विद्वानुपकारार्थमेव मात्रशः सम्यगुपयोजयेदिति ॥४४॥

मात्रश इति मात्रया, तेन पृथक्त्वेनैकैकशो मात्रया सम्यगुपयुज्यमानाः तथा एकत्वेन समुदितत्वेनैकीकृत्य मात्रया सम्यगुपयुज्यमाना रसा अध्यात्मलोकस्य सर्वप्राणिजनस्योपकारका भवन्तीत्यर्थः। अतो अन्यथेति अतिमात्रया। तत्र मात्रयो(पयोगं) गमयति—तानित्यादि ॥४४॥

भवन्ति चात्र—
शीतं वीर्येण यद्द्रव्यं मधुरं रसपाकयोः।
तयोरम्लं यदुष्णं च यद्द्रव्यं कटुकं तयोः ॥४५॥

इदानीं रसविशेषात् वीर्यविशेषाच्च विपाकविशेषो ज्ञातव्य इत्याह—शीतमित्यादि। यद्द्रव्यं रसे पाके च मधुरं तद्वीर्येण शीतं ज्ञेयं; तथा तयोः रसपाकयोर्यदम्लं तद्वीर्येणोष्णं ज्ञेयमिति शेषः। किंवा यच्चोष्णं कटुकं तयोरिति पाठः ॥४५॥

तेषां रसोपदेशेन निर्देश्यो गुणसंग्रहः।
वीर्यतोऽविपरीतानां पाकतश्चोपदेक्ष्यते ॥४६॥

यथा पयो यथा सर्पिर्यथा वा चव्यचित्रकौ।
एवमादीनि चान्यानि निर्दिशेद्रसतो भिषक् ॥४७॥

सम्प्रति मधुरतिक्तकषायाणां शीतत्वं, तथा कट्वम्ललवणानां चोष्णत्वं, तथा कटुतिक्तकषायाणामवृष्यत्वमित्यादयो रसद्वारेण द्रव्याणां ये गुणा उक्ताः तदपवादमाह—तेषामित्यादि। रसोपदेशेन रसगुणकथनद्वारेण द्रव्याणां यः शीतोष्णादिगुणसङ्ग्रहः कृतः, स वीर्यतः पाकतश्चाविपरीतानां तेषां वक्ष्यमाणक्षीरादिद्रव्याणामेव निर्देष्टुं शक्यः, न तु रसविपरीतवीर्यविपाकानामित्यर्थः। तत्राविपरीतवीर्यविपाकादितयैवोपदेष्टव्यानीति रसानुरूपगुणत्वमेवैषां ज्ञातव्यमित्यर्थः। इदं तु उदाहरणैकदेशमात्रं, तेनापराण्यप्येवंजातीयानि उदाहर्तव्यानीत्याह—एवमादीनीत्यादि। एवमादीनीत्येवंप्रकाराणि शालिगोधूमादीनीत्यर्थः ॥४६-४७॥

मधुरं किञ्चिदुष्णं स्यात् कषायं तिक्तमेव च।
यथा महत्पञ्चमूलं यथाऽब्जानूपमामिषम् ॥४८॥

लवणं सैन्धवं नोष्णमम्लमामलकं तथा ।
अर्कागुरुगुडूचीनां तिक्तानामुष्णमुच्यते ॥४९॥

सम्प्रति विरुद्धवीर्यत्वेन विरुद्धविपाकत्वेन वा रसद्वारेण गुणो यत्र (न) निर्देश्यस्तान्याह—मधुरमित्यादि। किञ्चिन्मधुरमुष्णं स्यात्, किञ्चिच्च कषायमुष्णं स्यात्, किञ्चिच्च तिक्तमुष्णं स्यादिति योजना। महदिति बिल्वादिपञ्चमूलम्। तिक्तस्य कषायस्य च उष्णतायामुदाहरणम्, अब्जानूपमामिषं तु मधुरस्योष्णतायामिति, अब्जं जलजमामिषं मत्स्य-कच्छपादि, आनूपं वराहादि। लवणमित्यादि। लवणमपि न किञ्चिदुष्णं यथा सैन्धवम्, अम्लमपि न किञ्चिदुष्णं यथाऽऽमलकमिति ॥४८-४९॥

किंचिदम्लं हि संग्राहि किंचिदम्लं भिनत्ति च ।
यथा कपित्थं संग्राहि भेदि चामलकं तथा ॥५०॥

पिप्पली नागरं वृष्यं कटु चावृष्यमुच्यते ।
कषायः स्तम्भनः शीतः सोऽभयायामतोऽन्यथा ॥५१॥

तस्माद्रसोपदेशेन न सर्वं द्रव्यमादिशेत् ।
दृष्टं तुल्यरसेऽप्येवं द्रव्ये द्रव्ये गुणान्तरम् ॥५२॥

पिप्पलीत्यादि। अत्र पिप्पलीनागरयोः कटुकयोरपि तद्विपरीतमधुर-विपाकत्वेन वृष्यत्वं ज्ञेयम्। अभयायामतोऽन्यथेति अभयायां कषायो रसो भेदनश्चोष्णश्चेत्यर्थः। तस्मादित्यादि। एवमुक्तरीत्या तुल्यरसेऽपि द्रव्ये यतो गुणान्तरं दृष्टं तस्मादित्यर्थः ॥५०-५२॥

रौक्ष्यात् कषायो रूक्षाणामुत्तमो मध्यमः कटुः ।
तिक्तोऽवरस्तथोष्णानामुष्णत्वाल्लवणः परः ॥५३॥

मध्योऽम्लः कटुकश्चान्त्यः स्निग्धानां मधुरः परः ।
मध्योऽम्लो लवणश्चान्त्यो रसः स्नेहान्निरुच्यते ॥५४॥

मध्योत्कृष्टावराः शैत्यात् कषायस्वादुतिक्तकाः ।
स्वादुर्गुरुत्वादधिकः कषायाल्लवणोऽवरः ॥५५॥

अम्लात् कटुस्ततस्तिक्तो लघुत्वादुत्तमोत्तमः ।
केचिल्लघूनामवरमिच्छन्ति लवणं रसम् ॥५६॥

गौरवे लाघवे चैव सोऽवरस्तूभयोरपि ।

अपरानपि रसगतान् विशेषानाह—रौक्ष्यादि। रूक्षाणां कषायकटुतिक्तानां मध्ये कषायो रसो रौक्ष्याद् रूक्षगुणेन उत्तमो रूक्षतम इत्यर्थः। कटुर्मध्यमो रूक्षतरः, तिक्तोऽवरो रूक्ष इत्यर्थः। उष्णत्वाल्लवणः पर इति उष्णतम इत्यर्थः, मध्योऽम्ल इति उष्णतरः, कटुकश्चान्त्य इत्यवरः तेनोष्ण इत्यर्थः। तिक्तादित्यादि—शीतात् तिक्तात् कषायः शीततरः मधुर पर इति शीततम इत्यर्थः। मध्योत्कृष्टावराः शैत्यात्कषायस्वादुतिक्तका इति पाठे तु यथासंख्यमन्वयः। स्वादुरित्यादि। अत्र मधुरस्य गुरुतमत्वेन लवणस्य च गुरुत्वेन पारिशेष्यात् कषायस्य गुरुतरत्वमित्यर्थः। अम्लादित्यादि—अम्लादित्यम्लमपेक्ष्य कटुर्लघुतरः तत इति कटुकाल्लाघवेनाम्लमपेक्ष्योत्तमस्तिक्तको लघुत्वेनोत्तमो उत्तमोत्तमः। मतान्तरमाह—केचिदित्यादि। प्रतिसंस्कर्ता उभयोरपि मतयोरविरोधार्थं मतद्वयं सङ्कलय्य दर्शयति—गौरवेत्यादि। उभयोरपीति मतद्वयेऽपि स लवणो रसोऽवरः, **अग्निवेशमते** गौरवेऽवरो मतान्तरे तु लाघवेऽवर इत्यर्थः। एतेन गौरवेऽवर इति येनोच्यते तेनापि किञ्चिल्लघुत्वं स्वीक्रियत एव, तथा लाघवेऽवर इति मतेऽपि किञ्चिद्गुरुत्वमन्वायातमेवेति न कश्चिदर्थभेद इत्यर्थः ॥५३-५६॥—

परं चातो विपाकानां लक्षणं संप्रवक्ष्यते ॥५७॥

कटुतिक्तकषायाणां विपाकः प्रायशः कटुः ।
अम्लोऽम्लं पच्यते स्वादुर्मधुरं लवणस्तथा ॥५८॥

विपाकस्यापि रसरूपत्वात्तदनन्तरं विपाकलक्षणाभिधानं प्रतिजानीते—परं चात इत्यादि। आहारस्यावस्थापाकानन्तरं रसानां परिणामास्त्रयोऽवस्थापाकाः, ते च "अन्नस्य भुक्तमात्रस्य" (चि० १५.९) इत्यादिना ग्रहणीचिकित्सिते वक्ष्यमाणाः, तेषामवसाने पुनर्जठराग्निसंयोगाद्यद्रसान्तरं रसविशेष उदेति स विशिष्टः पाको विपाक इत्यर्थः। इह केचिदाचक्षते—प्रतिरसं पाकः—अम्लोऽम्लस्य, मधुरो मधुरस्य, लवणो लवणस्य, कटुकः कटुकस्य, (तिक्तः) तिक्तस्य, कषाय कषायस्य इति षडेव विपाकाः। किं तत्र प्रमाणमिति चेत्, उपमानमेव, यथा क्षीरमतिपच्यमानमपि मधुरमेव स्यात्, यथा वा शालियवादय उप्तप्ररूढाः फलिताश्च शाल्यादिस्वरूपा एव भवन्ति तथा

मधुरादयोऽपि निष्ठापाकेऽपि मधुरादिस्वरूपा एव भवितुर्महन्ति। उक्तं च—"उप्ताः षष्टिकमाषाद्या [1]वह्निपक्वाश्च षड्रसाः। यान्ति नान्यत्वमित्येवं पाकः प्रतिरसं भवेत् ॥" इति। अन्ये तु ब्रुवते—रसाः द्विविधाः बलवन्तोऽबलवन्तश्च, बलवत्त्वं च व्यक्तत्वेन मात्राबाहुल्येन वा अबलवत्त्वं पुनरेतद्विपर्ययेण; तत्र अल्पतया अबलवन्तो रसा बलवतां वशमायान्तीति तेन निष्ठापाकेन बलवता रसेन दुर्बलरसाभिभवात् न रसप्रतिनियमेन मधुरस्य मधुर एव पाकोऽम्लस्य चाम्लः एवेति नियमाभावादित्यनवस्थितः पाक इति। अनियतत्वपक्षेऽपि षट्त्वमेव कदाचित् संभवादिति, तदुक्तं—"बह्वोऽभिभवन्त्यल्पान् [2]वह्निमिश्रीकृताः रसाः। तेनानिश्चितमेवैके पाकमाहुर्मनीषिणः ॥" इति। अन्ये तु वातादिभ्यो दोषेभ्य एव त्रीन् पाकानिच्छन्ति—कफाद् वातकफान्मधुरः, कफपित्तादम्लः, वातात् पित्ताद् वातपित्ताच्च कटुक इति, यदुक्तं—"कफाद्वातकफात्स्वादुरम्लः पित्तकफोद्भवः। पाकास्त्रयोऽनिलात् पित्ताद्वातपित्तात् कटुर्मताः ॥" इति। तदेतन्मतद्वयं प्रमाणशून्यत्वादुपेक्षणीयमेव। किंच प्रतिरसं रससदृशः पाकस्तथा बलवत्पराधीनता च पाकस्य रसद्वारा प्रतिपाद्यमानकार्येणैव लभ्यते तेनैतत्पक्षद्वयमपि न निष्ठापाके चिन्तनीयं, रसस्वरूपनिरूपणेनैवोक्तार्थत्वात्। दोषावस्थाजन्यश्च पाक उपपादकहेत्वभावादागमशून्यत्वाच्च प्रेक्षावद्भिरुपेक्षणीय इत्यतः कट्वम्लमधुरभेदेन त्रीन् विपाकानाह—कटुतिक्तकषायाणामित्यादि। प्रायश इति वचनात् पिप्पलीकुलत्थादीनां रसाननुगुणपाकितां दर्शयति। पाकस्त्वग्निसंयोगरूपो रसेषु न सम्भवतीति कट्वादिशब्दैस्तदाधारद्रव्याण्युच्यन्ते, एतेन यत्कैश्चिदुच्यते अवस्थापाकावसाने षड्रसस्यैवान्नस्य कटुरसत्वेन तदानीं तिक्तकषायादिरसानामभावात् तेषां विपाको नोपपद्यत इति तदप्यपास्तं, तिक्तादिरसानामभावेऽपि तदाश्रयद्रव्यस्य विद्यमानत्वादिति। वस्तुतस्तु अवस्थापाकत्रयेण तत्तदामाशयादिस्थानमहिम्ना मधुराम्लकटुरसाः परं क्रियन्ते न तु सर्वथा प्राकृतरसाभिभवः, अन्यथाऽवस्थापाकेन प्राकृतानां मधुरादिरसानामप्राकृतत्वात्तेषां कफादिजनकत्वाभिधानं निरवकाशं स्यादिति। ननु "अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकतः।" इत्यादिना षण्णामेव रसानामविशेषेणावस्थापाकवशात् कफादिजनकत्वं वक्ष्यति, ततश्चात्र

१. बाह्य[3]
२. बहिः[3]

रसविशेषाणां दोषविशेषजनकत्वं यदुक्तं तथा—"कटुक्तिकषायाणां विपाकः प्रायशः कटुः।" इत्यादिना च यो निष्ठापाक उक्तस्तसवं विरुध्यते अवस्थापाकेनैव वाधितत्वात्, नैवं, नह्यवस्थापाकोऽयं रसस्वभावं निष्ठापाकं वाधते किन्त्ववस्थायां स्वकार्यं करोति यथा मधुरतिक्ताद्यनेकरसेऽन्ने उपयुक्ते मधुरोऽपि स्वकार्यं करोति तिक्तादयश्च स्वकार्यं कुर्वन्ति, अयं तु विशेषो यदा मधुराख्यस्यावस्थापाकस्य मधुरादयः श्लेष्मजनका रसाः सहकारिणो भवन्ति तदा बहुश्लेष्माणं जनयति, यदा तु विपरीतकटुकादिपरिगृहीतो भवति तदा स्तोकमात्रं कफं जनयति। एवं पित्तजनकावस्थापाकेऽपि वाच्यम्। कटुतिक्तकषायाणां विपाक इत्यादिनोक्तस्तु निष्ठापाके आहितदोषाणां वर्धनं क्षपणं वा करोतीति निष्ठापाकस्याभिधानं शास्त्रे प्रयोजनवदेव। अन्ये तु ब्रुवते—न तावत् षड्रसादप्यन्नात्सामान्येनावस्थापाकेऽपि कफाद्युत्पत्तिः किन्तु षड्रस एवान्ने मधुरो य आहारांशः स उद्भूतः सन् कफं जनयति, तथा पित्तदोषकोपको (यः) आहारभागः तस्माद्विदाहावस्थायामुद्भूतादम्लरसात् पित्तमुत्पद्यते; एवं वायुरपि वायुजनकाहारांशात् कटुकावस्थायां भवतीति। एतच्च न सङ्गतम्, अन्नस्य भुक्तमात्रस्येतिग्रन्थविरोधात्। यतोऽत्र षड्रसस्यैवान्नस्य सामान्येनावस्थापाकात् कफादिजनकत्वं दर्शितं, न तु कस्यचिदाहारांशस्येति। यदि पुनः षड्रसाहारगतो यः श्लेष्मजनको भागः स एव स्थानमहिम्ना उद्भूतः सन् सर्वमेवाहारमवस्थापाकसमये मधुरीकृत्य कफं जनयतीत्युच्यते तदनुमतमेव। अन्ये त्वाहुः—अन्नान्नस्याग्निसंयोगान्मधुराद्यावस्थिकं भवति, किन्तु कफादिस्थानेषु मनुष्याणां स्वभावादेव मधुरादयो रसास्तिष्ठन्ति ते चान्नं स्वस्वभावं नीत्वा कफादीन् जनयन्ति, उक्तं हि **तन्त्रान्तरे**—"मधुरो हृदयादूर्ध्वं रसः कोष्ठे व्यवस्थितः। ततः संवर्धते श्लेष्मा शरीरबलवर्धनः॥ नाभिहृदयमध्ये तु रसस्त्वम्लो व्यवस्थितः। स्वभावेन मनुष्याणां तत्र पित्तं प्रवर्धते॥ अधो नाभ्यास्तु खल्वेकः कटुकोऽवस्थितो रसः। प्रायः श्रेष्ठतमस्तत्र प्राणिनां वर्धतेऽनिलः॥ तस्माद्विपाकस्त्रिविधो रसानां नात्र संशयः॥" एतदपि तन्त्रान्तरीयवचनं श्लेष्मपित्तगतमधुराम्लरसवायुप्राभाविककटुरसाभिप्रायेण वर्णनीयं न तु मधुराद्यावस्थिकपाक-

---

१—रसमलविवेकसमकालो भिन्नकाल एवावस्थापाकैः सममिति न विरोधः। स च भिन्नकालोऽपि अवस्थापाकजन्यदोषानुगुणतया अननुगुणतया वा अवस्थापाका[3]

परिक्षेपपरम् । ये च कफादिस्थानगताः रसा अत्रोक्तास्तेऽप्यस्माकमग्न्याधेय[1]-पाकसहकारितया अनुमता एवेति । तस्माद्यथोक्त एवार्थो न्याय्य इति । अयं च विपाकाधेयो रसविशेषो न रसनेन्द्रियग्राह्यः किन्तु तत्तत्कार्येणैवोन्नीयते यथा कटुरसाया उष्णवीर्याया अपि शुण्ठ्या वृष्यत्वेन मधुरः पाकोऽनुमीयते; तथा लवणस्य सृष्टविण्मूत्रतया मधुरः पाक उन्नीयते । ननु लवणस्य मधुरपाकित्वे पित्तरक्तादिकर्तृत्वमनुपपन्नं तथा तिक्तकषाययोः कटुपाकित्वे च पित्तहन्तृत्वमुपपन्नं, नैवं, सत्यपि लवणस्य मधुरपाकित्वे तत्र लवणे उष्णं वीर्यं यदस्ति तेन तत्पित्तरक्तादिकारकत्वम्, विपाकस्तु तत्र पित्तरक्तकरणलक्षणो कार्ये बाधितोऽपि सृष्टविण्मूत्रतादिलक्षणे लक्ष्यत एव । तथा (तिक्तकषाययोरपि कटुविपाको बलवता शीतवीर्येण बाधितत्वान्न पित्तजनकः, बद्धविण्मूत्रतया तु लक्ष्यत एव । न च) तिक्तादयोऽपि कुतो न (विपाकाः) स्युरिति वाच्यं, भूतस्वभावस्यापर्यनुयोज्यत्वात् । ननु यत्र रसविपरीतः पाको यथा लवणस्य मधुरः, तिक्तकषाययोश्च कटुकः स उच्यतां यस्तु समानो मधुरस्य मधुरोऽम्लस्याम्लः कटुकस्य च कटुः तत्कथनेन किं प्रयोजनं ? यतो रसगुणैरेव तत्र विपाकगुणोऽपि ज्ञास्यते, नैवं, लवणादिविसदृशरसान्तरोत्पादशंकानिरासार्थमपि तत्रानुगुणोऽपि विपाको वक्तव्य एव तथा यत्र रससमानगुणो विपा(कस्तत्र बलवत् कार्यं भवति, विपर्यये तु दुर्बलमिति ज्ञेयम् । एतच्च पाकत्रयं द्रव्यनियतं, तेन ग्रहण्यध्याये वक्षमाणाहारावस्थापाकाद् भिन्नमेव) ॥५७-५८॥

मधुरो लवणाम्लौ च स्निग्धभावात्त्रयो रसाः ।
वातमूत्रपुरीषाणां प्रायो मोक्षे सुखा मताः ॥५९॥

कटुतिक्तकषायास्तु रूक्षभावात्त्रयो रसाः ।
दुःखाय मोक्षे दृश्यन्ते वातविण्मूत्ररेतसाम् ॥६०॥
शुक्रहा बद्धविण्मूत्रो विपाको वातलः कटुः ।
मधुरः सृष्टविण्मूत्रो विपाकः कफशुक्रलः ॥६१॥

पित्तकृत् सृष्टविण्मूत्रः पाकोऽम्लः शुक्रनाशनः ।
तेषां गुरुः स्यान्मधुरः कटुकाम्लावतोऽन्यथा ॥६२॥
विपाकलक्षणस्याल्पमध्यभूयिष्ठतां प्रति ।
द्रव्याणां गुणवैशेष्यात्तत्र तत्रोपलक्षयेत् ॥६३॥

---

१. शय[3]

मृदुतीक्ष्णगुरुलघुस्निग्धरूक्षोष्णशीतलम् ।
वीर्यमष्टविधं केचित्, केचिद्द्विविधमास्थिताः ॥६४॥

शीतोष्णमिति, वीर्यं तु क्रियते येन या क्रिया ।
नावीर्यं कुरुते किंचित् सर्वा वीर्यकृता क्रिया ॥६५॥

रसो निपाते द्रव्याणां, विपाकः कर्मनिष्ठया ।
वीर्यं यावदधीवासान्निपाताच्चोपलभ्यते ॥६६॥

रसवीर्यविपाकानां सामान्यं यत्र लक्ष्यते ।
विशेषः कर्मणां चैव प्रभावस्तस्य स स्मृतः ॥६७॥

कटुकः कटुकः पाके वीर्योष्णश्चित्रको मतः ।
तद्वद्दन्ती प्रभावात्तु विरेचयति मानवम् ॥६८॥

विषं विषघ्नमुक्तं यत् प्रभावस्तत्र कारणम् ।
ऊर्ध्वानुलोमिकं यच्च तत् प्रभावप्रभावितम् ॥६९॥

मणीनां धारणीयानां कर्म यद्विविधात्मकम् ।
तत् प्रभावकृतं तेषां प्रभावोऽचिन्त्य उच्यते ॥७०॥

सम्यग्विपाकवीर्याणि प्रभावश्चाप्युदाहृतः ।
किंचिद्रसेन कुरुते कर्म वीर्येण चापरम् ॥७१॥

द्रव्यं गुणेन पाकेन प्रभावेण च किंचन ।
रसं विपाकस्तौ वीर्यं प्रभावस्तानपोहति ॥७२॥

बलसाम्ये रसादीनामिति नैसर्गिकं बलम् ।
षण्णां रसानां विज्ञानमुपदेक्ष्याम्यतः परम् ॥७३॥

स्नेहनप्रीणनाह्लादमार्दवैरुपलभ्यते ।
मुखस्थो मधुरश्चास्यं व्याप्नुवँल्लिम्पतीव च ॥७४॥

दन्तहर्षान्मुखास्रावात् स्वेदनान्मुखबोधनात् ।
विदाहाच्चास्यकण्ठस्य प्राश्यैवाम्लं रसं वदेत् ॥७५॥

प्रलीयन् क्लेदविष्यन्दमार्दवं कुरुते मुखे ।
यः शीघ्रं लवणो ज्ञेयः स विदाहान्मुखस्य च ॥७६॥

संवेजयेद्यो रसनं निपाते तुदतीव च ।
विदहन्मुखनासाक्षिसंस्रावी स कटुः स्मृतः ॥७७॥

प्रतिहन्ति निपाते यो रसनं स्ववते न च ।
स तिक्तो मुखवैशद्यशोषप्रह्लादकारकः ॥७८॥

वैशद्यस्तम्भजाड्यैर्यो रसनं योजयेद्रसः ।
बध्नातीव च यः कण्ठं कषायः स विकास्यपि ॥७९॥

एवमुक्तवन्तं भगवन्तमात्रेयमग्निवेश उवाच—भगवन् ! श्रुतमेतदवितथमर्थसंपद्युक्तं भगवतो यथावद्द्रव्यगुणकर्माधिकारे वचः, परं त्वाहारविकाराणां वैरोधिकानां लक्षणमनतिसंक्षेपेणोपदिश्यमानं शुश्रूषामह इति ॥८०॥

तमुवाच भगवानात्रेयः—देहधातुप्रत्यनीकभूतानि द्रव्याणि देहधातुभिर्विरोधमापद्यन्ते; परस्परगुणविरुद्धानि कानिचित्, कानिचित् संयोगात्, संस्कारादपराणि, देशकालमात्रादिभिश्चापराणि, तथा स्वभावादपराणि ॥८१॥

तत्र यान्याहारमधिकृत्य भूयिष्ठमुपयुज्यन्ते तेषामेकदेशं वैरोधिकमधिकृत्योपदेक्ष्यामः—न मत्स्यान् पयसा सहाभ्यवहरेत्, उभयं ह्येतन्मधुरं मधुरविपाकं महाभिष्यन्दि शीतोष्णत्वाद्विरुद्धवीर्यं विरुद्धवीर्यत्वाच्छोणितप्रदूषणाय महाभिष्यन्दित्वान्मार्गोपरोधाय च ॥८२॥

तन्निशम्यात्रेयवचनमनु भद्रकाप्योऽग्निवेशमुवाच—सर्वानेव मत्स्यान् पयसा सहाभ्यवहरेदन्यत्रैकस्माच्चिलिचिमात्, स पुनः शकली लोहितनयनः सर्वतो लोहितराजी रोहिताकारः प्रायो भूमौ चरति, तं चेत् पयसा सहाभ्यवहरेन्निःसंशयं शोणितजानां विबन्धजानां च व्याधीनामन्यतममथवा मरणं प्राप्नुयादिति ॥८३॥

नेति भगवानात्रेयः—सर्वानेव मत्स्यान्न पयसा सहाभ्यवहरेद्विशेषतस्तु चिलिचिमं, स हि महाभिष्यन्दित्वात् स्थूललक्षणतरानेतान् व्याधीनुपजनयत्यामविषमुदीरयति च । ग्राम्यानूपौदकपिशितानि च मधुतिलगुडपयोमाषमूलकबिसैर्विरूढधान्यैर्वा नैकध्यमद्यात्, तन्मूलं हि बाधिर्यान्ध्यवेपथुजाड्यकलमूकतामैण्मिण्यमथवा मरणमाप्नोति । न पौष्करं रोहिणीकं शाकं कपोतान् वा सर्षपतैलभृष्टान्मधुपयोभ्यां सहाभ्यवहरेत्, तन्मूलं हि शोणिताभिष्यन्दधमनीप्रवि(ति)चयापस्मारशङ्खकगलगण्डरोहिणीनामन्यतमं प्राप्नोत्यथवा मरणमिति । न मूलकलशुनकृष्णगन्धार्जकसुमुखसुरसादीनि भक्षयित्वा पयः सेव्यं, कुष्ठाबाधभयात् । न जातुकशाकं

न निकुचं पक्वं मधुपयोभ्यां सहोपयोज्यम्, एतद्धि मरणायाथवा बलवर्ण-तेजोवीर्योपरोधायालघुव्याधये षाण्ढ्याय चेति। तदेव निकुचं पक्वं न माषसूपगुडसर्पिर्भिः सहोपयोज्यं वैरोधिकत्वात्। तथाऽऽम्रामातकमातुलुङ्गनिकुचकरमर्दमोचदन्तशठबदरकोशाम्रभव्यजाम्बवकपित्थतिन्तिडीकपारावताक्षोडपनसनालिकेरदाडिमामलकान्येवंप्रकाराणि चान्यानि द्रव्याणि सर्वं चाम्लं द्रवमद्रवं च पयसा सह विरुद्धम्। तथा कङ्गुवनकमकुष्ठककुलत्थमाषनिष्पावाः पयसा सह विरुद्धाः। पद्मोत्तरिकाशाकं शार्करो मैरेयो मधु च सहोपयुक्तं विरुद्धं वातं चातिकोपयति। हारिद्रकः सर्षपतैलभृष्टो विरुद्धः पित्तं चातिकोपयति। पायसो मन्थानुपानो विरुद्धः श्लेष्माणं चातिकोपयति। उपोदिका तिलकल्कसिद्धा हेतुरतीसारस्य। बलाका वारुण्या सह कुल्माषैरपि विरुद्धा, सैव शूकरवसापरिभृष्टा सद्यो व्यापादयति। मयूरमांसमेरण्डसीसकावसक्तमेरण्डाग्निप्लुष्टमेरण्डतैलयुक्तं सद्यो व्यापादयति। हारिद्रकमांसं हारिद्रसीसकावसक्तं हारिद्राग्निप्लुष्टं सद्यो व्यापादयति, तदेव भस्मपांशुपरिध्वस्तं सक्षौद्रं सद्यो मरणाय। मत्स्यनिस्तालनसिद्धाः पिप्पल्यस्तथा काकमाची मधु च मरणाय। मधु चोष्णमुष्णार्तस्य च मधु मरणाय। मधुसर्पिषी समधृते, मधु वारि चान्तरिक्षं समधृतं, मधु पुष्करबीजं, मधु पीत्वोष्णोदकं, भल्लातकोष्णोदकं, तक्रसिद्धः कम्पिल्लकः, पर्युषिता काकमाची, अङ्गारशूल्यो भासश्चेति विरुद्धानि। इत्येतद्यथाप्रश्नमभिनिर्दिष्टं भवतीति ॥८४॥

भवन्ति चात्र श्लोकाः—

यत् किञ्चिद्दोषमास्राव्य न निर्हरति कायतः।
आहारजातं तत् सर्वमहितायोपपद्यते ॥८५॥

यच्चापि देशकालाग्निमात्रासात्म्यानिलादिभिः।
संस्कारतो वीर्यतश्च कोष्ठावस्थाक्रमैरपि ॥८६॥

परिहारोपचाराभ्यां पाकात् संयोगतोऽपि च।
विरुद्धं तच्च न हितं हृत्संपद्विधिभिश्च यत् ॥८७॥

विरुद्धं देशतस्तावद्रूक्षतीक्ष्णादि धन्वनि।
आनूपे स्निग्धशीतादि भेषजं यन्निषेव्यते ॥८८॥

कालतोऽपि विरुद्धं यच्छीतरूक्षादिसेवनम्।
शीते काले, तथोष्णे च कटुकोष्णादिसेवनम् ॥८९॥

विरुद्धमनले तद्वदन्नपानं चतुर्विधे ।
मधुसर्पिः समधृतं मात्रया तद्विरुध्यते ॥९०॥

कटुकोष्णादिसात्म्यस्य स्वादुशीतादिसेवनम् ।
यत्तत् सात्म्यविरुद्धं तु विरुद्धं त्वनिलादिभिः ॥९१॥

या समानगुणाभ्यासविरुद्धान्नौषधक्रिया ।
संस्कारतो विरुद्धं तद्यद्भोज्यं विषवद्भवेत् ॥९२॥

एरण्डसीसकासक्तं शिखिमांसं यथैव हि ।
विरुद्धं वीर्यतो ज्ञेयं वीर्यतः शीतलात्मकम् ॥९३॥

तत् संयोज्योष्णवीर्येण द्रव्येण सह सेव्यते ।
क्रूरकोष्ठस्य चात्यल्पं मन्दवीर्यमभेदनम् ॥९४॥

मृदुकोष्ठस्य गुरु च भेदनीयं तथा बहु ।
एतत् कोष्ठविरुद्धं तु, विरुद्धं स्यादवस्थया ॥९५॥

श्रमव्यवायव्यायामसक्तस्यानिलकोपनम् ।
निद्रालसस्यालसस्य भोजनं श्लेष्मकोपनम् ॥९६॥

यच्चानुत्सृज्य विण्मूत्रं भुङ्क्ते यश्चाबुभुक्षितः ।
तच्च क्रमविरुद्धं स्याद्यच्चातिक्षुद्वशानुगः ॥९७॥

परिहारविरुद्धं तु वाराहादीन्निषेव्य यत् ।
सेवेतोष्णं घृतादींश्च पीत्वा शीतं निषेवते ॥९८॥

विरुद्धं पाकतश्चापि दुष्टदुर्दारुसाधितम् ।
अपक्वतण्डुलात्यर्थपक्वदग्धं च यद्भवेत् ।
संयोगतो विरुद्धं तद्यथाऽम्लं पयसा सह ॥९९॥

अमनोरुचितं यच्च हृद्विरुद्धं तदुच्यते ।
संपद्विरुद्धं तद्विद्यादसंजातरसं तु यत् ॥१००॥

अतिक्रान्तरसं वाऽपि विपन्नरसमेव वा ।
ज्ञेयं विधिविरुद्धं तु भुज्यते निभृते न यत् ।
तदेवंविधमन्नं स्याद्विरुद्धमुपयोजितम् ॥१०१॥

षाण्ढ्यान्ध्यवीसर्पदकोदराणां
विस्फोटकोन्मादभगन्दराणाम् ।
मूर्च्छामदाध्मानगलग्रहाणां
पाण्ड्वामयस्यामविषस्य चैव ॥१०२॥

किलासकुष्ठग्रहणीगदानां
शोथाम्लपित्तज्वरपीनसानाम् ।
सन्तानदोषस्य तथैव मृत्यो-
र्विरुद्धमन्नं प्रवदन्ति हेतुम् ॥१०३॥

एषां खल्वपरेषां च वैरोधिकनिमित्तानां व्याधीनामिमे भावाः प्रतिकारा भवन्ति तद्यथा—वमनं विरेचनं च, तद्विरोधिनां च द्रव्याणां संशमनार्थमुपयोगः, तथाविधैश्च द्रव्यैः पूर्वमभिसंस्कारः शरीरस्येति ॥१०४॥

भवतश्चात्र—
विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् ।
वमनं शमनं चैव पूर्वं वा हितसेवनम् ॥१०५॥

सात्म्यतोऽल्पतया वाऽपि दीप्ताग्नेस्तरुणस्य च ।
स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् ॥१०६॥

तत्र श्लोकाः—
मतिरासीन्महर्षीणां या या रसविनिश्चये ।
द्रव्याणि गुणकर्मभ्यां द्रव्यसंख्या रसाश्रया ॥१०७॥

कारणं रससंख्याया रसानुरसलक्षणम् ।
परादीनां गुणानां च लक्षणानि पृथक्पृथक् ॥१०८॥

पञ्चात्मकानां षट्त्वं च रसानां येन हेतुना ।
ऊर्ध्वानुलोमभाजश्च यद्गुणातिशयाद्रसाः ॥१०९॥

षण्णां रसानां षट्त्वे च सविभक्ता विभक्तयः ।
उद्देशश्चापवादश्च द्रव्याणां गुणकर्मणि ॥११०॥

प्रवरावरमध्यत्वं रसानां गौरवादिषु ।
पाकप्रभावयोर्लिङ्गं वीर्यसंख्याविनिश्चयः ॥१११॥

षण्णामास्वाद्यमानानां रसानां यत् स्वलक्षणम् ।
यद्यद्विरुध्यते यस्माद्येन यत्कारि चैव यत् ॥११२॥

वैरोधिकनिमित्तानां व्याधीनामौषधं च यत् ।
आत्रेयभद्रकाप्यीये तत् सर्वमवदन्मुनिः ॥११३॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने आत्रेयभद्रकाप्यीयो नाम षड्विंशोऽध्यायः ॥२६॥

सप्तविंशोऽध्यायः

अथातोऽन्नपानविधिमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

इष्टवर्णगन्धरसस्पर्शं विधिविहितमन्नपानं प्राणिनां प्राणिसंज्ञकानां प्राणमाचक्षते कुशलाः, प्रत्यक्षफलदर्शनात्; तदिन्धना ह्यन्तरग्नेः स्थितिः; तत् सत्त्वमूर्जयति, तच्छरीरधातुव्यूहबलवर्णेन्द्रियप्रसादकरं यथोक्तमुपसेव्यमानं, विपरीतमहिताय संपद्यते ॥३॥

तस्माद्धिताहितावबोधनार्थमन्नपानविधिमखिलेनोपदेक्ष्यामोऽग्निवेश !। तत् स्वभावादुदकं क्लेदयति, लवणं विष्यन्दयति, क्षारः पाचयति, मधु संदधाति, सर्पिः स्नेहयति, क्षीरं जीवयति, मांसं बृंहयति, रसः प्रीणयति, सुरा जर्जरीकरोति, शीधुरवधमति, द्राक्षासवो दीपयति, फाणितमाचिनोति, दधि शोफं जनयति, पिण्याकशाकं ग्लपयति, प्रभूतान्तर्मलो माषसूपः, दृष्टिशुक्रघ्नः क्षारः, प्रायः पित्तलमम्लमन्यत्र दाडिमामलकात्, प्रायः श्लेष्मलं मधुरमन्यत्र मधुनः पुराणाच्च शालिषष्टिकयवगोधूमात्, प्रायस्तिक्तं वातलमवृष्यं चान्यत्र वेत्राग्रामृतापटोलपत्रात्, प्रायः कटुकं वातलमवृष्यं चान्यत्र पिप्पलीविश्वभेषजात् ॥४॥

परमतो वर्गसंग्रहेणाहारद्रव्याण्यनुव्याख्यास्यामः ॥५॥

शूकधान्यशमीधान्यमांसशाकफलाश्रयान् ।
वर्गान् हरितमद्याम्बुगोरसेक्षुविकारिकान् ॥६॥

दश द्वौ चापरौ वर्गौ कृतान्नाहारयोगिनाम् ।
रसवीर्यविपाकैश्च प्रभावैश्च प्रचक्ष्महे ॥७॥

अथ शूकधान्यवर्गः—

रक्तशालिर्महाशालिः कलमः शकुनाहृतः ।
तूर्णको दीर्घशूकश्च गौरः पाण्डुकलाङ्गुलौ ॥८॥

सुगन्धको लोहवालः सारिवाख्यः प्रमोदकः ।
पतङ्गस्तपनीयश्च ये चान्ये शालयः शुभाः ॥९॥

शीता रसे विपाके च मधुराश्चाल्पमारुताः ।
बद्धाल्पवर्चसः स्निग्धा बृंहणाः शुक्रमूत्रलाः ॥१०॥

रक्तशालिर्वरस्तेषां तृष्णाघ्नस्त्रिमलापहः ।
महांस्तस्यानु कलमस्तस्याप्यनु ततः परे ॥११॥

यवका हायनाः पांशुवाप्यनैषधकादयः ।
शालीनां शालयः कुर्वन्त्यनुकारं गुणागुणैः ॥१२॥

शीतः स्निग्धोऽगुरुः स्वादुस्त्रिदोषघ्नः स्थिरात्मकः ।
षष्टिकः प्रवरो गौरः कृष्णगौरस्ततोऽनु च ॥१३॥

वरकोद्दालकौ चीनशारदोज्ज्वलदर्दुराः ।
गन्धना कुरुविन्दाश्च षष्टिकाल्पान्तरा गुणैः ॥१४॥

मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः ।
बहुमूत्रपुरीषोष्मा त्रिदोषस्त्वेव पाटलः ॥१५॥

सकोरदूषः श्यामाकः कषायमधुरो लघुः ।
वातलः कफपित्तघ्नः शीतः संग्राहिशोषणः ॥१६॥

हस्तिश्यामाकनीवारतोयपर्णीगवेधुकाः ।
प्रशातिकाम्भःश्यामाकलौहित्याणुप्रियङ्गवः ॥१७॥

मुकुन्दो झिण्टिगर्मूटी वरुका वरकास्तथा ।
शिविरोत्कटजूर्णाह्वाः श्यामाकसदृशा गुणैः ॥१८॥

रूक्षः शीतोऽगुरुः स्वादुर्बहुवातशकृद्यवः ।
स्थैर्यकृत् सकषायश्च बल्यः श्लेष्मविकारनुत् ॥१९॥

रूक्षः कषायानुरसो मधुरः कफपित्तहा ।
मेदःक्रिमिविषघ्नश्च बल्यो वेणुयवो मतः ॥२०॥

सन्धानकृद्वातहरो गोधूमः स्वादुशीतलः ।
जीवनो बृंहणो वृष्यः स्निग्धः स्थैर्यकरो गुरुः ॥२१॥

नान्दीमुखी मधूली च मधुरस्निग्धशीतले ।
इत्ययं शूकधान्यानां पूर्वो वर्गः समाप्यते ॥२२॥

अथ शमीधान्यवर्गः—

कषायमधुरो रूक्षः शीतः पाके कटुर्लघुः ।
विशदः श्लेष्मपित्तघ्नो मुद्गः सूप्योत्तमो मतः ॥२३॥

वृष्यः परं वातहरः स्निग्धोष्णो मधुरो गुरुः ।
बल्यो बहुमलः पुंस्त्वं माषः शीघ्रं ददाति च ॥२४॥

राजमाषः सरो रुच्यः कफशुक्राम्लपित्तनुत् ।
तत्स्वादुर्वातिलो रूक्षः कषायो विशदो गुरुः ॥२५॥

उष्णाः कषायाः पाकेऽम्लाः कफशुक्रानिलापहाः ।
कुलत्था ग्राहिणः कासहिक्काश्वासार्शसां हिताः ॥२६॥

मधुरा मधुराः पाके ग्राहिणो रूक्षशीतलाः ।
मकुष्ठकाः प्रशस्यन्ते रक्तपित्तज्वरादिषु ॥२७॥

चणकाश्च मसूराश्च खण्डिकाः सहरेणवः ।
लघवः शीतमधुराः सकषाया विरूक्षणाः ॥२८॥

पित्तश्लेष्मणि शस्यन्ते सूपेष्वालेपनेषु च ।
तेषां मसूरः संग्राही कलायो वातलः परम् ॥२९॥

स्निग्धोष्णो मधुरस्तिक्तः कषायः कटुकस्तिलः ।
त्वच्यः केश्यश्च बल्यश्च वातघ्नः कफपित्तकृत् ॥३०॥

मधुराः शीतला गुर्व्यो बलघ्न्यो रूक्षणात्मिकाः ।
सस्नेहा बलिभिर्भोज्या विविधाः शिम्बिजातयः ॥३१॥

शिम्बी रूक्षा कषाया च कोष्ठे वातप्रकोपिनी ।
न च वृष्या न चक्षुष्या विष्टभ्य च विपच्यते ॥३२॥

आढकी कफपित्तघ्नी वातला, कफवातनुत् ।
अवल्गुजः सैडगजो, निष्पावा वातपित्तलाः ॥३३॥

काकाण्डोमा(ला)त्मगुप्तानां माषवत् फलमादिशेत् ।
द्वितीयोऽयं शमीधान्यवर्गः प्रोक्तो महर्षिणा ॥३४॥

अथ मांसवर्गः—

गोखराश्वतरोष्ट्राश्वद्वीपिसिंहर्क्षवानराः ।
वृको व्याघ्रस्तरक्षुश्च बभ्रुमार्जारमूषिकाः ॥३५॥

लोपाको जम्बुकः श्येनो वान्तादश्चाषवायसौ ।
शशघ्नी मधुहा भासो गृध्रोलूककुलिङ्गकाः ॥३६॥

धूमिका कुररश्चेति प्रसहा मृगपक्षिणः ।
श्वेतः श्यामश्चित्रपृष्ठः कालकः काकुलीमृगः ॥३७॥

कूर्चिका चिल्लटो भेको गोधा शल्लकगण्डकौ।
कदली नकुलः श्वाविदिति भूमिशयाः स्मृताः ॥३८॥

सृमरश्चमरः खड्गो महिषो गवयो गजः।
न्यङ्कुर्वराहश्चानूपा मृगाः सर्वे रुरुस्तथा ॥३९॥

कूर्मः कर्कटको मत्स्यः शिशुमारस्तिमिङ्गिलः।
शुक्तिशङ्खोद्रकुम्भीरचुलुकीमकरादयः ॥४०॥

इति वारिशयाः प्रोक्ता वक्ष्यन्ते वारिचारिणः।
हंसः क्रौञ्चो बलाका च बकः कारण्डवः प्लवः ॥४१॥

शरारिः पुष्कराह्वश्च केशरी मणितुण्डकः।
मृणालकण्ठो मद्गुश्च कादम्बः काकतुण्डकः ॥४२॥

उत्क्रोशः पुण्डरीकाक्षो मेघरावोऽम्बुकुक्कुटी।
आरा नन्दीमुखी वाटी सुमुखाः सहचारिणः ॥४३॥

रोहिणी कामकाली च सारसो रक्तशीर्षकः।
चक्रवाकस्तथाऽन्ये च खगाः सन्त्यम्बुचारिणः ॥४४॥

पृषतः शरभो रामः श्वदंष्ट्रो मृगमातृका।
शशोरणौ कुरङ्गश्च गोकर्णः कोट्टकारकः ॥४५॥

चारुष्को हरिणैणौ च शम्बरः कालपुच्छकः।
ऋष्यश्च वरपोतश्च विज्ञेया जाङ्गला मृगाः ॥४६॥

लावो वर्तीरकश्चैव वार्तीकः सकपिञ्जलः।
चकोरश्चोपचक्रश्च कुक्कुभो रक्तवर्त्मकः ॥४७॥

लावाद्या विष्किरास्त्वेते वक्ष्यन्ते वर्तकादयः।
वर्तको वर्तिका चैव बर्ही तित्तिरिकुक्कुटौ ॥४८॥

कङ्कशारपदेन्द्राभगोनर्दगिरिवर्तकाः।
क्रकरोऽवकरश्चैव वारडश्चेति विष्किराः ॥४९॥

शतपत्रो भृङ्गराजः कोयष्टिर्जीवजीवकः।
कैरातः कोकिलोऽत्यूहो गोपापुत्रः प्रियात्मजः ॥५०॥

लट्टा लट्ट(ट्टू)षको बभ्रुर्वटहा डिण्डिमानकः।
जटी दुन्दुभिपाक्कारलोहपृष्ठकुलिङ्गकाः ॥५१॥

कपोतशुकशारङ्गाश्चिरटीकङ्कुयष्टिकाः ।
सारिका कलविङ्कश्च चटकोऽङ्गारचूडकः ॥५२॥

पारावतः पाण्ड(न)विक इत्युक्ताः प्रतुदा द्विजाः ।
प्रसह्य भक्षयन्तीति प्रसहास्तेन संज्ञिताः ॥५३॥

भूशया बिलवासित्वादानूपाऽनूपसंश्रयात् ।
जले निवासाज्जलजा जलेचर्याज्जलेचराः ॥५४॥

स्थलजा जाङ्गलाः प्रोक्ता मृगा जाङ्गलचारिणः ।
विकीर्य विष्किराश्चेति प्रतुद्य प्रतुदाः स्मृताः ॥५५॥

योनिरष्टविधा त्वेषा मांसानां परिकीर्तिता ।
प्रसहा भूशयानूपवारिजा वारिचारिणः ॥५६॥

गुरूष्णस्निग्धमधुरा बलोपचयवर्धनाः ।
वृष्याः परं वातहराः कफपित्तविवर्धनाः ॥५७॥

हिता व्यायामनित्येभ्यो नरा दीप्ताग्नयश्च ये ।
प्रसहानां विशेषेण मांसं मांसाशिनां भिषक् ॥५८॥

जीर्णार्शोग्रहणीदोषशोषार्तानां प्रयोजयेत् ।
लावाद्यो वैष्किरो वर्गः प्रतुदा जाङ्गला मृगाः ॥५९॥

लघवः शीतमधुराः सकषाया हिता नृणाम् ।
पित्तोत्तरे वातमध्ये सन्निपाते कफानुगे ॥६०॥

विष्किरा वर्तकाद्यास्तु प्रसहाल्पान्तरा गुणैः ।
नातिशीतगुरुस्निग्धं मांसमाजमदोषलम् ॥६१॥

शरीरधातुसामान्यादनभिष्यन्दि बृंहणम् ।
मांसं मधुरशीतत्वाद्गुरु बृंहणमाविकम् ॥६२॥

योनावजाविके मिश्रगोचरत्वादनिश्चिते ।
सामान्येनोपदिष्टानां मांसानां स्वगुणैः पृथक् ॥६३॥

केषांचिद्गुणवैशेष्याद्विशेष उपदेक्ष्यते ।
दर्शनश्रोत्रमेधाग्निवयोवर्णस्वरायुषाम् ॥६४॥

बर्ही हिततमो बल्यो वातघ्नो मांसशुक्रलः ।
गुरूष्णस्निग्धमधुराः स्वरवर्णबलप्रदाः ॥६५॥

बृंहणाः शुक्रलाश्चोक्ता हंसा मारुतनाशनाः।
स्निग्धाश्चोष्णाश्च वृष्याश्च बृंहणाः स्वरबोधनाः ॥६६॥

बल्याः परं वातहराः स्वेदनाश्च ’णायुधाः।
गुरूष्णो मधुरो नातिधन्वानूपनिषेवणात् ॥६७॥

तित्तिरिः संजयेच्छीघ्रं त्रीन् दोषाननिलोल्बणान्।
पित्तश्लेष्मविकारेषु सरक्तेषु कपिञ्जलाः ॥६८॥

मन्दवातेषु शस्यन्ते शैत्यमाधुर्यलाघवात्।
लावाः कषायमधुरा लघवोऽग्निविवर्धनाः ॥६९॥

सन्निपातप्रशमनाः कटुकाश्च विपाकतः।
गोधा विपाके मधुरा कषायकटुका रसे ॥७०॥

वातपित्तप्रशमनो बृंहणो बलवर्धनी।
शल्लको मधुराम्लश्च विपाके कटुकः स्मृतः ॥७१॥

वातपित्तकफघ्नश्च कासश्वासहरस्तथा।
कषायविशदाः शीता रक्तपित्तनिबर्हणाः ॥७२॥

विपाके मधुराश्चैव कपोता गृहवासिनः।
तेभ्यो लघुतराः किंचित् कपोता वनवासिनः ॥७३॥

शीताः संग्राहिणश्चैव स्वल्पमूत्रकराश्च ते।
शुकमांसं कषायाम्लं विपाके रूक्षशीतलम् ॥७४॥

शोषकासक्षयहितं संग्राहि लघु दीपनम्।
चटका मधुराः स्निग्धा बलशुक्रविवर्धनाः ॥७५॥

सन्निपातप्रशमनाः शमना मारुतस्य च।
कषायो विशदो रूक्षः शीतः पाके कटुर्लघुः ॥७६॥

शशः स्वादुः प्रशस्तश्च सन्निपातेऽनिलावरे।
मधुरा मधुराः पाके त्रिदोषशमनाः शिवाः ॥७७॥

लघवो बद्धविण्मूत्राः शीताश्चैणाः प्रकीर्तिताः।
स्नेहनं बृंहणं वृष्यं श्रमघ्नमनिलापहम् ॥७८॥

वराहपिशितं बल्यं रोचनं स्वेदनं गुरु।
गव्यं केवलवातेषु पीनसे विषमज्वरे ॥७९॥

शुष्ककासश्रमात्यग्निमांसक्षयहितं च तत् ।
स्निग्धोष्णं मधुरं वृष्यं माहिषं गुरु तर्पणम् ॥८०॥

दार्ढ्यं बृहत्त्वमुत्साहं स्वप्नं च जनयत्यपि ।
गुरूष्णा मधुरा बल्या बृंहणाः पवनापहाः ॥८१॥

मत्स्याः स्निग्धाश्च वृष्याश्च बहुदोषाः प्रकीर्तिताः ।
शैवालशष्पभोजित्वात्स्वप्नस्य च विवर्जनात् ॥८२॥

रोहितो दीपनीयश्च लघुपाको महाबलः ।
वर्ण्यो वातहरो वृष्यश्चक्षुष्यो बलवर्धनः ॥८३॥

मेधास्मृतिकरः पथ्यः शोषघ्नः कूर्म उच्यते ।
खड्गमांसमभिष्यन्दि बलकृन्मधुरं स्मृतम् ॥८४॥

स्नेहनं बृंहणं वर्ण्यं श्रमघ्नमनिलापहम् ।
धार्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि ॥८५॥

चटकानां च यानि स्युरण्डानि च हितानि च ।
क्षीणरेतःसु कासेषु हृद्रोगेषु क्षतेषु च ॥८६॥

मधुराण्यविदाहीनि सद्योबलकराणि च ।
शरीरबृंहणे नान्यत् खाद्यं मांसाद्विशिष्यते ॥८७॥

इति वर्गस्तृतीयोऽयं मांसानां परिकीर्तितः ।

अथ शाकवर्गः—

पाठाशुषाशटीशाकं वास्तुकं सुनिषण्णकम् ॥८८॥

विद्याद्ग्राहि त्रिदोषघ्नं भिन्नवर्चस्तु वास्तुकम् ।
त्रिदोषशमनी वृष्या काकमाची रसायनी ॥८९॥

नात्युष्णशीतवीर्या च भेदिनी कुष्ठनाशिनी ।
राजक्षवकशाकं तु त्रिदोषशमनं लघु ॥९०॥

ग्राहि शस्तं विशेषेण ग्रहण्यर्शोविकारिणाम् ।
कालशाकं तु कटुकं दीपनं गरशोफजित् ॥९१॥

लघूष्णं वातलं रूक्षं कालाख्यं शाकमुच्यते ।
दीपनी चोष्णवीर्या च ग्राहिणी कफमारुते ॥९२॥

प्रशस्यतेऽम्लचाङ्गेरी ग्रहण्यर्शोहिता च सा ।
मधुरा मधुरा पाके भेदिनी श्लेष्मवर्धनी ॥९३॥

वृष्या स्निग्धा च शीता च मदघ्नी चाप्युपोदिका ।
रूक्षो मदविषघ्नश्च प्रशस्तो रक्तपित्तिनाम् ॥९४॥

मधुरो मधुरः पाके शीतलस्तण्डुलीयकः ।
मण्डूकपर्णी वेत्राग्रं कुचेला वनतिक्तकम् ॥९५॥

कर्कोटकावल्गुजकौ पटोलं शकुलादनी ।
वृषपुष्पाणि शार्ङ्गेष्टा केम्बूकं सकठिल्लकम् ॥९६॥

नाडी कलायं गोजिह्वा वार्ताकं तिलपर्णिका ।
कौलकं कार्कशं नैम्बं शाकं पार्पटकं च यत् ॥९७॥

कफपित्तहरं तिक्तं शीतं कटु विपच्यते ।
सर्वाणि सूप्यशाकानि फञ्जी चिल्ली कुतुम्बकः ॥९८॥

आलुकानि च सर्वाणि सपत्राणि कुटिञ्जरम् ।
शणशाल्मलिपुष्पाणि कर्बुदारः सुवर्चला ॥९९॥

निष्पावः कोविदारश्च पत्तूरश्चुच्चुपर्णिका ।
कुमारजीवो लोट्टाकः पालङ्क्या मारिषस्तथा ॥१००॥

कलम्बनालिकासुर्यः कुसुम्भवृकधूमकौ ।
लक्ष्मणा च प्रपुन्नाडो नलिनीका कुठेरकः ॥१०१॥

लोणिका यवशाकं च कूष्माण्डकमवल्गुजम् ।
यातुकः शालकल्याणी त्रिपर्णी पीलुपर्णिका ॥१०२॥

शाकं गुरु च रूक्षं च प्रायो विष्टभ्य जीर्यति ।
मधुरं शीतवीर्यं च पुरीषस्य च भेदनम् ॥१०३॥

स्विन्नं निष्पीडितरसं स्नेहाढ्यं तत् प्रशस्यते ।
शणस्य कोविदारस्य कर्बुदारस्य शाल्मलेः ॥१०४॥

पुष्पं ग्राहि प्रशस्तं च रक्तपित्ते विशेषतः ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षपद्मादिपल्लवाः ॥१०५॥

कषायाः स्तम्भनाः शीता हिताः पित्तातिसारिणाम् ।
वायुं वत्सादनी हन्यात् कफं गण्डीरचित्रकौ ॥१०६॥

श्रेयसी बिल्वपर्णी च बिल्वपत्रं तु वातनुत् ।
भण्डी शतावरीशाकं बला जीवन्तिकं च यत् ॥१०७॥

पर्वण्याः पर्वपुष्प्याश्च वातपित्तहरं स्मृतम् ।
लघु भिन्नशकृत्तिक्तं लाङ्गलक्युरुबूकयोः ॥१०८॥

तिलवेतसशाकं च शाकं पञ्चाङ्गुलस्य च ।
वातलं कटुतिक्ताम्लमधोमार्गप्रवर्तनम् ॥१०९॥

रूक्षाम्लमुष्णं कौसुम्भं कफघ्नं पित्तवर्धनम् ।
त्रपुसैर्वारुकं स्वादु गुरु विष्टम्भि शीतलम् ॥११०॥

मुखप्रियं च रूक्षं च मूत्रलं त्रपुसं त्वति ।
एर्वारुकं च संपक्वं दाहतृष्णाक्लमार्तिनुत् ॥१११॥

वर्चोभेदीन्यलाबूनि रूक्षशीतगुरूणि च ।
चिर्भटैर्वारुके तद्वद्वर्चोभेदहिते तु ते ॥११२॥

सक्षारं पक्वकूष्माण्डं मधुराम्लं तथा लघु ।
सृष्टमूत्रपुरीषं च सर्वदोषनिबर्हणम् ॥११३॥

केलूटं च कदम्बं च नदीमाषकमैन्दुकम् ।
विशदं गुरु शीतं च समभिष्यन्दि चोच्यते ॥११४॥

उत्पलानि कषायाणि रक्तपित्तहराणि च ।
तथा तालप्रलम्बं स्यादुरःक्षतरुजापहम् ॥ १५॥

खर्जूरं तालशस्यं च रक्तपित्तक्षयापहम् ।
तरूटबिसशालूकक्रौञ्चादनकशेरुकम् ॥११६॥

शृङ्गाटकाङ्कलोड्यं च गुरु विष्टम्भि शीतलम् ।
कुमुदोत्पलनालास्तु सपुष्पाः सफलाः स्मृताः ॥११७॥

शीताः स्वादुकषायास्तु कफमारुतकोपनाः ।
कषायमीषद्विष्टम्भि रक्तपित्तहरं स्मृतम् ॥११८॥

पौष्करं तु भवेद्बीजं मधुरं रसपाकयोः ।
बल्यः शीतो गुरुः स्निग्धस्तर्पणो बृंहणात्मकः ॥११९॥

वातपित्तहरः स्वादुर्वृष्यो मुञ्जातकः परम् ।
जीवनो बृंहणो वृष्यः कण्ठ्यः शस्तो रसायने ॥१२०॥

विदारिकन्दो बल्यश्च मूत्रलः स्वादुशीतलः ।
अम्लिकायाः स्मृतः कन्दो ग्रहण्यर्शोहितो लघुः ॥१२१॥

नात्युष्णः कफवातघ्नो ग्राही शस्तो मदात्यये ।
त्रिदोषं बद्धविण्मूत्रं सार्षपं शाकमुच्यते ॥१२२॥
(तद्वत् स्याद्रक्तनालस्य रूक्षमम्लं विशेषतः ।)
तद्वत् पिण्डालुकं विद्यात् कन्दत्वाच्च मुखप्रियम् ।
सर्पच्छत्रकवर्ज्यास्तु बह्व्योऽन्याश्छत्रजातयः ॥१२३॥
शीताः पीनसकर्त्र्यश्च मधुरा गुर्व्य एव च ।
चतुर्थः शाकवर्गोऽयं पत्रकन्दफलाश्रयः ॥१२४॥

अथ फलवर्गः—

तृष्णादाहज्वरश्वासरक्तपित्तक्षतक्षयान् ।
वातपित्तमुदावर्तं स्वरभेदं मदात्ययम् ॥१२५॥
तिक्तास्यतामास्यशोषं कासं चाशु व्यपोहति ।
मृद्वीका बृंहणी वृष्या मधुरा स्निग्धशीतला ॥१२६॥
मधुरं बृंहणं वृष्यं खर्जूरं गुरु शीतलम् ।
क्षयेऽभिघाते दाहे च वातपित्ते च तद्धितम् ॥१२७॥
तर्पणं बृंहणं फल्गु गुरु विष्टम्भि शीतलम् ।
परूषकं मधूकं च वातपित्ते च शस्यते ॥१२८॥
मधुरं बृंहणं बल्यमाम्रातं तर्पणं गुरु ।
सस्नेहं श्लेष्मलं शीतं वृष्यं विष्टभ्य जीर्यति ॥१२९॥
तालशस्यानि सिद्धानि नारिकेलफलानि च ।
बृंहणस्निग्धशीतानि बल्यानि मधुराणि च ॥१३०॥
मधुराम्लकषायं च विष्टम्भि गुरु शीतलम् ।
पित्तश्लेष्मकरं भव्यं ग्राहि वक्त्रविशोधनम् ॥१३१॥
अम्लं परूषकं द्राक्षा बदराण्यारुकाणि च ।
पित्तश्लेष्मप्रकोपीणि कर्कन्धुनिकुचान्यपि ॥१३२॥
नात्युष्णं गुरु संपक्वं स्वादुप्रायं मुखप्रियम् ।
बृंहणं जीर्यति क्षिप्रं नातिदोषलमारुकम् ॥१३३॥
द्विविधं शीतमुष्णं च मधुरं चाम्लमेव च ।
गुरु पारावतं ज्ञेयमरुच्यत्यग्निनाशनम् ॥१३४॥
भव्यादल्पान्तरगुणं काश्मर्यफलमुच्यते ।
तथैवाल्पान्तरगुणं तूदमम्लं परूषकात् ॥१३५॥

कषायमधुरं टङ्कं वातलं शीतलम् ।
कपित्थमामं कण्ठघ्नं विषघ्नं ग्राहि वातलम् ॥१३६॥

मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम् ।
परिपक्वं च दोषघ्नं विषघ्नं ग्राहि गुर्वपि ॥१३७॥

बिल्वं तु दुर्जरं पक्वं दोषलं पूतिमारुतम् ।
स्निग्धोष्णतीक्ष्णं तद्बालं दीपनं कफवातजित् ॥१३८॥

रक्तपित्तकरं बालमापूर्णं पित्तवर्धनम् ।
पक्वमाम्रं जयेद्वायुं मांसशुक्रबलप्रदम् ॥१३९॥

कषायमधुरप्रायं गुरु विष्टम्भि शीतलम् ।
जाम्बवं कफपित्तघ्नं ग्राहि वातकरं परम् ॥१४०॥

बदरं मधुरं स्निग्धं भेदनं वातपित्तजित् ।
तच्छुष्कं कफवातघ्नं पित्ते न च विरुध्यते ॥१४१॥

कषायमधुरं शीतं ग्राहि सिम्बि(ञ्चि)तिकाफलम् ।
गाङ्गेरुकं करीरं च बिम्बं तोदनधन्वनम् ॥१४२॥

मधुरं सकषायं च शीतं पित्तकफापहम् ।
संपक्वं पनसं मोचं राजादनफलानि च ॥१४३॥

स्वादूनि सकषायाणि स्निग्धशीतगुरूणि च ।
कषायविशदत्वाच्च सौगन्ध्याच्च रुचिप्रदम् ॥१४४॥

अवदंशक्षमं हृद्यं वातलं लवलीफलम् ।
नीपं शताह्वकं पीलु तृणशून्यं विकङ्कतम् ॥१४५॥

प्राचीनामलकं चैव दोषघ्नं गरहारि च ।
ऐङ्गुदं तिक्तमधुरं स्निग्धोष्णं कफवातजित् ॥१४६॥

तिन्दुकं कफपित्तघ्नं कषायं मधुरं लघु ।
विद्यादामलके सर्वान् रसांल्लवणवर्जितान् ॥१४७॥

रूक्षं स्वादु कषायाम्लं कफपित्तहरं परम् ।
रसासृङ्मांसमेदोजान्दोषान् हन्ति बिभीतकम् ॥१४८॥

स्वरभेदकफोत्क्लेदपित्तरोगविनाशनम् ।
अम्लं कषायमधुरं वातघ्नं ग्राहि दीपनम् ॥१४९॥

स्निग्धोष्णं दाडिमं हृद्यं कफपित्ताविरोधि च ।
रूक्षाम्लं दाडिमं यत्तु तत् पित्तानिलकोपनम् ॥१५०॥

मधुरं पित्तनुत्तेषां पूर्वं दाडिममुत्तमम् ।
वृक्षाम्लं ग्राहि रूक्षोष्णं वातश्लेष्मणि शस्यते ॥१५१॥
अम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः ।
गुणैस्तैरेव संयुक्तं भेदनं त्वम्लवेतसम् ॥१५२॥
शूलेऽरुचौ विबन्धे च मन्देऽग्नौ मद्यविप्लवे ।
हिक्काश्वासे च कासे च वम्यां वर्चोगदेषु च ॥१५३॥
वातश्लेष्मसमुत्थेषु सर्वेष्वेवोपदिश्यते ।
केसरं मातुलुङ्गस्य लघु शेषमतोऽन्यथा ॥१५४॥
रोचनो दीपनो हृद्यः सुगन्धिस्त्वग्विवर्जितः ।
कर्च्चूरः कफवातघ्नः श्वासहिक्कार्शसां हितः ॥१५५॥
मधुरं किंचिदम्लं च हृद्यं भक्तप्ररोचनम् ।
दुर्जरं वातशमनं नागरङ्गफलं गुरु ॥१५६॥
वातामाभिषुकाक्षोटमुकूलकनिकोचकाः ।
गुरूष्णस्निग्धमधुराः सोरुमाणा बलप्रदाः ॥१५७॥
वातघ्ना बृंहणा वृष्याः कफपित्ताभिवर्धनाः ।
प्रियालमेषां सदृशं विद्यादौष्ण्यं विना गुणैः ॥१५८॥
श्लेष्मलं मधुरं शीतं श्लेष्मातकफलं गुरु ।
श्लेष्मलं गुरु विष्टम्भि चाङ्कोटफलमग्निजित् ॥१५९॥
गुरूष्णं मधुरं रूक्षं केशघ्नं च शमीफलम् ।
विष्टम्भयति कारञ्जं वातश्लेष्माविरोधि च ॥१६०॥
आम्रातकं दन्तशठमम्लं सकरमर्दकम् ।
रक्तपित्तकरं विद्यादैरावतकमेव च ॥१६१॥
वातघ्नं दीपनं चैव वार्ताकं कटु तिक्तकम् ।
वातलं कफपित्तघ्नं विद्यात् पर्पटकीफलम् ॥१६२॥
पित्तश्लेष्मघ्नमम्लं च वातलं चाक्षिकीफलम् ।
मधुराण्यनुपाकीनि पित्तश्लेष्महराणि च ॥१६३॥
अश्वत्थोदुम्बरप्लक्षन्यग्रोधानां फलानि च ।
कषायमधुराम्लानि वातलानि गुरूणि च ॥१६४॥
भल्लातकास्थ्यग्निसमं तन्मांसं स्वादु शीतलम् ।
पञ्चमः फलवर्गोऽयमुक्तः प्रायोपयोगिकः ॥१६५॥

अथ हरितवर्गः—

रोचनं दीपनं वृष्यमार्द्रकं विश्वभेषजम् ।
वातश्लेष्मविबन्धेषु रसस्तस्योपदिश्यते ॥१६६॥

रोचनो दीपनस्तीक्ष्णः सुगन्धिर्मुखशोधनः ।
जम्बीरः कफवातघ्नः क्रिमिघ्नो भक्तपाचनः ॥१६७॥

बालं दोषहरं, वृद्धं त्रिदोषं, मारुतापहम् ।
स्निग्धसिद्धं, विशुष्कं तु मूलकं कफवातजित् ॥१६८॥

हिक्काकासविषश्वासपार्श्वशूलविनाशनः ।
पित्तकृत् कफवातघ्नः सुरसः पूतिगन्धहा ॥१६९॥

यवानी चार्जकश्चैव शिग्रुशालेयमृष्टकम् ।
हृद्यान्यास्वादनीयानि पित्तमुत्क्लेशयन्ति च ॥१७०॥

गण्डीरो जलपिप्पल्यस्तुम्बरुः शृङ्गवेरिका ।
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च ॥१७१॥

पुंस्त्वघ्नः कटुरूक्षोष्णो भूस्तृणो वक्त्रशोधनः ।
खराह्वा कफवातघ्नी बस्तिरोगरुजापहा ॥१७२॥

धान्यकं चाजगन्धा च सुमुखश्चेति रोचनाः ।
सुगन्धा नातिकटुका दोषानुत्क्लेशयन्ति च ॥१७३॥

ग्राही गृञ्जनकस्तीक्ष्णो वातश्लेष्मार्शसां हितः ।
स्वेदनेऽभ्यवहारे च योजयेत्तमपित्तिनाम् ॥१७४॥

श्लेष्मलो मारुतघ्नश्च पलाण्डुर्न च पित्तनुत् ।
आहारयोगी बल्यश्च गुरुर्वृष्योऽथ रोचनः ॥१७५॥

क्रिमिकुष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः ।
स्निग्धश्चोष्णश्च वृष्यश्च लशुनः कटुको गुरुः ॥१७६॥

शुष्काणि कफवातघ्नान्येतान्येषां फलानि च ।
हरितानामयं चैष षष्ठो वर्गः समाप्यते ॥१७७॥

अथ मद्यवर्गः—

प्रकृत्या मद्यमम्लोष्णमम्लं चोक्तं विपाकतः ।
सर्वं सामान्यतस्तस्य विशेष उपदेक्ष्यते ॥१७८॥

कृशानां सक्तमूत्राणां ग्रहण्यर्शोविकारिणाम् ।
सुरा प्रशस्ता वातघ्नी स्तन्यरक्तक्षयेषु च ॥१७९॥

हिक्काश्वासप्रतिश्यायकासवर्चोग्रहारुचौ ।
वम्यानाहविबन्धेषु वातघ्नी मदिरा हिता ॥१८०॥
शूलप्रवाहिकाटोपकफवातार्शसां हितः ।
जगलो ग्राहिरूक्षोष्णः शोफघ्नो भक्तपाचनः ॥१८१॥
शोषार्शोग्रहणीदोषपाण्डुरोगारुचिज्वरान् ।
हन्त्यरिष्टः कफकृतान् रोगान् रोचनदीपनः ॥१८२॥
मुखप्रियः सुखमदः सुगन्धिर्बस्तिरोगनुत् ।
जरणीयः परिणतो हृद्यो वर्ण्यश्च शार्करः ॥१८३॥
रोचनो दीपनो हृद्यः शोषशोफार्शसां हितः ।
स्नेहश्लेष्मविकारघ्नो वर्ण्यः पक्करसो मतः ॥१८४॥
जरणीयो विबन्धघ्नः स्वरवर्णविशोधनः ।
लेखनः शीतरसिको हितः शोफोदरार्शसाम् ॥१८५॥
सृष्टभिन्नशकृद्वातो गौडस्तर्पणदीपनः ।
पाण्डुरोगव्रणहिता दीपनी चाक्षिकी मता ॥१८६॥
सुरासवस्तीव्रमदो वातघ्नो वदनप्रियः ।
छेदी मध्वासवस्तीक्ष्णो मैरेयो मधुरो गुरुः ॥१८७॥
धातक्याऽभिषुतो हृद्यो रूक्षो रोचनदीपनः ।
माध्वीकवन्न चात्युष्णो मृद्वीकेक्षुरसासवः ॥१८८॥
रोचनं दीपनं हृद्यं बल्यं पित्ताविरोधि च ।
विबन्धघ्नं कफघ्नं च मधु लघ्वल्पमारुतम् ॥१८९॥
सुरा समण्डा रूक्षोष्णा यवानां वातपित्तला ।
गुर्वी जीर्यति विष्टभ्य श्लेष्मला तु मधूलिका ॥१९०॥
दीपनं जरणीयं च हृत्पाण्डुक्रिमिरोगनुत् ।
ग्रहण्यर्शोहितं भेदि सौवीरकतुषोदकम् ॥१९१॥
दाहज्वरापहं स्पर्शात् पानाद्वातकफापहम् ।
विबन्धघ्नमवस्रंसि दीपनं चाम्लकाञ्जिकम् ॥१९२॥
प्रायशोऽभिनवं मद्यं गुरु दोषसमीरणम् ।
स्रोतसां शोधनं जीर्णं दीपनं लघु रोचनम् ॥१९३॥
हर्षणं प्रीणनं मद्यं भयशोकश्रमापहम् ।
प्रागल्भ्यवीर्यप्रतिभातुष्टिपुष्टिबलप्रदम् ॥१९४॥

सात्त्विकैर्विधिवद्युक्त्या पीतं स्यादमृतं यथा ।
वर्गोऽयं सप्तमो मद्यमधिकृत्य प्रकीर्तितः ॥१९५॥

अथ जलवर्गः—

जलमेकविधं सर्वं पतत्यैन्द्रं नभस्तलात् ।
तत् पतत् पतितं चैव देशकालावपेक्षते ॥१९६॥
खात् पतत् सोमवाय्वर्कैः स्पृष्टं कालानुवर्तिभिः ।
शीतोष्णस्निग्धरूक्षाद्यैर्यथासन्नं महीगुणैः ॥१९७॥
शीतं शुचि शिवं मृष्टं विमलं लघु षड्गुणम् ।
प्रकृत्या दिव्यमुदकं, भ्रष्टं पात्रमपेक्षते ॥१९८॥
श्वेते कषायं भवति पाण्डुरे स्यात्तु तिक्तकम् ।
कपिले क्षारसंसृष्टमूषरे लवणान्वितम् ॥१९९॥
कटु पर्वतविस्तारे मधुरं कृष्णमृत्तिके ।
एतत् षाड्गुण्यमाख्यातं महीस्थस्य जलस्य हि ।
तथाऽव्यक्तरसं विद्यादैन्द्रं कारं हिमं च यत् ॥२००॥

यदन्तरीक्षात् पततीन्द्रसृष्टं चोक्तैश्च पात्रैः परिगृह्यतेऽम्भः ।
तदैन्द्रमित्येव वदन्ति धीरा नरेन्द्रपेयं सलिलं प्रधानम् ॥२०१॥

ईषत्कषायमधुरं सुसूक्ष्मं विशदं लघु ।
अरूक्षमनभिष्यन्दि सर्वं पानीयमुत्तमम् ॥२०२॥
गुर्वभिष्यन्दि पानीयं वार्षिकं मधुरं नवम् ।
तनु लघ्वनभिष्यन्दि प्रायः शरदि वर्षति ॥२०३॥
तत्तु ये सुकुमाराः स्युः स्निग्धभूयिष्ठभोजनाः ।
तेषां भोज्ये च भक्ष्ये च लेह्ये पेये च शस्यते ॥२०४॥
हेमन्ते सलिलं स्निग्धं वृष्यं बलहितं गुरु ।
किंचित्ततो लघुतरं शिशिरे कफवातजित् ॥२०५॥
कषायमधुरं रूक्षं विद्याद्वासन्तिकं जलम् ।
ग्रैष्मिकं त्वनभिष्यन्दि जलमित्येव निश्चयः ।
ऋतावृताविहाख्याताः सर्व एवाम्भसो गुणाः ॥२०६॥
विभ्रान्तेषु तु कालेषु यत् प्रयच्छन्ति तोयदाः ।
सलिलं तत्तु दोषाय युज्यते नात्र संशयः ॥२०७॥

राजभी राजमात्रैश्च सुकुमारैश्च मानवैः ।
सुगृहीताः शरद्यापः प्रयोक्तव्या विशेषतः ॥२०८॥

नद्यः पाषाणविच्छिन्नविक्षुब्धाभिहतोदकाः ।
हिमवत्प्रभवाः पथ्याः पुण्या देवर्षिसेविताः ॥२०९॥

नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः ।
मलयप्रभवा याश्च जलं तास्वमृतोपमम् ॥२१०॥

पश्चिमाभिमुखा याश्च पथ्यास्ता निर्मलोदकाः ।
प्रायो मृदुवहा गुर्व्यो याश्च पूर्वसमुद्रगाः ॥२११॥

पारियात्रभवा याश्च विन्ध्यसह्यभवाश्च याः ।
शिरोहृद्रोगकुष्ठानां ता हेतुः श्लीपदस्य च ॥२१२॥

वसुधाकीटसर्पाखुमलसंदूषितोदकाः ।
वर्षाजलवहा नद्यः सर्वदोषसमीरणाः ॥२१३॥

वापीकूपतडागोत्ससरःप्रस्रवणादिषु ।
आनूपशैलधन्वानां गुणदोषैर्विभावयेत् ॥११४॥

पिच्छिलं क्रिमिलं क्लिन्नं पर्णशैवालकर्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम् ॥२१५॥

विस्रं त्रिदोषं लवणमम्बु यद्वरुणालये ।
इत्यम्बुवर्गः प्रोक्तोऽयमष्टमः सुविनिश्चितः ॥२१६॥

अथ गोरसवर्गः—

स्वादु शीतं मृदु स्निग्धं बहलं श्लक्ष्णपिच्छिलम् ।
गुरु मन्दं प्रसन्नं च गव्यं दशगुणं पयः ॥२१७॥

तदेवंगुणमेवौजः सामान्यादभिवर्धयेत् ।
प्रवरं जीवनीयानां क्षीरमुक्तं रसायनम् ॥२१८॥

महिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहान्न्यूनमनिद्राय हितमत्यग्नये च तत् ॥२१९॥

रूक्षोष्णं क्षीरमुष्ट्रीणामीषत्सलवणं लघु ।
शस्तं वातकफानाहक्रिमिशोफोदरार्शसाम् ॥२२०॥

बल्यं स्थैर्यकरं सर्वमुष्णं चैकशफं पयः ।
साम्लं सलवणं रूक्षं शाखावातहरं लघु ॥२२१॥

छागं कषायमधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥२२२॥

हिक्काश्वासकरं तूष्णं पित्तश्लेष्मलमाविकम् ।
हस्तिनीनां पयो बल्यं गुरु स्थैर्यकरं परम् ॥२२३॥

जीवनं बृंहणं सात्म्यं स्नेहनं मानुषं पयः ।
नावनं रक्तपित्ते च तर्पणं चाक्षिशूलिनाम् ॥२२४॥

रोचनं दीपनं वृष्यं स्नेहनं बलवर्धनम् ।
पाकेऽम्लमुष्णं वातघ्नं मङ्गल्यं बृंहणं दधि ॥२२५॥

पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥२२६॥

शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ।
रक्तपित्तकफोत्थेषु विकारेष्वहितं च तत् ॥२२७॥

त्रिदोषं मन्दकं, जातं वातघ्नं दधि, शुक्रलः ।
सरः, श्लेष्मानिलघ्नस्तु मण्डः स्रोतोविशोधनः ॥२२८॥

शोफार्शोग्रहणीदोषमूत्रग्रहोदरारुचौ ।
स्नेहव्यापदि पाण्डुत्वे तक्रं दद्याद्गरेषु च ॥२२९॥

संग्राहि दीपनं हृद्यं नवनीतं नवोद्धृतम् ।
ग्रहण्यर्शोविकारघ्नमर्दितारुचिनाशनम् ॥२३०॥

स्मृतिबुद्ध्यग्निशुक्रौजःकफमेदोविवर्धनम् ।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम् ॥२३१॥

सर्वस्नेहोत्तमं शीतं मधुरं रसपाकयोः ।
सहस्रवीर्यं विधिभिर्घृतं कर्मसहस्रकृत् ॥२३२॥

मदापस्मारमूर्च्छायशोषोन्मादगरज्वरान् ।
योनिकर्णशिरःशूलं घृतं जीर्णमपोहति ॥२३३॥

सर्पींष्यजाविमहिषीक्षीरवत् स्वानि निर्दिशेत् ।
पीयूषो मोरटं चैव किलाटा विविधाश्च ये ॥२३४॥

दीप्ताग्नीनामनिद्राणां सर्व एव सुखप्रदाः ।
गुरवस्तर्पणा वृष्या बृंहणाः पवनापहाः ॥२३५॥

विशदा गुरवो रूक्षा ग्राहिणस्तक्रपिण्डकाः ।
गोरसानामयं वर्गो नवमः परिकीर्तितः ॥२३६॥

अथेक्षुवर्गः—

वृष्यः शीतः सरः स्निग्धो बृंहणो मधुरो रसः ।
श्लेष्मलो भक्षितस्येक्षोर्यान्त्रिकस्तु विदह्यते ॥२३७॥
शैत्यात् प्रसादान्माधुर्यात् पौण्ड्रकाद्वंशको वरः ।
प्रभूतक्रिमिमज्जासृङ्मेदामांसकरो गुडः ॥२३८॥
क्षुद्रो गुडश्चतुर्भागत्रिभागार्धावशेषितः ।
रसो गुरुर्यथापूर्वं धौतः स्वल्पमलो गुडः ॥२३९॥
ततो मत्स्यण्डिकाखण्डशर्करा विमलाः परम् ।
यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा ॥२४०॥
वृष्या क्षीणक्षतहिता सस्नेहा गुडशर्करा ।
कषायमधुरा शीता सतिक्ता यासशर्करा ॥२४१॥
रूक्षा वम्यतिसारघ्नी छेदनी मधुशर्करा ।
तृष्णासृक्पित्तदाहेषु प्रशस्ताः सर्वशर्कराः ॥२४२॥
माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं मधुजातयः ।
माक्षिकं प्रवरं तेषां विशेषाद्भ्रामरं गुरु ॥२४३॥
माक्षिकं तैलवर्णं स्याद्घृतवर्णं तु पौत्तिकम् ।
क्षौद्रं कपिलवर्णं स्याच्छ्वेतं भ्रामरमुच्यते ॥२४४॥
वातलं गुरु शीतं च रक्तपित्तकफापहम् ।
सन्धातृ छेदनं रूक्षं कषायं मधुरं मधु ॥२४५॥
हन्यान्मधूष्णमुष्णार्तमथवा सविषान्वयात् ।
गुरुरूक्षकषायत्वाच्छैत्याच्चाल्पं हितं मधु ॥२४६॥
नातः कष्टतमं किंचिन्मध्वामात्तद्धि मानवम् ।
उपक्रमविरोधित्वात् सद्यो हन्याद्यथा विषम् ॥२४७॥
आमे सोष्णा क्रिया कार्या सा मध्वामे विरुध्यते ।
मध्वामं दारुणं तस्मात् सद्यो हन्याद्यथा विषम् ॥२४८॥
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ।
इतीक्षुविकृतिप्रायो वर्गोऽयं दशमो मतः ॥२४९॥

अथ कृतान्नवर्गः—

क्षुत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगज्वरापहा ।
स्वेदाग्निजननी पेया वातावर्चोऽनुलोमनी ॥२५०॥

तर्पणी ग्राहिणी लघ्वी हृद्या चापि विलेपिका ।
मण्डस्तु दीपयत्यग्निं वातं चाप्यनुलोमयेत् ॥२५१॥

मृदूकरोति स्रोतांसि स्वेदं संजनयत्यपि ।
लङ्घितानां विरिक्तानां जीर्णे स्नेहे च तृष्यताम् ॥२५२॥

दीपनत्वाल्लघुत्वाच्च मण्डः स्यात् प्राणधारणः ।
लाजपेया श्रमघ्नी तु क्षामकण्ठस्य देहिनः ॥२५३॥

तृष्णातीसारशमनो धातुसाम्यकरः शिवः ।
लाजमण्डोऽग्निजननो दाहमूर्च्छानिवारणः ॥२५४॥

मन्दाग्निविषमाग्नीनां बालस्थविरयोषिताम् ।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः ॥२५५॥

क्षुत्पिपासापहः पथ्यः शुद्धानां च मलापहः ।
शृतः पिप्पलिशुण्ठीभ्यां युक्तो लाजाम्लदाडिमैः ॥२५६॥

कषायमधुराः शीता लघवो लाजसक्तवः ।
सुधौतः प्रस्रुतः स्विन्नः संतप्तश्चौदनो लघुः ॥२५७॥

भृष्टतण्डुलमिच्छन्ति गरश्लेष्मामयेष्वपि ।
अधौतोऽप्रस्रुतोऽस्विन्नः शीतश्चाप्योदनो गुरुः ॥२५८॥

मांसशाकवसातैलघृतमज्जफलौदनाः ।
बल्याः संतर्पणा हृद्या गुरवो बृंहयन्ति च ॥२५९॥

तद्वन्माषतिलक्षीरमुद्गसंयोगसाधिताः ।
कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ॥२६०॥

स्विन्नभक्ष्यास्तु ये केचित् सौप्यगौधूमयाविकाः ।
भिषक् तेषां यथाद्रव्यमादिशेद्गुरुलाघवम् ॥२६१॥

अकृतं कृतयूषं च तनुं सांस्कारिकं रसम् ।
सूपमम्लमनम्लं च गुरुं विद्याद्यथोत्तरम् ॥२६२॥

सक्तवो वातला रूक्षा बहुवर्चोऽनुलोमिनः ।
तर्पयन्ति नरं सद्यः पीताः सद्योबलाश्च ते ॥२६३॥

मधुरा लघवः शीताः सक्तवः शालिसंभवाः ।
ग्राहिणो रक्तपित्तघ्नास्तृष्णाच्छर्दिज्वरापहाः ॥२६४॥

हन्याद्व्याधीन् यवापूपो यावको वाट्य एव च ।
उदावर्तप्रतिश्यायकासमेहगलग्रहान् ॥२६५॥

धानासंज्ञास्तु ये भक्ष्याः प्रायस्ते लेखनात्मकाः ।
शुष्कत्वात्तर्पणाश्चैव विष्टम्भित्वाच्च दुर्जराः ॥२६६॥

विरूढधाना शष्कुल्यो मधुक्रोडाः सपिण्डकाः ।
पूपाः पूपलिकाद्याश्च गुरवः पैष्टिकाः परम् ॥२६७॥

फलमांसवसाशाकपललक्षौद्रसंस्कृताः ।
भक्ष्या वृष्याश्च बल्याश्च गुरवो बृंहणात्मकाः ॥२६८॥

वेशवारो गुरुः स्निग्धो बलोपचयवर्धनः ।
गुरवस्तर्पणा वृष्याः क्षीरेक्षुरसपूपकाः ॥२६९॥

सगुडाः सतिलाश्चैव सक्षीरक्षौद्रशर्कराः ।
भक्ष्या वृष्याश्च बल्याश्च परं तु गुरवः स्मृताः ॥२७०॥

सस्नेहाः स्नेहसिद्धाश्च भक्ष्या विविधलक्षणाः ।
गुरवस्तर्पणा वृष्या हृद्या गौधूमिका मताः ॥२७१॥

संस्काराल्लघवः सन्ति भक्ष्या गौधूमपैष्टिकाः ।
धानापर्पटपूपाद्यास्तान् बुद्ध्वा निर्दिशेत्तथा ॥२७२॥

पृथुका गुरवो भृष्टान् भक्षयेदल्पशस्तु तान् ।
यावा विष्टभ्य जीर्यन्ति सरसा भिन्नवर्चसः ॥२७३॥

सूप्यान्नविकृता भक्ष्या वातला रूक्षशीतलाः ।
सकटुस्नेहलवणानल्पशो भक्षयेत्तु तान् ॥२७४॥

मृदुपाकाश्च ये भक्ष्याः स्थूलाश्च कठिनाश्च ये ।
गुरवस्ते व्यतिक्रान्तपाकाः पुष्टिबलप्रदाः ॥२७५॥

द्रव्यसंयोगसंस्कारं द्रव्यमानं पृथक् तथा ।
भक्ष्याणामादिशेद्बुद्ध्वा यथास्वं गुरुलाघवम् ॥२७६॥

(नानाद्रव्यैः समायुक्तः पक्वामक्लिन्नभर्जितैः ।
विमर्दको गुरुर्हृद्यो वृष्यो बलवतां हितः ॥२७७॥)

रसाला बृंहणी वृष्या स्निग्धा बल्या रुचिप्रदा ।
स्नेहनं तर्पणं हृद्यं वातघ्नं सगुडं दधि ॥२७८॥

द्राक्षाखर्जूरकोलानां गुरु विष्टम्भि पानकम् ।
परूषकाणां क्षौद्रस्य यच्चेक्षुविकृतिं प्रति ॥२७९॥

तेषां कट्वम्लसंयोगान् पानकानां पृथक् पृथक् ।
द्रव्यं मानं च विज्ञाय गुणकर्माणि चादिशेत् ॥२८०॥

कट्वम्लस्वादुलवणा लघवो रागषाडवाः ।
मुखप्रियाश्च हृद्याश्च दीपना भक्तरोचनाः ॥२८१॥
आम्रामलकलेहाश्च बृंहणा बलवर्धनाः ।
रोचनास्तर्पणाश्चोक्ताः स्नेहमाधुर्यगौरवात् ॥२८२॥
बुद्ध्वा संयोगसंस्कारं द्रव्यमानं च तच्छ्रितम् ।
गुणकर्माणि लेहानां तेषां तेषां तथा वदेत् ॥२८३॥
रक्तपित्तकफोत्क्लेदि शुक्तं वातानुलोमनम् ।
कन्दमूलफलाद्यं च तद्वद्विद्यात्तदासुतम् ॥२८४॥
शिण्डाकी चासुतं चान्यत् कालाम्लं रोचनं लघु ।
विद्याद्वर्गं कृतान्नानामेकादशतमं भिषक् ॥२८५॥

अथाहारयोगिवर्गः—

कषायानुरसं स्वादु सूक्ष्ममुष्णं व्यवायि च ।
पित्तलं बद्धविण्मूत्रं न च श्लेष्माभिवर्धनम् ॥२८६॥
वातघ्नेषूत्तमं बल्यं त्वच्यं मेधाग्निवर्धनम् ।
तैलं संयोगसंस्कारात् सर्वरोगापहं मतम् ॥२८७॥
तैलप्रयोगादजरा निर्विकारा जितश्रमाः ।
आसन्नतिबलाः संख्ये दैत्याधिपतयः पुरा ॥२८८॥
ऐरण्डतैलं मधुरं गुरु श्लेष्माभिवर्धनम् ।
वातासृग्गुल्महृद्रोगजीर्णज्वरहरं परम् ॥२८९॥
कटूष्णं सार्षपं तैलं रक्तपित्तप्रदूषणम् ।
कफशुक्रानिलहरं कण्डूकोठविनाशनम् ॥२९०॥
प्रियालतैलं मधुरं गुरु श्लेष्माभिवर्धनम् ।
हितमिच्छन्ति नात्यौष्ण्यात्संयोगे वातपित्तयोः ॥२९१॥
आतस्यं मधुराम्लं तु विपाके कटुकं तथा ।
उष्णवीर्यं हितं वाते रक्तपित्तप्रकोपणम् ॥२९२॥
कुसुम्भतैलमुष्णं च विपाके कटुकं गुरु ।
विदाहि च विशेषेण सर्वदोषप्रकोपणम् ॥२९३॥
फलानां यानि चान्यानि तैलान्याहारसंविधौ ।
युज्यन्ते गुणकर्मभ्यां तानि ब्रूयाद्यथाफलम् ॥२९४॥
मधुरो बृंहणो वृष्यो बल्यो मज्जा तथा वसा ।
यथासत्त्वं तु शैत्योष्णे वसामज्ज्ञोर्विनिर्दिशेत् ॥२९५॥

सस्नेहं दीपनं वृष्यमुष्णं वातकफापहम् ।
विपाके मधुरं हृद्यं रोचनं विश्वभेषजम् ॥२९६॥

श्लेष्मला मधुरा चार्द्रा गुर्वी स्निग्धा च पिप्पली ।
सा शुष्का कफवातघ्नी कटूष्णा वृष्यसंमता ॥२९७॥

नात्यर्थमुष्णं मरिचमवृष्यं लघु रोचनम् ।
छेदित्वाच्छोषणत्वाच्च दीपनं कफवातजित् ॥२९८॥

वातश्लेष्मविबन्धघ्नं कटूष्णं दीपनं लघु ।
हिङ्गु शूलप्रशमनं विद्यात् पाचनरोचनम् ॥२९९॥

रोचनं दीपनं वृष्यं चक्षुष्यमविदाहि च ।
त्रिदोषघ्नं समधुरं सैन्धवं लवणोत्तमम् ॥३००॥

सौक्ष्म्यादौष्ण्याल्लघुत्वाच्च सौगन्ध्याच्च रुचिप्रदम् ।
सौवर्चलं विबन्धघ्नं हृद्यमुद्गारशोधि च ॥३०१॥

तैक्ष्ण्यादौष्ण्याद्व्यवायित्वाद्दीपनं शूलनाशनम् ।
ऊर्ध्वं चाधश्च वातानामानुलोम्यकरं बिडम् ॥३०२॥

सतिक्तकटु सक्षारं तीक्ष्णमुत्क्लेदि चौद्भिदम् ।
न काललवणे गन्धः सौवर्चलगुणाश्च ते ॥३०३॥

सामुद्रकं समधुरं, सतिक्तं कटु पांशुजम् ।
रोचनं लवणं सर्वं पाकि स्रंस्यनिलापहम् । ३०४॥

हृत्पाण्डुग्रहणीरोगप्लीहानाहगलग्रहान् ।
कासं कफजमर्शांसि यावशूको व्यपोहति ॥३०५॥

तीक्ष्णोष्णो लघुरूक्षश्च क्लेदी पक्ता विदारणः ।
दाहनो दीपनश्छेत्ता सर्वः क्षारोऽग्निसन्निभः ॥३०६॥

कारवी कुञ्चिकाऽजाजी यवानी धान्यतुम्बुरु ।
रोचनं दीपनं वातकफदौर्गन्ध्यनाशनम् ॥३०७॥

आहारयोगिनां भक्तिनिश्चयो न तु विद्यते ।
समाप्तो द्वादशश्चायं वर्ग आहारयोगिनाम् ॥३०८॥

शूकधान्यं शमीधान्यं समातीतं प्रशस्यते ।
पुराणं प्रायशो रूक्षं प्रायेणाभिनवं गुरु ॥३०९॥

यद्यदागच्छति क्षिप्रं तत्तल्लघुतरं स्मृतम् ।
निस्तुषं युक्तिभृष्टं च सूप्यं लघु विपच्यते ॥३१०॥

मृतं कृशं चातिमेद्यं वृद्धं बालं विषैर्हतम् ।
अगोचरभृतं व्यालसूदितं मांसमुत्सृजेत् ॥३११॥

अतोऽन्यथा हितं मांसं बृंहणं बलवर्धनम् ।
प्रीणनः सर्वभूतानां हृद्यो मांसरसः परम् ॥३१२॥

शुष्यतां व्याधिमुक्तानां कृशानां क्षीणरेतसाम् ।
बलवर्णार्थिनां चैव रसं विद्याद्यथामृतम् ॥३१३॥

सर्वरोगप्रशमनं यथास्वं विहितं रसम् ।
विद्यात् स्वर्यं बलकरं वयोबुद्धीन्द्रियायुषाम् ॥३१४॥

व्यायामनित्याः स्त्रीनित्या मद्यनित्याश्च ये नराः ।
नित्यं मांसरसाहारा नातुराः स्युर्न दुर्बलाः ॥३१५॥

क्रिमिवातातपहतं शुष्कं जीर्णमनार्तवम् ।
शाकं निःस्नेहसिद्धं च वर्ज्यं यच्चापरिस्रुतम् ॥३१६॥

पुराणमामं संक्लिष्टं क्रिमिव्यालहिमातपैः ।
अदेशकालजं क्लिन्नं यत्स्यात्फलमसाधु तत् ॥३१७॥

हरितानां यथाशाकं निर्देशः साधनादृते ।
मद्याम्बुगोरसादीनां स्वे स्वे वर्गे विनिश्चयः ॥३१८॥

यदाहारगुणैः पानं विपरीतं तदिष्यते ।
अन्नानुपानं धातूनां दृष्टं यन्न विरोधि च ॥३१९॥

आसवानां समुद्दिष्टामशीतिं चतुरुत्तराम् ।
जलं पेयमपेयं च परीक्ष्यानुपिबेद्धितम् ॥३२०॥

स्निग्धोष्णं मारुते शस्तं पित्ते मधुरशीतलम् ।
कफेऽनुपानं रूक्षोष्णं क्षये मांसरसः परम् ॥३२१॥

उपवासाध्वभाष्यस्त्रीमारुतातपकर्मभिः ।
क्लान्तानामनुपानार्थं पयः पथ्यं यथाऽमृतम् ॥३२२॥

सुरा कृशानां पुष्ट्यर्थमनुपानं विधीयते ।
कार्श्यार्थं स्थूलदेहानामनु शस्तं मधूदकम् ॥३२३॥

अल्पाग्नीनामनिद्राणां तन्द्राशोकभयक्लमैः ।
मद्यमांसोचितानां च मद्यमेवानुशस्यते ॥३२४॥

अथानुपानकर्मगुणान् प्रवक्ष्यामः—अनुपानं तर्पयति, प्रीणयति, ऊर्जयति, बृंहयति, पर्याप्तिमभिनिर्वर्तयति, भुक्तमवसादयति, अन्नसङ्घातं

भिनत्ति, मार्दवमापादयति, क्लेदयति, जरयति, सुखपरिणामितामाशुव्यवायितां चाहारस्योपजनयतीति ॥३२५॥

भवति चात्र—

अनुपानं हितं युक्तं तर्पयत्याशु मानवम्।
सुखं पचति चाहारमायुषे च बलाय च ॥३२६॥

नोर्ध्वाङ्गमारुताविष्टा न हिक्काश्वासकासिनः।
न गीतभाष्याध्ययनप्रसक्ता नोरसि क्षताः ॥३२७॥

पिबेयुरुदकं भुक्त्वा तद्धि कण्ठोरसि स्थितम्।
स्नेहमाहारजं हत्वा भूयो दोषाय कल्पते ॥३२८॥

अन्नपानैकदेशोऽयमुक्तः प्रायोपयोगिकः।
द्रव्याणि न हि निर्देष्टुं शक्यं कार्त्स्न्येन नामभिः ॥३२९॥

यथा नानौषधं किंचिद्देशजानां वचो यथा।
द्रव्यं तत्तत्तथा वाच्यमनुक्तमिह यद्भवेत् ॥३३०॥

चरः शरीरावयवाः स्वभावो धातवः क्रिया।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते ॥३३१॥

चरोऽनूपजलाकाशधन्वाद्यो भक्ष्यसंविधिः।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥३३२॥

गुरुभक्ष्याश्च ये सत्त्वाः सर्वे ते गुरवः स्मृताः।
लघुभक्ष्यास्तु लघवो धन्वजा धन्वचारिणः ॥३३३॥

शरीरावयवाः सक्थिशिरःस्कन्धादयस्तथा।
सक्थिमांसाद्गुरुः स्कन्धस्ततः क्रोडस्ततः शिरः ॥३३४॥

वृषणौ चर्म मेढ्रं च श्रोणी वृक्कौ यकृद्गुदम्।
मांसाद्गुरुतरं विद्याद्यथास्वं मध्यमस्थि च ॥३३५॥

स्वभावाल्लघवो मुद्गास्तथा लावकपिञ्जलाः।
स्वभावाद्गुरवो माषा वराहमहिषास्तथा ॥३३६॥

धातूनां शोणितादीनां गुरुं विद्याद्यथोत्तरम्।
अलसेभ्यो विशिष्यन्ते प्राणिनो ये बहुक्रियाः ॥३३७॥

गौरवं लिङ्गसामान्ये पुंसां स्त्रीणां तु लाघवम्।
महाप्रमाणा गुरवः स्वजातौ लघवोऽन्यथा ॥३३८॥

गुरूणां लाघवं विद्यात् संस्कारात् सविपर्ययम् ।
व्रीहेर्लाजा यथा च स्युः सक्तूनां सिद्धपिण्डिकाः ॥३३९॥

अल्पादाने गुरूणां च लघूनां चातिसेवने ।
मात्रा कारणमुद्दिष्टं द्रव्याणां गुरुलाघवे ॥३४०॥

गुरूणामल्पमादेयं लघूनां तृप्तिरिष्यते ।
मात्रां द्रव्याण्यपेक्षन्ते मात्रा चाग्निमपेक्षते ॥३४१॥

बलमारोग्यमायुश्च प्राणाश्चाग्नौ प्रतिष्ठिताः ।
अन्नपानेन्धनैश्चाग्निर्ज्वलति व्येति चान्यथा ॥३४२॥

गुरुलाघवचिन्तेयं प्रायेणाल्पबलान् प्रति ।
मन्दक्रियाननारोग्यान् सुकुमारान्सुखोचितान् ॥३४३॥

दीप्ताग्नयः खराहाराः कर्मनित्या महोदराः ।
ये नराः प्रति तांश्चिन्त्यं नावश्यं गुरुलाघवम् ॥३४४॥

हिताभिर्जुहुयान्नित्यमन्तरग्निं समाहितः ।
अन्नपानसमिद्भिर्ना मात्राकालौ विचारयन् ॥३४५॥

आहिताग्निः सदा पथ्यान्यन्तरग्नौ जुहोति यः ।
दिवसे दिवसे ब्रह्म जपत्यथ ददाति च ॥३४६॥

नरं निःश्रेयसे युक्तं सात्म्यज्ञं पानभोजने ।
भजन्ते नामयाः केचिद्भाविनोऽप्यन्तरादृते ॥३४७॥

षट्त्रिंशतं सहस्राणि रात्रीणां हितभोजनः ।
जीवत्यनातुरो जन्तुर्जितात्मा संमतः सताम् ॥३४८॥

प्राणाः प्राणभृतामन्नमन्नं लोकोऽभिधावति ।
वर्णः प्रसादः सौस्वर्यं जीवितं प्रतिभा सुखम् ॥३४९॥

तुष्टिः पुष्टिर्बलं मेधा सर्वमन्ने प्रतिष्ठितम् ।
लौकिकं कर्म यद्वृत्तौ स्वर्गतौ यच्च वैदिकम् ॥३५०॥
कर्मापवर्गे यच्चोक्तं तच्चाप्यन्ने प्रतिष्ठितम् ।

तत्र श्लोकः—
अन्नपानगुणाः साग्र्या वर्गा द्वादश निश्चिताः ॥३५१॥
सगुणान्यनुपानानि गुरुलाघवसंग्रहः ।
अन्नपानविधावुक्तं तत् परीक्ष्यं विशेषतः ॥३५२॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थानेऽन्नपानविधिर्नाम
सप्तविंशोऽध्यायः ॥२७॥

अष्टाविंशोऽध्यायः

अथातो विविधाशितपीतीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

विविधमशितं पीतं लीढं खादितं जन्तोर्हितमन्तरग्निसन्धुक्षितबलेन यथास्वेनोष्मणा सम्यग्विपच्यमानं कालवदनवस्थितसर्वधातुपाकमनुपहत-सर्वधातूष्ममारुतस्रोतः केवलं शरीरमुपचयबलवर्णसुखायुषा योजयति शरीरधातूनूर्जयति च । धातवो हि धात्वाहाराः प्रकृतिमनुवर्तन्ते ॥३॥

तत्राहारप्रसादाख्यो रसः किट्टं च मलाख्यमभिनिर्वर्तते । किट्टात् स्वेदमूत्रपुरीषवातपित्तश्लेष्माणः कर्णाक्षिनासिकास्यलोमकूपप्रजननमलाः केशश्मश्रुलोमनखादयश्चावयवाः पुष्यन्ति । पुष्यन्ति त्वाहाररसाद्रस-रुधिरमांसमेदोऽस्थिमज्जशुक्रौजांसि पञ्चेन्द्रियद्रव्याणि धातुप्रसादसंज्ञकानि शरीरसन्धिबन्धपिच्छादयश्चावयवाः । ते सर्व एव धातवो मलाख्याः प्रसादाख्याश्च मलरसाभ्यां पुष्यन्तः स्वं मानमनुवर्तन्ते यथावयः-शरीरम् । एवं रसमलौ स्वप्रमाणावस्थितावाश्रयस्य समधातोर्धातुसाम्य-मनुवर्तयतः । निमित्ततस्तु क्षीणवृद्धानां प्रसादाख्यानां धातूनां वृद्धिक्षया-भ्यामाहारमूलाभ्यां रसः साम्यमुत्पादयत्यारोग्याय किट्टं च मलानामेव-मेव । स्वमानातिरिक्ताः पुनरुत्सर्गिणः शीतोष्णपर्यायगुणैश्चोपचर्यमाणा मलाः शरीरधातुसाम्यकराः समुपलभ्यन्ते ॥४॥

तेषां तु मलप्रसादाख्यानां धातूनां स्रोतांस्ययनमुखानि । तानि यथा-विभागेन यथास्वं धातूनापूरयन्ति । एवमिदं शरीरमशितपीतलीढखादित-प्रभवम् । अशितपीतलीढखादितप्रभवाश्चास्मिञ् शरीरे व्याधयो भवन्ति । हिताहितोपयोगविशेषास्त्वत्र शुभाशुभविशेषकरा भवन्तीति ॥५॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच—दृश्यन्ते हि भगवन् ! हितसमाख्यातमप्याहारमुपयुञ्जाना व्याधिमन्तश्चागदाश्च, तथैवाहित-समाख्यातम्; एवं दृष्टे कथं हिताहितोपयोगविशेषात्मकं शुभाशुभविशेष-मुपलभामह इति ॥६॥

तमुवाच भगवानात्रेयः—न हिताहारोपयोगिनामग्निवेश ! तन्निमित्ता-व्याधयो जायन्ते, न च केवलं हिताहारोपयोगादेव सर्वव्याधिभयमतिक्रान्तं

भवति; सन्ति ह्यृतेऽप्यहिताहारोपयोगादन्या रोगप्रकृतयः, तद्यथा—कालविपर्ययः, प्रज्ञापराधः, शब्दस्पर्शरूपरसगन्धाश्चासात्म्या इति। ताश्च रोगप्रकृतयो रसान् सम्यगुपयुञ्जानमपि पुरुषमशुभेनोपपादयन्ति; तस्माद्धिताहारोपयोगिनोऽपि दृश्यन्ते व्याधिमन्तः। अहिताहारोपयोगिनां पुनः कारणतो न सद्यो दोषवान् भवत्यपचारः। नहि सर्वाण्यपथ्यानि तुल्यदोषाणि, न च सर्वे दोषास्तुल्यबलाः, न च सर्वाणि शरीराणि व्याधिक्षमत्वे समर्थानि भवन्ति। तदेव ह्यपथ्यं देशकालसंयोगवीर्यप्रमाणातियोगाद्भूयस्तरमपथ्यं संपद्यते। स एव दोषः संसृष्टयोनिर्विरुद्धोपक्रमो गम्भीरानुगतश्चिरस्थितः प्राणायतनसमुत्थो मर्मोपघाती कष्टतमः क्षिप्रकारितमश्च संपद्यते। शरीराणि चातिस्थूलान्यतिकृशान्यनिविष्टमांसशोणितास्थीनि दुर्बलान्यसात्म्याहारोपचितान्यल्पाहाराण्यल्पसत्त्वानि च भवन्त्यव्याधिसहानि, विपरीतानि पुनर्व्याधिसहानि। एभ्यश्चैवापथ्याहारदोषशरीरविशेषेभ्यो व्याधयो मृदवो दारुणाः क्षिप्रसमुत्थाश्चिरकारिणश्च भवन्ति। त एव वातपित्तश्लेष्माणः स्थानविशेषे प्रकुपिता व्याधिविशेषानभिनिर्वर्तयन्त्यग्निवेश ! ॥७॥

तत्र रसादिषु स्थानेषु प्रकुपितानां दोषाणां यस्मिन् स्थाने ये ये व्याधयः संभवन्ति तांस्तान् यथावदनुव्याख्यास्यामः ॥८॥

अश्रद्धा चारुचिश्चास्यवैरस्यमरसज्ञता।
हृल्लासो गौरवं तन्द्रा साङ्गमर्दो ज्वरस्तमः॥ ९॥

पाण्डुत्वं स्रोतसां रोधः क्लैब्यं सादः कृशाङ्गता।
नाशोऽग्नेरयथाकालं वलयः पलितानि च ॥१०॥
रसप्रदोषजा रोगाः, वक्ष्यन्ते रक्तदोषजाः।
कुष्ठवीसर्पपिडका रक्तपित्तमसृग्दरः ॥११॥

गुदमेढ्रास्यपाकश्च प्लीहा गुल्मोऽथ विद्रधिः।
नीलिका कामला व्यङ्गः पिप्लवस्तिलकालकाः ॥१२॥
दद्रुश्चर्मदलं श्वित्रं पामा कोठास्रमण्डलम्।
रक्तप्रदोषाज्जायन्ते, शृणु मांसप्रदोषजान्॥ १३॥

अधिमांसार्बुदं कीलं गलशालूकशुण्डिके।
पूतिमांसालजीगण्डगण्डमालोपजिह्विकाः ॥ १४॥

विद्यान्मांसाश्रयान्, मेदःसंश्रयांस्तु प्रचक्ष्महे।
निन्दितानि प्रमेहाणां पूर्वरूपाणि यानि च॥ १५॥

अध्यस्थिदन्तौ दन्तास्थिभेदशूलं विवर्णता।
केशलोमनखश्मश्रुदोषाश्चास्थिप्रदोषजाः ॥ १६ ॥

रुक् पर्वणां भ्रमो मूर्च्छा दर्शनं तमसस्तथा।
अरुषां स्थूलमूलानां पर्वजानां च दर्शनम् ॥ १७ ॥

मज्जप्रदोषात्, शुक्रस्य दोषात् क्लैब्यमहर्षणम्।
रोगि वा क्लीबमल्पायुर्विरूपं वा प्रजायते ॥ १८ ॥

न चास्य जायते गर्भः पतति प्रस्रवत्यपि।
शुक्रं हि दुष्टं सापत्यं सदारं बाधते नरम् ॥ १९ ॥

इन्द्रियाणि समाश्रित्य प्रकुप्यन्ति यदा मलाः।
उपघातोपतापाभ्यां योजयन्तीन्द्रियाणि ते ॥ २० ॥

स्नायौ सिराकण्डराभ्यो दुष्टाः क्लिश्नन्ति मानवम्।
स्तम्भसंकोचखल्लीभिर्ग्रन्थिस्फुरणसुप्तिभिः ॥ २१ ॥

मलानाश्रित्य कुपिता भेदशोषप्रदूषणम्।
दोषा मलानां कुर्वन्ति सङ्गोत्सर्गावतीव च ॥ २२ ॥

विविधादशितात् पीतादहिताल्लीढखादितात्।
भवन्त्येते मनुष्याणां विकारा य उदाहृताः ॥ २३ ॥

तेषामिच्छन्ननुत्पत्तिं सेवेत मतिमान् सदा।
हितान्येवाशितादीनि न स्युस्तज्जास्तथाऽऽमयाः॥ २४ ॥

रसजानां विकाराणां सर्वं लङ्घनमौषधम्।
विधिशोणितिकेऽध्याये रक्तजानां भिषग्जितम् ॥ २५ ॥

मांसजानां तु संशुद्धिः शस्त्रक्षाराग्निकर्म च।
अष्टौनिन्दितिकेऽध्याये मेदोजानां चिकित्सितम् ॥ २६ ॥

अस्थ्याश्रयाणां व्याधीनां पञ्च कर्माणि भेषजम्।
बस्तयः क्षीरसर्पींषि तिक्तकोपहितानि च ॥ २७ ॥

मज्जशुक्रसमुत्थानामौषधं स्वादुतिक्तकम्।
अन्नं व्यवायव्यायामौ शुद्धिः काले च मात्रया ॥ २८ ॥

शान्तिरिन्द्रियजानां तु त्रिमर्मीये प्रवक्ष्यते।
स्नाय्वादिजानां प्रशमो वक्ष्यते वातरोगिके ॥ २९ ॥

नवेगान्धारणेऽध्याये चिकित्सासंग्रहः कृतः।
मलजानां विकाराणां सिद्धिश्चोक्ता क्वचित्क्वचित् ॥३०॥

व्यायामादूष्मणस्तैक्ष्ण्याद्धितस्यानवचारणात् ।
कोष्ठाच्छाखा मला यान्ति द्रुतत्वान्मारुतस्य च ॥३१॥

तत्रस्थाश्च विलम्बन्ते कदाचिन्न समीरिताः।
नादेशकाले कुप्यन्ति भूयो हेतुप्रतीक्षिणः ॥ ३२ ॥

वृद्ध्या विष्यन्दनात् पाकात् स्रोतोमुखविशोधनात्।
शाखा मुक्त्वा मलाः कोष्ठं यान्ति वायोश्च निग्रहात् ॥ ३३ ॥

अजातानामनुत्पत्तौ जातानां विनिवृत्तये।
रोगाणां यो विधिर्दृष्टः सुखार्थी तं समाचरेत् ॥ ३४ ॥

सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः।
ज्ञानाज्ञानविशेषात्तु मार्गामार्गप्रवृत्तयः ॥ ३५ ॥

हितमेवानुरुध्यन्ते प्रपरीक्ष्य परीक्षकाः।
रजोमोहावृतात्मानः प्रियमेव तु लौकिकाः ॥ ३६ ॥

श्रुतं बुद्धिः स्मृतिर्दाक्ष्यं धृतिर्हितनिषेवणम्।
वाग्विशुद्धिः शमो धैर्यमाश्रयन्ति परीक्षकम् ॥ ३७ ॥

लौकिकं नाश्रयन्त्येते गुणा मोहरजःश्रितम्।
तन्मूला बहवो यन्ति रोगाः शारीरमानसाः ॥ ३८ ॥

प्रज्ञापराधाद्ध्यहितानर्थान् पञ्च निषेवते।
संधारयति वेगांश्च सेवते साहसानि च ॥ ३९ ॥

तदात्वसुखसंज्ञेषु भावेष्वज्ञोऽनुरज्यते।
रज्यते न तु विज्ञाता विज्ञाने ह्यमलीकृते ॥ ४० ॥

न रागान्नाप्यविज्ञानादाहारानुपयोजयेत् ।
परीक्ष्य हितमश्नीयाद्देहो ह्याहारसंभवः ॥ ४१ ॥

आहारस्य विधावष्टौ विशेषा हेतुसंज्ञकाः।
शुभाशुभसमुत्पत्तौ तान् परीक्ष्य प्रयोजयेत् ॥ ४२ ॥

परिहार्याण्यपथ्यानि सदा परिहरन्नरः।
भवत्यनृणतां प्राप्तः साधूनामिह पण्डितः ॥ ४३ ॥

यत्तु रोगसमुत्थानमशक्यमिह केनचित्।
परिहर्तुं न तत् प्राप्य शोचितव्यं मनीषिभिः ॥ ४४ ॥

तत्रः श्लोकाः—

आहारसंभवं वस्तु रोगाश्चाहारसंभवाः।
हिताहितविशेषाच्च विशेषः सुखदुःखयोः ॥ ४५ ॥

सहत्वे चासहत्वे च दुःखानां देहसत्त्वयोः।
विशेषो रोगसङ्घाश्च धातुजा ये पृथक्पृथक् ॥ ४६ ॥

तेषां चैव प्रशमनं कोष्ठाच्छाखा उपेत्य च।
दोषा यथा प्रकुप्यन्ति शाखाभ्यः कोष्ठमेत्य च ॥४७॥

प्राज्ञाज्ञयोर्विशेषश्च स्वस्थातुरहितं च यत्।
विविधाशितपीतीये तत् सर्वं संप्रकाशितम् ॥४८॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने विविधाशित-
पीतीयो नामाष्टाविंशोऽध्यायः ॥२८॥

इत्यन्नपानचतुष्कः ॥७॥

ऊनत्रिंशोऽध्यायः

अथातो दशप्राणायतनीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

दशैवायतनान्याहुः प्राणा येषु प्रतिष्ठिताः ।
शङ्खौ मर्मत्रयं कण्ठो रक्तं शुक्रौजसी गुदम् ॥३॥

तानीन्द्रियाणि विज्ञानं चेतनाहेतुमामयान् ।
जानीते यः स वै विद्वान् प्राणाभिसर उच्यते ॥४॥

द्विविधास्तु खलु भिषजो भवन्त्यग्निवेश ! प्राणानामेकेऽभिसरा हन्तारो रोगाणां, रोगाणामेकेऽभिसरा हन्तारः प्राणानामिति ॥५॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच—भगवंस्ते कथमस्माभिर्वेदितव्या भवेयुरिति ॥६॥

भगवानुवाच—य इमे कुलीनाः पर्यवदातश्रुताः परिदृष्टकर्माणो दक्षाः शुचयो जितहस्ता जितात्मानः सर्वोपकरणवन्तः सर्वेन्द्रियोपपन्नाः प्रकृतिज्ञाः प्रतिपत्तिज्ञाश्च ते ज्ञेयाः प्राणानामभिसरा हन्तारो रोगाणां; तथाविधा हि केवले शरीरज्ञाने शरीराभिनिर्वृत्तिज्ञाने प्रकृतिविकारज्ञाने च निःसंशयाः, सुखसाध्यकृच्छ्रसाध्ययाप्यप्रत्याख्येयानां च रोगाणां समुत्थानपूर्वरूपलिङ्गवेदनोपशयविशेषज्ञाने व्यपगतसंदेहाः, त्रिविधस्यायुर्वेदसूत्रस्य ससंग्रहव्याकरणस्य सत्रिविधौषधग्रामस्य प्रवक्तारः, पञ्चत्रिंशतो मूलफलानां चतुर्णां च स्नेहानां पञ्चानां च लवणानामष्टानां च मूत्राणामष्टानां च क्षीराणां क्षीरत्वग्वृक्षाणां च षण्णां शिरोविरेचनादेश्च पञ्चकर्माश्रयस्यौषधगणस्याष्टाविंशतेश्च यवागूनां द्वात्रिंशतश्चूर्णप्रदेहानां षण्णां च विरेचनशतानां पञ्चानां च कषायशतानां प्रयोक्तारः, स्वस्थवृत्तविहितभोजनपाननियमस्थानचङ्क्रमणशयनासनमात्राद्रव्याञ्जनधूमनावनाभ्यञ्जनपरिमार्जनवेगाविधारणविधारणव्यायामसात्म्येन्द्रियपरीक्षोपक्रमणसद्वृत्तकुशलाः, चतुष्पादोपगृहीते च भेषजे षोडशकले सविनिश्चये सत्रिपर्येषणे सवातकलाकलज्ञाने व्यपगतसन्देहाः, चतुर्विधस्य च स्नेहस्य चतुर्विंशत्युपनयस्योपकल्पनीयस्य चतुःषष्टिपर्यन्तस्य च व्यवस्थापयितारः, बहुविध-

विधानयुक्तानां च स्नेह्यस्वेद्यवम्यविरेच्यविविधौषधोपचाराणां च कुशलाः, शिरोरोगादेर्दोषांशविकल्पजस्य च व्याधिसंग्रहस्य सक्षयपिडकाविद्रधेस्त्रयाणां च शोफानां बहुविधशोफानुबन्धानामष्टचत्वारिंशतश्च रोगाधिकरणानां चत्वारिंशदुत्तरस्य च नानात्मजस्य व्याधिशतस्य तथा विगर्हितातिस्थूलातिकृशानां सहेतुलक्षणोपक्रमाणां स्वप्नस्य च हिताहितस्यास्वप्नातिस्वप्नस्य च सहेतूपक्रमस्य षण्णां च लङ्घनादीनामुपक्रमाणां संतर्पणापतर्पणजानां च रोगाणां सरूपप्रशमनानां शोणितजानां च व्याधीनां मदमूर्च्छायसंन्यासानां च सकारणरूपौषधोपचाराणां कुशलाः, कुशलाश्चाहारविधिविनिश्चयस्य प्रकृत्या हिताहितानामाहारविकाराणामग्र्यसंग्रहस्यासवानां च चतुरशीतेर्द्रव्यगुणकर्मविनिश्चयस्य रसानुरससंश्रयस्य सविकल्पवैरोधिकस्य द्वादशवर्गाश्रयस्य चान्नपानस्य सगुणप्रभावस्य सानुपानगुणस्य नवविधस्यार्थसंग्रहस्याहारगतेश्च हिताहितोपयोगविशेषात्मकस्य च शुभाशुभविशेषस्य धात्वाश्रयाणां च रोगाणां सौषधसंग्रहाणां दशानां च प्राणायतनानां यं च वक्ष्याम्यर्थेदशमहामूलीये त्रिंशत्तमाध्याये तत्र च कृत्स्नस्य तन्त्रोद्देशलक्षणस्य तन्त्रस्य च ग्रहणधारणविज्ञानप्रयोगकर्मकार्यकालकर्तृकरणकुशलाः, कुशलाश्च स्मृतिमतिशास्त्रयुक्तिज्ञानस्यात्मनः शीलगुणैरविसंवादनेन च संपादनेन सर्वप्राणिषु चेतसो मैत्रस्य मातापितृभ्रातृबन्धुवत्, एवंयुक्ता भवन्त्यग्निवेश ! प्राणानामभिसरा हन्तारो रोगाणामिति ॥७॥

अतो विपरीता रोगाणामभिसरा हन्तारः प्राणानां, भिषक्छद्मप्रतिच्छन्नाः कण्टकभूता लोकस्य प्रतिरूपकसधर्माणो राज्ञां प्रमादाच्चरन्ति राष्ट्राणि ॥८॥

तेषामिदं विशेषविज्ञानं भवति—अत्यर्थं वैद्यवेशेन श्लाघमाना विशिखान्तरमनुचरन्ति कर्मलोभात्, श्रुत्वा च कस्यचिदातुर्यमभितः परिपतन्ति, संश्रवणे चास्यात्मनो वैद्यगुणानुच्चैर्वदन्ति, यश्चास्य वैद्यः प्रतिकर्म करोति तस्य च दोषान्मुहुर्मुहुरुदाहरन्ति, आतुरमित्राणि च प्रहर्षणोपजापोपसेवादिभिरिच्छन्त्यात्मीकर्तुं, स्वल्पेच्छुतां चात्मनः ख्यापयन्ति, कर्म चासाद्य मुहुर्मुहुरवलोकयन्ति दाक्ष्येणाज्ञानमात्मनः प्रच्छादयितुकामाः, व्याधिं चापावर्तयितुमशक्नुवन्तो व्याधितमेवानुपकरणमपरिचारकमनात्मवन्तमुपदिशन्ति, अन्तगतं चैनमभिसमीक्ष्यान्यमाश्रयन्ति देशमपदेशमात्मनः कृत्वा, प्राकृतजनसन्निपाते चात्मनः कौशलमकुशलवद्वर्णयन्ति, अधीरवच्च धैर्यमपवदन्ति धीराणां, विद्वज्जनसन्निपातं (चाभिसमीक्ष्य) प्रतिभय-

मिव कान्तारमध्वगाः परिहरन्ति दूरात्, यश्चैषां कश्चित् सूत्रावयवो भवत्युपयुक्तस्तमप्रकृते प्रकृतान्तरे वा सततमुदाहरन्ति, न चानुयोगमिच्छन्त्यनुयोक्तुं वा, मृत्योरिव चानुयोगादुद्विजन्ते, न चैषामाचार्यः शिष्यः सब्रह्मचारी वैवादिको वा कश्चित् प्रज्ञायत इति ॥९॥

भवन्ति चात्र—

भिषक्छद्म प्रविश्यैवं व्याधितांस्तर्कयन्ति ये ।
वीतंसमिव संश्रित्य वने शाकुनिका द्विजान् ॥१०॥

श्रुतदृष्टक्रियाकालमात्राज्ञानबहिष्कृताः ।
वर्जनीया हि ते मृत्योश्चरन्त्यनुचरा भुवि ॥११॥

वृत्तिहेतोर्भिषङ्मानपूर्णान् मूर्खविशारदान् ।
वर्जयेदातुरो विद्वान् सर्पास्ते पीतमारुताः ॥१२॥

ये तु शास्त्रविदो दक्षाः शुचयः कर्मकोविदाः ।
जितहस्ता जितात्मानस्तेभ्यो नित्यं कृतं नमः ॥१३॥

तत्र श्लोक—

दशप्राणायतनिके श्लोकस्थानार्थसंग्रहः ।
द्विविधा भिषजश्चोक्ताः प्राणस्यायतनानि च ॥१४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थाने दशप्राणायतनीयो नामोनत्रिंशोऽध्यायः ॥२९॥

त्रिंशोऽध्यायः

अथातोऽर्थेदशमहामूलीयमध्यायं व्याख्यास्यामः ॥१॥

इति ह स्माह भगवानात्रेयः ॥२॥

अर्थे दश महामूलाः समासक्ता महाफलाः ।
महच्चार्थश्च हृदयं पर्यायैरुच्यते बुधैः ॥३॥

षडङ्गमङ्गं विज्ञानमिन्द्रियाण्यर्थपञ्चकम् ।
आत्मा च सगुणश्चेतश्चिन्त्यं च हृदि संश्रितम् ॥४॥

प्रतिष्ठार्थं हि भावानामेषां हृदयमिष्यते ।
गोपानसीनामागारकर्णिकेवार्थचिन्तकैः ॥५॥

तस्योपघातान्मूर्च्छायं भेदान्मरणमृच्छति ।
यद्धि तत् स्पर्शविज्ञानं धारि तत्तत्र संश्रितम् ॥६॥

तत् परस्यौजसः स्थानं तत्र चैतन्यसंग्रहः ।
हृययं महदर्थश्च तस्मादुक्तं चिकित्सकैः ॥७॥

तेन मूलेन महता महामूला मता दश ।
ओजोवहाः शरीरेऽस्मिन् विधम्यन्ते समन्ततः ॥८॥

येनौजसा वर्तयन्ति प्रीणिताः सर्वदेहिनः ।
यदृते सर्वभूतानां जीवितं नावतिष्ठते ॥९॥

यत् सारमादौ गर्भस्य यत्तद्गर्भरसाद्रसः ।
संवर्तमानं हृदयं समाविशति यत् पुरा ॥१०॥

यस्य नाशात्तु नाशोऽस्ति धारि यद्धृदयाश्रितम् ।
यच्छरीररसस्नेहः प्राणा यत्र प्रतिष्ठिताः ॥११॥

तत्फला बहुधा वा ताः फलन्तीव(ति) महाफलाः ।
ध्मानाद्धमन्यः स्रवणात् स्रोतांसि सरणात्सिराः ॥१२॥

तन्महत् ता महामूलास्तच्चौजः परिरक्षता ।
परिहार्या विशेषेण मनसो दुःखहेतवः ॥१३॥

हृद्यं यत् स्याद्यदौजस्यं स्रोतसां यत् प्रसादनम् ।
तत्तत् सेव्यं प्रयत्नेन प्रशमो ज्ञानमेव च ॥१४॥

अथ खल्वेकं प्राणवर्धनानामुत्कृष्टतममेकं बलवर्धनानामेकं बृंहणानामेकं नन्दनानामेकं हर्षणानामेकमयनानामिति। तत्राहिंसा प्राणिनां प्राणवर्धनानामुत्कृष्टतमं, वीर्यं बलवर्धनानां, विद्या बृंहणानां, इन्द्रियजयो नन्दनानां, तत्त्वावबोधो हर्षणानां, ब्रह्मचर्यमयनानामिति; एवमायुर्वेदविदो मन्यन्ते ॥१५॥

तत्रायुर्वेदविदस्तन्त्रस्थानाध्यायप्रश्नानां पृथक्त्वेन वाक्यशो वाक्यार्थशोऽर्थावयवशश्च प्रवक्तारो मन्तव्याः। तत्राह—कथं तन्त्रादीनि वाक्यशो वाक्यार्थशोऽर्थावयवशश्चोक्तानि भवन्तीति ॥१६॥

अत्रोच्यते—तन्त्रमार्षं कार्त्स्न्येन यथाम्नायमुच्यमानं वाक्यशो भवत्युक्तम् ॥१७॥

बुद्ध्या सम्यगनुप्रविश्यार्थतत्त्वं वाग्भिर्व्याससमासप्रतिज्ञाहेतूदाहरणोपनयनिगमनयुक्ताभिस्त्रिविधशिष्यबुद्धिगम्याभिरुच्यमानं वाक्यार्थशो भवत्युक्तम् ॥१८॥

तन्त्रनियतानामर्थदुर्गाणां पुनर्विभावनैरुक्तमर्थावयवशो भवत्युक्तम् ॥१९॥

तत्र चेत् प्रष्टारः स्युः—चतुर्णामृक्सामयजुरथर्ववेदानां कं वेदमुपदिशन्त्यायुर्वेदविदः ?, किमायुः ?, कस्मादायुर्वेदः ?, किमर्थमायुर्वेदः ?, शाश्वतोऽशाश्वतो वा ?, कति कानि चास्याङ्गानि ?, कैश्चायमध्येतव्यः ?, किमर्थं च ? इति ॥२०॥

तत्र भिषजा पृष्टेनैवं चतुर्णामृक्सामयजुरथर्ववेदानामात्मनोऽथर्ववेदे भक्तिरादेश्या, वेदो ह्याथर्वणो दानस्वस्त्ययनबलिमङ्गलहोमनियमप्रायश्चित्तोपवासमन्त्रादिपरिग्रहाच्चिकित्सां प्राह; चिकित्सा चायुषो हितायोपदिश्यते ॥२१॥

वेदं चोपदिश्यायुर्वाच्यं; तत्रायुश्चेतनानुवृत्तिर्जीवितमनुबन्धो धारि चेत्येकोऽर्थः ॥२२॥

तदायुर्वेदयतीत्यायुर्वेदः; कथमिति चेत् ? उच्यते—स्वलक्षणतः सुखासुखतो हिताहिततः प्रमाणाप्रमाणतश्च; यतश्चायुष्याण्यनायुष्याणि च द्रव्यगुणकर्माणि वेदयत्यतोऽप्यायुर्वेदः। तत्रायुष्याण्यनायुष्याणि च द्रव्यगुणकर्माणि केवलेनोपदेक्ष्यन्ते तन्त्रेण ॥२३॥

तत्रायुरुक्तं स्वलक्षणतो यथावदिहैव पूर्वाध्याये च । तत्र शारीरमानसाभ्यां रोगाभ्यामनभिद्रुतस्य विशेषेण यौवनवतः समर्थानुगतबलवीर्ययशःपौरुषपराक्रमस्य ज्ञानविज्ञानेन्द्रियेन्द्रियार्थबलसमुदये वर्तमानस्य परमर्द्धिरुचिरविविधोपभोगस्य समृद्धसर्वारम्भस्य यथेष्टविचारिणः सुखमायुरुच्यते; असुखमतो विपर्ययेण; हितैषिणः पुनर्भूतानां परस्वादुपरतस्य सत्यवादिनः शमपरस्य परीक्ष्यकारिणोऽप्रमत्तस्य त्रिवर्गं परस्परेणानुपहतमुपसेवमानस्य पूजार्हसंपूजकस्य ज्ञानविज्ञानोपशमशीलस्य वृद्धोपसेविनः सुनियतरागरोषेर्ष्यामदमानवेगस्य सततं विविधप्रदानपरस्य तपोज्ञानप्रशमनित्यस्याध्यात्मविदस्तत्परस्य लोकमिमं चामुं चावेक्षमाणस्य स्मृतिमतिमतो हितमायुरुच्यते; अहितमतो विपर्ययेण ।।२४।।

प्रमाणमायुषस्त्वर्थेन्द्रियमनोबुद्धिचेष्टादीनां विकृतिलक्षणैरुपलभ्यतेऽनिमित्तैः, अयमस्मात् क्षणान्मुहूर्ताद्दिवसात्त्रिपञ्चसप्तदशद्वादशाहात् पक्षान्मासात् षण्मासात् संवत्सराद्वा स्वभावमापत्स्यत इति; तत्र स्वभावः प्रवृत्तेरुपरमो मरणमनित्यता निरोध इत्येकोऽर्थः; इत्यायुषः प्रमाणम्; अतो विपरीतमप्रमाणमरिष्टाधिकारे; देहप्रकृतिलक्षणमधिकृत्य चोपदिष्टमायुषः प्रमाणमायुर्वेदे ।।२५।।

प्रयोजनं चास्य स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य विकारप्रशमनं च ।।२६।।

सोऽयमायुर्वेदः शाश्वतो निर्दिश्यते, अनादित्वात्, स्वभावसंसिद्धलक्षणत्वात्, भावस्वभावनित्यत्वाच्च । न हि नाभूत् कदाचिदायुषः सन्तानो बुद्धिसन्तानो वा, शाश्वतश्चायुषो वेदिता, अनादि च सुखदुःखं सद्रव्यहेतुलक्षणमपरापरयोगात् । एष चार्थसंग्रहो विभाव्यते आयुर्वेदलक्षणमिति । गुरुलघुशीतोष्णस्निग्धरूक्षादीनां द्रव्याणां सामान्यविशेषाभ्यां वृद्धिह्रासौ, यथोक्तं—गुरुभिरभ्यस्यमानैर्गुरूणामुपचयो भवत्यपचयो लघूनां, एवमेवेतरेषामिति, एष भावस्वभावो नित्यः, स्वलक्षणं च द्रव्याणां पृथिव्यादीनां; सन्ति तु द्रव्याणि गुणाश्च नित्यानित्याः । न ह्यायुर्वेदस्याभूत्वोत्पत्तिरुपलभ्यते, अन्यत्राववबोधोपदेशाभ्याम्; एतद्वै द्वयमधिकृत्योत्पत्तिमुपदिशन्त्येके । स्वाभाविकं चास्य लक्षणमकृतकं, यदुक्तमिहाद्येऽध्याये च; यथा—अग्नेरौष्ण्यम्, अपां द्रवत्वम् । भावस्वभावनित्यत्वमपि चास्य, यथोक्तं—गुरुभिरभ्यस्यमानैर्गुरूणामुपचयो भवत्यपचयो लघूनामिति ।।२७।।

तस्यायुर्वेदस्याङ्गान्यष्टौ; तद्यथा—कायचिकित्सा, शालाक्यं, शल्यापहर्तृकं, विषगरवैरोधिकप्रशमनं, भूतविद्या, कौमारभृत्यकं, रसायनं, वाजीकरणमिति ॥२८॥

स चाध्येतव्यो ब्राह्मणराजन्यवैश्यैः। तत्रानुग्रहार्थं प्राणिनां ब्राह्मणैः, आरक्षार्थं राजन्यैः, वृत्त्यर्थं वैश्यैः; सामान्यतो वा धर्मार्थकामपरिग्रहार्थं सर्वैः। तत्र यदध्यात्मविदां धर्मपथस्थानां धर्मप्रकाशकानां वा मातृपितृभ्रातृबन्धुगुरुजनस्य वा विकारप्रशमने प्रयत्नवान् भवति, यच्चायुर्वेदोक्तमध्यात्ममनुध्यायति वेदयत्यनुविधीयते वा, सोऽस्य परो धर्मः; या पुनरीश्वराणां वसुमतां वा सकाशात् सुखोपहारनिमित्ता भवत्यर्थावाप्तिरारक्षणं च, या च स्वपरिगृहीतानां प्राणिनामातुर्यादारक्षा, सोऽस्यार्थः; यत् पुनरस्य विद्वद्ग्रहणयशः शरण्यत्वं च, या च संमानशुश्रूषा, यच्चेष्टानां विषयाणामारोग्यमाधत्ते सोऽस्य कामः। इति यथाप्रश्नमुक्तमशेषेण ॥२९॥

अथ भिषगादित एव भिषजा प्रष्टव्योऽष्टविधं भवति—तन्त्रं, तन्त्रार्थान्, स्थानं, स्थानार्थान्, अध्यायं, अध्यायार्थान्, प्रश्नं, प्रश्नार्थांश्चेति; पृष्टेन चैतद्वक्तव्यमशेषेण वाक्यशो वाक्यार्थशोऽर्थावयवशश्चेति ॥३०॥

तत्रायुर्वेदः शाखा विद्या सूत्रं ज्ञानं शास्त्रं लक्षणं तन्त्रमित्यनर्थान्तरम् ॥३१॥

तन्त्रार्थः पुनः स्वलक्षणैरुपदिष्टः। स चार्थः प्रकरणैर्विभाव्यमानो भूय एव शरीरवृत्तिहेतुव्याधिकर्मकार्यकालकर्तृकरणविधिविनिश्चयाद्दशप्रकरणः, तानि च प्रकरणानि केवलेनोपदेक्ष्यन्ते तन्त्रेण ॥३२॥

तन्त्रस्यास्याष्टौ स्थानानि; तद्यथा—श्लोकनिदानविमानशारीरेन्द्रियकायचिकित्सितकल्पसिद्धिस्थानानि। तत्र त्रिंशदध्यायकं श्लोकस्थानम्, अष्टाष्टाध्यायकानि निदानविमानशारीरस्थानानि, द्वादशकमिन्द्रियाणां, त्रिंशकं चिकित्सितानां, द्वादशके कल्पसिद्धिस्थाने भवतः ॥३३॥

भवति चात्र—

द्वे त्रिंशके द्वादशकत्रयं च त्रीण्यष्टकान्येषु समाप्तिरुक्ता।
श्लोकौषधारिष्टविकल्पसिद्धिनिदानमानाश्रयसंज्ञकेषु ॥३४॥
स्वे स्वे स्थाने यथास्वं च स्थानार्थ उपदेक्ष्यते।
सविंशमध्यायशतं शृणु नामक्रमागतम् ॥३५॥
दीर्घञ्जीवोऽप्यपामार्गतण्डुलारग्वधादिकौ ।
षड्विरेकाश्रयश्चेति चतुष्को भेषजाश्रयः ॥३६॥

मात्रातस्याशितीयौ च नवेगान्धारणं तथा ।
इन्द्रियोपक्रमश्चेति चत्वारः स्वास्थ्यवृत्तिकाः ॥३७॥

खुड्डाकश्च चतुष्पादो महांस्तिस्रैषणस्तथा ।
सह वातकलाख्येन विद्यान्नैर्देशिकान् बुधः ॥३८॥

स्नेहनस्वेदनाध्यायावुभौ यश्चोपकल्पनः ।
चिकित्साप्राभृतश्चैव सर्व एव प्रकल्पनाः ॥३९॥

कियन्तःशिरसीयश्च त्रिशोफाष्टोदरादिकौ ।
रोगाध्यायो महांश्चैव रोगाध्यायचतुष्टयम् ॥४०॥

अष्टौनिन्दितसंख्यातस्तथा लङ्घनतर्पणे ।
विधिशोणितिकश्चैव व्याख्यातास्तत्र योजनाः ॥४१॥

यज्जःपुरुषसंख्यातो भद्रकाप्यान्नपानिकौ ।
विविधाशितपीतीयश्चत्वारोऽन्नविनिश्चयाः ॥४२॥

दशप्राणायतनिकस्तथाऽर्थेदशमूलिकः ।
द्वावेतौ प्राणदेहार्थौ प्रोक्तौ वैद्यगुणाश्रयौ ॥४३॥

औषधस्वस्थनिर्देशकल्पनारोगयोजनाः ।
चतुष्काः षट् क्रमेणोक्ताः सप्तमश्चान्नपानिकः ॥४४॥

द्वौ चान्त्यौ संग्रहाध्यायाविति त्रिंशकमर्थवत् ।
श्लोकस्थानं समुद्दिष्टं तन्त्रस्यास्य शिरः शुभम् ॥४५॥

चतुष्काणां महार्थानां स्थानेऽस्मिन् संग्रहः कृतः ।
श्लोकार्थः संग्रहार्थश्च श्लोकस्थानमतः स्मृतम् ॥४६॥

ज्वराणां रक्तपित्तस्य गुल्मानां मेहकुष्ठयोः ।
शोषोन्मादनिदाने च स्यादपस्मारिणां च यत् ॥४७॥

इत्यध्यायाष्टकमिदं निदानस्थानमुच्यते ।
रसेषु त्रिविधे कुक्षौ ध्वंसे जनपदस्य च ॥४८॥

त्रिविधे रोगविज्ञाने स्रोतःस्वपि च वर्तने ।
रोगानीके व्याधिरूपे रोगाणां च भिषग्जिते ॥४९॥

अष्टौ विमानान्युक्तानि मानार्थानि महर्षिणा ।
कतिधापुरुषीयं च गोत्रेणातुल्यमेव च ॥५०॥

खुड्डिका महती चैव गर्भावक्रान्तिरुच्यते ।
पुरुषस्य शरीरस्य विचयौ द्वौ विनिश्चितौ ॥५१॥

शरीरसंख्या सूत्रं च जातेरष्टममुच्यते ।
इत्युद्दिष्टानि मुनिना शारीराण्यत्रिसूनुना ॥५२॥

वर्णस्वरीयः पुष्पाख्यस्तृतीयः परिमर्शनः ।
चतुर्थ इन्द्रियानीकः पञ्चमः पूर्वरूपिकः ॥५३॥

कतमानिशरीरीयः पन्नरूपोऽप्यवाक्शिराः ।
यस्यश्यावनिमित्तश्च सद्योमरण एव च ॥५४॥

अणुज्योतिरिति ख्यातस्तथा गोमयचूर्णवान् ।
द्वादशाध्यायकं स्थानमिन्द्रियाणामिति स्मृतम् ॥५५॥

अभयामलकीयं च प्राणकामीयमेव च ।
करप्रचितकं वेदसमुत्थानं रसायनम् ॥५६॥

संयोगशरमूलीयमासिक्तक्षीरकं तथा ।
माषपर्णभृतीयं च पुमाञ्जातबलादिकम् ॥५७॥

चतुष्कद्वयमप्येतदध्यायद्वयमुच्यते ।
रसायनमिति ज्ञेयं वाजीकरणमेव च ॥५८॥

ज्वराणां रक्तपित्तस्य गुल्मानां मेहकुष्ठयोः ।
शोषोन्मादेऽप्यपस्मारे क्षतशोथोदरार्शसाम् ॥५९॥

ग्रहणीपाण्डुरोगाणां श्वासकासातिसारिणाम् ।
छर्दिवीसर्पतृष्णानां विषमद्यविकारयोः ॥६०॥

द्विव्रणीयं त्रिमर्मीयमूरुस्तम्भिकमेव च ।
वातरोगे वातरक्ते योनिव्यापत्सु चैव यत् ॥६१॥

त्रिंशच्चिकित्सितान्युक्तान्यतः कल्पान् प्रचक्ष्महे ।
फलजीमूतवेक्ष्वाकुकल्पो धामार्गवस्य च ॥६२॥

पञ्चमो वत्सकस्योक्तः षष्ठश्च कृतवेधने ।
श्यामात्रिवृतयोः कल्पस्तथैव चतुरङ्गुले ॥६३॥

तिल्वकस्य सुधायाश्च सप्तलाशङ्खिनीषु च ।
दन्तीद्रवन्त्योः कल्पश्च द्वादशोऽयं समाप्यते ॥६४॥

कल्पना पञ्चकर्माख्या बस्तिसूत्री तथैव च।
स्नेहव्यापदिकी सिद्धिर्नेत्रव्यापदिकी तथा ॥६ ॥

सिद्धिः शोधनयोश्चैव बस्तिसिद्धिस्तथैव च।
प्रासृती मर्मसंख्याता सिद्धिर्बस्त्याश्रया च या ॥६६॥

फलमात्रा तथा सिद्धिः सिद्धिश्चोत्तरसंज्ञिता।
सिद्धयो द्वादशैवैतास्तन्त्रं चासु समाप्यते ॥६७॥

स्वे स्वे स्थाने तथाऽध्याये चाध्यायार्थः प्रवक्ष्यते।
तं ब्रूयात् सर्वतः सर्वं यथास्वं ह्यर्थसंग्रहात् ॥३८॥

पृच्छा तन्त्राद्यथाम्नायं विधिना प्रश्न उच्यते।
प्रश्नार्थो युक्तिमांस्तस्य तन्त्रेणैवार्थनिश्चयः ॥६९॥

निरुक्तं तन्त्रणात्तन्त्रं, स्थानमर्थंप्रतिष्ठया।
अधिकृत्यार्थमध्यायनामसंज्ञा प्रतिष्ठिता ॥७०॥

इति सर्वं यथाप्रश्नमष्टकं संप्रकाशितम्।
कात्स्न्येंन चोक्तस्तन्त्रस्य संग्रहः सुविनिश्चितः ॥७१॥

सन्ति पाल्लविकोत्पाताः संक्षोभं जनयन्ति ये।
वर्तकानामिवोत्पाताः सहसैवाविभाविताः ॥७२॥

तस्मात्तान् पूर्वसंजल्पे सर्वत्राष्टकमादिशेत्।
परावरपरीक्षार्थं तत्र शास्त्रविदां बलम् ॥७३॥

शब्दमात्रेण तन्त्रस्य केवलस्यैकदेशिकाः।
भ्रमन्त्यल्पबलास्तन्त्रे ज्याशब्देनेव वर्तकाः ॥७४॥

पशुः पशूनां दौर्बल्यात् कश्चिन्मध्ये वृकायते।
स सत्यं वृकमासाद्य प्रकृतिं भजते पशुः ॥७५॥

तद्वदज्ञोऽज्ञमध्यस्थः कश्चिन्मौखर्यसाधनः।
स्थापयत्याप्तमात्मानमाप्तं त्वासाद्य भिद्यते ॥७६॥

बभ्रुर्गूढ इवोर्णाभिरबुद्धिरबहुश्रुतः।
किं वै वक्ष्यति सञ्जल्पे कुण्डभेदी जडो यथा ॥७७॥

सद्वृत्तैर्न विगृह्णीयाद्भिषगल्पश्रुतैरपि।
हन्यात् प्रश्नाष्टकेनादावितरांस्त्वाप्तमानिनः ॥७८॥

दम्भिनो मुखरा ह्यज्ञाः प्रभूताबद्धभाषिणः।
प्रायः, प्रायेण सुमुखाः सन्तो युक्ताल्पभाषिणः ॥७९॥

तत्त्वज्ञानप्रकाशार्थमहङ्कारमनाश्रितः ।
स्वल्पाधाराज्ञमुखरान्मर्षयेन्न विवादिनः ॥८०॥

परो भूतेष्वनुक्रोशस्तत्त्वज्ञान(ने)परा दया।
येषां तेषामसद्वादनिग्रहे निरता मतिः ॥८१॥

असत्पक्षाक्षणित्वार्तिदम्भपारुष्यसाधनाः ।
भवन्त्यनाप्ताः स्वे तन्त्रे प्रायः परविकत्थकाः ॥८२॥

तान् कालपाशसदृशान् वर्जयेच्छास्त्रदूषकान्।
प्रशमज्ञानविज्ञानपूर्णाः सेव्या भिषक्तमाः ॥८३॥

समग्रं दुःखमायत्तमविज्ञाने द्वयाश्रयम्।
सुखं समग्रं विज्ञाने विमले च प्रतिष्ठितम् ॥८४॥

इदमेवमुदारार्थमज्ञानां न प्रकाशकम्।
शास्त्रं दृष्टिप्रणष्टानां यथैवादित्यमण्डलम् ॥८५॥

तत्र श्लोकाः—

अर्थे दशमहामूलाः संज्ञा चासां यथा कृता।
अयनान्ताः षडग्र्याश्च रूपं वेदविदां च यत् ॥८६॥

सप्तकश्चाष्टकश्चैव परिप्रश्नाः सनिर्णयाः।
यथा वाच्यं यदर्थं च षड्विधाश्चैकदेशिकाः ॥८७॥

अर्थेदशमहामूले सर्वमेतत् प्रकाशितम्।
संग्रहश्चायमध्यायस्तन्त्रस्यास्यैव केवलः ॥८८॥

यथा सुमनसां सूत्रं संग्रहार्थं विधीयते।
संग्रहार्थं तथाऽर्थानामृषिणा संग्रहः कृतः ॥८९॥

अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते।
इयताऽवधिना सर्वं सूत्रस्थानं समाप्यते ॥९०॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते सूत्रस्थानेऽर्थेदशमहामूलीयो नाम त्रिंशोऽध्यायः ॥३०॥

॥ समाप्तं सूत्रस्थानम् ॥

शुद्धिपत्रम्

पृष्ठाङ्कः	पंक्तिः	सन्दर्भः	मुद्रितपाठः	शुद्धपाठः
४	२१	१.१	सभ्यग	सम्यग
५	१९	१.२	सम्बाधन	सम्बोधन
७	१०	१.३	यस्याद	यस्माद
८	१४	१.१०	वार्क्षिदेव	वार्क्षिर्देव
८	१५	१.११	वैजवापिश्च	बैजवापिश्च
१५	१०	१.४३	हिसा	हिंसा
१५	२०	१.४४	ह्रासहेतुवि	ह्रासहेतुर्वि
१५	२७	१.४४	द्वय	द्व्य
१९	७	१.४५	निरु	निरू
२३	२५	१.५०	पृथग्भावा	पृथग्भावो
२७	११,१२	१.५२	संया	संयो
३१	१८	१.५९-६१	रुक्ष	रूक्ष
३२	२६	१.६२	दहमाश्रिताः	देहमाश्रिताः
३२	२७	१.६२	ानरुच्यते	निरुच्यते
३७	१३	१.९३	अजामूत्र	अजामूत्रं
३९	११	१.११८	दद्र	दद्रु
४८	२८	३.१२	कुष्ठ	कुष्ठं
४८	२८	३.१२	समनःशिल	समनःशिलं
४९	२	३.१३	सकुष्ठ	सकुष्ठं
५२	४	४.३	षञ्च	पञ्च
५३	१३	४.५	तैत्लस्य	तैलस्य
६१	१८	४.१९	मात्रण	मात्रेण
६१	३०	४.२१	एववादिनं	एवंवादिनं
७१	२२	५.४७	घ्रणेन	घ्राणेन
८१	११	६.३	इस	इह
८९	६	७.१४	छदि	छर्दि
१०७	२८	८.२२	सर्वत्राध	सर्वत्राधि

१२०	२७	१०.५	मात्राच्छेदा	मात्रोच्छेदा
१२०	३२	१०.५	व्ययिरेक	व्यतिरेक
१२१	२५	१०.५	षाडश	षोडश
१२३	१६	१०.१०	त्कृष्ठतां	त्कृष्टतां
१२३	१८	१०.९-१०	कथम	कथन
१२६	८	१०.२३-२४	औपध	औषध
१२८	२०	११.६	माततं	मातरं
१३५	२६	११.२५	यथाक्त	यथोक्त
१३९	२८	११.३४	भिषज	भिषजः
१३९	२९	११.३५	स्वप्ना, ब्रह्मचर्यामति	स्वप्नो, ब्रह्मचर्यमिति
१४१	१३	११.३९	प्रवत्ति	प्रवृत्ति
१४२	१६	११.३९	लोह	मोह
१४४	२५	११.४५	लाभाचा	लाभाच्चा
१४७	२०	११.५५	प्रणिधान	प्रणिधानं
१४७	२८	११.५६	लभत	लभते
१४९	२०	१२.५	तच्छ्रत्वा	तच्छ्रुत्वा
१५५	४	१३.१-२	निदश	निर्देश
१८५	२	१४.६७	प्रावृताङ्ग	प्रावृताङ्गं
१८६	९	१५.३	प्रतिभागार्थाः	प्रतिभोगार्थाः
१९१	९	१५ १५	यानयान	यानयानं
२०३	९	१६.२०	इवाक्षिणा	इवाक्षिणो
२०५	९	१७.३०-४०	इत्पादौ	इत्यादौ
२१३	१६	१७.९०-१००	व्यधादया	व्यधादयो
२१९	२९	१८.९-१५	छेदादित्यर्थ	छेदादित्यर्थः
२२०	२९	१८.२६	शङ्खका	शङ्खको
२२९	१	१९.४	बमि	वमि
२३५	२३	२०.१२	एववि‍ध	एवंविध
२३८	३	२०.१४-१६	वाह्य	बाह्य
२४७	२६	२१.५०	रूक्षत्व	रूक्षत्वं
२४७	२६	२१.५०	पचर्यंत	पचर्यंते
२५१	१९	२२.३-८	द्वैध्योद्	द्वैध्याद्
२५१	२०	२२.२८	शाष	शोष

२५७	६	२३.१-२	१४१	१४.१
२६६	२७	२४.४०	वार्द्रण	वार्द्रेण
२६९	७	२५.१-२	ऽध्याया	ऽध्यायो
२७५	१	२५.३५	बयव	वयव
२७६	६	२५.३८	ऐणेय	ऐणेयं
२७८	२६	२५.४०	हार्याणम्	हार्याणाम्
२७९	२६	२५.४०	प्रियङ्गरेव	प्रियङ्गुरेव
२९१	१९	२६.१७-२०	याता	यातो
२९२	२८	२६.२७	हेतुर्मेषजं	हेतुर्भेषजं
२९८	४	२६.४१	दकस्यः	दकस्य
२९९	२८	२६.(४)४३	मार्गान	मार्गान्
३०१	१८	२६.४७	चब्य	चव्य
३०३	२७	२६.५७-५८	कषाय	कषायः
३०५	२	२६ ५७-५८	सर्वं	त्सर्वं
३०९	६	२६.८४	चाभ्लं	चाम्लं
३१०	१२	२६.९५	बिरुद्धं	विरुद्धं
३११	२४	२६.१११	विपाकया	विपाकयो
३१५	२०	२७.४७	चकार	चकोर
३१७	३	२७.६७	चणायुधाः	चरणायुधाः
३२०	२	२७.१०८	लधु	लघु
३२२	१	२७.१३६	वातलं शीतलम्	वातलं गुरु शीतलम्
३२९	५	२७.२३८	मेदा	मेदो
३३७	२६	२८.६	लभापह	लभामह
३३८	१	२८.७	ऽत्यहिता	ऽप्यहिता
३४४	१४	२९.१४	श्लोक	श्लोकः